श्री आदिशङ्करकीर्तिस्तम्भ संप्रोक्षण महोत्सवस्मारक शुभनिबन्धः

कालयुक्तवैशाखशुद्धपञ्चम्यां जगद्गुरु श्रीजयेन्द्र
सरस्वतीस्वामिपादैः प्रकाशितः

श्री आदिशङ्कर भगवत्पादाचार्याणां अवतारक्षेत्रे केरलप्रदेशान्तर्गत श्रीकालटयां श्री आदिशङ्कर भगवत्पाद कीर्तिस्तम्भमण्डप वैदिकमहा-संप्रोक्षण (श्रीशङ्करजयन्ती) पुण्यकाले श्रीकाञ्चीकामकोटिपीठाधिपति जगद्गुरु श्रीशङ्कराचार्य श्रीजयेन्द्रसरस्वती श्रीपादैः आविष्कृतः शुभनिबन्धः

कालयुक्त वैशाख शुद्धपञ्चमी ।

(१२-५-१९७८)

CONTENTS

PAGE

ॐ

श्रीमत्परमहंसपरिव्राजकाचार्यवर्य श्रीकाञ्चीकामकोटिपीठाधिप

जगद्गुरु श्रीशंकराचार्य श्रीमठसंस्थानात् अनुगृहीतं

श्रीमुखम्

श्रीचन्द्रमौलीश्वराय नमः

जनिमतामुपकारकेष्वर्थेषु परमार्थप्रकाशिका परमोपकारिणी अद्वैतविद्या । तत्त्वजिज्ञासूनां निर्वृतिपरकाष्ठ यत्र स परमार्थः । क्लिश्यतां जीवानां सर्वक्लेशनिवारको यः स परमोपकारकः । "तत्र को मोहः ? कः शोकः ? एकत्वमनुपश्यतः" (ईशा-७) इति श्रुतिः एकत्वानुदर्शनरूपाद्वैतविद्यावतः सहेतुकशोकमात्रं कण्ठरवेण प्रतिषेधति । "मायामात्रमिदं द्वैतमद्वैतं परमार्थतः" (गौड-आग-१७) "तत् सत्यं स आत्मा तत्त्वमसि" (छा-६-८-७) इत्याद्यागमश्च अद्वैततत्त्वस्य परमार्थतामुद्घोषयति ।

तत्र[1] केन प्रकारेण प्राणिनां क्लेशपात्राणां प्रत्यक्षसिद्धं तादृशक्लेशसमूहमुन्मूलयति अद्वैतविद्या ?

दुःखमात्रप्रहाणं हि दुःखमूलस्य प्रहाणं विना कदापि न सेत्स्यति । यद्यपि कर्मोपासनादिः धर्मः अर्थो वा तादात्विक-यत्किञ्चिद्दुःखनिवृत्तौ प्रभवेत्; तथापि यथा पुनःप्ररोहो न स्यात् तथा सर्वदुःखानामात्यन्तिकनिवृत्तिः दुःखमात्रस्य यन्मूलं तन्निवृत्तिं विना न घटेत ।

किन्तु अस्य दुःखस्य मूलम् ? जन्मेत्युच्यते विचारकैः । "न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति" (छा-८-१२-१) इति श्रुतेः ।

तर्हि जन्मनः किं मूलम् ? कर्मेत्याहुः त एव परीक्षकाः । यदि कर्मणो विरमेत् जनः, तदा आत्यन्तिकदुःखनिवृत्तिः हस्तसिद्धेति नोपायान्तरानुसरणे व्याप्रियतां मुमुक्षुलोक इति मध्ये विचिकित्स्येत ।

---

१ ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः । श्वेता० ।

पूर्वजन्मसु अस्मिंश्च जन्मनि एतत्क्षणपर्यन्तमनुष्ठितानां कर्मणां यन्मूलं तदनिवर्तने कर्मविरामसंकल्पः वाङ्मात्र एवावशिष्येत ।

तर्हि किं मूलं कर्मसामान्यस्य ? राग इत्याहुः, रागं तदुपलक्षितं द्वेषभयादिकं च दोषशब्देनाचक्षते । यस्मिन् कस्मिंश्चित् वस्तुनि यावत् रागो द्वेषो वा वर्तते तावत् तद्वस्तुनः प्राप्तये प्रहाणाय वा प्रयत्नं कुर्वन्नेव दृश्यते जनः ।

पूर्वोक्तदोषस्य किं मूलम् ? द्वितीयप्रतिभानमित्याहुः ब्रह्मविदः । तथा हि श्रुतिः "द्वितीयाद्वै भयं भवति" (बृह-१-४-१) इति । यदि द्वितीयवस्तुप्रतिभानमेव नाभविष्यत् तर्हि निरालम्बनतया भयस्य द्वेषस्य रागस्य वा कर्ममूलस्य प्रसक्तिरेव नौदैष्यत् । "यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्, तत् केन कं जिघ्रेत्, केन कं शृणुयात्, तत् केन कं विजानीयात्" (बृह-२-४-१४) इति हि श्रुतिः ।

तर्हि द्वैतभाने बीजं किम् ? मिथ्याज्ञानमित्याहुः परमे परीक्षकाः । तच्च मिथ्याज्ञानं सर्वसंसारबीजत्वेन न्यायविद्भिराचार्यैः विनिश्चितम् अद्वितीयतत्त्वसाक्षात्कारेणैव निवर्तत इति अद्वैतविद्या परममुपकरोति जनिमताम् । ज्ञानमेव हि अज्ञानविरोधि । द्वितीयवस्तुभानहेतोः मिथ्याभूतस्याज्ञानस्य अद्वितीयतत्त्वसाक्षात्कार एव निवर्तकः । मनश्शान्तिः भगवदुपासनादिकं सर्वमपि अन्यत् शास्त्रप्रसिद्धं तादृशसाक्षात्कारोत्पत्तावेव प्रयोजकं सत् पूर्वसोपानप्रविष्टं भवति ।

तच्चाद्वैततत्त्वं "सर्वं खल्विदं ब्रह्म" (छा-३-१४-१) "आनन्दो ब्रह्मेति व्यजानात्" (तै-३.६) "विज्ञानमानन्दं ब्रह्म" (बृ-३-९-२८) इति श्रुतिभिः जेगीयमानत्वात् परमानन्दघनमिति प्राणिनां परमपुरुषार्थो भवति । तज्ज्ञापिका अद्वैतविद्यापि प्राणिनां मातापितृसहस्रेभ्योऽपि परमप्रेयसीति परमोपकारिणी ।

अद्वैततत्त्वस्य परमार्थतायां मातापितृसहस्रेभ्योऽपि परमहितैषिणी श्रुतिः स्वयमेवोपपत्तिमित्थं दर्शयति । कारणात् कार्ये अनुभूयमानो भेदः नामरूपाभ्यामेव । घट इति नामभेदः; पृथुबुध्नोदरत्वादिराकारभेदश्च । एते एव हि नामरूपे तत्र तत्र श्रुतिषु कथ्येते । "आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म" (छा-७-१४-१) "नामरूपे व्यकरवाणि" (छा-६-३-१) इति । मृदेव हि घटः । कारणमेव हि कार्यम् । नामभेदः आकारभेदो वा केवलं काल्पनिकः । अत एवाह श्रुतिः "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव

सत्यम्'' (छा-६-१-४) इति । मृत्तिकेत्येव इत्येवकारेण विकारजातं अवस्तुतया अनृतम्, कारणमेव सत्यमिति प्रतीयते । एवं कारणपरम्पराविचारेण परमकारणे ब्रह्मणि अवधार्यमाणे ब्रह्मण एकस्यैव निरुपचरितं सत्यत्वरूप-पारमार्थिकत्वं, तद्भिन्नानां सर्वेषामेव सत्येतरत्वरूपकाल्पनिकत्वं च स्पष्टं श्रुत्या तात्पर्यनिर्णयाय उपपत्तिप्रदर्शन-पूर्वकमुपवर्णितं भवति । "तत्त्वमसि" (छा-६-८-७) इति यदद्वैतात्मरूपं निरूपितं तस्यैवाध्यायस्योपक्रमे "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" (छा-६-२-१) इति परमकारणत्वेन निरूपणात् तादृशाद्वितीयतत्त्वस्य पारमार्थिकत्वं प्रतिपादितं भवति । परमार्थज्ञापकत्वादेव हि परमोपकारकत्वम् । अपि च नारदः किल देवर्षिः सर्वविद्योऽपि आजानसिद्धमहायोगिनं सनत्कुमारं ब्रह्मविद्यार्थं "अधीहि भगव" इति मन्त्रेण उपससाद इति छान्दोग्याख्यायिकातः "स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठाम्" (मुः-२-२-२) इति मुण्डकवाक्यतश्चाद्वैतविद्यायाःपरमोप-कारकत्वं प्रख्यापितं भवतीति अद्वैतविद्यायाः परमार्थप्रकाशकत्वं परमोपकारकत्वं च पूर्वं प्रतिज्ञातं सुस्थमेव ।

एवमनितरसाधारणतया लोकोपकरणे अद्वितीयायाः अद्वैतविद्यायाः निरर्गलप्रचारे बद्धादरायाः नित्यतरुण्याः अद्वैतसभायाः अकारादिक्षकारान्तसुसंस्कृतवर्णसमसङ्ख्याकशरत्प्राप्तिनिमित्तसमुज्जृम्भमाणपञ्चाशत्तमवर्षप्राप्तसुवर्णम-होत्सवे "आप्रणखात् सर्व एव सुवर्ण" (छा-२-६-६) इति वेदप्रतिपाद्यस्य श्रीचन्द्रमौलीश्वरस्य प्रसादेन इतोऽपि सहस्रं शरदः आस्तिकाढ्यलोकनीरदनिर्मुच्यमानसुवर्णधाराभिषेचनेन अन्तर्वाणिगणमुखोल्लासिसुवर्णवाङ्मुखभूषणाक-लनेन च सौभाग्यं पूर्वाधिकतरप्रकाशेन वर्धतामभिवर्धतां जेजीयतामित्याशास्महे ।

नारायणस्मृतिः

श्री शङ्कराचार्यो विजयते

अनन्त श्री विभूषित जगद्गुरु श्री शङ्कराचार्य

श्री स्वामी शान्तानन्द सरस्वती जी महाराज

ज्योतिर्मठ बदरिकाश्रम :(हिमालय)

दिनांक : २-३-७८

मान्याः कीर्तिस्तम्भोद्घाटनमहामहत्त्वस्थापकाः ।

श्रीमद्भिः प्रेषितं आमन्त्रणपत्रं मया लब्धम् । श्रीमदाद्यजगद्गुरुचरणानामवतारभूमौ दक्षिणामूर्त्यभिन्नशङ्करभगवत्पादानां जयन्तीमहोत्सवः श्रीकाञ्चीकामकोटि पीठाधिपतीनां श्रीजयेन्द्र सरस्वती स्वामिपादानामायासेन सम्पाद्यते, ज्ञात्वा महदानन्देनाप्लावितं मे हृदयम् । यतो हि सनातनधर्मसंरक्षकाणामिदमपरिहार्याचरणम् ।

क्रियमाणेषु नानाविधहृदयावर्जककार्यक्रमेषु मदीया समुपस्थितिः मानसिकरूपेत्यवधेयम् ।

महोत्सवसाफल्यं प्रति अस्मदीया मङ्गलकामना शुभाशीर्वचांसि च समुल्लसन्तु ।

श्रीचरणाज्ञया
राजनारायण

Message

HIS HOLINESS SRI KESHAVANANDA BHARATHI SRIPADANGALAVARU

SRI EDNEER MUTT

EDNEER

KASARAGOD, S. RLY.

To

Jagadguru Sri Sankaracharya Swami Mutt,
Kancheepuram

Our country has a glorious succession of saints and seers who have lit the torch of knowledge and in their lives and teachings we find Hinduism living in all its Splendour.

The greatest and the most effective Advaita teacher was, of course, Sankara Bhagavatpada. He set the model for subsequent metaphysical thinking and gave a new direction to the course of philosophical history of India. He has poured forth for the benefit of posterity, great truths from the depths of his realization, not only in his commentaries but also other independent works.

But we live in the age when creeds are shaken, dogmas are questioned and traditions are dissolving. There is a general indifference towards religion which is due to the absence of facilities for the people to learn more about religion. Seminars and conferences are the easy solutions to these problems. So it is worth while to celebrate Sree Sankara Jayanti festival in this manner for propagation of basic Truth and revival of spiritual values It is also highly appreciable to erect a Keerthi Stupa to commemorate the life mission of Sri Sankara.

We wish that the celebration will be a genuine step towards the uplift of Hinduism and that the souvenir will be a memento of the occasion.

We pray to Lord Sri Dakshinamurthy and Sri Gopalakrishnaswami for the grand success of the celebration.

(Sd.)
WITH SRIMANNARAYANA SMARANAS.

Message

Srimad Jagadguru Sri Kudali-Sringeri Maha-Samsthanam

FORT ROAD
SHIMOGA-S77201

Sri Kanchi Kamakoti Peeta,
Kanchipuram.

Dear Sir,

We are in receipt of the invitation inviting our Holiness to preside over the lectures arranged on the occasion of the observance of the Birthday of Sri Adi Sankara Bhagavatpada from 8—5 to 17—5—'78.

The invitation was duly brought to the notice of His Holiness who expressed his satisfaction with the functions which have been arranged for the occasion.

However, His Holiness has expressed His Inability to attend the function for the reason of engaging Himself in THAPONISTA, and has directed me to communicate it to you.

His Holiness has also directed me to convey His Blessings for the success which I accordingly do hereby.

J. A. RAMANARAYANA AVADHANI
Administrator & G.P.A. Holder

Sriyuth :

Manager, Jagadguru Sri Sankaracharaya
Kanchi Kamakoti Mutt, KANCHIPURAM

Sriman Narayana Smaranam Purassaram
Sandistoyam Sandeshaha :

We feel profoundly pleased to go through your brief leaflet published in connection with the erection of a monumental ' KIRTI STUPA ' at Kalati (Kerala State) and also to have an invitation for presiding over the seminar sessions on any day from 8th to 17th May 1978, sent under the directions of His Holiness Swamiji of your Mutt, both relating to celebrations and functions organised in honour and glory of Srimad Jagadguru Shankaracharya on His 'JANMA JAYANTHI' day befalling on 12th May 78. Time and space are far too small to enumerate and recount the priceless religious works and treatises that our Revered Acharya produced many centuries back. Their fragrance and incense have never waned. Of course, there do exist several works and books expounding His glory and greatness and the marvellous achievements of Srimad Sankaracharya. But the erection of an edifice — 9 storeyed Pillar — Stupa — 125' high, as a monumental memorial of His name and fame is really an innovational and novel feature.

It is however, a great wonder how and why such a venture was not so far achieved, even assuming that such ideas may have been contemplated by some. So, your instant endeavour in constructing of such a monument in honour of His Memory and token of our gratitude, that too at the very place 'KALATI', where He took His divine incarnation is an extraordinary and worthy accomplishment indeed. We do fervently hope that, the ' KIRTI STUPA ' would soon become a fountain of inspiration, add a holy shrine for the scholars in our religious fields and Matas.

We invoke the blessings of Sri Seeta Ramachandra and — Chandramouleshwara, to endow the best success for the august occasion and its various celebrations and ceremonies, commencing 5 days before the Jayanti Day of Sri Bhagawat Pada extending for 5 days therefrom. May Sri Seeta Ramachandra, and Chandramouleshwara bless the people of our country, with greater faith and keener interest and awareness towards the values of our Dharma and impel them abide by the righteous path lit up by our great Srimad Acharya and inculcated and impressed upon us repeatedly by the pontiffs of the proud Peethas established by Him centuries ago, so that the objects and purpose intended in having erected the 'KIRTI STUPA' at enormous cost would be fully achieved.

" Iti; Sriman Narayana Smrutayaha.',
Miti: Kalayukti Sam Chaitra Shuddha 13, Friday the 21 st April 1978.
Vasati: Sri Tungateeraswara Thiruthahalli Sri Rhmachandrapura Mathe —

श्रीः

श्रीकाशी श्रीकरपात्रस्वामिजी महराज

श्रीशङ्करभगवत्पादानां जन्मस्थल्यां पुण्यभूमौ कालडीक्षेत्रे सं. २०३५ वैशाखशुक्लपञ्चम्यां श्रीमच्छङ्कर-भगवत्पादानां जयन्तीमहोत्सवो महता समारोहेण प्रचलिष्यतीति मदन्तेवासिनः पं० पट्टाभिरामशास्त्रिणो मुखान्निशम्य सन्तुष्टान्तरङ्गाः स्मः । जयन्तीमहोत्सवे सम्मिलितुं श्रीशास्त्रिणा प्रार्थिता अपि नैकविधेषु कार्येषु व्यापृतत्वान्महोत्सवस्थानस्य दवीयस्त्वाच्च समुपस्थातुं विहितमनसोऽपि न प्रभवाम इति नितरां खिद्यामहे । महोत्सवेऽस्मिन् चतुर्णां वेदानां पारायणस्य, सूक्तहोमस्य, व्याकरण-न्याय-मीमांसा-वेदान्तशास्त्राणां नानाप्रान्ततस्समागत्य विद्वद्वृन्दैः करिष्यमाणचर्चायाः, विविधधार्मिकविषयभाषणानाञ्च समायोजनं श्रीकाञ्चीकामकोटिपीठाधीश्वरैः कृतमिति नितरां प्रसीदामः । अस्मिन् शोभनेऽवसरे वाराणसीतोऽनेके दण्डिसंन्यासिनस्सादरमामन्त्रिताः, एवं भगवत्पादानां स्मारकः कश्चन कीर्तिस्तम्भोऽपि संस्थापयिष्यत इत्यवगत्य प्रसन्नान्तरङ्गाःस्मः । परमात्मनः कृपया सर्वमिदं शोभनं कार्यं साधु सम्पद्यतामिति कामयामहे ।

करपात्रस्वामिनः

सं. २०३५ वै. कृ. ९.

H. H. SRI SHANKARASHRAMA SWAMIJEE

Balekuduru Shri Math

P.O. HUNGAKCUTTA S.K.
Pin. 576218

To

Sri Kanchi Kamakoti
Math.

Balikudru
20—4—1978

Message

We are very glad to know that on the occasion of Sri Sankara Jayanti Celebrations there will be an inauguration of Adi Sankara Bhagavatpada's Kirthi Sthambha and Veda Vedanta Sastra Sadas under the guidance of Sri Kamakoti Acharya.

The whole world knows that Adi Sankara uplifted the Vaidika Sanatana Dharma by His teachings & writings. He travelled all over India by Padayathra to spread the Sanatana Dharma.

In the same way the present Sankaracharya of Sree Kanchi Kamakoti Peeta also has travelled aeross Bharatavarsha by Padayatra. He is encouraging Ved, Vedanta students to study them and patronizing Vedic and Philosophic scholars. In this way He is doing noble service to Sanatana Dharma.

So we belive that the Kirthi Sthambha is not only Adi Sankara's Kirṭhi Sthambha but also Kamakoti Shankaracharyas Kirthi Sthambha,

We wish the function every success.

H.H. Sri Shankarashrama Swamijee.

H. H. Vishweshatirtha Swamiji

SRI PEJAVARA MUTT
JAGADGURU MADWACHARYA SAMSTHANA
UDUPI- 576101 South Kanara.
Phone: 8498

Bangalore
27—4—1978

Message

We are happy to learn that a conference has been arranged from 8- 5- 78 to 17- 5- 1978 at Kaladi on the occasion of the Sankar Jayanti celebrations, the erection of Keerthi Stupa and commemoration of Sri Adi Sankara and our beloved Swamijis of Shri Kanchi Kamakoti Sankaracharya.

We pray to Lord Krishna to make the functions a grand success.

(Shri Vishweshatirtha Shri)
Pejavar Mutt, Udipi.

श्रीपुत्तिगे मठ-उडुपी-द. क.

जगद्गुरु श्री श्री मध्वाचार्य संस्थानम्

श्रीमदाद्य शंकराचार्याणां यानि चरित्राणि आदर्शभूतानि तेषां स्मारकतया कालडिक्षेत्रे एकं महास्तम्भं वैशाखमासे श्रीकामकोटि शंकराचार्याणां नेतृत्वेन स्थापयितुं एकः महान् उत्सवः प्रचलिष्यति इति श्रुतवन्तः वयं सप्रमोदं तस्य श्रेयःप्रार्थनां कुर्मः ।

उडुपि श्रीपुत्तिगेमठाधीशाः

श्रीगुणेन्द्रतीर्थश्रीपादाः

श्री श्री विद्यामान्यतीर्थ श्रीपादङ्गलवारु

श्रीपलिमारभण्डारकेरिमठ उडुपि (कर्नाटक)

यात्रास्थानम्. बेङ्गलूर
दिनाङ्क २७-४-१९७८

श्रीकालडीक्षेत्रे सनातधर्मप्रतिष्ठापकाणां श्रीमदाद्यशंकराचार्याणां चरित्रस्मारकं महास्तम्भं प्रतिष्ठापयितुं महान् उत्सवः अस्मिन् कालयुक्तिसंवत्सरस्य वैशाखमासे प्रचलिष्यतीति विदित्वा महान् प्रमोदः समजनि। अयमुत्सवः श्रीकामकोटिशंकराचार्याणां आध्यक्ष्येण निर्विघ्नः अभूतपूर्वश्च भूयात् इति आशासमानाः

श्रीविद्यामान्यतीर्थ श्रीचरणाः
उडुपि श्रीपलिमारभण्डारकेरिमठाध्यक्षाः

श्रीगोरक्षनाथो विजयते ।

श्रीगोरखनाथ मन्दिर गोरखपुर (उ. प्र)

दिनाङ्क १२-४-७८

श्रीकाञ्चीकामकोटिपीठाधिपतिजगद्गुरुश्रीशंकराचार्यस्वामिश्रीमठसंस्थानकाञ्चीपुरद्वारा सानन्दं समायोजितायामागामिमई मासस्य (७-५-७८) दिनाङ्कतः (१७-५-७८) दिनांङ्कं यावद्दशदिनव्यापिन्यां श्रीमदादिशङ्करभगवत्पादजयन्त्यनुबन्धिन्यां वेदशास्त्र-विद्वत्सभायां सम्मिलितीभवितुं प्रेषितं निमन्त्रण-पत्रं प्राप्तं तदनुसारं पूर्वमेव मया स्वस्य कार्यान्तरात्यन्तव्यस्तत्वेन श्री गोरक्षनाथसंस्कृतविद्यापीठस्य प्राध्यापकानाञ्च छात्राणां वार्षिक-परीक्षायाश्चात्यन्तनिकटस्थत्वेन च तत्रागमनेऽसमर्थत्वं ज्ञापितमासीदेषैव स्थितिरत्रास्ति ।

तथापि तस्या ऐतिहासिक्या वेदशास्त्रविद्वत्सभायाः सम्पूर्णतायै तत्र समुपस्थितनानाप्रान्तागतविद्वद्वरेण्यनिर्णीत निष्कर्षाय च जनतासु केन्द्रियतत्तत्प्रान्तीय-सर्वकारेषु च प्रचार-प्रसारायावश्यप्रेषणीयायापि शुभकामनां प्रेषयन्नस्मि ।

एतच्चाशासे यदेतादृशानि वेद-वेदाङ्ग-दर्शन-तन्त्रशास्त्रायुर्वेदविज्ञानगोष्ठ्यायोजनानि समये समये स्थाने चावश्यं कार्याणि । अन्यच्च देशस्य वर्तमानस्थितौ दृष्टिं दत्वा तत्र तत्र समाजे प्रतिदिनं घटितानां मानवताया न्यूनयत्रीणामप्रियघटनानां न्यूनतायै नाशाय चाधिराज्यमधिकाधिकमात्रायां दिव्यालोकप्रदस्य संस्कृतवाङ्मयस्य प्रचार-प्रसारायाऽपि भवन्तः पूर्वापेक्षमावश्यमधिकं विचारयिष्यन्तीति । अन्ते च तज्ज्ञानपीठाधीशान्—श्रीशङ्कराचार्यस्वामिनः सादरमभिवादयन्नहं तमेवानादिनिधनं योगिराजराजं भगवन्तं श्रीगोरक्षनाथं प्रार्थये यत्ते भवतां सर्वविधान् लोककल्याणकरान् कार्यक्रमान् सफलयन्त्विति ।

सदैव शुभाशंसकः

(महन्त अवेद्यनाथः)

ADI SANKARA BHAGAVAT PADAL

श्री गोविन्दनाथविरचित श्रीशङ्कर चरितस्य केचिद्भागाः

पुण्यतीर्थसमाकीर्णा पुण्यदेवालयान्विता ।
मेदिनी केरलाख्याऽस्ति भूसुरोत्तमभासुरा ॥ १ ॥
नानापदानविख्यातराजवीरविराजिता ।
नानावननदीशैल नगरागारशोभिता ॥ २ ॥
कश्चिद्देशो महानस्ति कालटीति सुविश्रुतः ।
सर्ववेदार्थनिपुणैस्सर्वशास्त्रविशारदैः ॥ ३ ॥
सर्वाश्रमरतैश्शान्तैरन्वितो विप्रसत्तमैः ।
तत्र विप्रोत्तमो जज्ञे सर्ववेदार्थतत्त्ववित् ॥ ४ ॥
सर्वशास्त्रार्थतत्त्वज्ञो गृही दानरतो महान् ।
निजधर्मरतो नित्यं पत्न्या सह गृहे वसन् ॥ ५ ॥
स निनायानपत्यो हि भूसुरो बहुवत्सरान् ।
लोका न सन्त्यपुत्रस्येत्यतिमात्रमनारतम् ॥ ६ ॥
सन्तापसहितं विप्रं भार्योवाच विचार्य तम् ।
सर्वभक्तजनाकाङ्क्षापूरणामरपादपः ॥ ७ ॥
निषेव्यः क्षिप्रमावाभ्यामपत्यार्थमुमापतिः ।
इत्थ प्रियावचः श्रुत्वा सन्तुष्टो द्विजपुंगवः ॥ ८ ॥
तया सह वृषाद्रीशं बहुकालमसेवत ।
सेव्यमानो महादेवस्ताभ्यां बिभ्रद् द्विजाकृतिम् ॥ ९ ॥
आत्मान दर्शयामास तस्मै स्वप्ने कदाचन ।
किं त्वं वाञ्छसि विप्रेति सुपृष्टेन द्विजन्मना ॥ १० ॥

काङ्क्षामि पुत्रमित्युक्तश्शम्भुः प्रोवाच तं तदा ।
पुत्रं सर्वगुणोपेतमेकं सर्वज्ञमेव वा ॥ ११ ॥
अपीच्छसि बहून् पुत्रान् विपरीतान् महीसुर ।
एवमुक्तो महीदेवस्तं द्विजं पुनरब्रवीत् ॥ १२ ॥
अहं वाञ्छामि सर्वज्ञं पुत्रमेकं गुणाकरम् ।
इत्थमुक्तो बभाषे तं द्विजवेषो महेश्वरः ॥ ॥ १३ ॥
तथैवास्तु सुतो धीमान् सर्वज्ञस्तव भूसुर ।
त्वं गच्छ गृहमित्युक्तस्तरसा प्रतिबुध्य सः ॥ १४ ॥
स्वप्रियां विप्रवर्यस्तं स्वप्नवृत्तान्तमब्रवीत् ।
ततस्तौ दम्पती मत्वा सफलं स्वप्नदर्शनम् ॥ १५ ॥
समाप्तभजनौ शम्भुं प्रणम्य भवनं गतौ ।
सन्तर्प्य विप्रसङ्घातं वस्त्रान्नकनकादिभिः ॥ १६ ॥
आशीर्वचांसि तेषां तौ जगृहाते वधूवरौ ।
लब्धानुज्ञौ द्विजातीनां तेषां भुक्तवतां ततः ॥ १७॥
तद्भुक्तशेषमन्नं तौ भोक्तुकामौ बभूवतुः ।
तत्रान्ने भोक्ष्यमाणे तु प्राविशज्ज्योतिरैश्वरम् ॥ १८ ॥
दम्पती तौ मुदोपेतौ बुभुजाते तदाहृतौ ।
गर्भं दधार सा तूर्णं शङ्करांशेन राजितम् ॥ १९ ॥
प्रवृद्धे तत्र चासूत नन्दनं समये शुभे ।
प्रादुर्भावे कुमारस्य लग्नमासीत्सुशोभनम् ॥ २० ॥
बलयुक्तशुभज्योतिस्समारूढसमीक्षितम् ।
येन सर्वज्ञतामेति जातवान् भुवि मानुषः ॥ २१ ॥

स च योगोऽप्यभूत्तस्य द्विजपुत्रस्य संभवे ।
मृगेन्द्रगजसर्पाखुतरक्षुहरिणादयः ॥ २२ ॥
हित्वाऽन्योन्यं तदा वैरं जन्तवो व्यहरन् वने ।
पुष्पाणि पुष्पिता वृक्षाः मुमुचुश्च तथा लताः ॥ २३ ॥
सुप्रसन्नजला नद्यो निष्कम्पास्सिन्धवोऽभवन् ।
द्वैतवादिकराग्रेभ्यः पुस्तकानि तदाऽपतन् ॥ २४ ॥
अद्वैतवादिनां चेतो हृष्टं व्यासस्य चाभवत् ।
स द्विजस्तनयं दृष्ट्वा मग्नोऽप्यानन्दसागरे ॥ २५ ॥
स्नात्वा नदीजले प्रादाद्विप्रेभ्यो धनसञ्चयम् ।
यथावत्स महीदेवो जातकर्म विधाय च ॥ २६ ॥
भूयो दृष्ट्वाऽऽत्मजं हृष्टो यथेष्टं कुमुदाकरः ।
तारकान्तेन रुद्रांशेनारिसंरोधिशक्तिना ॥ २७ ॥
पार्वतीव कुमारेण तुष्टा सा च द्विजाङ्गना ।
जन्मकालममुष्याथ ज्योतिश्शास्त्रविशारदाः ॥ २८ ॥
विचार्य सुतरां बुद्ध्या शशसुर्द्विजपुङ्गवम् ।
सर्वज्ञो भविता नूनं तव पुत्रो महीसुर ॥ २९ ॥
हितमद्वैतवादिभ्यश्शास्त्ररत्नं विधास्यति ।
चित्रैर्बहुविधैर्वादैर्विजेता च सरस्वतीम् ॥ ३० ॥
स्थापयिष्यति लोकेऽस्मिन् कीर्तिंश्च विमलां निजाम् ।
एवंविधान् समाकर्ण्य पुत्रजन्मगुणान् द्विजः ॥ ३१ ॥
विस्मितोऽतीव पूर्वस्माद्गिरिशे भक्तिमानभूत् ।
द्वादशेऽहनि तं बालमङ्कमारोप्य कौतुकात् ॥ ३२ ॥

चक्रे शङ्करनामानं पिता शङ्करभक्तिमान् ।

दैवज्ञवाणीं सञ्चिन्त्य तत्प्रज्ञामवलोक्य च ॥ ३३ ॥

आरब्धाक्षरमारम्भे तृतीयाब्दस्य तं व्यधात् ।

एकवारं लिखित्वा स जग्राह लिपिसञ्चयम् ॥ ३४ ॥

नानाविधं समस्तं च शङ्करोऽतीव बुद्धिमान् ।

काव्यानि चेतिहासानि पुराणान्यखिलानि सः ॥ ३५ ॥

* * * *

यथावज्जगृहे धीमान् प्रयाते वत्सरत्रये ।

पञ्चमाब्दे शुभे काले द्विजत्वं प्राप शङ्करः ॥ ३६ ॥

ततस्स जगृहे साङ्गान् निगमानखिलानपि ।

पदानि तेषामर्थांश्च कालेनाल्पेन बुद्धिमान् ॥ ३७ ॥

किं फलं बहुनोक्तेन षोडशाब्दे समागते ।

सर्वज्ञत्वमगादेव शङ्करश्शङ्करांशजः ॥ ३८ ॥

दूरयानाक्षमां दृष्ट्वा जरया जननीमसौ ।

किञ्चिद्दूरगतां घूर्णीं निन्ये निजगृहान्तिकम् ॥ ३९ ॥

अम्बाहितार्थमानीता पुत्रेणात्मगृहान्तिकम् ।

अम्बापगेति चाख्याता तस्यां ककुभि सा नदी ॥ ४० ॥

काञ्चीपुरमवासोऽयं शंकरो यतिपुङ्गवः ।

कथयामास शिष्येभ्यः तन्माहात्म्यमनुत्तमम् ॥ ४१ ॥

अनेकजन्मदं कर्म कृतवानपि मानवः ।

अत्र पञ्चत्वमापन्नो मोक्षं याति न संशयः ॥ ४२ ॥

एकाम्रनाथं देवं च काञ्चीपुरनिवासिनम् ।
देवीमल्लालनाथं च नत्वा यातस्ततो गुरुः ॥ ४३ ॥

*　*　*　*

सर्वज्ञशिष्यसंयुक्तः शङ्करो देशिकेश्वरः ।
भूमिं प्रदक्षिणीकृत्य भूयः काञ्चीपुरं गतः ॥ ४४ ॥
कामाक्ष्या नाम वाग्देव्याः स्थानं तत्पुरमाप्तवान् ।
सर्वज्ञपीठमारोढुमियेष यतिपुङ्गवः ॥ ४५ ॥
वादिभिर्जैमिनीयान्तैः कणादादिभिरुद्धतैः ।
स्वे स्वे शास्त्रे रहस्यं यत्तत्पृष्टश्शङ्करो महान् ॥ ४६ ॥
यथावदुत्तरं सर्वं समुदीर्य च सत्वरम् ॥

*　*　*　*

भूयो गत्वा सरस्वत्या दत्वा चोद्योत्तराण्यथ ।
सर्वज्ञपीठमारुह्य निविष्टस्सोऽष्टमेऽहनि ॥ ४७ ॥

*　*　*　*

देशे कालटिनाम्नि केरलधराशोभाकरे सद्विजे
　जातः श्रीपतिमन्दिरस्य सविधे सर्वज्ञतां प्राप्तवान् ।
भूत्वा षोडशवत्सरे यतिवरो गत्वा बदर्याश्रमं
कृत्वा भाष्यनिबन्धनस्य सुकविः श्रीशङ्करः पातु नः ॥ ४८ ॥
सन्तोषाकुलमानसाय सुतरां तूर्णं बदर्याश्रमं
संप्राप्ताय ततः पराशरभुवे भाष्यं निजं दर्शयन् ।
सार्धं तेन तपोधनेन बहुधा कृत्वा च संभाषणं
　मात्रा संस्मृत आप्तजन्मनिलयः श्रीशङ्करः पातु नः ॥ ४९ ॥

मात्रे वेद्यतमं निवेद्य मरणे दग्ध्वाऽनले तां मृतां
भूयोऽप्येत्य मुनीन्द्रसेवनरतः श्रीमद्गुरोर्याश्रमम् ।
प्रीत्या तत्र सनन्दनं सुमहितं शिष्यश्च संन्यासयन्
तद्युक्तः कृतपुण्यतीर्थगमनः श्रीशङ्करः पातु नः ॥ ५० ॥

मातुर्मुक्तिपदप्रदाननिरतस्तीर्थे प्रयागाह्वयं
गत्वा तत्र यथावदेव विहितस्नानः स्मरन् मातरम् ।
दृष्ट्वा भट्टगुरुं तुषानलगतं तत्तीरतो दर्शयन्
अस्मै भाष्यमनेन मानिततमः श्रीशङ्करः पातु नः ॥ ५१ ॥

तस्मात्प्रस्थितवांस्तदीयवचसा शिष्यत्वमानीतवान्
वादे भूयसि विश्वरूपगृहिणं गोकर्णयाने पुनः ।
दृष्ट्वा कञ्चन वर्णिनं द्विजसुतं मुक्ताखिलाकाङ्क्षितं
कृत्वा तञ्च यतीश्वरं प्रमुदितः श्रीशङ्करः पातु नः ॥ ५२ ॥

भूयस्तोटकनामधेयममलं शिष्यं च सन्यासयन्
सर्वैश्शिष्यगणैरुदारमतिभिर्युक्तः क्षितौ सञ्चरन् ।
नानातीर्थनिषेवणोत्सुकमतिः श्रीकालहस्तीश्वरं
दृष्ट्वा शङ्करमादरात्कृतनुतिः श्रीशङ्करः पातु नः ॥ ५३ ॥

श्रीकाञ्चीपुरमाप्तवानथ ततः श्रीपुण्डरीकाह्वयं
क्षेत्रं पुण्यतमं समेत्य महितं पश्यन् विभो स्ताण्डवम् ।
कावेरीसरितं गतं तदनु तं श्रीरङ्गनाथं हरिं
दृष्ट्वा राघवसेतुमेत्य मुदितः श्रीशङ्करः पातु नः ॥ ५४ ॥

ஸ்ரீகாஞ்சி காமகோடி பீடாதிபதி ஜகத்குரு ஸ்ரீ சந்திரசேகரேந்திரஸரஸ்வதி ஸ்வாமிகள்

The Advaita Aksharamalika

The words Golden Jubilee when translated into Sanskrit become Suvarna Mahotsava. The word ' suvarna , suggests also " auspicious letters. In the Mantra Sastra, Devi, the Divine Mother is represented as Mantra-Matrika, *i. e.*, Her very form is made up of 51 letters beginning from अ to क्ष, (the *aksharas.*) According to Sastra, all Mantras, such as Panchakshara and Asthakshara, should be counted during Japa prefixing the *aksharas* अ, to क्ष, (Meru) in succession in ascending and descending order. From this the letters come to be regarded as Japa garland or Aksharamala. When beads come to be used in Japa counting, they take the name of ' alphabetical garland' or अक्षमाला such as रुद्राक्षमाला, स्फटिकाक्षमाला, तामरसाक्षमाला. Thus the Suvarna Mahotsava of Advaita Sabha is celebrated by the publication of the Advaitaksharamalika, containing 51 minor prakaranas the number corresponding to that of the galaxy of *Varnas* constituting the form of Brahmavidyaswarupini, the Divine Mother.

The first session of the Advaita Sabha assembled in 1895, and the session of 1945 held at Thirukkarugavoor in Thanjavur Dt. represents its towering Meru. The *prakaranas* in the Aksharamalika are contributed by great Brahmavids and scholars of Bharata varsha, such as Parama Pujya Karapatria Tridandi Swami Maharaj from the banks of the Ganga, Bhashyaswami Sacchidananda Tirtha from the banks of the Akhanda Kaveri, Panditaraja Rajeswara Sastrin Sastraratnakara, Mahamahopadyaya Chinnaswami Sastrin Sastraratnakara, Sri Ramachandra Dikshita Sastraratnakara, Sri Vijayananda Tripathi of Benares, Ramaswami Sastrin of Baroda, Mandalika Venkatesa Sastrin of Godavari, Anantanarayana Sastrin of Poona, Bhandarkar Oriental Institute, and various other scholars of Advaita Philosophy in South India. From the pen of S. Subrahmania Sastrin, the all-round scholar and Adhyapaka of the Advaita Sabha, have emanated some six Prakaranas. Polakam Rama Sastrin and Seruvamani Krishnamurti Sastrin of the Madras Sanskrit College have contributed not a little to the fragrance of the Malika. The Dhanadikarin of Pudukottah State, an adept in all the three systems of Philosophy, Vidwan Mandalamandanam Kali Rangacharya and Mahamahopadhyaya Panditaraja Krishnamurti Sastrin of Madura have embellished the Malika with a *prakarana* in Vyakarana, their special subject. The veteran examiner of the *Sabha*, Polakam Sundara Sastrin, combining in himself a mastery over Rig Veda and the Dharma Sastra, Sivaramakrishna Ghanapathi, the Rig Vedic scholar of Jambukeswaram and Ramanatha Dikshita of the great Samavedic family of Appayya Dikshita have furnished the Malika with the fruits of their researches in Vedas and Smritis. Sri Krishna Sastrin of Devakottah Sivagama Sanga has furnished us with little-known excerpts from the Saivagamas. The Puranas and Ithihasas are drawn upon by Sri Veppathur Vaidyanatha Sastrin, the resident Adhyapaka of the Sabha. Angarai Rangaswami Sastrin of the Rama Mandir Vedanta Pathasala, Umayalpuram Ramanatha Sastrin, a retired Government official, Sri Subrahmania

Sastrin of Varahoor, Sri Panchapagesa Sastrin of Devangudi, Painganad Srinivasa Sastrin of Thooppil Visvamitra line of the famous Ratnakara Dikshita, the saintly Somayajin of Krishnarayapuram, Sri Sankara Dikshita and the pious Professor of Vedanta in Kaladi, the birth-place of Sri Sankaracharya, have handled the subtlest aspects of Advaita philosophy. Sri Arunachala Sastrin of Varahoor has brought out that the heart of all great poets is in Advaita. Sri Vanchinatha Iyer of Mudicondan, a Sanskrit-Hindi scholar and R.V. Sitarama Sastrin, a pleader of Masulipatnam. (both of them non-specialists) have also contributed to this volume. Further, the authors of some prakaranas have chosen to remain anonymous. Panditaraja Subrahmania Sastrin of Annamalai University has contributed the concluding prakaranas with his usual clearness.

The following couplets found at the end of the article ब्रह्मसूत्रेषु अद्वैतभावाः carry the final solution of the intellectual problems on the philosophical plane, being the essence of the authoritative pronouncements of the great authors on the subject.

शुद्धे ब्रह्मणि निर्धर्मे कथं शब्दादिलक्ष्यता ।
निर्विकल्पः कथं बोध उपलक्ष्यत्वमेत्र वा ॥
इति शङ्कासमाधानं प्राग्ग्रन्थेष्वेव दृश्यते ।
मणिकारादयोऽप्यैच्छन् आकाशादि पदैरपि ॥
स्मरणं निर्विकल्पं यत् न्यायज्ञाद्वैतिनोऽप्यमी ।
निर्धर्मके धर्मपूग आविद्यक इतीरितः ॥
आविद्यकेन धर्मेण निर्धर्मत्वं न हीयते ।
देहात्मप्रत्ययो यद्वत्प्रमाणत्वेन कल्पितः ॥
लौकिकं तद्वदेवेदं प्रमाणन्त्वात्मनिश्चयात् ।
उपलक्षणमप्यस्तु धर्मो ब्रह्मणि निर्गुणे ॥
उपलक्ष्यस्य नो किञ्चिद्रूपेणैवोपलक्ष्यता ।
स्वरूपमेवोपलक्ष्यं विनाऽवच्छेदकं क्वचित् ॥
जातेः स्वरूपतो भानं विनावच्छेदकं यथा ।
चन्द्रस्वरूपमात्रस्य प्रकृष्टा या प्रकाशता ॥
सोपलक्षणमित्येव सिद्धं लोके प्रदृश्यते ।
तन्निदर्शनसिद्धं नः स्वरूपस्योपलक्षणम् ॥
सिद्ध्यादिदर्शिनामेतदतिरोहितमेव नः ।
सगुणप्राप्तिरूपाया मुक्तेरपि निरूपणे ॥
मध्ये विकारनिर्मुक्तं रूपं सूत्रेण सूचितम् ।
विकारावर्ति च प्राह स्थितिं श्रुतिरितीरयन् ॥

विकारादनृतादन्यत् सत्यं ब्रह्माह सत्रकृत ।
असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते ॥
यथैवं द्वैतवर्त्मस्थः सोऽन्ते पक्वः शिवोऽद्वयः ॥

THE PURPORT

The identity of the individual soul with the God-head and the realization of all the objective phenomena of the universe, causing pain or pleasure, as the manifestation of that Supreme God-head—the very goal of life in the Universe, is the purport of not only all the revealed Vedas with their Angas, but also of the various differing schools of philosophical thought—the Darsanas. The Rig Veda Samhita exclaims 'EKAM SAT,' Truth is one. Taking the Veda as a whole, another Vedic passage declares सर्वेवेदा यत्पदमामनन्ति* All the Vedas contemplate the one Word and that word is OM. In the Mandukya Upanishad of the Atharva Veda a special explanation of the Supreme syllable concludes with the words शान्तं शिवं अद्वैतम् । The four Mahavakyas of the four Vedas and the passage पुरुष एवेदं सर्वम् repeated in all the four Vedas converge on this Supreme Light, the Supreme Happiness.

---

*Modern orientalists are generally of opinion that the Samhita portion of the *Rig Veda* speaks only of a primitive nature worship and that the sublime Advaita philosophy was only a later development in the Upanishadic literature, but strangely enough the researches of our scholars show that the Rig Veda Samhita advocates the final Advaitic Truth in unmistakable terms, sometimes more clearly than the *Upanishads* themselves—vide the article ऋग्वेदे अद्वैतभावा in this Malika.

In this connection, the following remarks under the heading 'Indian Arts' in the *Indian Year Book* 1940—41 (published by the Times of India Office) dealing with the primitive Stone Architecture of the Hindus may well be appropriately quoted.

'A curious fact in relation to Hindu work is that priority of date appears to have no relation to artistic development, It is not possible to trace, as in the case of Greek, Roman and Mediaeval craftwork, the regular progressive steps from art in its primitive state to its culminating point and its subsequent decay. *Styles in India seem to spring into existence fully developed;* the earlier examples often exhibiting finer craftsmanship than those of a later date.'

What is true of gross objects is also true of the sublime plane of philosophic truths.

But the question arises, if this is the conclusive idea of all the authorities and experience, how is it to be explained that many saints and seers have identified themeelves with varying schools of philosophical thought, such as Mimamsa, Nyaya, Vyakarana,

Yoga, Saivagamas, Vaishnavagamas, etc? The main purport of this Aksharamalika is to search the hearts of these saints and seers and find out their real conviction and the way in which these different schools help to arrive at the supreme truth.

Prabhakara, the founder of the Guru-Mata of Purva Mimamsa, throws direct light on the point. He says that the Mimamsa Bhashyakara, *i.e.*, Sabaraswami, did not explain the true nature of the ego "I" and "Mine"—which is only a result of the misconceived identity of the *Atma* with *Anatma*, the matter, because Bhagavan Sri Krishna has given his injunction in the Gita—"Do not perplex the undeveloped minds of the ignorant, who hold fast to Karma." Sabaraswami has not dwelt at length on this point, not because of his ignorance of the Truth, but on account of the specific injunction that those who are in the stage of Karma are not to be disturbed by the preaching to them of the Upanishadic truth.

Kumarila-Bhatta, the founder of the other and more popular school of Purva Mimamsa, tells us while explaining the nature of the soul, that the Mimamsa Bhashyakara deals only with the existence of the soul, as different from the body, and not with its full nature, because he is there concerned only with refuting atheistic Buddhists. For the realisation of the true nature of the Atman, which is Vibhu (all-pervading), Vedanta should be studied.

इत्याह नास्तिक्यनिराकरिष्णुः अत्मास्तितां भाष्यकृदत्र युक्त्या
दृढत्वमेतद्विषयःप्रबोधः प्रयाति वेदान्तनिषेवणेन ॥

Again, in the Sutras of the Nyaya philosophy, Sage Gautama says that the Nyaya system serves only as a fence to the precious plant-seed of the ultimate Truth: तत्वाध्यवसाय etc., and the Nyaya Bhashyakara Vatsyayana, commenting upon this, says that this is a step for those who have not realized the ultimate Truth on account of their mental plane not having been cleansed of sins (but who in some way or other are striving towards it. (अनुत्पन्नतत्वज्ञानानाम्) This topic has been clearly expounded by Nagoji Bhatta, the great grammarian, in his *Manjusha*. Udayanacharya, the great logician, who has propagated both the Nyaya and Vaiseshika schools in the last millennium, when dealing with the Buddhist logicians, points out the discrepancy in their Sunya-Vada, and when comparing his own system with Advaita says, "What has a ginger trader to do with a sea-going vessel? किमार्द्रकवणिजो वहित्रचिन्तया fter first exhorting them to get themselves absorbed in Advaita, where intellect itself is absorbed in the Supreme, he suggests to them an alternative to remain in the intellectual plane according to the Nyaya system after cleansing the muddiness of their intellect. (Here he alludes to a certain Buddhist theory of *Kalushavignanadharā*, a muddy flow of momentary knowledge). Kaiyata, the great grammarian, commenting upon Patanjali's Mahabhasya, in the course of inquiring what the real nature of matter is, says that matter is the True Brahman in untrue colours,

असत्योपाध्यवच्छिन्नं सर्वं ब्रह्मतत्वं द्रव्यशब्दवाच्यम् ।

Patanjali, the author of Mahabhashya himself, while explaining the sentence, "The self hurts the self," says, the subject self is what is limited by mind or अन्तः करण and the object self is that limited by the body or Deha (देहात्मा and अन्तरात्मा) This remarkable utterance directly suggests the Advaitic conception of the limited self which, when freed from limitation, becomes the Supreme Self.

Almost all the philosophers ot the different schools, whether belonging to the Vedic or non-Vedic systems, prior or posterior to Sri Gaudapadacharya and Sri Sankaracharya, refer to the Advaita philosophers as Brahmavadins or Brahmavids, *Aupanishadas* or *Adhyatmakusalas*.

Vidyananda, a Jain author who flourished about eleven centuries ago, in his तत्त्वार्थश्लोकवर्तिक (published in Gandhi Natharanga Jainagrantha mala) refers to the Advaitins as Brahmavadins. The famous Asvaghosha, in his *Buddha Charita*, refers to the Advaitin as Adhytmakusala. Prabhakara Guru, in the Brihati, refers to them as Brahmavids. Udayanacharya refers to Advaita as Vedanaya (the Vedic school) and hails victory of Advaita and designates them as Aupanishadas. Even the Dvaitic author of Nyayamritam, (an attack on Advaita) quotes an ancient authority wherein the Advaitins are clearly termed Vedantins (to the exclusion of the Dvaitins). Kamalasila (the disciple of Santarakshita the Buddhist author of Tattvasangraha)* and his commentator who flourished twelve centuries ago, when dealing with other systems of philosophy, refer to Advaitins as " followers of the Upanishad."

The purport of the Upanishads or the Vedanta is put in a nutshell in Sukra Niti, the earliest work on political science.

ब्रह्मैकमद्वितीयं स्यात् नेह नानास्ति किंचन ।
मायिक सर्वमज्ञानादिति वेदान्तिनां मतम् ।
नानापथजुषामेको गम्यस्त्वमसि (Pushpadanta Kavi)
ओं शान्तिः शान्तिः शान्तिः

* Gaekwad's Oriental Series, Vol. LXXX.

अ. भगवत्पादसिद्धान्ते शिवविष्ण्वभेदः

शिवनामनि भाविते‌ऽन्तरङ्गे महति ज्योतिषि मानिनीमयार्धे ।
दुरितान्यपयान्ति दूरदूरे मुहुरायान्ति महान्ति मङ्गळानि ॥

स्मृते सकलकल्याणभाजनं यत्र जायते ।
पुरुषस्तमजं नित्यं व्रजामि शरणं हरिम् ॥

ஸ்ரீ ஆதிசங்கராசார்ய ஸ்வாமிகள் 'தசச்லோகி'யில் शिवः केवलोऽहं என்று சிவோ஽ஹம்பாவனையையும், வாக்யவிருத்தி என்னும் ஞான நூலில் यस्य प्रसादादहमेव विष्णुः (எவனுடைய கிருபையால் நானே விஷ்ணு தத்வம் எனத் தெளிந்திருக்கின்றேனோ) என்ற தெளிவையும் கூறியிருப்பதால் சிவ விஷ்ணு ஸ்வரூப பேதம் இல்லை என்றுதெரிகிறது.

அவ்விதமே ப்ரம்ம ஸூத்ரபாஷ்யத்திலும் இந்த அபேதத்தை விளக்கியிருக்கிறார்கள். ப்ரம்ம ஸூத்ர நூலில் பாசுபதம் என்னும் சைவ மதமும் பாஞ்சராத்ரம் என்னும் வைஷ்ணவ மதமும் விசாரிக்கப்பட்டிருக்கின்றன. ஸ்ரீ ஆசார்ய ஸ்வாமிகள் பாசுபத மத விசாரத்தில் சிவாகமங்களில் சொல்லப்பட்ட ஈசுவரனே உலகத்திற்கு முதற் காரணம் என ப்ரம்ம ஸூத்ரம் (प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्) ஸ்தாபித்திருப்பதை விளக்கியிருக்கிறார்கள். அதற்கடுத்த பாஞ்சராத்ர விசாரத்தில் வைஷ்ணவாகமத்தில் சொல்லப்பட்ட நாராயணனே பரமாத்மா என்றும் அவனே எல்லாமாயிருக்கிறானென்றும் நிரூபிக்கிறார்கள். இதனாலும் ஸ்ரீ ஆசார்ய ஸித்தாந்தத்தில் சிவ-விஷ்ணு அபேதமே நிலைபெறுகிறது. இவ்விஷயத்தைப்பற்றிய சில ஸூக்ஷ்ம சங்கை ஸமாதானங்களும் இவ்வுபன்யாஸத்தில் சேர்க்கப்பட்டிருக்கின்றன.

Sri Bhagavatpāda speaks of Siva and Vishnu as the one supreme Isvara and makes no difference between them. This is clear from his Sūtra-Bhashya and other minor works.

In the Pāśupatādhikaraṇa he tells us that it is the Lord Siva of the Śaivāgamas who is spoken of as both the material and efficient cause of the universe in the section प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् of the Brahma-Sūtras: while in the Pāñcharātrādhikaraṇa he asserts that Nārāyaṇa is the Paramātman.

यथा दशश्लोक्यां—'न भूमिर्न तोयं न तेजो न वायुः' इत्युपक्रम्य 'तदेकोऽवशिष्टः शिवः केवलोऽहम्' इत्युपसंहृतवन्तः भगवत्पादाः, तथा वाक्यवृत्तौ 'यस्य प्रसादादहमेव विष्णुः मय्येव सर्वं परिकल्पितं च' इति त एव उपसंजह्रुः। अनेन भगवत्पादानां हृदये शिवहरिशब्दयोः अर्थभेदो नाभिमत इति प्रस्फुटं प्रतीयते । 'कश्च भगवान्महेशः शङ्करनारायणात्मैकः' इति च प्रश्नोत्तररत्नमालिकायाम् ।

यद्यप्येवं प्रकरणेषु भगवत्पादैः हरिहराभेदः जोघुष्यते, तथापि आकरत्वेन प्रख्याते परमार्थैकबोधपरे भाष्ये हरिहराभेदनिरूपणप्रस्तावं जिज्ञासन्ते बहवः परीक्षकाः । तत्र पाशुपतपाञ्चरात्राधिकरणयोः भवति भाष्ये प्रसक्तिः पशुपतिवासुदेवयोः प्रस्तावस्य । तत्र पाञ्चरात्राधिकरणे—

"तत्र यत्तावदुच्यते योऽसौ नारायणः परोऽव्यक्तात्प्रसिद्धः परमात्मा सर्वात्मा स आत्मना-

त्मानमनेकधा व्यूह्यावस्थित इति, तन्न निराक्रियते । 'स एकधा भवति त्रिधा भवति' इत्यादिश्रुतिभ्यः परमात्मनोऽनेकधाभावस्य अधिगतत्वात् । यदपि तस्य भगवतोऽभिगमनादिलक्षणमाराधनम अजस्रमनन्यचित्ततया अभिप्रेयते तदपि न प्रतिषिध्यते। श्रुतिस्मृत्योरीश्वरप्रणिधानस्य प्रसिद्धत्वात्' इत्युपवर्णितमस्ति । तेन भट्टभास्करहरदत्ताचार्यादीनामिव वासुदेवे जीवत्वभावो नैवास्ति लेशतोऽपि भगवत्पादानां इति स्फुटमवगच्छामः । तथा पाशुपताधिकरणे—

'इदानीं केवलाधिष्ठात्रीश्वरकारणवादः प्रतिषिध्यते । तत्कथमवगम्यते, 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' 'अभिध्योपदेशाच्च' इत्यत्र प्रकृतिभावेनाधिष्ठातृभावेन च उभयस्वभावस्येश्वरस्य स्वयमेव (बादरायण) आचार्येण प्रतिष्ठापितत्वात् । यदि पुनः अविशेषेण ईश्वरकारणवादमात्रमिह प्रतिषिध्येत पूर्वोत्तरविरोधात् व्याहताभिव्याहारः सूत्रकार इत्येतदापद्येत' इति भगवत्पादैः निरूपितमस्ति ।

अनेन पाशुपतागमेषु प्रतिपादितो यः पशुपतिरीश्वरः स एव वेदान्तेषु जगदुपादानत्वेन निमित्तत्वेन च 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' इत्यधिकरणे निर्धारित इति दृढं निरूपयन्ति भगवत्पादा इति निश्चप्रचम् । यदि पाशुपताधिकरणे निरूपितस्येश्वरस्य जगत्कारणत्वमात्रमेव निराक्रियेत तदा सूत्रकाराणां पूर्वोत्तरविरुद्धप्रक्रमित्वापत्तिमपि घोषयन्ति भगवत्पादाः । एवं द्वयोः प्रकृत्यधिकरणपाशुपताधिकरणयोः प्रतिपाद्यविशेष्यैक्यसमन्वयनिरूपणेन वेदान्तमीमांसाशास्त्रे, 'अथातो ब्रह्मजिज्ञासा' इत्यादिसर्वाधिकरणतात्पर्यविषयीभूतं ब्रह्म पाशुपतागमप्रसिद्धः परमेश्वर एवेति गम्यते । अत एव भगवत्पादाः तत्तदधिकरणविचारेषु शिवे शीघ्रोपस्थितिमता ईश्वरशब्देन परमेश्वरशब्देन च परं ब्रह्म उपाददते । उपास्यसगुणप्रतिपादकाधिकरणभाष्येषु अन्यत्र भाष्येषु च परिच्छिन्नोपाधौ परिपूर्णपरमेश्वरदृष्टिसंभावितत्वे दृष्टान्तत्वेन तत्र तत्र 'यथा साळग्रामे हरिः' 'प्रतिमायां विष्णुबुद्धिः' इत्यादिवाक्यैः हरिमेवोपाददते । इदं च उपमोपादानं आलङ्कारिकसमयानुसारेण काल्पनिकमपि वा ईषद्भेदमपेक्षते। न चोपमेयस्य निर्गुणत्वं उपमानस्य सगुणत्वं चाङ्गीकृत्य भेदो निर्वोढुं शक्यः । परिच्छिन्नोपाधौ उपास्यत्वेनोपदिष्टस्य उपमेयस्य सगुणत्वावश्यंभावात्। एवंचोपमेयभूतोऽत्र उपास्यः सगुणः भिन्नोपाधिकत्वेन कथंचित् विष्णुभिन्नः परमेश्वरशब्दवाच्यश्च वक्तव्य इति शिवस्योपमेयत्वं उपास्यत्वं च सिध्यति । परमेश्वरविष्णवोश्च स्वरूपैक्येऽपि उपमापेक्षितं आहार्यभेदकल्पनं, यथा एकस्यैव विष्णोः वेणुकोदण्डाद्यायुधभेदेन रुक्मिणीपतित्वसीतापतित्वाद्युपाधिभेदेन च रामकृष्णादिभेदकल्पनं तथा नीलमेघश्यामळत्वस्फटिकसंकाशत्वादिभेदेन चक्रपरश्वाद्यायुधभेदादिना च कृतमिति सुष्ठु संपन्नम् । पाशुपताधिकरणे प्रसिद्धपरमेश्वर एव उत्तरमीमांसाधिकरणेषु सर्वत्र तात्पर्यविषयभूतोऽर्थ इति निर्णीयते । पाशुपताधिकरणे 'निमित्तकारणवादमात्रमिह प्रतिषिध्यते' इति भगवत्पादवचनात् तदंशभिन्नयोगक्रियाचर्यादीनां अधिकार्यानुगुण्येन श्रुत्यविरुद्धत्वं भगवत्पादाभिमतत्वं च प्रतीयते ।

'सर्वश्शर्वश्शिवस्थाणुर्भूतादिर्निधिरव्ययः' इति विष्णुसहस्रनामवाक्ये शिवशब्दव्याख्यानावसरे श्रीभगवत्पादाचार्यैः 'स ब्रह्मा स शिवः' इत्यभेदोपदेशात्' इत्यभिधानमपि भगवत्पादाचार्याणां शिवविष्णवभेद एवाभिमतः इत्यत्र प्रमाणम् ।

किञ्च 'ऋतं सत्यं परं ब्रह्म पुरुषं नृकेसरिविग्रहम्, कृष्णपिङ्गलं ऊर्ध्वरेतं विरूपाक्षं शङ्करं नीललोहितं उमापतिं पशुपतिं पिनाकिनं ह्यमित-

श्रुतिं, 'ईशानस्सर्वविद्यानामीश्वरस्सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिः' इत्यत्र नृसिंहपूर्वतापनीयोपनिषद्भगवत्पादभाष्यमपि हरिहराभेदे श्रेष्ठं प्रमाणं भवति । तद्भाष्येऽपि 'अत्र केचित् प्रागुक्तमाकारं मन्त्रवर्णात्पृथक्त्वेन उपास्यमाचक्षते । तदयुक्तम् । एवं तर्हि उपक्रमोपसंहाराभ्यां नृसिंहब्रह्मविद्यैक्यमवगतं बाध्येत । नृसिंहपदव्याख्यानावसरे नृसिंह एव आसीत्परमेश्वरः इति नृसिंहेश्वरयोः सामानाधिकरण्यमवगतं बाध्येत । तस्मात् त्रिणेत्राद्याकारविशिष्टः अस्यां विद्यायां नृसिंह एवोपास्यः इत्युक्त्या भगवत्पादाचार्याणामपि शिवविष्णवभेदस्सम्मत इति विज्ञायते । 'नृसिंहेश्वरयोः सामानाधिकरण्यादि'ति भाष्यवाक्ये भगवत्पादाः ईश्वरशब्देन त्र्यम्बकं असाधारणतया अभिदधतीति च विशदीभवति । 'प्रतद्विष्णुः स्तवते वीर्याय मृगो न भीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ।' इत्यत्र विष्णुर्मृगः सिंहः... गिरिष्ठाः गिरिः पर्वतः तत्स्थ ईश्वरात्मकः इत्यर्थः इति भगवत्पादभाष्ये नृसिंहस्य परमेश्वरात्मकत्वोक्त्या हरिहराभेदस्तदभिमत इति निश्चीयते । किञ्च 'तस्मात् नृसिंह आसीत्परमेश्वरः' इति श्रुतेः भगवत्पादीयभाष्यम्—'यस्मादेवं तस्मात् नृसिंहः परमेश्वरः आसीदित्यन्वयः । न च नृसिंहे परमेश्वर आसीदित्यन्वयः । वैयधिकरण्यापत्तेः । सामानाधिकरण्यान्वयोपपत्तौ सत्यां वैय्यधिकरण्यानुपपत्तेः । तस्मान्नृसिंहः परमेश्वरस्त्रिणेत्रो नीलकण्ठः पिनाकीति सिद्धं' इति । अनेनापि हरिहराभेदे तात्पर्यं तेषां वज्रलेपायितमिति ।

एवं पाशुपतपाञ्चरात्राधिकरणयोः विहितः सूक्ष्मेक्षिकया विचारः वाक्यवृत्तिदशश्लोक्यादिष्विव पशुपतिवासुदेवयोरविशिष्टप्रतिपत्तिमेव भगवत्पादानां स्फुटयति । अत एव तत्रभवान् भर्तृहरिः—'महेश्वरे वा जगतामधीश्वरे जनार्दने वा जगदन्तरात्मनि । न वस्तुभेदप्रतिपत्तिरस्ति मे तथाऽपि भक्तिस्तरुणेन्दुशेखरे ॥' (वैरा-८४) इत्युदघुष्यत् । किंच भगवत्पादीयगीताभाष्ये तत्र तत्र नारायणः ब्रह्मेति व्यवहृतः । केनोपनिषद्भाष्ये तु "उमां हैमवतीं" इत्यत्र उमया नित्यं सहसिद्धः परमेश्वरः ब्रह्मेति निर्धारितः ।

* उपास्यब्रह्मनिरूपणपरेषु ब्रह्ममीमांसाधिकरणेषु अन्यत्र च 'यथा साळग्रामे हरिः' इत्यादिना हरेरुपास्यब्रह्मोपमानत्वोपस्थापनेनैव अभेदप्रतिपत्तिमतामपि भगवत्पादानां लोकसंग्रहार्थोपासनाकाले चन्द्रमौळीश्वराराधनं शिवोपासनोपदेशश्च युज्यते । अत एव शिवरहस्ये नवमांशे—'तद्योगभोगवरमुक्तिसुमोक्षयोगलिङ्गार्चनात्प्राप्तजयः स्वकाश्रमे' इत्यादि भगवत्पादान् प्रकृत्य अभिहितं दृश्यते ॥

शिवविष्णवभेदः न केवलं पारमार्थिकः, अपि तु व्यावहारिकोऽपि । जीवेश्वरयोस्तु व्यावहारिक एव भेदः, अभेदस्तु पारमार्थिकः, इत्येतत्परमाचार्याणां भगवत्पादानां हृदयङ्गमं तात्पर्यमिति ।

---

* यथा दहराधिकरणे "परमेश्वर एव दहराकाशो भवितुमर्हति" इत्युपक्रम्य, "अथवा जीवपुर एवास्मिन् ब्रह्म सन्निहितमुपलक्ष्यते, यथा साळग्रामे विष्णुः सन्निहित इति तद्वत्" ॥

आ. को नाम अद्वैतसिद्धान्तः

வேதம், ஸ்ம்ருதி, புராணம், தர்சனக் கிரந்தங்கள் முதலிய எல்லாத் தத்துவ நூல்களுக்கும் அத்வைதத்திலேயே கருத்து. அத்வைத தர்சனத்தின் விசேஷ லக்ஷணங்களாவன: (1) ப்ரஹ்மம் ஸர்வாத்மகம் (2) அதிஷ்டானமாயுள்ள ப்ரஹ்மத்தில் அஞ்ஞானத்தாலே கல்பிக்கப்பட்ட பிரபஞ்சம் மித்யை (3) ஞானத்தாலே தான் மோக்ஷம் (4) ஜீவப்ரஹ்மாபேதம் (5) ப்ரஹ்மம் நிர்க்குணம் (6) ஜீவன் முக்தி (7) மூவகை ஸத்யம் (8) ஹரிஹராபேதம். இந்த லக்ஷணங்களில் யாதொன்றேனும் ஒரு நூலிலே எங்கேனும் காணப்பெற்றால், அந்நூலிலே த்வைத வாக்கியங்கள் பல இருந்தாலும், அந்நூல் முழுவதுமே அத்வைதத்தைப் போதிக்கின்றது என்று கொள்ளவேண்டும். ஏனென்றால், த்வைத ஞானத்தைக் கொண்டு அனுஷ்டிக்கப் பெறும் கர்மாக்கள் உபாஸனைகள் முதலிய பஹிரங்க அந்தரங்க ஸாதனங்கள் அத்வைத ஞானத்திலேதான் கொண்டுபோய்விடும். தத்தமது வர்ணாச்ரம தர்மங்களை அனுஷ்டித்தும் தவம் புரிந்தும் ஹரியை ஆராதித்தும் வைராக்யம் முதலிய ஸாதனங்கள் நான்கையும் பெறுகிறான் என்று ஸ்ரீபகவத்பாதர்களே விளக்கியிருக்கிறார்கள். ஆதலால், த்வைத வாக்கியங்கள் அதிகமாகக் காணப்படுவது அத்வைதத்திற்குப் பாதகம் ஆகாது. அந்நூல்களிலே காணப்படும் அத்வைத வாக்கியம் ஒன்றேனும் த்வைதத்தைப் போதிப்பதற்கு அவசியமில்லை. ஆதலால் அதன் கருத்து அத்வைதத்தைப் போதிப்பதேயாகும். இவ்வாறு 'எல்லா தத்துவ நூல்களுக்குமே அத்வைத ஸித்தாந்தமே பரம லக்ஷ்யம்' என்று முன்னோர்களால் நிரூபிக்கப் பெற்றுள்ளது.

This article points out that ADVAITA alone is the purport of all the Upanishads as well as of the Mahabharata and of the several Smrities and Puranas. For, though Dvaita ideas abound in a particular work expounding the Truth, if that work contains, as it inevitably does, at least one or two passages of Advaitic import, the entire work must be regarded as establishing Advaita.

Dvaita passages are to be expected and are explained by Sri Sankara Bhagavatpāda and other Acharyas as helpful by their insistence on KARMĀNUSHTHĀNA and UPASĀNĀ and on the discipline of the four-fold Sadhana so essential for grasping the Advaitic Truth. On the other hand, the Advaita passages are out of place and cannot be fitted into the structure of Dvaita doctrine.

The concepts and fundamental characteristics of Advaita are : (1) Brahman is the Atman of everything. (2) Prapancha for the phenomenal world is Mithya (3) Moksha, (Salvation) is only through Gñana. (4) The Jivas and the Brahman—all is one. (5) The Brahman has no attributes, is Nirguṇa. (6) Jīvanmukti (release during this life) is attainable. (7) The three kinds of Satya (Truth). (8) Non-difference between Hari and Hara. Therefore, if any of these characteristics are found anywhere in any work, that work in its entirety is Advaitic.

अद्वैततत्त्व एव सर्वासां विद्यानां सर्वेषां प्राचीनाचार्याणां च परमतात्पर्यनिष्ठा भवति । श्रीकण्ठभाष्यव्याख्यानावसरे एवमभाणि श्रीदीक्षितेन्द्रैः—

"यद्यप्यद्वैत एव श्रुतिशिखरगिरामागमानां च निष्ठा
साकं सर्वैः पुराणैस्स्मृतिनिकरमहाभारतादिप्रबन्धैः ।
तत्रैव ब्रह्मसूत्राण्यपि च विमृशतां भान्ति विश्रान्तिमन्ति
प्रत्नैराचार्यरत्नैरपि परिजगृहे शङ्कराद्यैस्तदेव ॥

तथाप्यनुग्रहादेव तरुणेन्दुशिखामणेः ।
अद्वैतवासना पुंसाम् आविर्भवति नान्यथा ॥"

सर्वेषां वेदान्तानामद्वितीये ब्रह्मणि तात्पर्यमिति श्रुतिस्मृतिपुराणानामालयैः करुणालयैः श्रीमच्छङ्करभगवत्पादैश्च कण्ठत एवोक्तम् ।

पूर्वोदाहृतदीक्षितेन्द्रवाक्यात् दीनोद्धरणैकोद्देशेन प्रवृत्तानां प्राचुर्येण सर्वेषां ग्रन्थानामाचार्याणां च अन्यत्र सोपानभूतसिद्धान्तेषु अवान्तरतात्पर्यवतामपि परमतात्पर्यमद्वैत एवेति गम्यते । एवं सति केषां प्रबन्धानां केन प्रकारेण अद्वैततत्त्वबोधकत्वमिति यथामति परिशीलनेन निष्पन्नान् अर्थान् तत्त्वविचारप्रेमवतां लोकानां पुरतः समर्प्य तत्सेवाकलनम् अद्वैतविद्यैकशरणानां पण्डितानामवश्यकर्तव्येषु अन्यतमं भवति ।

तत्र तत्तत्प्रबन्धेषु केन केन प्रकारेणाद्वैततत्त्वं निरूपितमिति बोधयितुम् अङ्गतया अद्वैतदर्शने निरूप्यमाणाःसिद्धान्ता विविच्य सप्रमाणमिह संग्रहेण निरूप्यन्ते । यत्र प्रबन्धे बहून्यपि द्वैतबोधकानि वाक्यानि सन्ति तत्रैकमपि अद्वैततत्त्वावेदकं वाक्यमस्ति चेत् तस्य ग्रन्थस्य समग्रस्यापि अद्वैतबोधन एव तात्पर्यमवसेयम् । यतोऽद्वैततत्त्वं नान्तरीयकतया द्वैतमपेक्षत एव । द्वैतविज्ञानसाध्यकर्मोपासनादिबहिरङ्गान्तरङ्गसाधनसाध्यत्वादद्वैतसाक्षात्कारस्य । तथाहि — 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' इति श्रुतिः । अत्रैव च 'तथाप्यनुग्रहादेव तरुणेन्दुशिखामणेः । अद्वैतवासना पुंसामाविर्भवति नान्यथा' इति दीक्षितेन्द्राः । श्रीभगवत्पादैरपि च 'स्ववर्णाश्रमधर्मेण तपसा हरितोषणात् । साधनं प्रभवेत्पुंसां वैराग्यादिचतुष्टयम् ॥' इत्युक्तम् ।

अद्वैतस्य द्वैतनिषेधरूपत्वात् निषेधस्य निषेध्यसमर्पणसापेक्षत्वात् द्वैतवाक्यानां अद्वैतोपयोगित्वम् । सिद्धान्ते अद्वैतस्य पारमार्थिकत्वेन द्वैतस्य काल्पनिकत्वेन च काल्पनिकभेदनिरूपणं न पारमार्थिकाद्वैतनिरूपणेन विरुध्येे । तदेवं द्वैतवाक्यानामद्वैतोपयोगित्वम् । नैवं द्वैतस्य अद्वैतापेक्षानियमः । अद्वैतानुसंधानं विनाऽपि द्वैतबुद्धिसाध्यकर्मोपासनादेः सुसंपादत्वात् । न केवलं द्वैते अद्वैतानपेक्षा । किं तु द्वैतविघटकत्वमपि अद्वैतानुभवस्य । तथाहि — 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत् केन कं विजानीयात्' इति क्रियाकारकफलनिराकरणश्रुतेः । तस्मात् द्वैतवाक्यबहुलेष्वपि ग्रन्थेषु एकमपि सत् अद्वैततत्त्वबोधकं वाक्यं कृत्स्नस्य तस्य ग्रन्थस्याद्वैतपरतां व्यनक्ति ।

ब्रह्मणस्सर्वात्मकत्वम्

'पुरुष एवेदं सर्वम्' इति ऋग्यजुस्सामान्युद्घुष्यन्ति । 'पुरुष एवेदं विश्वम्' इति चाथर्वणश्रुतिः । अनेन ब्रह्मैव सत्यं न ब्रह्मणोऽन्यत्परमार्थवस्त्वस्तीति अयमेकोऽसाधारणोऽद्वैतसिद्धान्तः प्रदर्शितो भवति ।

प्रपञ्चस्याधिष्ठानब्रह्माज्ञानकल्पितत्वेन मिथ्यात्वम्

एवं च सति प्रपञ्चस्य परमात्मव्यतिरिक्तत्वेन जडत्वेन परस्परपृथक्त्वेन च यत् भानं तन्न तात्त्विकम् । किंतु अज्ञानमूलान्यथाभानमेव । अत एव प्रपञ्चानृतत्वं नामायमेकोऽसाधारणोऽद्वैतसिद्धान्तः । प्रपञ्चाभिसंधस्य बन्धः सर्वानुभवसिद्धः । ब्रह्माभिसंधस्य मोक्षश्च श्रुतिविद्वदनुभवसिद्धः । छान्दोग्यश्रुतिश्च 'पुरुषं सौम्योत हस्तगृहीतमानयन्ति अपहार्षीत्स्तेयमकार्षीत्परशुमस्मै तपतेति । स यदि तस्य कर्ता भवति तत एवानृतमात्मानं कुरुते । सोऽनृताभिसन्धोऽनृतेनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स दह्यतेऽथ हन्यते' इति प्रथममन्त्रेण, "अथ यदि तस्याकर्ता भवति तत एव सत्यमात्मानं कुरुते । स सत्याभिसन्धस्सत्येनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति । स न दह्यतेऽथ मुच्यते ।" इति द्वितीयमन्त्रेण, "स यथा तत्र नादाह्येतैतदात्म्यमिदं सर्वं तत्सत्यं स

आत्मा तत्त्वमसि श्वेतकेतो इति तद्धास्य विजज्ञाविति विजज्ञाविति" इति तृतीयमन्त्रेण च अनृताभिसंधस्य बन्धं सत्याभिसंधस्य मोक्षं च दर्शयति। अतः प्रपञ्चस्य अनृतत्वरूपं मिथ्यात्वं ब्रह्मणः सत्यत्वं च सिद्धं भवति ॥

ज्ञानादेव मोक्षः

ज्ञानादेव मोक्ष इत्ययमप्येकोऽसाधारणस्सिद्धान्तः अद्वैतदर्शने । "तमेवं विद्वानमृत इह भवति । नान्यः पन्था विद्यतेऽयनाय" इति पुरुषसूक्तश्रुतौ। यस्मादिदं सर्वमात्मैव भवति यस्माद्द्वैतमेव रागादीनां दुःखबीजानामालंबनं च भवति तस्मादज्ञानप्रभवस्य दुःखहेतोर्द्वैतभानस्य समूलस्य निवृत्तिरेव मुक्तिः । सा च रज्जौ सर्पबुद्धेः निवृत्तिवत् सर्वात्मनोऽद्वितीयस्य परमात्मनः यथार्थज्ञानमात्रेणैव भवति । इति मोक्षहेतुर्ज्ञानमेव नान्यत् ॥

तच्च ज्ञानं सदाचारविवेकवैराग्यभक्तिध्यानादिसंपादितेश्वरानुग्रहात् सिध्यति । यदि बन्धहेतुः प्रपञ्चोऽनृतो न स्यात्तदा ज्ञानेन बन्धनिवृत्तिर्न स्यात् । बन्धनिवृत्तिश्च मोक्षः । अमृतत्वरूपमोक्षस्य ज्ञानमेवोपाय इति निरूपयति श्रुतिशतम् । अतः तस्य द्वैतप्रपञ्चस्य ज्ञानबाध्याज्ञानकल्पितत्वरूपानृतत्वोपपत्तिः । द्वैतप्रपञ्चस्यानृतत्वादर्शिनो मोक्षानुपपत्तिश्च भवति । यावद्द्वितीयवस्तुज्ञानं तावद्रागप्रसक्तिः, तावद्दुःखम् । ततः सर्वात्मकब्रह्मसाक्षात्कारेण मिथ्याप्रपञ्चस्य निवृत्त्या मोक्षोपपत्तिः ॥

जीवब्रह्माभेदः

यथा जडवस्तूनां सर्वेषां कल्पितत्वं परमार्थतश्च ब्रह्मव्यतिरेकेणासत्त्वं एवं जीवानामपि ब्रह्माभेदं बोधयति श्रुतिः । "ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो" इति श्रुतिः इदङ्कारास्पदस्य प्रपञ्चस्य ब्रह्मात्मकतां बोधयित्वा अहङ्कारास्पदानां जीवानां यदि ब्रह्मात्मताबोधिका न स्यात् तदा पुनः द्वितीयवस्त्वनिवृत्त्या दुःखहेतुभूतरागाद्यालंबनं द्वैतं दुःखसंतानमुत्पादयेदेव । अत एवोपदिशति श्रुतिः "तत्त्वमसि" "अयमात्मा ब्रह्म" इत्यादि । न चैतज्जीवब्रह्माभेदज्ञानं स्थूलोऽहं नीलोऽहं इत्यादिदेहात्मज्ञानवच्छरीरशरीरिभावनिबन्धनम् । चार्वाकपामरबालादीनामपि तदुदयात्तस्य भ्रमत्वात् । तत्त्वमसीत्युपदेशस्य च "यावन्न विमोक्ष्ये अथ संपत्स्ये" इत्युत्तरवाक्ये मोक्षोद्देशेनैव प्रवृत्तत्वात्, तत्त्वमसीति वाक्यात्पूर्वमुदाहृतवाक्ये च सत्याभिसंधस्यैव मोक्षसंभववचनाच्च, तत्त्वमसीति वाक्यजन्यं जीवब्रह्माभेदज्ञानं यथार्थज्ञानमेव । न तु स्थूलोऽहमित्यादिज्ञानवद्भ्रान्तिर्भवितुमर्हति । तादृशज्ञानस्य बन्धजनकत्वेन मोक्षजनकत्वायोगात् ।

अन्यच्च । यदि जीवः स्वभावत एव ब्रह्मभिन्नस्स्यान्न तूपाधितः, तर्हि मोक्षदशायामपि जीवस्य ब्रह्मणैकता न स्यात् । मोक्षो नाम मनोग्राह्यः कश्चित्सुखविशेष इति पर्यवस्येत् । तादृशमोक्षस्य च आगन्तुकत्वात्कार्यत्वमपि स्यात् । यत्कार्यं तदनित्यमिति न्यायाच्च तादृशमोक्षस्य अनित्यत्वापत्त्या आत्यन्तिकपुरुषार्थता न स्यात् । अतो नित्यमोक्षान्यथानुपपत्त्याऽपि महावाक्यैरुपदिष्टो जीवब्रह्माभेद इतरदर्शनप्रक्रियासु कुत्राप्यनुल्लिखितोऽद्वैतदर्शने परमस्सिद्धान्तः ।

यत्र क्वचन मतान्तरे जीवाः प्रपञ्चश्च ब्रह्मणः पृथग्भूता एव इति कल्पयित्वा मोक्षदशायां परं शिवे जीवस्य लयोऽभ्युपगम्यते तन्मते तादृशलयः विद्यमानस्यैव भेदस्य अस्फुरणमात्रमेव न त्वभेदः इत्यभ्युपगमात् संसारदशायां

सत्यविषयज्ञानं मोक्षदशायां तदज्ञानमिति असामञ्जस्यापातः । सत्याभिसंधमोक्षनिर्वाहाय महावाक्यबोधितः पारमार्थिकः जीवब्रह्माभेदः अद्वैतदर्शने इष्यते । "यथा नद्यस्स्यन्दमानास्समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय । तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ।" इति मोक्षवादिश्रुतिप्रदर्शितजलसमुद्रदृष्टान्तेनापि जीवब्रह्मणोस्स्वाभाविकोऽभेदः औपाधिकश्च भेद इति व्यञ्जितो भवति । समुद्रस्थमेव हि जलं सूर्यकिरणसंयोगात् पर्वतादिसंयोगाच्च मेघनद्यादिरूपाण्यौपाधिकानि भजते । स्वभावतस्तु सलिलमेकरसमेव । नात्र किंचिद्वैलक्षण्यं इत्येवमियं श्रुतिः दृष्टान्तमुखेनापि जीवब्रह्माभेदं बोधयति ।

निर्गुणं ब्रह्म

ब्रह्मणः परमार्थतः निर्गुणत्वमित्ययमेकोऽसाधारणोऽद्वैतसिद्धान्तः । "साक्षी चेता केवलो निर्गुणश्च" इति हि श्रुतिः । यदि सगुणत्वमेव पारमार्थिकं स्वरूपं परात्मनः, तदा परमात्मभिन्नः परमात्मवत्सत्यः गुणसमूहो वर्तेत इत्यभ्युपगन्तव्यम् । परमात्मभिन्नः एकोऽपि पदार्थोऽस्ति चेत् वस्तुकृतपरिच्छेदापत्त्या परमात्मनः पूर्णत्वं हीयेत । परमात्मा हि पूर्णः पुरुष इति चोद्घुष्यते श्रुतिषु । यथा पूर्णत्वान्यथानुपपत्त्या सर्वात्मत्वं निश्चीयते तथा निर्गुणत्वमपि निश्चीयते । एवं जीवब्रह्माभेदबोधोऽपि पूर्णत्वमेवोपोद्बलयति । अत एव "परं चापरं च ब्रह्म यदोङ्कारः" "पादोऽस्य विश्वा भूतानि । त्रिपादस्यामृतं दिवि" "न्यूनमन्यत्स्थानं संपूर्णमन्यत्" "यत्र नान्यत्पश्यति नान्यद्विजानाति स भूमा" "यत्रान्यत्पश्यति अन्यच्छृणोति अन्यद्विजानाति तदल्पं" इति सगुणनिर्गुणविभाजकश्रुतयः दृष्टिभेदेनैव नेतव्याः । उपास्योपासकभावक्षमं विश्वरूपादिप्रदर्शकं यदपरं ब्रह्म तत्पूर्णब्रह्मसाक्षात्काररहितानां आरुरुक्षूणामुपकारार्थं कल्पितविग्रहम् । परमार्थस्तु तदेव पूर्णं निर्गुणमिति परमार्थापरमार्थदृष्टिभेदेन निर्गुणसगुणविभागोऽयं श्रुतिसिद्धः ।

जीवन्मुक्तिः

मुक्तेः ऐहिकफलत्वमिति जीवन्मुक्त्यभ्युपगमः असाधारण एकोऽद्वैतसिद्धान्तः । "तमेवं विद्वानमृत इह भवति" इति इहशब्दघटितं श्रूयते अमृतत्वबोधकं वाक्यं पुरुषसूक्ते । "ऐहिकमप्यप्रस्तुतप्रतिबन्धे" इति च ब्रह्मसूत्रम् । "इह चेदवेदीत्" इति केनोपनिषच्छ्रुतिः । "गर्भेनु सन्नन्वेषां" इत्यैतरेयश्रुतिः ॥ उपपन्ना चेयं जीवन्मुक्तिः, यत् मुक्त्यपेक्षितचित्तपरिपाकः यदि जीवदवस्थायां न संपन्नः तदा मरणमात्रेण संपत्स्यत इति कल्पनाया अरमणीयत्वम् । "अत्र ब्रह्म समश्नुते" इतीयमपि श्रुतिः "अमृत इह भवति" इति श्रुतिसमानार्थिका । एवमत्रैव जन्मनि तत्त्वज्ञानेन सर्वात्मभावमप्राप्तस्य कर्मोपासनायोगसाधनादिसहितस्य तुरीयाश्रमनिष्ठस्य वा अपरमार्थविदोऽपि सगुणपरमेश्वरलोकप्राप्तिरूपा क्रममुक्तिः श्रुत्यादिषु तत्र तत्रोपवर्णिता । तादृशीं मुक्तिमापन्नानां महाप्रळयकाले भगवद्विग्रहस्यापि तिरोधानदशायां तावत्पर्यन्तं भगवत्सान्निध्यरूपसंस्कारवशात् उत्पन्नसर्वात्मभावानां निर्गुणब्रह्मभाव इतीममर्थं प्रतिपादयति "ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे । परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम् ॥ " इति स्मृतिः ।

सत्तात्रैविध्यम्

रज्जुसर्पादिमिथ्याभावपदार्थः रज्वाद्यधिष्ठानदर्शने अपैति । एवमयं गिरिसमुद्रादिजाग्रत्प्रपञ्चः सर्वोऽपि तदधिष्ठानभूतब्रह्मदर्शने अपैति इति ब्रह्मणः

पारमार्थिकी सत्ता; भ्रान्तिस्वप्नादिरहितजाग्रत्कालीनप्रपञ्चस्य व्यावहारिकी सत्ता; शुक्तिरजताद्यध्यस्तपदार्थानां स्वाप्निकपदार्थानां च प्रातिभासिकी सत्ता इति सत्तात्रैविध्यं अद्वैतदर्शने असाधारणतयाऽभ्युपगम्यते । "सत्यं चानृतं च सत्यमभवत्" इति तैत्तिरीयश्रुतिः परमार्थसत्यं ब्रह्मैव व्यावहारिकपृथिव्यादिरूपेण प्रातिभासिकानृतस्वप्नादिरूपेण च अभवदिति निरूपयति । "सत्यस्य सत्यं तेषामेष सत्यं" इति श्रुतिश्च पारमार्थिकव्यावहारिकसत्तयोर्विभागं दर्शयति । द्वैतश्रुतीनां प्रत्यक्षानुमानाद्यवगतभेदानुवादकत्वात् "अग्निर्हिमस्य भेषजम्" इत्यादिवत् त्रिविधार्थवादमध्ये अनुवादरूपार्थवादत्वं सिद्धम् । एवं चासां पूर्णब्रह्मसाक्षात्कारोदयापेक्षितचित्तशुद्धिचित्तैकाग्र्यादिसंपादककर्मोपासनादिस्तावकत्वेन तादृशकर्मोपासनपरमफलभूतब्रह्मसाक्षात्कारस्तावकत्वमपि परंपरया सिद्धम् ।

हरिहराभेदः

एवं व्यावहारिकोपासनाकाण्डे उपास्यस्य सगुणमूर्तेः ईश्वरत्वमिष्यतेऽद्वैतसिद्धान्ते । तस्यैव "यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्मेति ।" इति श्रुतिनिरुक्तानां त्रयाणां प्रपञ्चकृत्यानां मध्ये एकैकावलम्बनेन तस्यैव ब्रह्मविष्णुशिवमूर्तिभेदक्लृप्तेः शिवविष्ण्वादिभेदे आग्रहः अनवसरः । यथा व्यावहारिकदशायामपि रामकृष्णाद्यभेदः यथा वा दक्षिणामूर्तिनटराजाद्यभेदः एवं हरिहराद्वैतमपीति अद्वैतसिद्धान्तः । "शान्तं शिवमद्वैतम्" इति माण्डूक्यश्रुतिः शिवपदेनैव ब्रह्माचष्टे । काठकश्रुतिश्च "तद्विष्णोः परमं पदम्" इति विष्णुशब्देन ब्रह्माचष्टे ॥

इति शिवम्

(इ) ऋग्वेदे अद्वैतभावाः

(जम्बुकेश्वरं शिवरामकृष्णघनपाठी शिरोमणिः)

ஒவ்வொரு வேதமும் கர்ம காண்டம் ஞானகாண்டமென்று இருவகையாக அமைந்திருக்கிறது. கர்ம காண்டம் ஈசுவரனுடைய கட்டளையால் உலகத்தை ரக்ஷிப்பதற்காக நியமிக்கப்பட்ட தேவதைகளை யஜ்ஞங்களின் மூலம் வழிபட்டு உலக க்ஷேமத்தை நிலைநாட்டுவதற்காக ஏற்பட்டது.

ஞான காண்டம் நிஷ்காம யஜ்ஞானுஷ்டானத்தால் சித்த சுத்தி ஏற்பட்ட ஜீவன்களை ஈசுவரோபாஸனையில் ஏற்றி ஈசுவர கிருபையை அடைவித்துப் பின்பு சிரவண மனன தியானங்களால் பேதம் அகல ஈசுவரனுடைய பரிபூர்ணாத்வைத தத்வ ஸாக்ஷாத்காரத்தை அனுபவிக்கச் செய்விக்கிறது.

ஞான காண்டத்திற்கு உபநிஷத் என்று பெயர். ஞான காண்டத்தில் அத்வைதம் சொல்லப்படுவது ஸஹஜம். கர்ம காண்டத்திலும்கூட ஆங்காங்கு அத்வைத தத்வம் மிளிர்கிறது.

ரிக் வேதத்தில் ஐதரேயோபநிஷத் என்னும் ஞான காண்டத்தில் மஹாவாக்யத்திலுள்ள அத்வைத்தைத் தவிர கர்ம காண்டத்திலும் ஆங்காங்கு அத்வைத உண்மைகள் வெளிப்படுத்தப்பட்டிருக்கின்றன. அவைகளில் சிலவற்றை சதச்லோகீ என்னும் ஞானநூல் எடுத்துக் காட்டியிருக்கிறது. அதிலுள்ளவைகளும் மற்றும் அனேக வாக்யங்களும் இந்த வியாஸத்தில் விவரிக்கப்பட்டுள்ளன.

ஒன்றாயிருக்கும் உண்மையையே இந்திரனென்றும் வருணனென்றும் யமனென்றும் வேதியர்கள் அனேகமாகச் சொல்கிறார்கள் என்று பொருள்படும் ரிக் 2-3-22-6-இல் காணப்படுகிறது.

ஒரே சூரியன் எல்லாப் பிரகாசமுமாய் ஆகியிருப்பதுபோல ஒரே பொருள் எல்லாமாயிற்று. 2-3-22-6.

கர்ப்பத்திலிருக்கும் பொழுதே வாமதேவரிஷி முக்தியடைந்தார். கர்ப்பத்திலிருந்தே அவர் அறிந்ததாவது "நானே மனு; நானே சூரியன்." என்னும் உண்மை—3-6-15-1. நானே எல்லாமாயிருக்கிறேன் என்ற பொருள் இதற்கேற்படுகிறது.

ஜீவன் துக்கப்படுவது ஈசுவரத் தன்மையின்மையாலேயே. தேகம் மனம் இவைகளைவிட வேறுபட்ட ஈசனை அறியும்பொழுது சோகம் விலகுகிறது. ஈசனுடைய நிறைவை யடைகிறான் என்று பொருளுடைய ருக்—

समाने वृक्षे पुरुषो निमग्नो-
ऽनीशया शोचति मुह्यमानः ।
जुष्टं यदा पश्यत्यन्यमीशं अस्य
महिमानमिति वीतशोकः ॥

மரித்தபின் பரலோகமடைவது ஆத்மா அல்ல. மனமே போகிறது. மனம் போவதால் ஆத்மா போவதாக வ்யவஹரிக்கப்படுகிறது. ஜீவாத்மாவோ எங்கும் நிறைந்த பொருள்—என்ற பொருளுடைய விஸ்தாரமான கதை 8-1-20-1.

Every Veda is divided into two parts—the Karmakāṇḍa and the Jñānakāṇḍa. The Karmakāṇḍa is intended to bring prosperity to the world through the various sacrifices enjoined in it. The Jñānakāṇḍa is intended to bring about the self-realisation of the identity of the Jīvas with the Lord, through the ladder of unselfish performance of the sacrifices, devotion, hearing, contemplation, and concentration.

It is essential that Vedāntic truths are set out in the Jñānakāṇḍa. But in the Karmakāṇḍa too we find many passages relating

to the advaitic truth. This is the case with Ṛg. Veda also.

The Brahmins speak of the one truth as many, Indra, Mitra, Varuna, Agni, Garutmān, etc. (2-3-22-6)

"I became Manu, Sūrya, Kakṣhīvan and others"—(3-6-15-1), so declared Vamadeva.

The Jīva's misery is due to the non-realization of his identity with the Godhead. When he realizes it as different from body, mind etc., he attains his Glory and becomes free from sorrow (8-1-20-1).

कल्याणाद्भुतगात्राय कामितार्थप्रदायिने ।
श्रीमद्वेङ्कटनाथाय श्रीनिवासाय मङ्गलम् ॥
"या वेदान्तार्थतत्त्वैकस्वरूपा परमार्थतः ।
नामरूपात्मना व्यक्ता सा मां पातु सरस्वती ॥ १

या साङ्गोपाङ्गवेदेषु चतुर्ष्वेकैव गीयते ।
अद्वैता ब्रह्मणश्शक्तिः सा मां पातु सरस्वती ॥ २

या वर्णपदवाक्यार्थस्वरूपेण विवर्तते ।
अनादिनिधनाऽनन्ता सा मां पातु सरस्वती ॥ ३

अध्यात्ममधिदैवं च देवानां सम्यगीश्वरी ।
प्रत्यगास्ते वदन्ती या सा मां पातु सरस्वती ॥ ४

अन्तर्याम्यात्मना विश्वं त्रैलोक्यं या नियच्छति ।
रुद्रादित्यादिरूपस्था सा मां पातु सरस्वती ॥ ५

या प्रत्यग्दृष्टिभिर्जीवैः व्यज्यमानाऽनुभूयते ।
व्यापिनी ज्ञप्तिरूपैका सा मां पातु सरस्वती ॥ ६

नामजात्यादिभिर्भेदैरष्टधा या विकल्पिता ।
निर्विकल्पात्मनाऽव्यक्ता सा मां पातु सरस्वती ॥ ७

व्यक्ताव्यक्तगिरस्सर्वा वेदाद्या व्याहरन्ति याम् ।
सर्वकामदुघा धेनुस्सा मां पातु सरस्वती ॥ ८

यां विदित्वाऽखिलं बन्धं निर्मथ्याखिलवर्त्मना ।
योगी याति परं स्थानं सा मां पातु सरस्वती ॥ ९॥

नामरूपात्मकं सर्वं यस्यामावेश्य तां पुनः ।
ध्यायन्ति ब्रह्मरूपैका सा मां पातु सरस्वती ॥१०॥"

इमे दश श्लोका ऋग्वेदीयसरस्वतीरहस्योपनिषदि वर्तन्ते । तेषां चाद्वैतात्मपरत्वं स्पष्टं प्रतीयते । अथ ऋग्वेदे विशिष्य कर्मकाण्डे अद्वैतस्य परमात्मनः सर्वात्मनः सर्वात्मत्वं, प्रपञ्चरूपभेदस्य जीवेश्वरभावस्य च मायाप्रयुक्तत्वं, मायाया स्सदसद्विलक्षणत्वं, संसारदशायां ब्रह्मणो मायया आवृतत्वं इत्यादयः परमाद्वैतसिद्धान्तानुसारिणोऽर्थविशेषा यत्र यत्र निरूप्यन्ते, तानि वाक्यानि श्रीसायणाचार्यभाष्यसहायेन सङ्कलय्य अभिज्ञानां पुरत उपहरामि ।

तत्र ऐतरेयोपनिषदि तृतीयाध्याये पंचमखण्डे "कोऽयमात्मेति वयमुपास्महे । कतरस्स आत्मा । येन वा पश्यति येन वा शृणोति येन वा गन्धानाजिघ्रति येन वा वाचं व्याकरोति येन वा स्वादु चास्वादु च विजानाति ।" इत्यात्मजिज्ञासूनां मुमुक्षूणां आत्मतत्त्वनिर्धारणार्थान्वेषणमुपक्रम्य "यदेतद्धृदयं मनश्चैतत् । संज्ञानमाज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मतिर्मनीषा जूतिः स्मृतिस्संकल्पः क्रतुरसुः कामो वश इति सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति" इत्यन्तेन ग्रन्थेन अन्तःकरणादिधर्माणां अमूर्तानां आन्तरपदार्थानां वाचकशब्दानां प्रज्ञानस्यात्मनो नामधेयत्वकथनेन, तैस्साकं आत्मनस्तादात्म्यमुपवर्ण्य, "एष ब्रह्म एष इन्द्र एष प्रजापतिरेते सर्वे देवा इमानि च पञ्च महाभूतानि पृथिवी वायुराकाश आपो ज्योतींषीत्येतानि च क्षुद्रमिश्राणीव" इति ब्रह्मेन्द्रपृथिव्यादिवस्तुतादात्म्यं प्रदर्श्य,

"बीजानीतराणि चेतराणि चाण्डजानि च जारुजानि च स्वेदजानि चोद्भिज्जानि चाश्वा गावः पुरुषा हस्तिनो यत्किंचेदं प्राणि जङ्गमं च पतत्रि च यच्च स्थावरं सर्वं तत्प्रज्ञानेत्रम्" इति ग्रन्थेन अण्डजजरायुजादिभेदभिन्नप्राणिजातात्मकस्य स्थावरजङ्गमरूपस्य च सर्वस्य जगतः प्रज्ञानेत्रत्वं प्रदर्श्य, "प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठा" इत्यनेन द्वैतसामान्यस्य प्रज्ञानेऽधिष्ठाने कल्पितत्ववर्णनेन वक्ष्यमाणैक्ययोग्यतां जीवेश्वरयोः प्रदर्श्य, "प्रज्ञानं ब्रह्म" इति महावाक्येन, प्रज्ञानशब्दार्थस्य उपक्रमे दर्शनश्रवणादिकर्तृत्वेन निर्दिष्टस्य जीवात्मनः शोधनपूर्वकं निर्विशेषब्रह्मभावस्य बोधनेन अद्वैतब्रह्मबोधनपरेयमुपनिषत् इति स्फुटमवगम्यते ।

तत्र सर्वस्यापि प्रज्ञानात्मत्वं प्रतिपाद्य, तादृशप्रज्ञानाभिन्नः परमात्मा इति जीवब्रह्मैक्यं बोधितम्। एतादृशजीवब्रह्माभेदानुभववतो वामदेवस्य तत्त्वज्ञानफलसार्वात्म्यानुभवप्रदर्शिका इमा ऋचः—

३-६-१५-१ अहं मनुरभवं सूर्यश्चाहं कक्षीवाँ ऋषिरस्मि विप्रः । अहं कुत्समार्जुनेयं न्यृंजेहं कविरुशना पश्यतामा ।

३-६-१५-२ अहं भूमिमददामार्यायाहं वृष्टिं दाशुषे मर्त्याय। अहमपो अनयं वाव शानामेद्वासो अनुकेतमायम् ।

३-६-१५-३ अहं पुरो मन्दसानो व्यैरनवसाकं नवतीः शम्बरस्य । शततमं वेश्यं सर्वता ता दिवोदासमातिथिग्वं यदावं ।

३-६-१६-१ गर्भे नु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वा । शतं मा पुर आयसीररक्षन्नधः श्येनो जवसा निरदीयम् ।

अत्र पूर्वाभिस्तिसृभिर्ऋग्भिः उत्पन्नात्मैकत्वविज्ञानवतो वामदेवमहर्षेः तत्त्वज्ञानफलभूतसार्वात्म्यानुभवो मन्वादिभवनद्वारेण प्रदर्श्यते । तुरीयया ऋचा अहं ब्रह्मास्मीत्यनुभववता वामदेवेन सर्वेषां देवानां जन्मानि परमात्माभिन्नेन मया ज्ञातानि; तादृशाभेदज्ञानाधिगमात् पूर्वं मया बन्धकानि अयोमयान्यतिकठिनानि अपरिमितानि शरीराणि धृतानि । ज्ञानाधिगमानन्तरं तेभ्यो बन्धकेभ्यो निर्मुक्तोऽहं इति स्वानुभवः उद्घुष्यते ॥

बृहदारण्यकोपनिषदि च प्रथमाध्याये चतुर्थब्राह्मणे "तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्चेति" इति वाक्येन ऋग्वेदीयवामदेवसूक्तगताः एत एव मन्त्राः ब्रह्मविद्यायास्सर्वभावापत्तिः फलमित्येतस्य पूर्वं तत्रैवोक्तस्य अद्वैतानुसारिणोऽर्थस्य द्रढिम्न उदाहृताः ॥

६-४-२९-२ एकं एवाग्निर्बहुधा समिद्ध एकस्सूर्यो विश्वमनुप्रभूतः । एकैवोषास्सर्वमिदं विभात्येकं वा इदं विबभूव सर्वम् ।

अत्र अग्निसूर्यादिदृष्टान्तेन एकं ब्रह्मैव सर्वमभवत् इति वर्ण्यते ।

२-३-२२-६ इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः सस्सुपर्णो गरुत्मान् । एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ।

अत्र परमात्मानमेकं सन्तं, विप्राः इन्द्रमित्रादिभेदेन बहुधा वाङ्मात्रेण व्यवहरन्ति, वस्तुतस्त्वं अद्वैतमेवेति प्रतिपाद्यते ।

८-७-१७-१ नासदासीन्नोऽसदासीत्तदानीं नासीद्रजो नो व्योमापरो यत् । किमावरीवः कुहकस्य शर्मन्नम्भः किमासीद्गहनं गभीरम् ।

अत्र नामरूपात्मकस्य दृश्यमानस्य जगतः उपादानकारणं किं स्यादिति संदिह्य, न तावच्छुद्धस्यानीहस्य ब्रह्मणस्तथात्वमुपपद्यते । अथैतदतिरिक्तस्य तथात्वकल्पनं, तदा तत् किं असद्वा सद्वा भवेत् । न तावदाद्यः । कुतः ? गगनकुसुमवदसतः तुच्छत्वात् । अत्यन्तासत्त्वेन उपादानकारणत्वानर्हत्वात् । नापि सत् । शुद्धब्रह्मणोऽन्यस्य सतोऽभावात् । अतः पारिशेष्यात् सदसद्विलक्षणं किञ्चिदासीदित्यवसीयते, तदेव माया । एवं व्योमादेः सर्वस्यापि प्रपञ्चस्य निषेधपूर्वकं कुहकस्यैन्द्रजालिकस्य मायया स्थले जलभ्रममुत्पादयतः मायया क्षणं उत्पन्नं जलं यथा भ्रमनिवृत्तौ सत्यां स्थलस्यावरणं न भवति तद्वत् प्रकृतेऽपि आवरणसामान्यमपि निषिध्यते । तथा च शतश्लोक्यां आचार्यपादाः प्राहुः—

" तुच्छत्वान्नासदासीद्गगनकुसुमवद्भेदकं नो सदासीत्
किंन्वाभ्यामन्यदासीद्व्यवहृतिगतिसन्नास लोकस्तदानीम् ।
किं त्वर्वागेव शुक्तौ रजतवदपरो नो विराड् व्योमपूर्वः
शर्मण्यात्मन्यथैतत्कुहकसलिलवत्किंभवेदावरीवः ॥
(२३) ॥ इति ।

८-७-१७-२ न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्प्रकेतः । आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किञ्चनास ।

अत्र वस्तुतो ब्रह्मरूपाणामेव सतां जीवानां बन्धमोक्षावप्यज्ञानकृतौ । यथा रात्रिदिनव्यवहारः जगच्चक्षुषां सूर्यादर्शनदर्शनजनितो भास्करे आपेक्षिकः, न तु सततोदिते तस्मिन्वास्तविकः, तथा ब्रह्मण्यपि बन्धमोक्षव्यवहारः न वास्तविकः, किं तु आज्ञानिक इत्युच्यते । जीवव्यवहारः कथमित्याकाङ्क्षायां "आनीदवातं स्वधया तदेकं" इति शुद्धस्य ब्रह्मणः प्राणसंबन्धाभावादप्राणं एकमद्वितीयं तत् मायया कर्तृसंज्ञं हिरण्यगर्भाख्यमभवत् । तदन्यन्नासीत् । तदेव स्वधाशब्दवाच्यमायया परिवृतं सत् जीवभावं प्राप्तं, न पृथक्कश्चिज्जीवोऽस्तीत्यर्थः । तथा च शतश्लोक्यामाचार्यपादाः—

" बन्धो जन्मात्ययात्मा यदि न पुनरभूत्तर्हि मोक्षोऽपि नासी-
द्यद्वद्रात्रिर्दिनं वा न भवति तरणौ किं तु दृग्दोष एषः ।
अप्राणं शुद्धमेकं समभवदथ तन्मायया कर्तृसंज्ञं
तस्मादन्यच्च नासीत्परिवृतमजया जीवभूतं तदेव" ॥ २४ ॥ इति ।

८-७-१७-३१ तम आसीत्तमसा गूढमग्रे प्रकेतं सलिलं सर्वमा इदम् । तुच्छ्येनाभ्वपिहितं यदासीत्तपसस्तन्महिनाजायतैकम् ।

८-७-११-४७ कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत् । सतो बन्धुमसति निरविन्दन्हृदि प्रतीष्या कवयो मनीषा ।

अत्र प्रथममन्त्रेण भावरूपमज्ञानं ब्रह्माधिष्ठितं सत् प्रळयकाले सर्वावारकं सूक्ष्मजगद्रूपं चासीत् । तदा तमस्तादात्म्यापन्नजगतः तमसस्सकाशात् यदाविर्भवनं नामरूपाभ्यां तदेव तस्य जन्म । तथा च तस्मिन्काले मायायां तिरोहितं जगत् नीरे क्षीरमिव ज्ञातुमशक्यम् । तुच्छकल्पेन भावरूपाज्ञानेन आवृतमपि ब्रह्मणस्तपसो महिम्ना स्रष्टव्यपर्यालोचनरूपस्य माहात्म्येनोत्पन्नमित्युच्यते । "कामस्तदग्रे" इति द्वितीयमन्त्रेण ईश्वरस्य स्रष्टव्यपर्यालोचनं कथं कुतो जायते इत्याशङ्कायां, सर्वप्राणिनामन्तःकरणसमवेतं पुण्यादिरूपं यत्कर्म सृष्टिसमये फलोन्मुखमासीत्, तद्दृष्ट्वा कर्माध्यक्षस्य परमेश्वरस्य सिसृक्षा जाता, ततः सृजति यथा कल्पान्तर इत्युच्यते । इममेवार्थमनुवदन्ति शतश्लोक्यामाचार्याः—

"प्रागासीद्भावरूपं तम इति तमसा गूढमस्मादतर्क्यं क्षीरान्तर्यद्वदंभोजनिरिह जगतो नामरूपात्मकस्य । कामाद्धातुः सिसृक्षोरनुगतजगतः कर्मभिस्संप्रवृत्ताद्रेतोरूपैर्मनोभिः प्रथममनुगतैः संततैः कार्यमाणैः ॥ २५ ॥ इति ।

८-४-१७-२ पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् ।

अत्र निर्विशेषम् अद्वितीयं ब्रह्मैव भूतभविष्यद्वर्तमानप्रपञ्चरूपेण वर्तत इति वर्ण्यते ।

अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः । अहं मित्रावरुणोभाविभर्म्यहमिन्द्राग्नी अहमश्विनोभा ॥—

इत्यारभ्य "अहमेव वात इव प्रवाम्यारभमाणा भुवनानि विश्वा परो दिवा पर एना पृथिव्यैतावती महिना संबभूव" इत्यन्तः सूक्तभागः देवीसूक्ततया प्रसिद्धः अष्टमन्त्रात्मकः । अत्र अंभृणमहर्षिदुहिता आंभृणी नाम कन्या स्वस्य अद्वैतात्मज्ञानफलभूतं सार्वात्म्यानुभवं प्रकाशयति । तेन तस्या अद्वितीयब्रह्मरूपत्वेन सर्वजगद्रूपत्वं सर्वजगदधिष्ठानत्वं च वर्ण्यते ।

८-३-१७-७ न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव । नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति ।

अत्र निर्विशेषब्रह्मात्मानुभवः सर्वेषां कुतो न जायते, सर्वेषां जीवानामात्मत्वाविशेषात् ब्रह्मणः इति शङ्का परिह्रियते । तथाहि—हे नरा यूयं परमात्मानं न जानीथ, यः परमात्मा इमानि भूतान्युत्पादितवान् । कुतो न ज्ञायते इत्याकाङ्क्षायां, "अन्यद्युष्माकमन्तरं बभूव" इत्युत्तरम् । अयमर्थः । युष्माकं अहंप्रत्ययगम्यानां जीवानामन्यत् वेदान्तवेद्यं परमात्मतत्त्वम् अन्तरं व्यवहितं वर्तते । तस्मादहंप्रत्ययेषु परमात्मा न प्रकाशत इति । ननु वस्तुतो जीवब्रह्मणोरभेदादहंप्रत्ययेऽपि परमात्मा कुतो न भासते इति शङ्कायां, "नीहारेण प्रावृता जल्प्या च" इति उच्यते । अयमर्थः । हे नरा यूयं नीहारेण नीहारसदृशेनाज्ञानेन आवृताः ।

अतो न जानीथ । अत एवोदरंभराः नानाविधेषु यज्ञेषु प्रउगनिष्केवल्यादिशस्त्रं शंसन्तश्चरथ । तस्मात् ब्रह्मभावो नानुभूयते भवद्भिः । अज्ञानरूपावरणनिवृत्तौ सत्यां जायेत ब्रह्मात्मानुभव इति, माया, तदावृतत्वं ब्रह्मणः, तेन च बन्धः, आवरणनिवृत्तौ स्वरूपाविर्भावो मोक्ष इत्यादयः अत्र प्रतिपादिताः ।

८-६-१६-३ चतुष्कपर्दा युवतिस्सुपेशा घृतप्रतीका वयुनानि वस्ते । तस्यांसुपर्णा वृषणा निषेदतुर्यत्र देवा दधिरे भागधेयम् ।

अत्र मायाया उत्कर्षो वर्ण्यते । तथा हि— अस्यां मायायां चतुष्कपर्दाः - चत्वारः कपर्दाः उत्कर्षाः सन्ति । तत्र आद्यः उत्कर्षः युवतिरिति । एषा माया नित्यं नूतना कदाऽपि स्थविरा न भवति । अतो युवतिरित्युच्यते । अस्मद्देहादिवार्धकेऽपि सा तरुण्येवास्ते । अयमेक उत्कर्षः । अथ द्वितीयः उत्कर्षः सुपेशा इति । सुकुशलेत्यर्थः । यस्मात्कारणादियम् अघटितघटनापाटवं कौशलं विक्षेपे याति । तस्मात् सुपेशस्त्वं तस्या द्वितीय उत्कर्षः । तथेयं घृतप्रतीका । घृतवन्मृष्टं प्रतीकं मुखं यस्यास्सा तथा । यस्य कस्याप्यारम्भे मृष्टं दर्शयति, परिणामे विषोपमम् इत्यर्थः । अयं तृतीय उत्कर्षः । अथ वयुनानि उपनिषत्प्रतिपादितान्यात्मज्ञानानि आवरणशक्त्याऽऽच्छादयति । अयं चतुर्थ उत्कर्षः । तस्यां चतुरुत्कर्षवत्यां मायायां वृषणौ सुपर्णौ जीवपरमात्मानौ तिष्ठतः । यया मायया इन्द्रियादयः स्वस्वविषये प्रवर्तन्त इति । अत्र मायाधीनः जीवपरमात्मभेद इति, मायासंबन्धं विना इन्द्रियादयो जीवं स्वस्वविषये- व्याकृष्टुं न शक्नुवन्ति इति च वर्णितम् । अस्मान्मन्त्रात्पूर्वं द्वौ मन्त्रौ जीवपरमायाप्रतिपादकतया सायणाचार्येण व्याख्यातौ । इमं मन्त्रार्थमनुसृत्य शतश्लोक्यां आचार्यपादाः—

"चत्वारोऽस्याः कपर्दा युवतिरथ भवेन्नूतना नित्यमेषा
माया वा पेशला स्यादघटितघटनापाटवं याति यस्मात् ।
स्यादारम्भे घृतास्याश्रुतिभववयुनान्येवमाच्छादयन्ती
तस्यामेतौ सुपर्णाविव परपुरुषौ तिष्ठतोऽर्थप्रतीत्या" ॥ २६ ॥ इति प्राहुः ।

८-६-१६-४ एकस्सुपर्णः ससमुद्रमाविवेश स इदं विश्वं भुवनं विचेष्टे । तं पाकेन मनसा पश्यमन्तितस्तं माता रेह्हि स उ रेह्हि मातरम् । सुपर्णं विप्राः कवयो वचोभिरेकं सन्तं बहुधा कल्पयन्ति ।

अत्र जीवपरमात्मनोर्मध्ये एकः परमात्मा असङ्गोऽस्ति । तदपरो जीवः अज्ञानसिन्धुं प्रविष्टः । स चात्मस्वरूपं विस्मृत्य विविधजगदाकारं प्रातिभासिकमाभासम् आत्मानं पश्यति । ततः पाकेन मनसा उत्पन्नात्मतत्त्वनिश्चयात्मिकया बुद्ध्या स्वस्वरूप एव सर्वं पश्यति सर्वं ब्रह्म ब्रह्मैवाहमस्मीति । तदा सा माया तं जीवं विसृजति । स च तां मायां विसृजति । अन्तर्दृष्ट्या विचार्यमाणे मायाजीवयोरसंस्पर्शो अखण्डमेवानुभूयते । तर्हि सुपर्णद्वयकल्पना कुत इत्यत आह—"एकं सन्तं बहुधा कल्पयन्ति" इति । अयमर्थः । तमेकमेवात्मानं विप्राः श्रुतिज्ञाः कवयः शिष्यबोधादिव्य-

बह्वातिविधये वाग्भिरनेकधा कल्पयन्ति । न खलु-भवत इति । तथा चेयं श्रुतिः जीवपरयोर्भेदः मायानिबन्धनः, माया च यावत्तत्त्वज्ञानं जीवमावृणोति । आवरकाज्ञाने निवृत्ते ब्रह्मात्मतत्त्वं प्रकाशते इत्येतत्प्रतिपादयति । तथा च शतश्लोक्यामाचार्यपादाः प्राहुः—

"एकस्तत्रास्त्यसङ्गस्तदनु तदपरोऽज्ञानसिन्धुं प्रविष्टो
विस्मृत्यात्मस्वरूपं स विविधजगदाकारमात्मानमैक्षत् ।
बुद्ध्यान्तर्यावदैक्षद्विसृजति तमजा सोऽपि तामेवमेकः
तावद्विप्रास्तमेकं कथमपि बहुधा कल्पयन्ति स्ववाग्भिः" ॥ २७ ॥ इति ।

अथ प्रत्यगात्मा प्रजननसमये गर्भाविर्भावे सति नागच्छति, न यात्यन्तकाले, विभुत्वात्, अतोऽपरिच्छिन्नोऽखण्डोऽस्तीति प्रतिपादयितुं तत्काले लिङ्गदेहविशिष्टमनस एव गर्भे प्रवेशः, अन्तकाले ऊर्ध्वलोकगमनं च भवति इति प्रतिपादयन्तः केचन मन्त्राः प्रदर्श्यन्ते । तत्र काचनाख्यायिका वर्तते । तथाहि—पूर्वं सनातिसंज्ञस्य राज्ञो गृहे बन्धुः सुबन्धुः श्रुतबन्धुर्विप्रबन्धुरिति चत्वारो भ्रातरः पुरोहिता आसन् । ते द्विषन्नाशाय राज्ञा अभिचारकर्म कर्तुं नियोजिताः । ते चाभिचारकर्म न कृतवन्तः । ततः सनातिनाम्ना राज्ञा ते पौरोहित्याद्बहिष्कृताः । मायाविनौ च अपरौ पुरोहितौ संवृत्तौ । तेन बन्ध्वादयः क्रुद्धाः सन्तः राज्ञः आभिचारिकं कर्तुं प्रवृत्ताः । तच्छ्रुत्वा मायाविनौ पुरोहितौ आभिचारिककर्मणा सुबन्धुं जघ्नतुः । ततः सुबन्धोर्भ्रातरः तं पुनर्जीवयितुं वक्ष्यमाणैर्मन्त्रैरुपायं चक्रुः । तत्र प्रथमो मन्त्रः—

८-१-२० यत्ते॑ य॒मं वै॑वस्व॒तं मनो॑ ज॒गाम॑ दूर॒कम् । तत्त॒ आ व॑र्तयामसी॒ह क्षया॑य जी॒वसे॑ ।

पुरुषस्य म्रियमाणस्य मनो नाम बहुधा विशीर्णं भवति, तस्य पुनस्संभरणमन्त्र उच्यते । हे म्रियमाण पुरुष ते - तव मनः इन्द्रियवर्गसहितं विवस्वतः पुत्रं यमं दूरकं अत्यन्तं दूरं यथा भवति तथा जगाम । ते तव तन्मनः आवर्तयामसि आवर्तयामः । किमर्थं, इह क्षयाय इह लोके, निवासाय जीवसे चिरकालजीवनाय इत्यर्थः । अत्र लैङ्गिकमनस एव बहिर्गमनपुनरावर्तनयोर्वर्णनात् आत्मनोऽन्यत्र गमनं नास्ति विभुत्वादित्यादि सूचितम् । अथ मनसः अन्तकाले बहिर्निष्क्रमणे प्राप्ते, बाह्यस्थानानि द्वादश प्रदर्श्य तेभ्यः पुनरावर्तनं क्रमेण वर्ण्यते । तत्र द्वितीयमन्त्रो यथा—

८-१-२०-२ यत्ते॒ दिवं॒ यत्पृ॑थि॒वीं मनो॑ ज॒गाम॑ दूर॒कम् । तत्त॒ आ व॑र्तयामसी॒ह क्षया॑य जी॒वसे॑ ।

अत्रायमर्थः । हे सुबन्धो यत्ते मनो दिवं जगाम यच्च पृथिवीम् । दूरकं क्रियाविशेषणमेतत् । तदिह निवासाय जीवनाय चावर्तयामः इति । अत्र सूक्ते द्वादशमन्त्रेष्वपि प्रथमपाद एव व्यत्यासः । द्वितीयतृतीयचतुर्थपादास्सरूपाः ।

८-१-२०-३ यत्ते॒ भूमिं॒ चतु॑र्भृष्टिं॒ जीवसे

८-१-२०-४ यत्ते॒ चत॑स्रः प्र॒दिशो॒ जीवसे

८-१-२०-५ यत्ते॑ समु॒द्रम॑र्ण॒वम् जीवसे

८-१-२०-६ यत्ते मरीचीः प्रवतो जीवसे
८-१-२१-१ यत्ते अपो यदोषधीः जीवसे
८-१-२१-२ यत्ते सूर्यं यदुषसं जीवसे
८-१-२१-३ यत्ते पर्वतान्बृहतो जीवसे
८-१-२१-४ यत्ते विश्वमिदं जगत् जीवसे
८-१-२१-५ यत्ते पराः परावतो जीवसे
८-१-२१-६ यत्ते भूतं च भव्यं च मनो
जगाम दूरकम् ।
तत्त आवर्तयामसीह क्षयाय
जीवसे । इति ।

एवं अन्योऽपि मन्त्रो वदति ।

८-१-२१-४ यमादहं वैवस्वतात्सुबन्धोर्मन
आभरम् ।
जीवातवे न मृत्यवेऽथो अरिष्ट-
तातये ॥

अनेन मन्त्रेण सुबन्धोर्मनसः प्रत्यावर्तनं कृतम् । स च पुनरुज्जीवित इति वर्णितम् ।

अत्रार्थे शतश्लोक्यामाचार्यपादाः—

"नायाति प्रत्यगात्मा प्रजननसमये नैव यात्यन्त-
काले
यस्सोऽखण्डोऽस्ति लैङ्गं मन इह विशति प्रव्रज-
त्यूर्ध्वमर्वाक् ।
तत्कार्श्यं स्थूलतां वा न भजति वपुषः किं तु
संस्कारजातं
तेजोमात्रा गृहीत्वा व्रजति पुनरिहायाति
तैस्तैस्सहैव" ॥ २७ ॥

"आसीत्पूर्वं सुबन्धुर्भूशमतनिष्ठुरो यः पुरोधास्स-
नातेः
ब्राह्मणात्कूटाभिचारात्स खलु मृतिमितस्तन्मनो-
गात्कृतान्तम् ।
तद्भ्राता श्रौतमन्त्रैः पुनरनयदिति प्राह सूक्तेन वेद-
स्तस्मादात्माभियुक्तं व्रजति ननु मनः कर्हि-
चिन्नान्तरात्मा" ॥२८॥ इति ।

४-७-३३-३ रूपं रूपं प्रतिरूपो बभूव
तदस्य रूपं परिचक्षणाय । इन्द्रो मायाभिः पुरु-
रूप ईयते युक्ता ह्यस्य हरयः शता दश ।

अनेन मन्त्रेण इन्द्रः परमात्मा सर्वगतः सच्चिदानन्दरूपः अन्तःकरणाद्युपाधिभिः प्रतिशरीरमवच्छिन्नस्सन् जीव इति व्यपदिश्यते । स एव अनादिमायाशक्तिभिः वियदादिजगदात्मना विवर्तते । इन्द्रियवृत्तयश्च तेनैव संबद्धाः । एतत्सर्वं तस्य परमात्मनो वास्तवं रूपं तस्य दर्शनायेत्यर्थः । यद्वा रूपं रूपं—रूप्यतेऽनेनेति रूपं, शरीरमित्यर्थः । रूपं रूपं प्रतिशरीरं, प्रतिरूपः प्रतिबिम्बरूपस्सन् सर्वाणि शरीराणि प्राप्नोत् बिम्बभूत ईश्वरः । तच्च प्राप्तं प्रतिबिम्बरूपमस्य परमात्मनः प्रतिचक्षणाय—प्रतिनियताकारस्य ब्रह्मरूपस्य दर्शनाय भवति इति जीवपरयोरवच्छेदवादः बिम्बप्रतिबिम्बवादश्च निरूपितः । अतो ज्ञायते जीवपरयोरभेदः श्रुत्यर्थ इति । अस्य च दशशतसहस्रसंख्याका या इन्द्रियवृत्तयः विषयग्रहणायोयुक्तास्सन्ति तदप्यस्य वास्तवरूपदर्शनाय भवति इत्यर्थः ॥

बृहदारण्यकोपनिषदि च द्वितीयाध्याये पञ्चमब्राह्मणे, "तदेतदृषिः पश्यन्नवोचत् रूपं रूपं प्रतिरूपो बभूव" इत्यादिना अयमेव मन्त्रः तत्रैव पूर्वमुक्तकक्ष्य(गोप्य) मधुरूपाद्वितीयात्मज्ञानप्रकाशकत्वेनानूदितः ।

अथ अद्वैतसिद्धान्तानुकूलतया सायणाचार्यैर्यत्र यत्रार्थो निरूपितः, ते मन्त्रा अष्टकाध्यायवर्गमन्त्राणां अङ्कनिर्देशपूर्वकं प्रतीकधारणप्रदर्शनद्वारा प्रदर्श्यन्ते ।

३-७-१४-५ हँसः शुचिषद्वसुरन्तरिक्षसत् १
२-३-१४-२ सप्त युञ्जन्ति रथमेकचक्रम् २
२-३-१४-३ इमं रथमधि ये संप्रतस्थुः ३
२-३-१४-४ को ददर्श प्रथमं जायमानम् ४
२-३-१४-५ पाकः पृच्छामि मनसा विजानन् ५
२-३-१५-२ इह ब्रवीतु यईमङ्ग वेद ६
१-८-८-१ चित्रं देवानामुदगादनीकम् ७
२-३-१४-१ अस्य वामस्य पलितस्य होतुः ८
२-३-१६-१ तिस्रो मातॄस्त्रीन् पितॄन्बिभ्रदेकः ९
२-३-१७-१ स्त्रियस्सतीस्ता उ मे पुंस आहुः १०
२-३-१७-३ अवः परेण पितरं यो अस्य ११
२-३-१७-५ द्वा सुपर्णा सयुजा सखाया १२
२-३-१८-१ यत्रासुपर्णा अमृतस्य भागम् १३
२-३-१८-२ यस्मिन् वृक्षे मध्वदः सुपर्णा १४
२-३-१९-५ अनच्छये तुरगातु जीवम् १५
२-३-२०-१ अपश्यं गोपामनिपद्यमानं १६
२-३-२०-२ य ईं चकार न सो अस्य वेद १७
२-३-२१-१ सप्तार्धगर्भा भुवनस्य रेतः १८
२-३-२१-२ न विजानामि यदि वेदमस्मि १९
२-३-२१-३ अपाङ् प्राङेति स्वधया गृभीतः २०
२-३-२१-४ ऋचो अक्षरे परमे व्योमन् २१
२-३-२२-४ त्रयः केशीन ऋतुथा विचक्षते २२
२-३-२२-६ इन्द्रं मित्रं वरुणमग्निमाहुः २३
८-१-२०-१ 'यत्ते यमं वैवस्वतं' इत्यादयो द्वादश मन्त्राः २४
८-१-२६-४ यस्मादहं वैवस्वतात् २५
४-७-३३-३ रूपं रूपं प्रतिरूपो बभूव २६
८-३-१६-१ 'य इमा विश्वा भुवनानि जुह्वत्' इति सूक्तं सप्तमन्त्रात्मकम् २७
८-३-१७-१ 'चक्षुषः पिता मनसा हि धीरः' इति सप्तमन्त्रात्मकं सूक्तम् २८
८-६-१६-१ 'घर्मा समन्ता त्रिवृतं व्यापतुः' इति पञ्चमन्त्रात्मको वर्गः २९
८-७-१७-१ 'नासदासीन्नोसदासीत्तदानीं' इति सप्तमन्त्रात्मको वर्गः ३०
८-४-१७-१ 'सहस्रशीर्षा पुरुषः' इति षोडशमन्त्रात्मकं पुरुषसूक्तम् ३१
८-७-१-१ तदिदास भुवनेषु ज्येष्ठम् ३२
८-७-११-१ 'अहं रुद्रेभिर्वसुभिश्चरामि' इदमष्टमन्त्रात्मकम् ३३
८-७-२३-३ यं कुमारनवं रथम् ३४
८-७-२३-४ यं कुमार प्रावर्तयः ३५
८-७-२३-५ कः कुमारमजनयत् ३६
८-७-२३-६ यथा भवदनुदेयी ३७
८-८-३५-१ पतङ्गमक्तमसुरस्यमायया ३८
८-८-३५-२ पतङ्गो वाचं मनसा बिभर्ति ३९

एवं, "समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः ।

जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः" ॥

इति मन्त्रे स्पष्टमद्वैतप्रक्रिया उक्ता । शरीरे निमग्नः—तदभेदमापन्नः, स्वस्य अनीशया ईश्वरभेदभावनया मुह्यति । वृक्षशब्दितशरीराद्भिन्नं आत्मानमीश्वरं यदा पश्यति, तदा वीतशोको भवति इति मन्त्रार्थः ॥

अथैतरेयारण्यके उपदिश्यमानास्सर्वा अप्युपासनाः प्रायः अद्वैतज्ञानानुकूलतया वर्तन्ते । यद्यपि तास्सगुणाः, तथाऽपि तासां उपासकस्य सार्वात्म्यादिफलकत्वात्, उपास्योपासकयोः अभेदभावनाविषयकत्वात्, व्यतिहारोक्त्या च ताः अद्वैतानुकूलाः प्रतीयन्ते ।

तथाहि—(२-२-४) तद्योऽहं सोऽसौ योऽसौ सोऽहं, तत्—तस्मिन् सर्वात्मके प्राणदेवतास्वरूपे योऽहं उपासकशरीरवर्ती, सोऽसौ—स एवादित्यमण्डलस्थः पुरुषः, तथा योऽसौ—अधिदैवम् आदित्यमण्डलस्थः पुरुषः यः, सोऽहं—स एवोपासकशरीरस्थोऽहमस्मि इत्यन्योन्यतादात्म्यं ध्यायेत् इत्यर्थः । तथा च श्रुतिस्तत्र तत्र अद्वैते तात्पर्यवती तदनुकूलतया उपासनं विधत्ते ।

सर्वमूलप्रमाणाय विष्णोरमिततेजसे ।
आद्याय सर्ववेदानाम् ऋग्वेदाय नमो नमः ॥

श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादशङ्करं लोकशङ्करम् ॥

॥ इति शिवम् ॥

(ई) यजुर्वेदे अद्वैतभावाः

श्री शंकरकिंकराः

யஜுர்வேதத்தில் 101 சாகைகள்; அவைகளில் பிரசித்தி பெற்றதும் தக்ஷிண தேசத்தில் வியாபித்திருப்பது மானது தைத்திரீய சாகை; அதில் உபநிஷத்திலும் கர்மகாண்டத்திலும் பலவிடங்களில் அத்வைத பாவங்கள் காணப்படுகின்றன.

'அவனே பிரபஞ்சத்தை ஸ்ருஷ்டித்து அதற்குள் புகுந்தான்' (தை-உ) 'புருஷனிடத்தில் இருப்பவனும் சூர்யனிடத்திலிருப்பவனும் ஒன்றே' (தை-உ) 'எவன் நமக்கு தகப்பனும் காப்பாற்றுபவனுமோ, எவன் ஒருவனாக இருந்து தேவர்களின் பெயரையடைகிறானோ, அவனை எல்லாப் புவனங்களும் பிரளய காலத்தில் அடைகின்றன.' (தை-ஸம்.)

'எவன் இந்த உலகங்களைப் படைத்தானோ அவனையறியமாட்டீர்கள். அவனுக்கும் உங்களுக்கும் நடுவில் பனிபோல் ஒரு மறைப்பு இருக்கிறது; அதால் மறைபட்டு உயிரில் ஆசையுடன் கர்மங்களைச் செய்கிறார்கள்'. (தை-ஸம்.)

The Yajurveda is divided into 101 ṡakhas of which the Taittirīya is widely prevalent in South India. We find in the Taittirīya Upaniṣad as well as in the Karmakāṇḍa many passages expounding the Advaitic principles.

He created the universe and entered into it (*Tai. Up.*)

He who is in the sun ; He who is in the person ; They both are One. (*Tai, Up*). He who is our father and preserver, who created as from his own self, who assumes the names of all the Devas, in him all the world rests at the deluge. (*Tai. Sam*).

You do not know him who created the world. There is something dewlike betwixt you. People take pleasure in the vital airs and talk under the mask of the dew (*of Nescience*)

शुक्लयजुर्वेदे अद्वैतभावाः

एवं किल उपाख्यायते पराशरात् सत्यवत्यां व्यासरूपेणावतीर्णो भगवान् वेदराशिं विभज्य पैलवैशंपायनजैमिनिसुमन्तुसंज्ञकेभ्यः चतुर्भ्यः शिष्येभ्यःक्रमेण ऋग्यजुस्सामाथर्वाख्याश्चतस्रः संहिताः प्रददौ। ते च पैलादयः स्वशिष्यगणान् अध्यापयामासुः स्वां स्वां संहिताम्। अथ कदाचित् दैवयोगेन यजुर्वेदाध्यापननिरतः वैशंपायनः अनिच्छयापि पदा स्पृष्टस्य बालस्य मरणेन ब्रह्महत्यां प्राप्तः। तच्छिष्यास्तु गुरोः पापशांतये तन्निदेशेन उग्रं तपश्चेरुः। याज्ञवल्क्यस्तु वैशंपायनशिष्येष्वन्यतमः अन्यान् सहाध्यायिनोऽवजानन्निव प्रोवाच "किमेभिः अल्पसारैः चरितेन मन्दतपसा। अहं चरिष्यामि सुदुश्चरं तप" इति। गुरुस्तु "अलं त्वया विप्रावमन्त्रा शिष्येण, मदधीतं त्यक्त्वा याहि" इत्याज्ञापयांचकार। सोपि महाप्रभावो याज्ञवल्क्यः गुरोरधीतं यजुषां गणं छर्दित्वा निष्क्रम्य उग्रं तपश्चरन् भगवन्तं त्रयीमयमादित्यमुपतस्थे। तस्य भक्त्या तुष्टो भगवान् सहस्ररश्मिः याज्ञवल्क्याय अयातयामानि यजूंषि अन्वग्रहीत्। याज्ञवल्क्येन छर्दिताः मन्त्राः पुनः इतरशिष्यैः तित्तिरिरूपेण खादिताः तैत्तिरीया अभवन्। तेन आदित्यप्रसादलब्धस्तु शुक्लयजुर्वेदः वाजसनेय इति चाख्यायते। शुक्लयजुर्वेदस्य पञ्चदशशाखाः काण्वमाध्यंदिनप्रभृतयः। तेष्वपि बहुलं अद्वैतभावाः सन्दृश्यन्ते॥

तथाहि—शतपथब्राह्मणान्तःपातिन्यां बृहदारण्यकोपनिषदि प्रथमाध्याये श्रूयते "ब्रह्म वा

इदमग्र आसीत् तदात्मानमेवावेत् अहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत् तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्" इत्यादि। अत्र च स्पष्टं जीवस्य ब्रह्मणा अभेदज्ञानं सर्वात्मभावशब्दितमोक्षसाधनमिति। तत्रैव "द्वितीयाद्वै भयं भवति" इति द्वैतस्य भयाख्यसंसारहेतुत्वं स्फुटीकृतम्। न च "स वै नैव रेमे तस्मादेकाकी न रमते" इत्यपि श्रवणात् द्वितीयस्यैव सुखहेतुत्वावगमात् कथमिदमिति शङ्का संभवति। अस्य अविद्वद्विषयत्वात्। अत एवारत्यादिवचनं संगच्छते। नहि ज्ञानिनः अरतिः संभवतीति।

एवं द्वितीयाध्याये, "ब्रह्म ते ब्रवाणि" इति स्वसमीपं प्राप्तं गार्ग्यं अपरब्रह्मवित्त्वेन तूष्णींभूतं बुबोधयिषुः अजातशत्रुस्तं सुप्तपुरुषसमीपमानीय यष्टिघातोत्थापनेन प्राणस्य अब्रह्मत्वमुपपाद्य तत्साक्षिणं जीवमेव ब्रह्मत्वेनावेदयति। तमेव अग्निविस्फुलिंगन्यायेन सकलप्रपञ्चोपादानं सत्यस्य सत्यं निर्धारयति। तदिदं अद्वैतमत एव सङ्गच्छते। मैत्रेयीब्राह्मणे च प्रियसंसूचितस्य आत्मन एव द्रष्टव्यत्वं प्रक्रम्य तस्यैव "अस्य महतो भूतस्य निश्वसितमेतत्" इत्यादिना जगदुपादानत्वं कथयति॥

"यत्र हि द्वैतमिव भवति तदितर इतरम् पश्यति" इत्यादिना संसारावस्थायां दर्शनादिव्यवहारः, "यत्र त्वस्य सर्वमात्मैवाऽभूत् तत्केन कं पश्येत्" इत्यादिना मोक्षावस्थायां दर्शनादिव्यवहाराभावश्च अद्वैतशास्त्राभिमतमोक्षप्रक्रियां दृढीकुरुतः। "अयमात्मा ब्रह्म" इति च अत्रैव महावाक्यान्तरम्। तृतीये च "यत्रायं पुरुषो म्रियते उदस्मात्प्राणाः क्रामन्त्याहो नेति"—इति आर्तभागप्रश्ने याज्ञवल्क्यप्रतिवचनं "नेति होवाच याज्ञवल्क्य" इति। अत्र ज्ञानिनः अत्रैव मोक्षः, नतु लोकान्तरगमनमिति अद्वैतपक्ष एव समञ्जसम्॥

तत्रैव अक्षरं परं ब्रह्म प्रकृत्य "नान्यदतोऽस्ति द्रष्टृ श्रोतृ मन्तृ" इत्यादिवचनं जीवस्य ब्रह्माव्यतिरेकं स्पष्टीकरोति। चतुर्थाध्याये च ज्योतिर्ब्राह्मणे 'कतम आत्मेति' इति जीवमुपक्रम्य तमेव अवस्थात्रयविरहितत्वेन संशोध्य पुनः तमेव "स वा एष महानज आत्मा" इति समाकृष्य "सर्वस्येशानः सर्वस्याधिपतिः....एष सर्वेश्वर एष भूताधिपति" रित्यादिना ईश्वराभेदं विदधती श्रुतिः जीवस्यैव शोधितं रूपं ब्रह्मेति प्रकटयति।

शुक्लयजुर्वेदसंहितायामपि अद्वैतभावा उपलभ्यन्ते—तथा हि रुद्राध्याये श्रीरुद्रस्य सर्वात्मत्वं, पुरुषसूक्ते च "पुरुष एवेदँ सर्वं यद्भूतं यच्च भव्यं" इत्यत्रापि पुरुषशब्दितस्य परमात्मनः सर्वात्मत्वं उच्यमानं ईश्वरस्य सर्वोपादानत्वेन सर्वतादात्म्यं, सर्वेषां ब्रह्मव्यतिरेकेण अभावं बोधयतीति सिद्धमद्वैतम्। पुनश्च "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" (३१-१८) इति मोक्षस्य ज्ञानमात्रसाध्यत्वं दृढीकरोति, ज्ञाननिवर्त्यत्वेन मृत्युशब्दोक्तबन्धस्य मिथ्यात्वं सूचयति।

"परिद्यावापृथिवी सद्य इत्वा परिलोकान् परिदिशः परिस्वः।
ऋतस्य तन्तुं विततं विचृत्य तदपश्यत् तदभवत् तदासीत्"॥ (३२-१२)

अयमर्थः—(भाष्ये) परीत्युपसर्गः इत्वेत्यनेन संबध्यते, सर्वमेधयाजी तद्ब्रह्म अपश्यत् पश्यति, तत् अभवत् भवति, तदासीत्, वस्तुगत्या तदेव अस्ति, छन्दसि कालानियमात्। अज्ञाननिवृत्तिरेव दर्शनं भवनं चेति भावः। 'तदेव सन्तस्तदु तद्भवाम' इत्युक्तेः। किंकृत्वा—द्यावापृथिव्यादिकं परीत्य परितः तद्रूपेण ज्ञात्वा, यज्ञस्य ऋतस्य तन्तुं इतिकर्तव्यतां विचृत्य समाप्येति यावत्। अत्र जीवस्य

स्वरूपमेव ब्रह्म, तज्ज्ञानमेव मोक्षसाधनमिति प्रतिपादितम् ॥

"परीत्य भूतानि परीत्य लोकान् परीत्य सर्वाः
प्रदिशो दिशश्च ।
उपस्थाय प्रथमजामृतस्यात्मनात्मानमभिसंविवेश"
॥ ३२—११ ॥

अयमर्थः—किंच सर्वभूतेषु अहमस्मि, सर्वाणि भूतानि मयि इति ज्ञानवतः मुक्तिरुच्यते —एवं ज्ञानवान् सर्वमेधयाजी आत्मना जीवरूपेण तस्य यज्ञस्य आत्मानं अधिष्ठातारं परमेश्वरं अभिसंविवेश प्रविशति । किं कृत्वा—भूतानि परीत्य ब्रह्मत्वेन ज्ञात्वा, लोकान् भूरादीन् परीत्य ब्रह्मरूपान् ज्ञात्वा, प्रथमजां वाचं वेदरूपां संसेव्य श्रवणादिकं कृत्वेत्यर्थः । अत्र च जीवस्य ब्रह्मरूपतापत्तिः मोक्षः स च ज्ञानसाध्यः इति स्फुटीकृतम् ॥

संहितोपनिषदि च "यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते" ॥
(४०-६)

अत्र भाष्यं—यस्तु सर्वाणि चेतनाचेतनानि आत्मन्येव पश्यति । मय्येव सर्वाणि भूतान्यवस्थितानि न मद्व्यतिरिक्तानि अहमेव परब्रह्मेति सर्वभूतेषु च आत्मानमवस्थितं तद्व्यतिरिक्तं पश्यति, सः न विजुगुप्सते घृणां न करोति । न विचिकित्सति इति माध्यंदिनपाठः ।

"यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः"
॥ ४०-७ ॥

अत्र च आत्मैवाभूदित्यस्य आत्मव्यतिरेकेण नास्तीत्यर्थः । एवकारस्वारस्यात् एकत्वमनुपश्यतः इत्युक्तेश्च । ततश्च द्वैताभावोपलक्षितब्रह्मसाक्षात्कारात् शोकमोहोपलक्षितः संसारो निवर्तत इत्यवगतम् । तथा,

अहं परस्तात् अहमवस्तात् यदन्तरिक्षं तदुमेति
नास ।
अहं सूर्यमुभयतो ददर्शाहं देवानां परमं गुहायत् ॥
(८-६-२)

अत्र मन्त्रद्रष्टुः सर्वात्मकत्ववर्णनं स्वस्य सर्वात्मकब्रह्मरूपत्वं सर्वस्य स्वव्यतिरेकेणाभावं च द्योतयति ।

कृष्णयजुर्वेदे अद्वैतभावाः

तत्र तावत् कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि विस्पष्टमद्वैतभावा अवगम्यन्ते । तथाहि—आनन्दवल्ल्यामादौ ब्रह्मणः "सत्यं ज्ञानमनंतं ब्रह्म" इति लक्षणमुखेन त्रिविधपरिच्छेदराहित्यमुक्त्वा विदुषः "सोऽश्नुते सर्वान् कामान् सह" इति यौगपद्येन सकलानन्दानुभवितृत्वमाह । तच्चाद्वैतगमकं । न हि इतरमते सकलजीवगतभूतभविष्यदादिसकलानन्दानुभवितृत्वं मुक्तस्येच्छन्ति । अद्वैते तु सर्वेषामानन्दानां तत्तद्वृत्त्यभिव्यक्तब्रह्मानन्दरूपत्वोपगमात् इदं संगच्छततेतराम् । एवं "तस्माद्वा एतस्मादात्मन आकाशः संभूतः" इत्यत्र प्रकृतब्रह्माभेदेन जीवनिर्देशः इमं सिद्धांतमुपोद्बलयति । तथा "तत्सृष्ट्वा तदेवानुप्राविशत्" इति स्रष्टुरेवाविकृतस्य जीवभावं ब्रवीति ॥

तथा "यदाह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवति" इत्यत्र भेददर्शिनः संसारभयमनुवदति । नह्यत्र भेददर्शनं विहाय अन्यदेव

भयकारणमुक्तमिति भ्रमितव्यम्; "द्वितीयाद्वै भयं भवति" इति श्रुत्यन्तरे भेददर्शनस्यैव भयहेतुत्वोक्तेः। "यदाह्येवैष एतस्मिन्....अभयं प्रतिष्ठां विन्दते" इति पूर्वतनवाक्ये च अभेददर्शनस्यैव अभयहेतुत्वं उच्यत इति रमणीयम्। तथा "स यश्चायं पुरुषे यश्चासावादित्ये स एकः" इति जीवस्य आदित्यान्तर्वर्तिपरमात्माभेदः प्रतिपादितः। न ह्यत्र आदित्यांतर्वर्तिजीवपुरुषाभेदः प्रतिगद्यते, बाधात्, नापि उभयत्र अंतर्यामी एक इत्यर्थो युक्तः; नियम्यभेदेन नियामकभेदस्य अप्रसक्तत्वात् तन्निषेधे वाक्यवैयर्थ्यापत्तेः। "य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते" इति श्रौतप्रत्यभिज्ञया च परमात्मग्रहणस्यैव युक्तत्वाच्च तत्रैव जीवाभेदः प्रतिपाद्यत इति युक्तम्। अन्ते च 'अहमन्नं अहमन्नादः' इति आत्मनः सर्वात्मत्ववचनेनोपसंहारः अद्वैतसिद्धान्तमेव द्रढयति।

एवं कर्मकाण्डेऽपि तत्र तत्राद्वैतभावाः स्फुटमुपलभ्यन्ते। तथा हि—तैत्तिरीयसंहितायां चतुर्थकाण्डे "य इमा विश्वा भुवनानि जुह्वदृषिर्होता निषसादा पिता नः। स आशिषा द्रविणमिच्छमानः परमच्छदो वर आविवेश" इति॥

अस्यार्थः—यो विश्वकर्मा इमा विश्वा भुवनानि जुह्वत् प्रलयकाले संहरन् सर्वज्ञो होता अस्माकं पिता निषसाद स्वयं तस्थिवान्। सृष्टेः पूर्वमेक एवासीत् इत्यर्थः। सः आशिषा बहुस्यां प्रजायेय इति इच्छया द्रविणं जगद्भोगं इच्छन् परमच्छदः परमं स्वकीयं परमार्थरूपं आवृण्वन् वरे हृत्पुण्डरीके आविवेश जीवरूपेण प्रविष्टः। अत्र च ईश्वरस्यैव जीवभावः स्वस्वरूपस्य अविद्यया आवृतत्वं च स्पष्टम्।

"यो नः पिता जनिता यो विधाता यो नः सतो अभ्यासज्जजान। यो देवानां नामधा एक एव तं संप्रश्नं भुवनायन्त्यन्या" इति च॥

अयमर्थः—यः नः पालयिता उत्पादयिता च। यश्च नः सत् वर्तमानं भोग्यजातं सतः स्वस्वरूपात् उत्पादयामास। यश्च देवानां इन्द्रमित्रवरुणादीनां नामधारकः। अत एवोक्तं ऋग्वेदे—"इन्द्रं मित्रं वरुणमग्निमाहुः अथो दिव्यः ससुपर्णो गरुत्मान्। एकं सद्विप्रा बहुधा वदन्ति"—इत्यादि। वस्तुतस्तु सः एक एव। तं अन्यानि भुवनानि प्रलयकाले यन्ति। संप्रश्नं यथा तथा, यथा कः ईश्वरः कानि भुवनानीत्येवं संप्रश्नो भवेत् तथेत्यर्थः। अत्र च एकस्य परमात्मनः अनेकधाभावः स्फुटः॥

"न तं विदाथ य इमं जजानान्यद्युष्माकमंतरं भवति। नीहारेण प्रावृताजल्प्या चासुतृप उक्थशासश्चरन्ति" इति।

अयमर्थः—यो विश्वकर्मा इदं जजान उत्पादितवान्, तं हे जीवाः यूयं न जानीथ। देवदत्तोऽहं यज्ञदत्तोऽहं इति जानीम इति चेत्, नैतत् युष्माकं पारमार्थिकं रूपं, किंतु तदन्यत् वेदान्तवेद्यं ईश्वरतत्त्वं विद्यते। तथापि कुतो न जानीमस्तद्रूपं इति शंकायामुत्तरं नीहारेणेति—यथा नीहारः नात्यन्तमसन्। दृष्टेरावारकत्वात्। नापि सन्, काष्ठादिरूपान्तरेण संबन्धुम् अयोग्यत्वात्, एवं अज्ञानमपि सदसद्विलक्षणं, तेन यूयं प्रावृताः मनुष्योऽहमिति जल्प्याश्च असुषु तृप्यन्ति, न परमेश्वरतत्त्वं विचारयितुं प्रवर्तन्ते परलोकार्थम्। यज्ञेषु उक्थ्यादिशस्त्रं शंसन्ति इत्यर्थः। अत्र जीवेश्वरभेदकं अज्ञानमेव नान्यत्, स्वतस्तु ऐक्यमेव तयोरित्युक्तम्।

"विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोहस्त उत विश्वतस्पात्। संबाहुभ्यां नमति संपतत्रैर्द्यावापृथिवी जनयन् देव एकः"॥ इति।

अयमर्थः—चक्षुरादिप्राणानां द्यावापृथिव्योश्चोत्पत्तेरूर्ध्वं विश्वरूपधरः परमेश्वर एवं भासते। कथं? विश्वतः चक्षूंषि यस्यासौ विश्वतश्चक्षुः,

परमेश्वरस्य सर्वप्राण्यात्मकत्वात् यस्य प्राणिनो ये चक्षुषी ते तदुपाधिकस्य परमेश्वरस्यैवेति सर्वत्रास्य चक्षूंषि संपद्यन्ते । एवं मुखादिष्वपि । अत्र परमात्मनः सर्वात्मत्वमुक्तम् ।

"नासदासीन्नोसदासीत् तदानीं । नासीद्रजो नो व्योमा परोयत् । किमावरीवः कुहकस्य शर्मन् । अम्भः किमासीद्गहनं गभीरम् । नमृत्युरमृतं तर्हिन । रात्रिया अन्ह आसीत्प्रकेतः । आनीदवातं स्वधया तदेकम् । तम आसीत्तमसा गूढमग्ने प्रकेतम् । तुच्छेनाभ्वपिहितं यदासीत्" (तै-ब्रा-२-८-९) इत्यादिवाक्यानि सदसद्विलक्षणस्य तमःशब्दितस्य मायातत्वस्य प्रतिपादकानि । "अतृष्यँस्तृष्यध्यायत् । अस्माज्जाता मेमिथू चरन् । पुत्रो निऋत्या वैदेहः । अचेता यश्चचेतनः । सतंमणिमविन्दत् । सोऽनंगुलिरावयत्" (तै. आ. १-११) ।

अयमर्थः—अयमात्मा स्वयमतृष्यन्नेव तृषां प्राप्नोतीव गम्यते । जडतादात्म्याध्यासात् । तथा ध्यानरहितोपि ध्यायतीव । तथा अस्माद्देहाज्जाताः पुत्रादयः मे मदीया इति भ्राम्यति । मिथू - मिथः चिज्जडाध्यासात् चरन् मदीयमिति वृथा भ्राम्यति । पुत्रः अहंकारः देहरहितस्य चिदात्मनः संबन्धी वैदेहः स्वयं अचेताः अचेतनः चैतन्यच्छायापत्या चेतन इव लक्ष्यते । अत्रापि जीवस्य निर्धर्मकत्वं स्वतः, अध्यासेन सधर्मकत्वं चाद्वैतिनामभिमतमेव स्पष्टीकृतम् ॥

"नामनामैवनाममे । नपुंसकं पुमां स्त्र्यस्मि । स्थावरोस्म्यथजंगमः । यजेयक्षियष्टाहे च" । (आ. १-११) ॥ अत्र ब्रह्मणः सार्वात्म्यमुच्यते । अत्राद्यौ नामशब्दौ नकारान्तौ नामधेयमाचक्षाते, तृतीयो नामशब्दः प्रसिद्धिवाचकमव्ययं, ब्रह्मवित् स्वानुभवं प्रकटयति । मे मम पूर्वमज्ञानदशायां देवोमनुष्यः गौरश्व इत्येवं तत्तज्जन्मसु यन्नाम व्यवह्रियते तत्सर्वं नामैव शब्दमात्रमेव न तु परस्परविलक्षणः कश्चिदर्थोस्ति । उक्तं च 'वाचारंभणं विकारो नामधेयं' इति । लोके यन्नपुंसकं पुमान् स्त्री वा तत्सर्वमहमेवास्मि । स्थावरजङ्गमौ च अहमेव । सर्ववस्तुषु अनुगतं सच्चिदानन्दरूपं यद्ब्रह्म तदेवाहमस्मीत्यर्थः ।

तथा होतृहृदयाख्यमंत्रेष्वपि अद्वैतभावाः दृश्यंते । तथाहि—"एकः सन् बहुधा विचारः" इति । सचान्तर्यामी परमात्मा स्वेन रूपेण एक एव सन् जीवरूपेण बहुधा भूत्वा विविधचरणवान् भवतीत्यर्थः ॥

'समानसीन आत्मा जनानां' इति च । स च सर्वेषां जीवानां स्वरूपभूतः मनसा योगयुक्तेन ग्राह्यो भवतीत्यर्थः ॥

तथा पुरुषसूक्ते "सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वाभिवदन् यदास्ते" इत्यत्र यःस्रष्टा स एव स्वसृष्टेषु देहेषु अनुप्रविश्य व्यवहरन् आस्ते इति वदन् ब्रह्मैव जीव इति विस्पष्टयति ।

अन्यत्रापि 'ब्रह्मैव सन् ब्रह्माप्येति' 'यो देवानां नामधा एक एव' 'ब्रह्मविश्वमिदं जगत्' इत्यादीनि अद्वैतभावावेदकानि वाक्यानि द्रष्टव्यानि ॥

(उ) सामवेदे अद्वैतभावाः

(मायूरवासी श्री· रामनाथदीक्षितः)

ஸாமவேதம் ஆயிரம் சாகைகளுள்ளது. அவைகளில் கௌதும சாகை தென் தேசத்தில் பிரசாரத்திலிருக்கிறது. இந்த வேதத்தில் மந்திரபாகம், பூர்வார்ச்சிகம் உத்தரார்ச்சிகம் என்று இரண்டு வகைப் பட்டது. பிராஹ்மண பாகம் எட்டு விதம்; ப்ரௌடம், ஷட்விம்சம், ஸாம விதி, ஆர்ஷேயம், தேவதாத்யாயம், உபநிஷத், ஸம்ஹிதோபநிஷத், வம்சம் என்பன. இவ்வுபந்யாஸத்தில் மந்திர பாகத்திலும் ப்ராஹ்மண பாகத்திலும் தோன்றும் அத்வைத பாவங்கள் குறிக்கப் பட்டுள்ளன.

சாந்தோக்ய உபநிஷத்தில் ஆறுவது அத்தியாயத்தில், 'பிரபஞ்சம் ஸத்ய மன்று; அதற்குக் காரணமான பிரஹ்ம ஸ்வரூபமே ஸத்யம்' என்பதை நிரூபிக்க எடுக்கப்பட்டிருக்கும் உதாரணம் கவனிக் கத்தக்கது. உத்தாலகர் என்ற மஹரிஷி தன் புத்திரன் 12 வருஷங்கள் குருகுலத் தில் வசித்து சகல வித்யைகளையும் கரை கண்டு மிகுந்த கர்வத்தோடு வரக்கண்டு, கேட்கிறார். "மகனே! எதைத் தெரிந் தால் எல்லாம் தெரிந்ததாகுமோ அந்த வஸ்துவைக் கேட்டாயா" என்றார். மகன் "இல்லை", என்று கூறி, "அஃது எப்படி இருக்கக்கூடும்" என ஆச்சரியத் துடன் வினவ, தந்தை "குழந்தாய்! எப்படி ஒரு மண்கட்டியை யறிந்தால் பானை முதலான சகல விகாரங்களையும் அறிந்ததாகுமோ, எப்படி ஒரு தங்கக் கட்டியை யறிந்தால் சகல தங்கநகை களையு மறிந்ததாகுமோ அப்படியே என்று உணர்ந்துகொள். மண்ணை யறிந்தும் விகாரங்களின் உருவம் அறியப் படவில்லையே என்று ஸந்தேகம் வேண் டாம். உருவம் என்பது வெறும் பெயர் தான். மண் ஒன்றே உண்மை" என்று விவரித்தார். இவ்விடம் 'பிரபஞ்சம் முழுவதும் கல்பனை; காரணபூதமான ப்ரஹ்மமே ஸத்யம்' என்று தெளிவா கிறது. 'तत्त्वमसि' என்னும் ஜீவபிரஹ்ம ஐக்யத்தைப் போதிக்கும் மஹாவாக்யம் இந்த உபநிஷத்திலேயே உள்ளது.

ஸாமவிதானத்தில் பரமேச்வரனைக் குறித்து 'अहमः' என்று பெயர் குறிக்கப் பட்டிருக்கிறது. 'நான் என்று கூப்பிடப் படுகிறவன்' என்பது அதன் பொருள். உலகில் 'நான்' என்று வ்யவஹரிக்கப் படுகிறவன் ஜீவனே. இப்பெயரை ஈச் வரனுக்குப் பொருத்தி ஜீவன் ஈசன் இருவரும் ஒன்றே என்று கொள்ள வேண்டும் என்று போதிக்கப்படுகின்றது.

Sama Veda is said to have one thousand sub-divisions of which Kauthuma Sakha alone is prevalent in South India. The Samhita and the eight Brahmanas contain many truths of the Advaita philosophy.

The Lord is spoken of as 'अहमः' the purport of the word I). in the Samavidhana Brahmana. From this it is clear that the Lord is identical with the Jiva, who is the meaning of the word I.

"Just as the effects of clay are realised from the knowledge of clay—the effects being mere name, and the clay alone true; so also when the Atman is realised, every-thing is known." (Ch. 6) "That thou art". (Ch. 6). "He entered the body himself in the form of Jiva and created name and form" (Ch.). These are from the Chhandogyo-panished.

ओं नमस्सामवेदाय सामवेदप्रियाय च ।
यश्शङ्कर इति ख्यातः स मे शं तनुताच्चिरम् ॥
चन्द्रशेखरयोगीन्द्रं नमस्कृत्य तदाज्ञया ।
सामवेदेऽद्वैतभावान् सङ्गृह्णामि यथामति ॥

इह खलु सहस्रशाखात्मकसामवेदः साम्बत्रियं इति प्रसिद्धतरं लोके । मन्त्रब्राह्मणात्मके तस्मिन् मन्त्रभागो द्विविधः, पूर्वार्चिकः उत्तरार्चिकश्चेति । आर्चिकग्रन्थे गीयमानानां साम्नां आधारभूता ऋच एव पठिताः । ताश्च इन्द्रादिदेवतास्तुतिपराः । ब्राह्मणग्रन्थः अष्टविधः ॥

तथा च प्राचां वचनम्—

अष्टौ हि ब्राह्मणग्रन्थाः प्रौढब्राह्मणमादिमम् ।
षड्विंशाख्यं द्वितीयं स्यात्ततस्सामविधिर्भवेत् ॥
आर्षेयं देवताध्यायो भवेदुपनिषत्ततः ।
संहितोपनिषद्वंशो ग्रन्था अष्टावुदीरिताः ॥ इति ॥

१. तत्र प्रौढे ब्राह्मणे अग्निष्टोमसंस्थाकं ज्योतिष्टोममारभ्य सहस्रसंवत्सरसत्रपर्यन्ताः सोमयागा अनुक्रमेण विहिताः । तदङ्गभूतानि सामवेदीयानि स्तोत्राणि स्तोमाः तेषां विष्टुतिप्रकाराश्च विहिताः ।

२. द्वितीये च षड्विंशे ब्राह्मणे प्रौढाख्यताण्ड्योक्तशेषाः केचन विशेषाः - श्येनादियागविशेषाः सुब्रह्मण्याह्वानविषयश्च विहिताः ।

३. तृतीये च सामविधाने क्रतुष्वशक्तानां तत्फलसिद्धये कृच्छ्रानुष्ठानपूर्वकं सामजप उक्तः ।

४. चतुर्थे आर्षेये साम्नां ऋषिच्छन्दोदेवताः प्रतिपादिताः ।

५. पञ्चमे दैवते निधनानां छन्दोवर्णदेवतानां निरूपणं तन्नामनिर्वचनञ्च कृतम् ।

६. षष्ठे च छान्दोग्ये जीवपरमात्माभेदः जगन्मिथ्यात्वं तदौपयिकान्युपाख्यानानि नानाविधोपासनानि च श्रूयन्ते ।

७. सप्तमे संहितोपनिषदाख्ये मन्त्रसंहिताभेदः तत्तदध्ययनप्रशंसा दैवासुरादिभेदेन गानप्रकारः तत्फलादिकञ्च प्रतिपादितम् ।

८. अष्टमे च वंशब्राह्मणे सम्प्रदायप्रवर्तकानां आचार्याणां परम्पराऽनुकीर्तिता । अत्र छान्दोग्योपनिषद्व्यतिरिक्तेषु ग्रन्थेषु कर्मस्वरूपतदितिकर्तव्यतातदधिकारितत्फलादिकस्य प्रायेण प्रतिपादकेषु भेदावगमेऽपि सूक्ष्मेक्षिकया समन्वेषणे तेषां अद्वैतात्मतत्त्वविषये तात्पर्यमिति यथामति निरूप्यते ॥

१. आरण्यसंहितायां चतुर्थखण्डे पञ्चमी ऋक् 'पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम्' इति । अत्र भूतभविष्यद्वर्तमानात्मकप्रपञ्चजातस्य पुरुषाभिन्नत्वं बोध्यते सावधारणम् । तच्च ब्रह्मण एव सत्यत्वं प्रपञ्चस्य च कल्पितत्वमित्यनभ्युपगमे न घटते, जडचेतनयोरभेदायोगात् । तथा च एवकारार्थप्रधानमिदं वाक्यं जगतो ब्रह्मभेदनिराकरणेन मिथ्यात्वमावेदयति । अत्रत्यपुरुषशब्दस्य सच्चिदानन्दात्मकब्रह्मैवार्थः । तच्च 'पादोऽस्य सर्वा भूतानि' इत्युत्तरार्धव्याख्यानावसरे सायणभाष्ये 'यद्यपि 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यनन्तस्य ब्रह्मणः पादचतुष्टयं निरूपयितुमशक्यं, तथापि जगदिदं ब्रह्मस्वरूपापेक्षया अल्पमिति विवक्षितत्वात्पादत्वोपचारः' इत्यनेन स्पष्टम् ॥

२. ताण्ड्यमहाब्राह्मणे चतुर्थाध्याये प्रथमखण्डे 'प्रजापतिर्वा इदमेक आसीत् । सोऽकामयत । बहु स्यां प्रजायेयेति स एतमतिरात्रमपश्यत्' इति चतुर्थं ब्राह्मणम्, तत्रैव षोडशाध्यायारम्भे ज्योतिर्नामकक्रतुविधायकं ब्राह्मणं 'प्रजापतिर्वा इदमेक आसीन्नाहरासीन्न रात्रिरासीत्' इत्यादि ॥

तथा विंशाध्यायचतुर्दशखण्डे त्रिरात्रक्रतुस्तुतिप्रकरणे 'प्रजापतिर्वा इदमेक आसीत्तस्य वागेव

स्वमासीत्' इत्यादिवाक्यम्, सामविधानाख्ये तृतीये ब्राह्मणे 'ब्रह्म ह वा इदमग्र आसीत् तस्य तेजोरसोऽत्यरिच्यत' इति प्रथमाध्याये अग्रिमं ब्राह्मणम्' इति चैवमादौ इदंशब्दनिर्दिष्टस्य नामरूपात्मकस्य प्रपञ्चस्य ब्रह्मप्रजापतिशब्दनिर्दिष्टचैतन्येन साकं अभेदो बोध्यतेऽवधारणपूर्वकम्। तथा च सायणभाष्यं "इदं नामरूपात्मकं प्रतीयमानं प्रपञ्चजातं अग्रे सृष्टेः पूर्वं प्रळयावस्थायां ब्रह्मैवासीत्, ह प्रसिद्धौ, सा च 'सदेव सोम्येदमग्र आसीत्' 'आत्मा वा इदमेक एवाग्र आसीत्' इत्यादिश्रुत्यन्तरापेक्षया। वा इत्येवकारार्थे । अत्र यः स्थाणुः स पुरुषः इतिवत् इदं ब्रह्म आसीत् इति बाधायां सामानाधिकरण्यम् । इदं सर्वं कारणरूपब्रह्मैवासीत् न कार्यं किञ्चिदपीत्यर्थः" ॥ इति। अत्रत्यप्रजापतिशब्दस्य प्रपञ्चकारणीभूत ईश्वर एवार्थः तदानीं हिरण्यगर्भादीनां अनुत्पत्तेः । तथा च भाष्यं—"प्रजापतिशब्देनात्र चिदेकरसरूपो मायाशक्तियुक्तः परमेश्वर उच्यते" इति । अत्र सर्वत्र प्रपञ्चब्रह्मणोः जडचेतनयोः प्रतिपाद्यमानः अभेदः अन्यतरस्य मिथ्यात्वं विनाऽनुपपद्यमानः प्रमाणसिद्धस्य ब्रह्मचैतन्यस्य मिथ्यात्वाभावे प्रपञ्चस्य मिथ्यात्वं परिशेषयति। तथा च अद्वैतात्मसिद्धिः॥

३. तत्रैव सामविधानब्राह्मणे प्रथमाध्याये द्वितीयखण्डे कृच्छ्रत्रयनिरूपणावसरे प्राजापत्यकृच्छ्रानुष्ठातुः काञ्चिदितिकर्तव्यतामाह—'अथोदकतर्पणम्' इत्यादिना। तत्र मन्त्रचतुष्टयेन उदकतर्पणं विधीयते। मन्त्रप्रतिपाद्यो देवः परमेश्वरः; शिवायेति स्पष्टलिङ्गसद्भावात्। तत्र 'अहमाय' इति मन्त्रविवरणे 'माङ् माने शब्दे च अहमिति शब्द्यते सर्वैर्मनुष्यैरित्यहमः परमेश्वरः अहंशब्दवाच्य इत्यर्थः । सर्वे जनाः कस्त्वमिति पृष्टाः अहमिति स्वात्मानं कथयन्ति । तादृशाय नमः' इति भाष्यम्। अत्र अहंशब्दवाच्यस्य परमेश्वरत्वोक्त्या जीवब्रह्माभेदः सिध्यति। भेदे अहंशब्दवाच्यत्वायोगात् परमेश्वरस्य॥

४. कर्मकाण्डात्मके छान्दोग्योपनिषत्पूर्वभागे मन्त्रब्राह्मणापरनामधेये षष्ठे ब्राह्मणे द्वितीयाध्यायद्वितीयखण्डे आग्रहायणाख्यकर्मणि अग्न्युपस्थाने विनियुक्तो मन्त्रः—'प्रतिक्षत्रे प्रतितिष्ठामि राष्ट्रे । प्रत्यश्वेषु प्रतितिष्ठामि गोषु । प्रतिप्राणे प्रतितिष्ठामि पुष्टौ । प्रत्यङ्गेषु प्रतितिष्ठाम्यात्मनि' इत्यादिः॥

अत्र प्रतितिष्ठाम्यात्मनीति विवरणे 'जीवात्माहं परमात्मनि प्रतितिष्ठामि स्वरूपनिष्ठो भवामीत्यर्थः' इति भाष्यम्। तथा च जीवस्य परः स्वरूपमित्यायातम्॥

५. तत्रैव चतुर्थे खण्डे भोगकामस्यादित्योपस्थाने विनियुक्तो मन्त्रः—'वृष इव पक्वस्तिष्ठसि सर्वान्कामान्भुवस्पते' इत्यादिः। तत्र भाष्यं 'भुवस्पते शरीररूपस्य भुवनस्य अधिपते अन्तरात्मन् पक्वः परिपक्वः वृद्धिक्षयरहितः । वृक्ष इव ऊर्ध्वमूलावाक्शाखेन तिष्ठसि' इति। अत्र आदित्यदेवतायाः अस्मच्छरीरपतित्वायोगात् आदित्यान्तर्वर्ती परमात्मा ग्राह्यः उपस्थेयत्वेन । तस्य च शरीराधिपतित्वं पूर्वोक्तदिशा जीवपराभेदाभिप्रायेणैवेति तयोरभेदप्रतिपादकमिदं वाक्यम्॥

६. तत्रैव समनन्तरे मन्त्रे अश्वादीनां वाहनानां शोभनाविच्छेदकामस्य परिविष्यमाण आदित्ये कर्तव्यहोमे विनियुक्ते 'ऋतं सत्ये प्रतिष्ठितं भूतं भविष्यता सह' इत्यादिवाक्यं विद्यते । 'ऋतं व्यावहारिकं कृत्स्नं जगत्सत्ये परमात्मनि' इति विवृते तत्र च 'सत्यस्य सत्यं प्राणा वै सत्यं तेषामेष सत्यं' इत्यादिश्रुत्यन्तरानुरोधेन व्यावहारिकप्रपञ्चस्य पारमार्थिकब्रह्मणि कल्पितत्वरूपं प्रतिष्ठितत्वं उक्तं भवति॥

७. छान्दोग्योपनिषदि तृतीयाध्याये चतुर्दशखण्डे शाण्डिल्यविद्यायां 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' इति वाक्यम्, इदं सर्वं ब्रह्म इति सामानाधिकरण्येन सर्वस्य वस्तुजातस्य ब्रह्माभिन्नत्वमुक्त्वा कथं प्रपञ्चस्य ब्रह्माभिन्नत्वमित्याकाङ्क्षायां तज्जलानिति वाक्येन 'यत् यस्मादुत्पद्यते यस्मिन्प्रलीयते यस्मिन्विद्यते तत्तदभिन्नम्, यथा पटः इति लोकसिद्धयुक्तिप्रदर्शनपूर्वकं प्रपञ्चस्य श्रुतिसिद्धब्रह्मजत्वब्रह्मलीयमानत्वब्रह्मनिष्ठत्वहेतूक्त्या उपपादयति । तदभिन्नत्वञ्च जडस्य प्रपञ्चस्य चैतन्येन साकं तात्विकाभेदायोगात् आध्यासिकतादात्म्यरूपं ग्राह्यम् । तदात्वे च प्रपञ्चस्याध्यस्तत्वं ब्रह्मणः पारमार्थिकत्वं चेति अद्वैतब्रह्मसिद्धिः ॥

८. षष्ठाध्याये उद्दालको नाम महर्षिः स्वपुत्रं श्वेतकेतुं द्वादशवर्षाणि गुरुकुले उषित्वा सर्वान् वेदानधीत्य वैदुष्यगर्वेण स्तब्धतया प्रतिनिवृत्तं विलोक्य तादृशाविनीतत्वपनयनाय ब्रह्मविद्यामुपदिदिक्षुः 'यन्नु सोम्येदं महामना अनूचानमानी स्तब्धोऽस्युत तमादेशमप्राक्ष्यः येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञात' मिति पृष्ट्वा, 'कथन्नु भगवस्स आदेशो भवती'ति एकविज्ञानेन सर्वविज्ञानं कथं उपपद्यत इत्याशयवता तेन पृष्टः 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात् वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं' इत्यादिदृष्टान्तवाक्यैस्तदुपपादयामासेति उपाख्यायते । अत्र दृष्टान्तवाक्ये मृत्पिण्डाविज्ञानेन तत्कार्यभूतघटादयः ज्ञाता भवन्तीत्युक्तम् । कथमिदं उपपद्यते ? उपादानेन ज्ञातेन उपादेयं न हि ज्ञातं भवति उपादानोपादेययोर्भेदादिति शङ्कायां वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यनेन तदुपपादनं कृतम् । अयमर्थः । योऽयं घटशरावादिरूपः विकारः मृदादिव्यतिरिक्त इवावभासते स सर्वोऽपि वाचारम्भणं वाङ्मात्रालम्बनं न तु वस्तुतोऽस्तीति । तदेव स्पष्टीक्रियते नामधेयमिति । नामधेयमात्र इत्युक्ते अर्थासत्वं अनुक्तमपि प्रतीयते लोके । ननु असन्विकारः कथं भासते इति शङ्कायां मृत्तिकेत्येव सत्यमित्युक्तम् । मृदादिरेव सत्यः तद्व्यतिरिक्ततयाऽवभासमानः घटशरावादिरूपः विकारः असत्य एव मायामयः रज्जुसर्पादिवदवभासते इति तदर्थः । मृत्तिकेत्येव सत्यमित्यादिवाक्यानि मृदादीनां न सत्यत्वप्रतिपिपादयिषया प्रवृत्तानि, अपितु तेषामेवासत्यत्वप्रतिपिपादयिषया प्रवृत्तानि इति वक्तुं शक्यते इतिशब्दशिरस्कत्वात् । यथा 'मनो ब्रह्मेत्युपासीत' 'आदित्यो ब्रह्मेत्यादेशः' इत्यादीनि मनआदीनामब्रह्मत्वं गमयन्ति तद्वत् । तथा च दृष्टान्तेषु उपादानातिरिक्तविकारसत्यत्वाभावप्रतिपादनस्य दार्ष्टान्तिकेपि तथात्वमिति प्रत्यायनार्थत्वात् सर्वोपादानभूतसद्रूपचैतन्यज्ञानेन तत्कल्पितप्रपञ्चतत्वज्ञानं संभवतीत्येतत्सिद्धं भवति । एवं च अधिष्ठानभूतसद्रूपचैतन्यभिन्नस्य सत्यत्वाभावनिश्चयात् पारमार्थिकं ब्रह्मैकमेवेति अद्वैतप्रतिपादकं महदेतल्लिङ्गम् ॥

९. तत्रैव षष्ठाध्याये सद्विद्यारम्भे 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इति अग्रे सृष्टेः पूर्वं परिदृश्यमानं चराचरात्मकं वस्तुजातं सद्रूपचैतन्याभिन्नं आसीत् तच्च सत् एकमेवाद्वितीयम् सजातीयविजातीयस्वगतभेदरहितं इति प्रतिपादितम् । प्रपञ्चस्य सत्यत्वे तदानीं सूक्ष्मावस्थस्य तस्य सत्त्वात् जीवस्य च भिन्नत्वे तस्य सत्त्वाच्च सजातीयविजातीयभेदवत्वं स्यादिति श्रुतेरश्रुतार्थकल्पनं स्यात् । तच्चानिष्टम् । अतः प्रपञ्चस्य मिथ्यात्वं जीवस्य चाभिन्नत्वम् इति यथाश्रुत्यभ्युपगन्तव्यम् । तथा च अस्याः श्रुतेरद्वैतप्रतिपादकत्वं सुप्रसिद्धमेव ॥

१०. तथा 'हंताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' इति त्रिवृत्करणप्रतिपादनावसरे जीवेनात्मना इति जीवस्य स्वस्वरूपत्वं कण्ठत एव उच्यते सदाख्य-देवतया । तथात्वे नाहमीश्वर इति प्रत्यक्षादीनां का गतिरिति चेत् । औपाधिकभेदमादाय उपपत्तेः। जीवो हि नाम अन्तःकरणे चैतन्यस्य प्रतिबिम्बः आदर्श इव पुरुषस्य । तथा च आचार्यपादाः 'जीवो हि नाम देवतायाः आभासमात्रं' इति । तथा च जीवब्रह्माभेदबोधिकेयं श्रुतिः इति स्पष्टतरमव-गम्यते । पूर्वमद्वैतात्मानमभिधाय तद्रूपसत्याभि-सन्धस्य मुक्तिः अनृताभिसन्धस्य बन्ध इति च ब्रुवाणा श्रुतिः अद्वैतस्य सत्यत्वं द्वैतस्य मिथ्यात्वं च स्फुटयति ॥

११. तथा 'स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' इत्यत्र 'विशिष्टाद्भावप्रत्ययो विशेषणमभिधत्ते' इति न्यायेन इदं सर्वं एष आत्मा इत्युक्तं भवति । अत्र च बाधायां सामानाधिकरण्यम् । प्रतीयमानस्य सर्वस्य जडस्य चैतन्येन साकं मुख्याभेदायोगात् । बाधायां सामानाधिकरण्यद्योतके च तत्सत्यमिति पदे । अनन्तरञ्च स आत्मा तत्वमसीति जगत्कारणं सदाख्यं ब्रह्म आत्मशब्देन निर्दिश्य तदभिन्नस्त्व-मसीति ब्रह्माभेदो बोध्यते तत्त्वजिज्ञासोः श्वेत-केतोः । अत्र अभेदे सामानाधिकरण्यं उभयोश्चेत-नत्वेन बाधकाभावात् । न च प्रत्यक्षादिबाधः। उपक्रमोपसंहारादिषड्विधतात्पर्यलिङ्गवता वाक्येन बोधितेऽर्थे प्रत्यक्षादीनामकिञ्चित्करत्वात् । इदमेव वाक्यं तत्र तत्र वेदान्तेषु जीवब्रह्माभेदबोधकतया जोघुष्यते । अस्यैव दार्ढ्यार्थं स्थूणानिखननन्यायेन अष्टभिरुदाहरणैरुत्तरत्र प्रपञ्च्यते ॥

१२. तथा स्वपितिनामनिर्वचनेनापि जीव-परयोरभेदोऽवगम्यते 'यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो भवति' इति। अत्र स्वं ह्यपीतो भवतीति प्रसिद्धिद्योतकेन हिशब्देन लौकिकसाधारण्येन प्रसिद्धं सुषुप्तावस्थायां स्वरूप-गमनं श्रूयते । तदा न भेदोऽवभासते, यदि स्यात् तदा भायात्। अतः भेदः काल्पनिक इति सिद्ध्यति ॥

१३. सप्तमाध्याये भूमविद्यायां भूमाख्यस्य ब्रह्मणः 'स एवाधस्तात् स उपरिष्टा' दित्यादिना सार्वात्म्यमुक्तम् । अनन्तरञ्च स एवेति परोक्षनिर्दे-शात् जीवादन्य इति शङ्का मा भूदिति तन्निवारणार्थं अहङ्कारस्य सार्वात्म्यमुक्तम् । ततोऽपि अहङ्कारस्य संघातपरत्वशङ्कायां अथात आत्मादेश इत्यादिना आत्मनस्सार्वात्म्यमुक्तम् । अत्र यथा अरुन्धती-स्वरूपं उपदिदिक्षुः तत्समीपवर्तिस्थूलताराभिः अभि-भूतां तां प्रथमत एव विविच्य निर्देष्टुमशक्ततया प्रथमं स्थूलतारां इयमेवारुन्धतीति निर्दिश्य तद-नन्तरं तत्र स्थौल्यानुपपत्तिशङ्कायां प्रसक्तायां वस्तु-तत्त्वबोधनार्थं इयं त्वतिसूक्ष्मा अरुन्धतीति स्थूल-ताराविवेचनेन सत्यारुन्धतीमुपदिशति, एवमिहापि सतः अहंपदवाच्येनैक्यं प्रदर्श्य तत्र प्रसक्तशङ्का-निराकरणेन तत्त्वबोधनार्थं निष्कृष्टशुद्धरूपात्मना सहैक्यं प्रतिपादयति । तदुक्तं विवरणाचार्यैः 'अहं-कारस्यात्मैकत्वेन प्रत्यक्षसिद्धस्य पृथगुपदेशो भेदार्थः भूमात्मनोः भिन्नत्वेन प्रत्यक्षसिद्धयोः पृथगुपदेशः ऐक्यार्थः द्वयोस्सार्वात्म्यायोगात्' इति । न चात्र सर्वगतत्वोपदेश एव न सार्वात्म्योप-देशः, तथाच उभयोस्सर्वगतत्वं सम्भवतीति न जीवपरैक्यसिद्धिः इति शङ्कनीयम्। स एवाधस्तादित्य-वधारणेन वस्त्वन्तराभावबोधनेन सार्वात्म्यपर्यव-सानात्। स एवेदं सर्वमिति च उपसंहारे स्पष्टतरं सार्वात्म्योपलब्धेश्च । प्रतीते च सार्वात्म्ये द्वयो-रसार्वात्म्यायोगात् ब्रह्मात्मैक्यसिद्धिरिति ॥

१४. अष्टमाध्याये दहरविद्यायां 'तद्यथापि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तो न

विन्देयुरेवमेवेमास्सर्वाः प्रजाः अहरहर्गच्छन्त्यः एतं ब्रह्मलोकं न विन्दन्ति अनृतेन हि प्रत्यूढाः'। इत्यत्र सर्वस्यापि सुषुप्तिकाले ब्रह्मगमनं अनृतशब्दवाच्याविद्यावृतत्वात् ब्रह्मप्राप्त्यभावश्च श्रूयते। अत्र अज्ञानावृतत्वप्रयुक्तः ब्रह्मप्राप्त्यभावः इत्युक्ते ज्ञानप्रयुक्ता ब्रह्मप्राप्तिरूपतादृशाप्राप्तिनिवृत्तिरिति सिध्यति। लोके च यत् ज्ञानेन निवर्तते तन्मिथ्या इति रज्जुसर्पादौ दृष्टम्। प्रकृते च ब्रह्माप्राप्तिर्ज्ञाननिवर्त्येति लब्धत्वात् सा मिथ्येति सिध्यति। ब्रह्माप्राप्तेर्मिथ्यात्वे ब्रह्मप्राप्तेस्सत्यत्वं अर्थसिद्धम्। सा च प्राप्तिः 'ब्रह्म वेद ब्रह्मैव भवति' इत्यादिश्रुत्यन्तरानुरोधात् ब्रह्मीभावरूपेति जीवपरैक्यसिद्धिः अत्र श्रुतौ विवक्षितेति गम्यते।

एवं सामवेदान्तर्गतमन्त्रब्राह्मणभागेषु अद्वैतवाक्यान्युद्धृत्य भाष्यानुरोधेन यथामति विवरणं कृत्वा श्रीमदाचार्यचरणनलिनयोः समर्पये॥

(ऊ) अथर्ववेदे अद्वैतभावाः

(श्री. शिवरामकृष्णशास्त्री)

பிரச்னம் முண்டகம் மாண்டூக்யம் என்ற மூன்று பிரதான உபநிஷத்துகள் அதர்வண வேதத்தில் உள. அவைகளில் அத்வைத பாவங்கள் நிரம்பியிருப்பது தெரிந்த விஷயம். கர்ம காண்டத்திலுள்ள அத்வைத பாவங்கள் இவ்வுபந்யாஸத்தில் எடுத்துக்காட்டப்பட்டிருக்கின்றன.

பிரஹ்மமே ஹோதா, பிரஹ்மமே யாகம், பிரஹ்மமே ஹவிஸ் முதலியன: பிரஹ்மமே யஜ்ஞத்தின் தத்வம் (காலஸூக்தம்). நீயே ஸ்திரீ, நீயே புருஷன், நீ குமாரன் குமாரி, நீயே மூத்து, கோல் பிடித்து நடக்கிறாய். நாநாவிதமாய் நீயே பிறக்கிறாய். (10—8—27)

Advaitic truths are seen in many passages in the Karmakāṇḍa of the Atharva Veda also.

Brhman is Hotṛ. He is yaga..He is the reality of the yajna (Kālasūkta).

You are woman, man, boy and girl. You are born. You walk with a stick. (10-8-27)

अथर्ववेदो हि प्रश्नमुण्डकमाण्डूक्यैस्तिसृभिरुपनिषद्भिः परिकर्मितः। एतासु चाद्वितीयः परमात्मा प्रतिपाद्यते इति सांप्रदायिकाः । तत्र माण्डूक्ये 'अयमात्मा ब्रह्म' इति ब्रह्माभिन्नत्वेन आत्मानमुपक्रम्य 'सोऽयमात्मा चतुष्पादि'ति तं चतुष्पात्त्वेन प्रविभज्य ओंकारं च तिसृभिर्मात्राभिर्विभज्य क्रमेण मात्रात्रयाभेदेन पादत्रयं अध्यात्मं विश्वतैजसप्राज्ञरूपं, अधिदैवं वैश्वानरहिरण्यगर्भान्तर्यामिरूपं निर्वर्ण्य पूर्वपूर्वप्रविलापनेन अमात्रेण चतुर्थपादरूपेण ओंकारेण मायासंख्यातुरीयमद्वितीयं बोधयित्वा अद्वैतसिद्धान्तः सुप्रतिष्ठापितः । तच्च तुरीयमद्वैतं ब्रह्म 'नान्तःप्रज्ञ' मित्यादिना इतरनिषेधमुखेन प्रतिपादयति। स एवाद्वैतसिद्धान्तः कर्मनिरूपणावसरेऽपि तत्र तत्र प्रतिपाद्यते । तथा हि—कालसूक्ते पठ्यते—

"स एव संभुवनान्याभरत् स एव संभुवनानि पर्यैत् । पिता सन्नभवत्पुत्र एषां तस्मात् वै नान्यत्परमस्ति तेजः"। इति (का. १९-३३-४)॥

अस्यायमर्थः—स एव कालाख्यपरमात्मैव भूतजातान्युत्पादयति, स एव भुवनानि संपर्यैत् सम्यक् व्याप्नोति, एषां भूतानां पिता जनकत्वेन सन्नपि एषां पुत्रोऽपि भवति भूतजाताज्जनिष्यमाणं यत्पदार्थजातं तद्रूपतयापि स एव वर्तते । तस्मात् सर्वोत्पादकात् सर्वगतात् पुत्रादिरूपेण भविष्यतश्च तस्मात् परमात्मनोऽन्यद्वै परं उत्कृष्टं तेजो नास्तीति, वैशब्दः प्रसिद्धौ । अत्र अन्यत्परं तेजो नास्तीति निषेधात् स्वस्यापि तेजोरूपत्वमर्थासिद्धम्। 'तस्य भासा सर्वमिदं विभाती'ति श्रुतेः । अत्र प्रकृतस्य कालात्मकस्य ब्रह्मणः सर्वात्मत्वं वर्णितम्॥

ब्रह्म होता ब्रह्म यज्ञा ब्रह्मणा स्वरे वोमिताः ।
अध्वर्युर्ब्रह्मणो जातो ब्रह्मणोऽन्तर्हितं हविः ॥
ब्रह्म स्रुचो घृतवतीर्ब्रह्मणा वेदिरुद्धिता ।
ब्रह्म यज्ञस्य तत्त्वं च ऋत्विजो ये हविष्कृतः ॥
संमिताय स्वाहा ॥

—१९ काण्डे—४२ सूक्तं—१-२ मन्त्रौ

अत्र 'ब्रह्मैवेदं सर्वं, तत्सृष्ट्वा तदेवानुप्राविशत्, त्वं स्त्री त्वं पुमान् त्वं कुमार उत वा कुमारी' इत्यादिश्रुतिभिः कृत्स्नस्य कार्यकारणप्रपञ्चस्य ब्रह्मात्मकत्वं ब्रह्मण एव स्वसृष्टसकलपदार्थानुप्रवेष्टृत्वं, ब्रह्मव्यतिरिक्तस्य सर्वस्याप्यसत्त्वं चाभिप्रेत्य ब्रह्मण एव होत्रादिरूपत्वं उपवर्णितम् । किंच ब्रह्म यज्ञस्य तत्त्वं चेति विशेषितत्वात् अत्रोक्तानां होत्रादीनां पारमार्थिकं रूपं ब्रह्मैव; तत्रैव परिकल्पितत्वात् कृत्स्नप्रपञ्चस्य । यथा मृदुपादानकाः शरावादयो मृदेव, एवं ब्रह्मोपादानकास्तत्त्वतो ब्रह्मैवेत्यभिप्रायः ॥

संमिताय स्वाहेति उक्तरीत्या होत्राद्यभेदमापन्नाय ब्रह्मणे स्वाहा इत्यर्थः पर्यवसितः । अत्र सर्वेषां यज्ञसाधनभूतानां ब्रह्मणि कल्पितत्वं प्रकटं सत् ब्रह्मैक्यवादं द्रढयति ॥

यन्मन्युर्जायामावहत् संकल्पस्य गृहादधि ।
क आसन् जन्याः के वराः क उ ज्येष्ठवरोऽभवत् ॥

—११ काण्डे—१० सूक्ते—१ ऋक्

अत्र स्वमहिमप्रतिष्ठस्य परब्रह्मणः त्रिगुणात्मिकाया मायाशक्तेश्च प्राणिकर्मपरिपाकजनितसंबन्धवशाज्जायमाना 'सोऽकामयत बहु स्यां प्रजायेय' इत्यादिश्रुत्या प्रतिपाद्या या पारमेश्वरी सिसृक्षावस्थारूपा मायावृत्तिः तत्संबन्धो लौकिकविवाहरूपेन रूप्यते ॥

यत्—यदा मन्युः मन्यते सर्वं जानातीति मन्युर्निरावरणज्ञान ईश्वरः, सः जायां आवहत् जायतेऽस्यां सर्वं जगदिति जाया सिसृक्षावस्थापन्ना पारमेश्वरी मायाशक्तिः तां आभिमुख्यं प्रापयत्, भार्यात्वेन अभ्यमन्यतेत्यर्थः । लोके हि जाया कस्याचित् श्वशुरस्य गृहादानीयते तद्दर्शयति संकल्पस्येति । 'सोऽकामयत बहु स्यां प्रजायेय' इति प्राथमिक ईश्वरकृतः संकल्पः, तस्य गृहात् आवासात् । तद्वशादेव हि एषा सिसृक्षावस्था समजायत इत्येवं व्यपदिश्यते । अधिः पञ्चम्यर्थानुवादी । ननु लोके वधूबन्धवः वरबन्धवश्च मिलित्वा कन्यावरयोः विवाहं प्रचालयति । अत्र तु सृष्टेः प्राक्कस्यचिदपि ब्रह्माभिन्नस्याभावात् कथं मायेश्वरयोस्संबन्धस्य विवाहत्वरूपणं संघटेत इत्याशङ्क्य श्रुत्यैव प्रश्नः क्रियते 'क आसन् जन्याः' इत्युत्तरार्धेन ॥

अयमर्थः—सृष्टिकाले जन्याः जनसंबन्धिनः बान्धवाः वधूपक्षीयाः के आसन्निति प्रश्नः । के वा वराः कन्यावरणस्य कर्तारः? को नाम तस्मिन् समये ज्येष्ठवरः प्रधानभूतो वरः उद्वाहकर्ता अभवदिति प्रश्नः । अस्य प्रश्नस्योत्तरं उत्तरेण मन्त्रेण क्रियते ॥

तपश्चैवास्तां कर्म चान्तर्महत्यर्णवे ।
त आसन् जन्यास्ते वरा ब्रह्म ज्येष्ठवरोऽभवत् ॥

—११ काण्डे—१० सूक्ते—२ मन्त्रः

तस्मिन् सृष्टिसमये स्रष्टुः परमेश्वरस्य तपः स्रष्टव्यपर्यालोचनात्मकम् । "यःसर्वज्ञः सर्वविद्यस्य ज्ञानमयं तप" इति श्रुतेः । कर्म च प्राणिभिरनुष्ठितं पुण्यापुण्यात्मकं सुखदुःखफलोन्मुखं परिपक्वं कर्म च आस्तां, एवकारेण तदुभयव्यतिरिक्तस्य सत्ता वार्यते । तपःकर्मणी एव सति उपकरणत्वेन

तस्मिन् समये अवस्थिते इत्यर्थः । तपःकर्मणोः सत्तायाः आधारं निर्दिशति 'अन्तर्महत्यर्णव' इति । महति—प्रभूते अर्णवे समुद्रे प्रलयकालीने अन्तः मध्ये । "आपो वा इदमग्रे सलिलमासीत्" इति श्रुतेः । महति प्रभूते अर्णवे अर्णव इव व्यापके ब्रह्मण्येव तपः स्रष्टव्यपर्यालोचनं, आसीत्—कर्म प्राण्यनुष्ठितं पुण्यापुण्यात्मकं परिपक्वं नियम्यत्वेन तस्मिन्नेव आसीदित्यर्थः । यद्वा अनयोरेव तपःकर्मणोर्वस्त्वन्तराभावात् व्यक्तिबाहुल्यमुपचर्य कृतस्य प्रश्नस्य प्रतिवचनं "त आसन् जन्याः" इति । अत्र त इति प्रतिनिर्दिश्यमानापेक्षपुल्लिङ्गत्वम् । ताः तपःकर्मव्यक्तयः जन्या विवाहप्रवृत्ता बन्धुजनाः आसन् । त एव वरयितारश्च आसन् । यत् सिसृक्षावस्थं जगत्कारणं ब्रह्म मायारूपाया जायाया आवहने स एव ज्येष्ठवरोऽभवत् प्रधानभूतः उद्वाहकर्ताऽभवत् इत्यर्थः । अत्र प्रश्नप्रतिवचनाभ्यां प्रलयकालेऽद्वैतब्रह्मणस्सत्वं तदिच्छावशान्मायया जगदुत्पत्तिस्थित्यादिकं ब्रह्माभिन्नस्याभावश्च बोधितः ॥

अथ सायणभाष्यरहितस्थले अद्वैतसिद्धान्तानुकूलानि वाक्यानि लिख्यन्ते । दशमकाण्डेऽष्टमसूक्तस्थिताः मन्त्राः ।

यदेजति पतति यच्च तिष्ठति प्राणदप्राणन्निमिषच्च यत् भुवत् ।
तद्दाधार पृथिवीं विश्वरूपं तत्संभूय भवत्येकमेव ॥
—१० काण्डं, ८ सूक्तं, ११ मन्त्रः

त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी ।
त्वं जीर्णो दण्डेन वंचसि त्वं जातो भवसि विश्वतोमुखः ॥

उतैषां पितोत वा पुत्र एषामुतैषां ज्येष्ठ उत वा कनिष्ठः ।
एको ह देवो मनसि प्रविष्टः प्रथमो जातः स उ गर्भे अन्तः ॥
—१० काण्डं, ८ सूक्तं, २७—२८ मन्त्रौ

यत्र देवाश्च मनुष्याश्चारा नाभाविव श्रिताः ।
अपां त्वा पुष्पं पृच्छामि यत्र तन्मायया हितम् ॥
१०—८—३४

वेदाहं सूत्रं विततं यस्मिन्नोताः प्रजा इमाः ।
सूत्रं सूत्रस्याहं वेदाथो यद्ब्राह्मणं महत् ॥
१०-८-३८

पुण्डरीकं नवद्वारं त्रिभिर्गुणेभिरावृतम् ।
तस्मिन्यद्यक्षमात्मन्वत् तद्वै ब्रह्मविदो विदुः ॥
१०—८—४३

अकामो धीरो अमृतः स्वयंभूः रसेन तृप्तो न कुतश्च नोनः ।
तमेव विद्वान्न बिभाय मृत्योरात्मानं धीरमजरं युवानम् ॥ १०-८-४४

अत्र दशमकाण्डीयाष्टमसूक्ते चतुश्चत्वारिंशन्मन्त्रा वर्तन्ते । ते सर्वेऽप्यध्यात्मपराः । तत्र सायणाचार्यैः न व्याख्या कृता । सूक्ष्मेक्षिकया दृश्यमानेऽद्वैतपरत्वं तत्र प्रतीयते ॥

अथर्व, ११ काण्डे, ९,१०,११ सूक्तानि-

सप्तविंशतिमन्त्रघटितानि ब्रह्मौदनाख्ये सवयज्ञे हुतशिष्टस्य ओदनस्य दृश्यप्रपञ्चनिषेधावधित्वेन शिष्यमाणं सर्वजगत्कारणं यत् ब्रह्म तदभेदेन स्तुतिपराणि — उच्छिष्यमाणौदनस्तुतिपरत्वात् उच्छिष्टसूक्तानीत्युच्यन्ते । तत्र प्रथमसूक्ते प्रथमा ऋक् ॥

उच्छिष्टे नामरूपं चोच्छिष्टे लोक आहितः ।
उच्छिष्ट इन्द्रश्चाग्निश्च विश्वमन्तः समाहितम् ॥

अयमर्थः—'अथात आदेशो नेति नेति' 'नेह नानास्ति किञ्चन' इत्येवं दृश्यप्रपञ्चनिषेधात् ऊर्ध्वं तदवधित्वेन शिष्यते—अवशिष्यते इत्युच्छिष्टं, बाधावधित्वेन शिष्यमाणं निर्गुणं परं ब्रह्म, तस्मिन् शुक्त्यादौ रजतादिवत् नाम रूपं चेति द्विधाभूतं समस्तं जगत् आहितं आरोपितं वर्तते इत्यर्थः । इत्थं सामान्येन सर्वजगदाधारत्वमभिधाय विशेषतो निर्दिशति—उच्छिष्टे लोके आहित इति । पृथिव्यादिरूपस्सर्वो लोकस्तस्मिन्नध्यस्त इत्यर्थः । तस्मिन्नेव ब्रह्मणि द्युलोकाधिपतिरिन्द्रः पृथिव्यधिपतिरग्निश्चाध्यस्तौ । किं बहुना, एतदुपलक्षितं विश्वं सर्वं जगत् अन्तः स्थापितं स्वस्मिन्नेव स्वेनैव मायया आरोपितमित्यर्थः ।

एतमन्येऽपि षड्विंशतिमन्त्राः उच्छिष्टब्रह्मणः कारणत्वाश्रयत्वसार्वात्म्यादिप्रतिपादनपरास्सन्तोऽद्वैतसिद्धान्ते तात्पर्यवन्तो वर्तन्ते ॥

उच्छिष्टसूक्तादन्यो मन्त्रः अस्मच्छब्दवाच्यजीवात्मनः उच्छिष्टपदवाच्यब्रह्मणश्चाभेदबोधको लिख्यते ।

प्रतीहारो निधनं विश्वजिच्चाभिजिच्च यः ।
सह्वातिरात्रावुच्छिष्टे द्वादशाहोपि तन्मयि ॥

—११ काण्डे, ९ सूक्तं १२ मन्त्रः

अत्र मदभिन्नोच्छिष्टब्रह्मणि प्रतीहारादयः परिकल्पिता इत्युच्यते । प्रतीहारः प्रतिहर्त्रा उच्यमाना साम्नश्चतुर्थी भक्तिः, येन भागेन साम समाप्यते तन्निधनं, अन्ये यागविशेषाः विश्वजिदादयः । एवमथर्ववेदसंहितायाः प्रायः सांसारिकफलभूतसुखासुखप्राप्तिपरिहारावुद्दिश्य प्रवृत्तत्वेऽपि तस्याः मुख्यं तात्पर्यं अद्वैतब्रह्मण्येव वर्तते इति ॥

"तस्माद्वै विद्वान् पुरुषमिदं ब्रह्मेति मन्यते ।
सर्वा ह्यस्मिन् देवताः गावो गोष्ठ इवासते" ॥

अयमर्थः—तस्मात् पुरुषं पुरुषशरीरं व्याप्य स्थितं ब्रह्मेति मन्यते विद्वान्, यथा गावः गोष्ठे विस्रंभेण तिष्ठन्ति । तस्मात् सर्वदेवताभिराश्रितं जीवरूपेण अन्तर्यामिरूपेण च प्रविष्टं पुरुषशरीरं ब्रह्मतादात्म्येन विद्वान् साक्षात्करोतीत्यर्थः ॥

॥ इति सर्वं शिवम् ॥

(ऋ) मन्वादिस्मृतिषु अद्वैतभावाः

(पोलकम् श्रीसुन्दरशास्त्रिणः)

தர்மம் மோக்ஷ சாதனமாகையால், தர்ம சாஸ்திரங்களாகிய ஸ்ம்ருதிகள் ஆத்ம ஞானத்தை, ஆத்ம தர்சனத்தை, பரம தர்மமாக உபதேசிப்பது பொருத்தமே.

மனு ஸ்ம்ருதி உபக்ரமத்திலும் உபசம்ஹாரத்திலும் அத்வைதத்தை விளக்குகின்றது: ''யோகத்தாலே ஆத்ம தர்சனம் பெறுவதே பரம தர்மம்'' (1, 8); 'எல்லாப் பொருளும் ஆத்மாவி லுள்ளது (தன்னுள்ளேயுள்ளது) ஆத்மா (தானே) எல்லாப் பொருளிலுமுள்ளது என்று ஒருமையைக் காணும் ஆத்மயாஜி ஸ்வாராஜ்யத்தை (பிரும்மத் தன்மையை) அடைகிறான் (12, 91).

ஸ்ம்ருதியின் மத்திய பாகத்திற் கூறப் பட்ட (6, 92) தர்ம லக்ஷணங்கள் பத்தினுள் ஒன்றான வித்யை ஆத்ம ஞானமே என்று குல்லூக பட்டரின் உரை தெளிவாக்குகின்றது. தர்மத்தை விளக்க வேண்டும் என்று கேட்ட முனிவர் களுக்கு மனு ''பிரம்மமே ஜகத்திற்குக் காரணம்; ஆத்மஞானமே பரம தர்மம். விப்ரர்கள் தர்மத்திற்காகப் பிறந்த தர்ம ஸ்வரூபிகளாதலால் (தர்மத்தாலுண் டான ஆத்ம ஞானத்தால்) வீடு பெறு கிறார்கள்'' என்று கூறுகிறார்.

மேலும், ஞானமே மோக்ஷ சாதனம் என்றும் வேதாப்யாசம், தவம், ஞானம், இந்திரிய வொடுக்கம், அஹிம்ஸை, குருஸேவை என்னும் ஆறு மோக்ஷ சாதனங்களுள் ஆத்மஞானமே மோக்ஷத்திற்கு (நேரான) உபாயமாத லால் மிகச் சிறந்தது என்றும் கூறப் பட்டுள்ளது. நிவிர்த்திகர்மாவினால் பஞ்ச பூதங்களைக் கடந்து விடலாம் என்பதால், சரீரமற்ற நிலையே மோக்ஷ நிலை என்னும் அத்வைதக் கொள்கை ஸ்தாபிக்கப் படுகின்றது.

யாஜ்ஞவல்க்ய ஸ்ம்ருதியும் பிராயச்சித் தாத்யாயத் தொடக்கத்திலேயே (1: 34) ஜீவேச்வராபேதத்தைக் கூறி, யதி தர்மப் பிரகரணத்தில் (108—110) ஆத்ம ஞானமே புனராவிருத்தியினின்றும் விடுவிக்கின்றது என்று கூறி, ப்ரும்ம ஸ்வரூபத்தை கடாகாசம் ப்ரதிபிம்பம் முதலிய அத்வைதத்திற்குரிய உதாரணங் களால் விளக்கி, ''ஆத்மாவே தன்னை எவ்வாறு சிருஷ்டித்துக் கொள்கிறது என்று உங்களுக்குக் கூறினேன்; அனாதி யாய் எல்லாம் வல்ல ஈசனான இவனே சரீரத்தால் ஆதியுடையவனாகி முக்குணங் களையுடையவனாய் சக்கிரத்தைப்போலச் சுழல்கின்றான்'' என்று முடிப்பதால், அத்வைதமே இந்த ஸ்ம்ருதியின் பொரு ளாகும்.

இதர ஸ்ம்ருதிகளும் அத்வைதத்தைக் கூறுகின்றன. (1) ''சரீரமே க்ஷேத்ரம்; இதை அறிந்தவனே க்ஷேத்ரஜ்ஞன் என்று தத்வமுணர்ந்தோர் கூறுவர். 'எல்லா க்ஷேத்ரங்களிலுமுள்ள க்ஷேத்ரஜ்ஞன் நானே' என்று அறிவாய்; மோக்ஷமடைய விரும்புவோன் க்ஷேத்ர க்ஷேத்ரஜ்ஞ தத் வத்தை (நிர்குணோபாஸனையை)த் தெரிந்துகொள்ளவேண்டும்'' என்று தத்துவத்தை பூதேவிக்கு விஷ்ணு விளக்குகிறார்; நிர்குணோபாஸனை செய்ய இயலாதவனுக்கே ஸகுணோபாஸனை கூறப் பட்டுள்ளது. ஸம்ஹிதையின் முடிவிலே ஞானத்தாலேயே மோக்ஷம் என்று விளக்கப்படுகின்றது. (2) தக்ஷ ஸ்ம்ருதி யும் ''ஆத்மாவைத் தவிர வேறொன்றை யும் காணாதவன் பிரும்மமாகிறான் என்பது தக்ஷபக்ஷம்; மனதைச் செயலற்ற தாக்கி க்ஷேத்ரஜ்ஞனை பரமாத்மாவோடு ஒன்று படுத்துவதே முக்கியமான யோகம்; மனோபாவங்களை நீத்து க்ஷேத் ரஜ்ஞனை பிரம்மத்திலே வைப்பதே தியானம், இதுவே யோகம், மற்றவை வெறும் பேச்சுப் பெருக்கே'' என்று கூறி

இதுவே தர்மத்தைப் பற்றிய அத்வைதக் கொள்கை என்று முடிவு செய்கின்றது. (3) சங்க ஸம்ஹிதையும் ஞானத்தாலேயே மோக்ஷமென்றும் பரமாத்மா இருபத்தைந்தாந்தத்துவமாகிய ஜீவாத்மாவினின்ற வேறுபடாதவன் என்றும் வற்புறுத்துகின்றது.

As Dharma is one of the means of attaining Moksha, it is but appropriate that the Smṛtis which deal with Dharma emphasise *Ātma-jñāna* and declare that *Ātma-darśana* is the highest Dharma.

The *Upakarma* (opening) and *Upasamhāra* (concluding) passages of the *Manu Smṛti* are clearly Advaitic: "This is the highest Dharma, realization of the Ātman by Yoga" (1,8); "(As Ātman) I am in every created thing and all things are in me; (thus) seeing oneness, the devotee of the Ātman attains (the nature of Brahman) *Svārājya*" (12,91); the central portion of the *Smṛti* (6, 92) also, in enumerating the ten indicia of Dharma, mentions Vidyā (explained by the commentator Kullūka as *Ātma-jñāna*). Questioned about Dharma, Manu declares that Brahman is the cause of the universe and that *Ātma-jñāna* is the supreme Dharma and that the Vipra is Dharma incarnate as he is born for the sake of Dharma and attains Moksha (through *Ātma jñāna* vouchsafed to him by Dharma).

The cardinal principle of *Advaita* that *jñāna* alone leads to Moksha is set out in the concluding verses thus: "Repeated reverent study of the Vedas, *tapas*, *jñāna*, control of the senses, *ahimsā* and *guru sevā*—of these several means, *ātma-jñāna* is the highest as it leads (directly) to Moksha (12, 83; 12,85).

Again in the passage, "By practising *nivṛtti* karma, one transcends the five elements (*bhūtas*)" the Advaitic concept of Moksha is upheld and other concepts involving (*bhautika*) *śarīra moksha-deśa* are negatived.

Yājñavalkya Smṛti (with the commentary Mitākshara) refers to Jiveśvarābheda (1,34) at the outset of *Prāyasahitta kāṇḍa*. *Yati-dharma-prakaraṇa* (108-110) declares that *Ātmajñāna* causes release from *punarurtti*. Knowledge about the Brahman is expounded with the illustrations of *ghaṭākāśa* and *Pratibimba* peculiar to Advaita; and the treatise ends with the declaration: "I have told you how the Ātman creates the Ātman, how the three *guṇas* pertain to the Ātman, and how Ātman assumes *śarīra* and revolves like a wheel in *Samsāra*" (181-1); and the commentary makes it clear that the purport of this is that *Iśvara* and *Jiva* are in reality one.

Examples are cited from other Smṛtis.

(i) Vishṇu's exposition to Bhūdevi starts with the statement (Vishṇu Samhitā ch. 96); "This body is known as *kshetra*, O Earth, and he who knows it as *kshetrajña* by those who know that. Know Me, O Bhāmini as the *kshetràjña* in all the kshetras. He who desires Moksha must always know the truth about *kshetra* and the *kshetrajña*" (referring to *nirguṇapāsana*); and the Samhita prescribes *Saguṇopāsana* only to these who are not able to do *nirguṇopāsana*. The concluding portion referring to *jñāna* as the attainment of Brahman is clearly Advaitic.

(ii) Daksha Smṛti declares: "He who sees (everywhere) nothing other than the Ātman is (become) the Brahman, this is Daksha's view. Release is by ridding the mind of its activity and by identifying the *kshetrajna* with the *Paramātman*: this is the foremost Yoga. Freed from all (bhāvas).

(mental activity) one must posit the *kshetrajña* in the Brahman; this is Dhyāna, this is Yoga, the rest is all words". Daksha in conclusion explicitly affirms the Advainta's convictions regarding Dharma.

(iii) Śankha Samhitā also points out that Mukti is attained only by the knowledge that the *Paramātman* is not separate from the twenty-fifth Tattva, the *Pratyagātman*.

यद्यपि मन्वादिस्मृतिषु धर्मशास्त्रत्वेन प्रसिद्धेषु नाद्वैतनिरूपणप्रसक्तिरस्ति, तथापि "अयं तु परमो धर्मो यद्योगेनात्मदर्शनम्" (याज्ञवल्कीये १, ८) "आत्मज्ञानं तितिक्षा च धर्मः साधारणो नृप" (महाभारते) इत्यादिवचनैः आत्मज्ञानस्यैव परमधर्मत्वेन, समूलकाषं पापजातस्य कषणहेतोः प्रायश्चित्तोपदेशप्रकरणे अवश्यवक्तव्यत्वेन निरूपितस्य धर्मजातस्य तमेतमिति वाक्यानुरोधेन आत्मतत्त्वज्ञाने फले पर्यवसानस्य वक्तव्यत्वेन च, नात्मस्वरूपनिरूपणमंतरा स्मृतीनां पौष्कल्यं संपद्येतेत्यभिप्रायेण स्वस्वशास्त्रेषु महर्षिभिरात्मतत्त्वनिरूपणं कृतम् । अतः स्मृतिषु अद्वैतविमर्शो युक्त एव । तत्रादौ मनुस्मृतिश्चिन्त्यते ॥

आसीदिदं तमोभूतं अप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ॥ (१, ४)
इति ॥

श्रीभगवान् मनुः जगज्जन्मादिकारणत्वम् ब्रह्मलक्षणम् वक्तुं प्रलयस्वरूपकीर्तनमुखेन सृष्टिवर्णनमारभते "आसीदिदम्" इत्यादिना । इयञ्च सरणिरात्मज्ञानोपदेशपरासूपनिषत्सु प्रसिद्धा—यथा "आत्मा वा इदमेक एवाग्र आसीत्" "तद्धेदन्तर्ह्यव्याकृतमासीत्" "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" इत्यादिषु । अन्ते च द्वादशाध्याये "सर्वभूतेषु चात्मानम्" (९२) इत्यादिनाऽद्वितीयात्मप्रतिपादनपरता अवसीयते । यथा चैतत्तथाऽनुपदमेव स्फुटीकरिष्यते । इत्थमुपक्रमोपसंहारैकरूप्येण ब्रह्मात्मैक्यज्ञानस्य प्राधान्यं मनुस्मृत्यभिप्रेतमवगम्यते । तदेतद्धर्मस्वरूपप्रश्नोत्तरतया प्रवृत्ते ग्रन्थे ब्रह्मज्ञानस्य प्राधान्येन निरूपणं न तस्य प्रकृष्टधर्मत्वमन्तरा घटत इति अर्थाज्ज्ञानस्य परमधर्मत्वं सिध्यति । वचनञ्चोदाहृतं याज्ञवल्क्यीयं "अयन्तु परमो धर्म" इति । मनुना च भण्यते

"धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥
(६, ९२) इति ।

अत्र दशविधधर्माभिधाने विद्याशब्दवाच्यमात्मज्ञानं परिगणितम् । "शास्त्रादितत्त्वज्ञानं धीः, आत्मज्ञानं विद्या" इति कुल्लूकभट्टेन व्याख्यातत्वात् । महाभारतेऽपि "आत्मज्ञानं तितिक्षा च धर्मस्साधारणो नृप" इति । अतः उपनिषत्सु "यतो वा इमानि भूतानि जायन्ते" इत्यादिना लक्षणकथनमुखेन ब्रह्मस्वरूपबोधनवत्, ब्रह्मसूत्रे 'जन्माद्यस्य यतः' इतिवच्च, प्रथमाध्याये सृष्ट्यादिकारणत्वरूपलक्षणप्रदर्शनादिना ब्रह्मप्रतिपादनेन मध्ये च षष्ठाध्याये

दशलक्षणकं धर्ममनुतिष्ठन्समाहितः ।
वेदान्तान्विधिवच्छ्रुत्वा संन्यसेदनृणो द्विजः ॥
(६, ९४)

इति परामर्शात् । अन्ते च द्वादशाध्याये—

"सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ।
समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति ॥
(१२, ९२)

इत्युपसंहाराच्च परमधर्मत्वेन संप्रतिपन्नमात्मज्ञानमादिमध्यावसानेषु प्राधान्येन निरूप्य, द्वितीय-

याद्यध्यायेषु तदङ्गतया संस्कारादिधर्मं मनुर्न्यरूरुप-दिति श्लिष्यते ॥

उक्तं ह्यभियुक्तैः—

"धर्मे पृष्टे मनुर्ब्रह्म जगतः कारणं ब्रुवन् ।
आत्मज्ञानं परं धर्मं वित्तेति व्यक्तमुक्तवान् ॥

प्राधान्यात्प्रथमाध्याये साधु तस्यैव कीर्तनम् ।
धर्मोऽन्यस्तु तदङ्गत्वाद्युक्तो वक्तुमनन्तरम् ॥
इति ॥

तदयं श्लोकार्थः—इदमिति सर्वनाम्ना अध्यक्षेण सर्वस्य प्रतिभासमानत्वाद्व्याकृतनामरूपं जगन्निर्दिश्यते । इदञ्जगत् तमोभूतं तमसि स्थितं लीनमासीत् । अन्धकारवाचकेन तमश्शब्देन तम इव तमः इति गौण्या वृत्त्या "तम आसीत्तमसा गूल्हमग्रे" इति श्रुताविव "मायान्तु प्रकृतिं विद्यात्," "दैवी ह्येषा गुणमयी", "अजामेकां लोहितशुक्लकृष्णां" इत्यादिश्रुतिस्मृत्यवधारितस्वरूपा त्रिगुणात्मिका मायाऽविद्यादिशब्दाभिधेया मूलप्रकृतिर्निर्दिश्यते । यथा तमसि लीनाः पदार्था अध्यक्षेण न प्रकाश्यन्ते, एवं प्रकृतिलीना अपि भावा नावगम्यन्त इति गुणयोगः । प्रलयकाले सूक्ष्मरूपतया प्रकृतौ लीनमासीदिति फलितोऽर्थः । स्पष्टो ह्ययमर्थः नासदासीये सूक्ते । विस्तरभयान्नेह तत्प्रपञ्च्यते ॥

प्रकृतिरपि ब्रह्मात्मनाऽव्याकृता आसीत् । अत एवाप्रज्ञातं अप्रत्यक्षम् । सकलप्रमाणश्रेष्ठस्य प्रत्यक्षस्य यो गोचरः स प्रज्ञातं इत्युच्यते, तन्न भवतीत्यप्रज्ञातम् । लक्ष्यते अनेनेति लक्षणं लिङ्गं व्याप्यं तदस्य नास्तीति अलक्षणं नानुमानगम्यमित्यर्थः । अप्रतर्क्यं तर्कयितुमशक्यं, तदानीं स्थूलशब्दाभावाच्छब्दतोऽप्यविज्ञेयं । एतदेव हि प्रमाणत्रयं द्वादशाध्याये मनुनाऽभ्युपगतम्—

"प्रत्यक्षमनुमानञ्च शास्त्रञ्च विविधागमम् ।
त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सता ॥ १०५ ॥
इति ।

न च "नासदासीन्नोसदासीत्तदानीम्" इति श्रुत्या न किमप्यवशिष्यत इति शङ्क्यम । "तद्धेदन्तर्ह्यव्याकृतमासीत" "सदेव सोम्येदमग्र आसीत" "आत्मा वा इदमेक एवाग्र आसीत्" "ब्रह्म वा इदमग्र आसीत्" इत्यादिश्रुतिषु सर्वस्यापि जगतो ब्रह्मात्मनाऽवस्थानश्रवणात् । अत एव प्रसुप्तमिव सर्वतः । प्रथमार्थे तसिः स्वकार्याक्षममित्यर्थः । तस्माद्ब्रह्मस्वरूपनिरूपणोपक्रमा मनुस्मृतिरिति निर्विवादम् ॥

यद्यपि प्रथमाध्याये नाद्वैतं स्पष्टमवगम्यते; तत्र वर्ण्यमानस्य देवमनुष्यादिसर्गस्य मतान्तरसाधारण्यात्, तथाऽपि—

उत्पत्तिरेव विप्रस्य मूर्तिर्धर्मस्य शाश्वती ।
स हि धर्मार्थमुत्पन्नो ब्रह्मभूयाय कल्पते ॥
(१-९८)

इत्यनेन प्रथमाध्यायगतश्लोकेन "धर्मानुगृहीतात्मज्ञानेन मोक्षाय संपद्यत" इति कुल्लूकभट्टकृतत्व्याख्यानेन चाद्वैतमेव मनोरभिमतमिति दृढं निश्चीयते । अत्र हि ब्रह्मभावार्थकब्रह्मभूयशब्देन मोक्षो निर्दिष्टः । नहि ब्रह्मभावलक्षणो मोक्षो मतान्तरे अभ्युपगम्यते । न वा संभवति, जीवत्वे स्थिते नष्टे वा ब्रह्मभावस्य दुरुपपादत्वात्; अन्यस्यान्यभावायोगात् ॥

अत एवोक्तं विष्णुपुराणे—

परमात्मात्मनोर्योगः परमार्थ इतीर्यते ।
मिथ्यैतदन्यद्द्रव्यं हि नैति तद्द्रव्यतां यतः ॥
(२-१४-२७) इति ।

स्पष्टं ह्यत्राऽन्यस्य सतोऽन्यभावापत्तिर्दृश्यते । आगन्तुकस्य विनाशित्वध्रौव्येण नित्यत्वेन सर्वसम्प्रतिपन्नमोक्षरूपत्वायोगाच्च । तस्माज्जीवस्य ब्रह्मभावं ब्रुवन्मनुः नित्यसिद्धमेव तमविद्यया तिरोहितं विद्यया चाभिव्यक्तमभिप्रैतीति निश्शङ्कमकामेनाप्यभ्युपेयमिति नास्ति क्वाचिदाशङ्काऽद्वैतस्य प्रथमाध्यायगम्यत्वे । आत्मज्ञानस्य मोक्षसाधनत्वं वर्णयदेतद्व्याख्यानमपि अमुमर्थमुपोद्बलयति । नहि ज्ञानमात्रेण कश्चिदर्थस्सिध्यन्दृष्टो लोके; सिध्यन्वा नित्यः ; ज्ञानस्याऽज्ञानापनयनमात्रपटुत्वात् । अतो व्याख्यानमपि मनोर्जीवब्रह्मैक्याभिप्रायं द्रढयति ॥

एवं द्वादशाध्यायपर्यालोचनमपि । तथा हि—

"एष सर्वस्समुद्दिष्टः कर्मणां वः फलोदयः ।
नैश्रेयसकरं कर्म विप्रस्येदं निबोधत" ॥ (८२)

अनेन श्लोकेन यः पृष्टो द्वादशाध्यायादौ—

"चातुर्वर्ण्यस्य कृत्स्नोयमुक्तो धर्मस्त्वयाऽनघ ।
कर्मणां फलनिर्वृत्तिं शंस नरतत्वतः पराम्" ॥ (२)

इति स एष शुभाशुभफलप्राप्तिलक्षणः फलोदयः कथितः । इदानीं ब्राह्मणस्य निश्रेयसशब्दितं मोक्षाय हितं साधनं शृणुत इति सफलं कर्म समाप्य पार्थक्येन मोक्षसाधनोपदेशं प्रतिज्ञाय—

"वेदाभ्यासस्तपो ज्ञानमिन्द्रियाणाञ्च संयमः ।
अहिंसा गुरुसेवा च निश्श्रेयसकरं परम्" ॥ (८३)

इति समनन्तरश्लोकेन "वेदाभ्यासः उपनिषदादेर्वेदस्य ग्रन्थतोऽर्थतश्चावर्तनं, तपः कृच्छ्रादि, ज्ञानं ब्रह्मविषयं, इन्द्रियजयः, अविहितहिंसावर्जनं, गुरुशुश्रूषा इत्येतत्प्रकृष्टं मोक्षसाधन" मिति कुल्लूकभट्टव्याख्यातेन वेदाभ्यासादीनां गुरुशुश्रूषान्तानां षण्णामविशेषेण साक्षात्परंपरासाधारण्येन मोक्षहेतुत्वं प्रतिज्ञाय—

"सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम् ।
तद्ध्यग्र्यं सर्वविद्यानां प्राप्यते ह्यमृतं ततः" ॥ (८५)

इत्येकान्तरितश्लोकेनोक्तानां षण्णामपि साधनानां मध्ये आत्मज्ञानस्य परमश्रेष्ठत्वमुक्त्वा, तत्र सर्वविद्याश्रैष्ठ्यं हेतूकृत्य, तत्रापि मोक्षसाधनत्वं हेतूकुर्वन्मनुः सञ्जनयत्यामोदमद्वैतिनां परं परमम् ॥

न ह्यत्र मतान्तरस्य वर्तते कश्चित्प्रवेशशङ्काशूकोऽपि । षण्णां मोक्षहेतुत्वेऽभिहितेऽपि पुनरात्मज्ञानमात्रस्य परत्वसर्वविद्याश्रेष्ठत्वमोक्षप्राप्त्युपायत्वानां पृथग्वर्णनमसत्यतिशये कथमुपपद्यताम् । अतिशयो वाऽस्य साधनान्तरेभ्यः पञ्चभ्यः साक्षात्साधनत्वमन्तरेण कोऽन्यः कलयितुं शक्यः । "ज्ञानादेव तु कैवल्यं" इति स्मृत्यन्तरमपि अन्येषां वेदाभ्यासादीनां परम्परया साधनत्वं, ज्ञानस्यैव साक्षात्कारणत्वञ्च ब्रुवन्मनुस्मृतिं संवादयति । न च कैवल्यं नाम ततो मोक्षान्न्यूनं स्थानान्तरमिति कस्यचिद्वचनं शक्योपपादनम् । उक्तवचनेष्वात्मज्ञानस्य निश्रेयसामृतशब्दाभ्यां मोक्षहेतुत्वस्य मनुस्मृतावेवाभिधानात् । "मुक्तिः कैवल्यनिर्वाणश्रेयोनिश्श्रेयसामृतम्" इत्यमरसिंहेन कैवल्यपदस्य मुक्तिशब्दपर्यायतोक्तेः । श्रीमद्भागवते च "मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थितिः" इति स्वरूपावस्थानलक्षणस्याऽऽत्मज्ञानप्राप्यस्य कैवल्यशब्दार्थत्वेन पराभिमतस्य मुक्तिशब्देन निर्देशाच्च मोक्षकैवल्यशब्दार्थयोर्भेदकल्पनस्याप्रामाणिकत्वात् । अतो ज्ञानमात्रान्मोक्षप्रतिपादकेन 'प्राप्यते ह्यमृतं ततः" ॥ (१२, ८५)

इत्यादिमनुवचनेनाऽद्वैतमेव प्रकटयकारि ॥

एवं "प्रवृत्तं कर्म संसेव्य देवानामेति साम्यताम् ।
निवृत्तं सेवमानस्तु भूतान्यत्येति पञ्च वै" ॥
(१२,९०)

इति वचनेनाऽपि अद्वैतमवगम्यते । अत्रेयं कुल्लूकभट्टव्याख्या—"निवृत्तकर्माभ्यासेन पुनश्शरीरारम्भकाणि पञ्चभूतान्यतिक्रामति, मोक्षं प्राप्नोतीत्यर्थः" इति । अनेन मोक्षे पञ्च भूतात्ययश्रवणेन शरीराभावस्य स्फुटत्वात्सशरीरमुक्त्यभ्युपगन्तृमतान्तराणां मनुस्मृत्यनभिमतत्वस्य स्पष्टत्वात् । न चैवमपि भूतातिक्रमस्य नैयायिकादिसंमतमुक्तिसाधारण्येनाऽद्वैतमुक्तिरेवाऽत्र कथं प्रतीयत इति शङ्क्यम् । एतच्छङ्काया व्युदासायैव समनन्तरश्लोकस्य प्रवृत्तत्वात् । अयं स श्लोकः

"सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ।
समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति" ॥
(१२, ९२) इति ।

न ह्येतद्वचनं मतान्तरे कथञ्चिदपि स्वारस्यमश्नुवीत । आत्मनोऽणुत्वमध्यमपरिमाणाभ्युपगन्तॄणां सर्वभूतेष्वात्मसत्त्वस्य, सर्वभूतानामात्मवृत्तित्वस्य च दुरुपपादत्वात् । विभुत्वाभ्युपेतॄणामपि आत्मनो नानात्वादनुपादानत्वाच्च सर्वभूतानामेकात्मवृत्तित्वस्याऽत्र प्रतीयमानस्य कथमप्यसङ्गतेः । स्वेनैव राजत इति स्वराट् स्वप्रकाशः परमात्मा तस्य भावः स्वाराज्यं ब्रह्मभावः । तिष्ठन्गायतीत्यादौ स्थितिगायत्योर्मध्ये कार्यान्तरस्येव, "पश्यन्स्वाराज्यमधिगच्छति" इत्यत्र दर्शनब्रह्मभावयोर्मध्ये कर्तव्यान्तरस्य वारणेन ब्रह्मभावलक्षणमोक्षस्याऽऽत्मदर्शनमात्रायत्तत्वप्रतीत्याऽद्वैतसिद्धान्तस्यैव मनुस्मृतिनिरूपितत्वं सिध्यति । एतादृशस्यात्मदर्शनस्य साधनजातं वेदप्रामाण्यादिकञ्च विस्तरेण समुपवर्ण्य,

एतद्वोऽभिहितं सर्वं निःश्रेयसकरं परम् ।
अस्मादप्रच्युतो विप्रः प्राप्नोति परमां गतिम् ॥

एवं स भगवान्देवो लोकानां हितकाम्यया ।
धर्मस्य परमं गुह्यं ममेदं सर्वमुक्तवान् ॥

इति शास्त्रमुपसंहृत्याऽपि आत्मदर्शनस्यैव साक्षान्मोक्षसाधनत्वेन कृत्स्नवेदशास्त्रसंमतत्वं, सर्वेषामपि तपोध्यानसमाधिप्रभृतीनां वैदिकधर्माणां तच्छेषत्वं, अतः प्राधान्येन तस्यैव सर्वप्रयत्नसंपाद्यत्वं, तावन्मात्रेण कृतकृत्यत्वञ्चाऽभिप्रेत्याऽसकृदुक्तमपि आत्मदर्शनं शास्त्रान्ते पुनर्विस्तरेण बहुभिःश्लोकैः सहेतुकं सप्रमाणं सोपपत्तिकञ्च परमादरेण श्रीभगवान्स्वायंभुवो मनुर्निरूपयामासेत्यतो नाऽन्यत्किञ्चित्प्रमाणादिकं गवेषणीयमद्वैतसाम्राज्ये । त एते श्लोकाः—

सर्वमात्मनि संपश्येत्सच्चासच्च समाहितः ।
सर्वं ह्यात्मनि संपश्यन्नाधर्मे कुरुते मनः ॥

आत्मैव देवताः सर्वाः सर्वमात्मन्यवस्थितम् ।
आत्मा हि जनयत्येषां कर्मयोगं शरीरिणाम् ॥

खं सन्निवेशयेत्खेषु चेष्टनस्पर्शनेऽनिलम् ।
पक्तिदृष्ट्योः परं तेजः स्नेहेऽपो गां च मूर्तिषु ॥

मनसीन्दुं दिशः श्रोत्रे क्रान्ते विष्णुं बले हरम् ।
वाच्यग्निं मित्रमुत्सर्गे प्रजने च प्रजापतिम् ।
प्रशासितारं सर्वेषामणीयांसमणोरपि ।
रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषं परम् ॥

एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम् ।
इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्वतम् ॥

एष सर्वाणि भूतानि पञ्चभिर्व्याप्य मूर्तिभिः ।
जन्मवृद्धिक्षयैर्नित्यं संसारयति चक्रवत् ॥

एवं यः सर्वभूतेषु पश्यत्यात्मानमात्मना ।
स सर्वसमतामेत्य ब्रह्माभ्येति परं पदम् ॥

इत्येतन्मानवं शास्त्रं भृगुप्रोक्तं पठन्द्विजः ।
भवत्याचारवान्नित्यं यथेष्टां प्राप्नुयाद्गतिम् ॥
(१२,११८-१२६)

निगदव्याख्याता इमे श्लोकाः ॥

इतीदं मानवं शास्त्रमद्वैतार्थे सुयोजितम् ।
आदिमध्यावसानानि विमृश्य श्रीगुरोर्मुदे ॥

एवमन्यदपि स्मार्तं वचनं योज्यमद्वये ।
तस्याऽपि तत्त्वरसता श्रुत्यन्तस्येव दृश्यते ॥

औपनिषदस्य पुरुषस्योपनिषद्भिरेव निर्णतव्यत्वात् किमनेन स्मृतिगवेषणेनेत्याशङ्का तु "स्वतन्त्रप्रज्ञानामुपनिषद्भिरेवार्थनिर्णयेऽपि परतन्त्रप्रज्ञानां प्रख्यातप्रणेतृकस्मृतिबलेन श्रुत्यर्थनिर्णयप्रवृत्त्याऽस्मत्कृतव्याख्यानेऽविश्वासेन च विपरीतग्रहणं स्यात्, तेषामपि यथार्थप्रबोधनाय मन्वादिस्मृतयः प्रदर्शनीयाः" इत्यादिना भगवत्पादैरेव समाधायि । अतः तत्त्वग्रहणदार्ढ्याय स्मृत्यर्थोऽनुसन्धेय एव ॥

अथ याज्ञवल्क्यस्मृतिश्चिन्त्यते । तत्र प्रायश्चित्ताध्याये—

"कालोऽग्निः कर्म मृद्वायुर्मनो ज्ञानं तपो जलम् ।
पश्चात्तापो निराहारस्सर्वेऽमी शुद्धिहेतवः ॥ (१,३१)

इति सामान्येन शुद्धिहेतूनुक्त्वा विशेषतश्च "अकार्यकारिणां दानं" ॥ (१, ३२)
इत्याद्युक्त्वा,
"भूतात्मनस्तपोविद्ये बुद्धेर्ज्ञानं विशोधनं ।
क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मता ॥ (१,३४)

इत्यभिहितम् । अत्र मिताक्षराव्याख्या—"भूतशब्देन तद्विकारभूतो देहेन्द्रियसंघो लक्ष्यते । तत्र स्थूलोऽहं कृशोऽहं काणोऽहं बधिरोऽहमित्येवं तदभिमानित्वेन योऽयमात्मा वर्तते स भूतात्मा तस्य तपोविद्ये शुद्धिनिमित्ते । तपश्शब्देन अनेकजन्मस्वेकस्मिन्नपि वा जन्मनि जाग्रत्स्वप्नसुषुप्त्यवस्थासु आत्मनो योयमन्वयश्शरीरादेश्च यो व्यतिरेकस्सोऽभिधीयते, यथा "तपसा ब्रह्म विजिज्ञासस्व" इति पञ्चकोशव्यतिरेकप्रतिपादनपरे वाक्ये । विद्याशब्देन चौपनिषदं "असंगो ह्ययमात्मा" इत्यादित्वंपदार्थनिरूपणविषयवाक्यजन्यं ज्ञानमुच्यते, एताभ्यामस्य शुद्धिः । शरीरादिव्यतिरिक्तबुद्धेस्संशयविपर्ययरूपत्वेनाशुद्धायाः प्रमाणजन्यं ज्ञानं विशोधनम् । क्षेत्रज्ञस्य तपोविद्याविशुद्धस्य त्वंपदार्थभूतस्य तत्त्वमस्यादिवाक्यजन्यात्साक्षात्कारादीश्वरज्ञानात्परमा विशुद्धिर्मुक्तिलक्षणा" इति । एवं प्रायश्चित्तादिसाध्यविशुद्ध्यपेक्षया त्वंपदार्थजीवशोधनपूर्वकक्षेत्रज्ञशब्दितनिष्कृष्टजीवस्वरूपब्रह्मैक्य - ज्ञानस्य परमपरिशुद्धिहेतुत्वप्रतिपादनेनाविद्यादिसकलदोषविनिर्मुक्तिलक्षणस्य परमपुरुषार्थस्य महावाक्यजन्यजीवब्रह्मैक्यज्ञानाधीनत्वं वर्णयतामद्वैतिनां सिद्धान्त एव परमर्षिणा जनकादिभ्यो ब्रह्मविद्योपदेष्टृत्वेन निखिलब्रह्मर्षिजेतृत्वेन च बृहदारण्यकादिकीर्तितमहिमातिशयेन याज्ञवल्क्येन कण्ठरवेण प्रतिपादितम् ॥

अन्यच्च, यतिधर्मप्रकरणे—

"द्वासप्ततिसहस्राणि हृदयादभिनिस्सृताः ।
हिता हिता नाम नाड्यस्तासां मध्ये शशिप्रभम् ।

मण्डलं तस्य मध्यस्थ आत्मा दीप इवाचलः ।
स ज्ञेयस्तं विदित्वेह पुनराजायते न तु ॥

ज्ञेयं चारण्यकमहं यदादित्यादवाप्तवान् ।
योगशास्त्रं च मत्प्रोक्तं ज्ञेयं योगमभीप्सता " ॥
(१०८—११०)

इति वैराग्यादिसाधनोपदेशपूर्वकं हृदयमण्डलमध्यस्थात्मज्ञानेनापुनरावृत्तिलक्षणं मोक्षं प्रतिज्ञाय,

चित्तवृत्तेर्विषयान्तरतिरस्करणेनात्मनि स्थैर्यलक्षणस्य योगस्य प्राप्त्यर्थमादित्यात्स्वप्राप्तबृहदारण्यकं स्वप्रोक्तयोगशास्त्रं च ज्ञातव्यमित्युक्त्वा ध्यानप्रकारं च कतिपयश्लोकैरुपदिश्य,

"अनादिरात्मा कथितस्तस्यादिस्तु शरीरकम्।
आत्मनस्तु जगत्सर्वं जगतश्चात्मसंभवः" ॥
(११७)

इत्यात्मनिरूपणमुपक्रम्य, तस्य निखिलजगत्कारणत्वमुपन्यस्य,

"मोहजालमपास्येह पुरुषो दृश्यते हि यः।
सहस्रकरपन्नेत्रस्सूर्यवर्चास्सहस्रकः" ॥ (११९)

इत्यादिना बहुभवनं प्रपञ्च्य वर्णादिसृष्टिं चाभिधाय श्लोकाविमौ बभाण—

"यद्येवं स कथं ब्रह्मन् पापयोनिषु जायते।
ईश्वरस्स कथं भावैरनिष्टैस्संप्रयुज्यते ॥

करणैरन्वितस्यापि पूर्वं ज्ञानं कथं च न।
वेत्ति सर्वगतां कस्मात्सर्वगोऽपि न वेदनाम्" ॥
(१२९, १३०) इति।

अत्र मिताक्षरा, "अत्र चोदयन्ति हे ब्रह्मन्योगीश्वर, यद्यात्मैव जीवादिभावं भजते तर्हि कथमसौ पापयोनिषु मृगपक्ष्यादिषु जायते। अथ मोहरागद्वेषादिदुष्टत्वात् तत्र जन्मेत्युच्यते, तच्च न, यस्मादीश्वरस्स्वतन्त्रः, स कथमनिष्टैर्मोहरागादिभावैस्संयुज्येत। किञ्च तथेदमप्यत्र दूषणं—मनःप्रभृतिज्ञानोपायैस्सहितस्यापि तस्याऽऽत्मनः पूर्वं ज्ञानं जन्मान्तरानुभूतविषयं कस्मान्नोत्पद्यते। तथा सर्वप्राणिगतां वेदनां सुखदुःखादिरूपां स्वयं सर्वगोऽपि सर्वदेहगतोऽपि कस्मान्न वेत्ति। तस्मादात्मैवेश्वरो जीवादिभावं भजत इत्युक्तम्" इति ॥

अत्र हीश्वरस्य जीवभावः कथमिति मुनीनां प्रश्नोऽवतारितः। एतादृशप्रश्नसामर्थ्यादेव जीवब्रह्मैक्यमद्वैतिसंमतमिह पूर्वं याज्ञवल्क्येन समुपदिष्टमिति ज्ञायते। कथमन्यथा महर्षयः भ्रान्तपुरुषा इवानुपदिष्टेऽविवक्षिते वाऽर्थे चोदयेयुः। न हि महर्षीणां भ्रान्तिकल्पना श्लाघीयसी, न वा प्रश्नार्थोऽन्यथयितुं शक्यस्स्फुटप्रतिभासः, नाप्युपरिष्टाद्याज्ञवल्क्यवाक्येन महर्षीणां भ्रान्त्युपपादनं कृतं दृश्यते, कथं वा निर्हेतुकः स्मृत्यर्थपरित्यागो विदुषां हृदयङ्गमस्स्यात्। तस्मान्मूर्धाभिषिक्तमिदं प्रमाणमद्वैतसिद्धौ श्लोकद्वयम् ॥

किञ्च, प्रथमप्रश्नस्य—"अन्त्यपक्षिस्थावरतां"
(१३१)

इत्यादिना, यद्यपीश्वरस्स्वरूपेण सत्यज्ञानानन्दलक्षणः, तथाऽप्यविद्यासमावेशवशान्मोहरागादिभावैरभिभूयमानो नानाहीनयोनिजननसाधनं मानसादित्रिविधं कर्मनिचयमाचरतीति विज्ञानेश्वरव्याख्यानरीत्याऽविद्याकर्माधीना नानायोनिप्राप्तिरिति समाधानमुक्त्वा, 'करणैरन्वितस्यापि" (१३०) इति द्वितीयप्रश्नस्य समाधानं—

"मलिनो हि यथाऽऽदर्शो रूपालोकस्य न क्षमः।
तथाऽविपक्वकरण आत्मज्ञानस्य न क्षमः" ॥
(१४१)

इत्यादिना समभ्यधायि। तत्र एकस्मिन्नात्मनि सुरनरादिदेहेषु भेदप्रत्ययो न घटत इत्याशङ्क्याऽऽह—

"आकाशमेकं हि यथा घटादिषु पृथग्भवेत्।
तथाऽऽत्मैको ह्यनेकश्च जलाधारेष्विवांशुमान्" ॥
(१४४) इति।

अत्र विज्ञानेश्वरः "यथैकमेव गगनं कूपकुंभाद्युपाधिभेदभिन्नं नानेवानुभूयते, यथा वा भानुरेकोऽपि

भिन्नेषु जलभाजनेषु करकमणिकमलिकादिषु नानेवानुभूयते, तथैकोऽप्यात्मा अन्तःकरणोपाधिभेदेन नाना प्रतीयते। द्वितीयदृष्टान्तोपादानमात्मभेदस्यापारमार्थिकत्वद्योतनार्थम्" इति। पुनश्च—

"अहङ्कारः स्मृतिर्मेधा द्वेषो बुद्धिः सुखं धृतिः।
इन्द्रियान्तरसञ्चार इच्छा धारणजीविते" ॥
(१७४)

इत्युपक्रम्य "यत एतानि दृश्यन्ते लिङ्गानि परमात्मनः।
तस्मादस्ति परो देहादात्मा सर्वग ईश्वरः ॥
(१७६)

अव्यक्तमात्मा क्षेत्रज्ञः क्षेत्रस्यास्य निगद्यते।
ईश्वरस्सर्वभूतस्थः सन्नसन्सदसच्च यः ॥
(१७८)

इत्यन्तेनैकस्यैवात्मनः उपाधिभेदादेव भेद इत्याकाशसूर्यप्रतिबिम्बादिदृष्टान्तेन कथयित्वा जीवस्वरूपभेदं निराकृत्य बुद्धीन्द्रियाद्यव्यक्तान्तस्य क्षेत्रत्वमुक्त्वा तदभिमानिन एव क्षेत्रज्ञत्वं परमात्मत्वं सर्वज्ञेश्वरत्वादिकञ्च स्पष्टमुपवर्णितम् ॥

उपसंहृतञ्चाऽन्ते—

"यथाऽऽत्मानं सृजत्यात्मा तथा वः कथितो मया।
विपाकात् त्रिप्रकाराणां कर्मणामीश्वरोऽपि सन् ॥
१८१ इति।

अत्र मिताक्षरा, "प्रकरणार्थमुपसंहरन्नाह, मानसादित्रिप्रकारकर्मणां विपाकादीश्वरोऽपि सन्नात्मा यथाऽऽत्मानं सृजति तथा युष्माकं कथितः। सत्वाद्याश्च गुणास्तस्यैवाऽविद्याविशिष्टस्य कीर्तिताः। तथा स एव रजस्तमोभ्यामाविष्टश्चक्रवदिह संसारे भ्राम्यतीत्यपि कथितम्। स एवानादिः परमपुरुषः शरीरग्रहणेनादिमान् कुब्जवामनादिविकारसहितस्तथा स्थूलाकारतया परिणतो लिङ्गैरिन्द्रियैश्च ग्राह्यस्वरूप उदाहृतः" इति। अत्रापि हि मूलव्याख्यानयोः स्पष्टं जीवेश्वरैक्यं प्रतीयते। तस्माद्द्वैतं मुक्त्वा याज्ञवल्क्यस्मृतौ मतान्तरस्य कथमपि नावकाश इति सिद्धम्। एवमन्याश्च काश्चन स्मृतय उदाह्रियन्ते। विष्णुसंहितायां षण्णवतितमाध्याये—

"इदं शरीरं वसुधे क्षेत्रमित्यभिधीयते।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥

क्षेत्रज्ञमेव मां विद्धि सर्वक्षेत्रेषु भामिनि।
क्षेत्रक्षेत्रज्ञविज्ञानं ज्ञेयं नित्यं मुमुक्षुणा ॥"

इत्युपदिश्य तत्रोपायं ध्यानयोगमुपक्रम्य "प्रशान्तात्मा चतुर्विंशत्या तत्वैर्व्यतीतं चिन्तयेत्। नित्यमगुणं शब्दस्पर्शरसरूपगंधातीतं सर्वज्ञमतिस्थूलं सर्वगमतिसूक्ष्मं सर्वतःपाणिपादं सर्वतोक्षिशिरोमुखं सर्वतस्सर्वेन्द्रियशक्ति एवं ध्यायेत्। ध्याननिरतस्य च संवत्सरेण योगाविर्भावो भवति। अथ निराकारे लक्ष्यबंधं कर्तुं न शक्नोति तदा पृथिव्यप्तेजोवाय्वाकाशमनोबुद्ध्यात्माव्यक्तपुरुषाणां पूर्वं पूर्वं ध्यात्वा लब्धलक्ष्यः तत्तत्परित्यज्यापरमपरं ध्यायेत्" इति ध्यानयोगं निरूप्योपसंहरति—

"पुरमाक्रम्य सकलं शेते यस्मान्महाप्रभुः।
तस्मात्पुरुष इत्येवं प्रोच्यते तत्वचिन्तकैः ॥

प्राग्रात्रापररात्रेषु योगी नित्यमतन्द्रितः।
ध्यायीत पुरुषं विष्णुं निर्गुणं पञ्चविंशकम् ॥

तत्वात्मानमगम्यञ्च सर्वतत्वविवर्जितम्।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥

बहिरन्तश्च भूतानामचरं चरमेव च।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥

अविभक्तं च भूतेन विभक्तमिव च स्थितम् ।
भूतभव्यभवद्रूपं ग्रसिष्णु प्रभविष्णु च ॥
ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥
इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ।
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते" ॥ इति ।

अत्र हि शरीराभिमानिनः क्षेत्रज्ञस्य परमात्मभावमुपदिश्य तज्ज्ञानसाधनतया निराकारपुरुषध्यानं तदशक्तस्य साकारध्यानं पुनर्निर्गुणं शब्दस्पर्शादिरहितं परमात्मतत्त्वं चोपवर्ण्य भक्तिसाध्यसाक्षात्कारेण ब्रह्मभावलक्षणो मोक्षः प्रतिपादित इति स्फुटमद्वैतम् ॥

एवं दक्षस्मृतिरपि सम्यगद्वैतनिरूपणदक्षा दरीदृश्यते। तत्र हि सप्तमाध्याये "तं योगं प्रब्रवीम्यहम्" इत्युपक्रम्य "नारण्यसेवनाद्योग" इत्यादिना योगस्यारण्यसेवनादिसाध्यत्वं प्रतिषिध्य,

"अभियोगात्तथाभ्यासात्तस्मिन्नेव तु निश्चयात् ।
पुनः पुनश्च निर्वेदाद्योगस्सिद्ध्यति नान्यथा ॥
आत्मचिन्ताविनोदेन शौचक्रीडनकेन च ।
सर्वभूतसमत्वेन योगस्सिद्ध्यति नान्यथा ॥
यश्चात्मनिरतो नित्यं आत्मक्रीडस्तथैव च ।
आत्मनिष्ठश्च सततमात्मन्येव स्वभावतः ॥
रतश्चैव स्वयं तुष्टस्सन्तुष्टो नान्यमानसः ।
आत्मन्येव सुतृप्तोऽसौ योगस्तस्य प्रसिद्ध्यति ॥
सुप्तोऽपि योगयुक्तः स्याज्जाग्रच्चापि विशेषतः ।
ईदृक्चेष्टः स्मृतः श्रेष्ठो गरिष्ठो ब्रह्मवादिनाम् ॥
य आत्मव्यतिरेकेण द्वितीयं नैव पश्यति ।
ब्रह्मीभूय स एवं हि दक्षपक्ष उदाहृतः ॥
वृत्तिहीनं मनः कृत्वा क्षेत्रज्ञं परमात्मनि ।
एकीकृत्य विमुच्येत योगोऽयं मुख्य उच्यते ॥
सर्वभावविनिर्मुक्तः क्षेत्रज्ञं ब्रह्मणि न्यसेत् ।
एतद्ध्यानं च योगं च शेषाः स्युर्ग्रन्थविस्तराः ॥
स्वसंवेद्यं हि तद्ब्रह्म कुमारी पुंसुखं यथा ।
अयोगी नैव जानाति जात्यंधो हि यथा घटम्" ॥

इति योगस्वरूपतदुपायतत्फलभूतब्रह्मभावादिवर्णनेनाऽद्वैतं प्रकटीकृत्यान्ते चोपसंजहार—

"यस्मिन्देशे वसेद्योगी ध्यानयोगविचक्षणः ।
सोऽपि देशो भवेत्पूतः किं पुनस्तस्य बान्धवाः ॥
द्वैतं चैव तथाऽद्वैतं द्वैताद्वैतं तथैव च ।
न द्वैतं नापि चाद्वैतमित्येतत्पारमार्थिकम् ॥
नाहं नैवान्यसंबन्धो ब्रह्मभावेन भावितः ।
ईदृशायामवस्थायामवाप्य परमं पदम् ॥
द्वैतपक्षं समास्थायाद्वैते तु सुव्यवस्थितः ।
अद्वैतिनां प्रवक्ष्यामि यथा धर्मः सुनिश्चितः ॥
तत्रात्मव्यतिरेकेण द्वितीयं यदि पश्यति ।
ततश्शास्त्राण्यधीयन्ते श्रूयन्ते ग्रन्थसंचयाः ॥

इति ।

एतेषु वचनेष्वद्वैतार्थस्य स्फुटतरं प्रतीयमानत्वात् न व्याख्यानापेक्षेति न तत्र यत्यते ॥

तथा शंखसंहितायां सप्तमाध्याये—

"विदेहमेतं पुरुषं महान्तं आदित्यवर्णं तमसः परस्तात् ।
मन्त्रैर्विदित्वा न बिभेति मृत्योर्नान्यः पन्था विद्यतेऽयनाय ॥
तथात्मानं तद्व्यतीतं पुरुषं पञ्चविंशकम् ।
तं तु ज्ञात्वा विमुच्यन्ते ये जनास्साधुवृत्तयः ॥
इदं तु परमं शुद्धं एतदक्षरमुत्तमम् ।
अशब्दमरसस्पर्शं अरूपं गन्धवर्जितम् ।
निर्दुःखमसुखं शुद्धं तद्विष्णोः परमं पदम्" ॥

इत्यादिना शब्दादिरहितप्रत्यगभिन्नपरमात्मज्ञानमात्रेण मुक्तिः नान्यथेति प्रतिपादनेन शंखस्मृतिरप्यद्वैते सुखं विश्राम्यतीति निश्चीयते ॥

इत्याज्ञया जगदुपास्यगुरोः कृपालोः
श्रीसुन्दरेशचटुलभ्रमरेण सारम् ।
अद्वैतमाक्षिकमिदं स्मृतिपुष्पलब्धं
प्रीत्यार्प्यते सविनयं विबुधाग्रणीभ्यः ॥

(ऋ) धर्मसूत्रेषु अद्वैतभावाः

(महोमहोपाध्याय चिन्नस्वामिशास्त्रिणः)

'ஆத்மலாபத்தினும் உயர்ந்தது வேறு இல்லை' என்பது ஆபஸ்தம்ப ஸூத்ரம்: ஆத்மா என்றும் அழியாதிருப்பதாகையால் லாபம் என்பது அஞ்ஞான நீக்கத்தையே குறிப்பதாம். வேடனாக வளர்ந்த ராஜகுமாரன் கதையை இந்த ஸூத்ரத்து உரையில் ஹரதத்தாசார்யர் விவரிக்கிறார். இக்கதை ஸ்ரீ பகவத்பாதர்களால் ப்ருஹதாரண்யக உபநிஷத் பாஷ்யத்திலே எடுத்தாளப்பெற்றதாகையாலும் ஸூத்ரம் அத்வைதப் பொருளுடையது என்பது தெளிவு.

போதாயன ஸூத்ரத்திலுள்ள "ஓங்காரமே பிரும்மம்; பிரும்மமே இச்சோதி. இதுவே வேதமும் வேத்தியப்பொருளும்; இது தன்னையே (ஆத்மாவையே) நமஸ்கரிக்கின்றது. ஆத்மாவே பிரும்மம்; ஆத்மாவே சோதி" என்னும் ஸூத்ரமும், சிராத்தத்திலே படிக்கப்படும் "அன்னம் பிரும்மம்; நானும் பிரும்மம்; உண்பவனும் பிரும்மம்" என்னும் மந்திரமும் அத்வைதத்தையே தெளிவாகப் பிரதிபாதிக்கின்றன.

"Nothing is known higher than *Ātma-lābha*" says a Sūtra of Āpastamba. As Ātman is eternal, *lābha* can only refer to the removal of the delusion that it is not attained. Haradattāchārya explains this by the illustration of the prince who was brought up by hunters and considered himself as a hunter, an illustration used by Sri Śankara Bhagavatpāda in the Bhāshya on Ch. II of the Bṛhadāraṇyaka.

"Om is Brahman, Brahman is this *Jyoti* (Effulgence); He who is this Jyoti warms (us); He is the Veda; He who warms (us) is the Vedya (the knowable); thus (by warming) does He gratify Himself and bows down before Himself (Ātman); Ātman is Brahman, Ātman is Jyoti" (Bodhāyana Sūtra). The familiar formula repeated at the Śrāddha "*Annam* (food) is Brahman; and I (who offer it) am Brahman; and the *Bhokta* (who eats it) is also Brahman" likewise clearly declares the Jīva-Brahman identity.

धर्मसूत्राण्यपि परामृश्यमानानि अद्वैताभिप्रायमेव स्फुटयन्तिं—तथाहि आपस्तंबधर्मसूत्रम् "आत्मलाभान्न परं विद्यते" इति। अत्र आत्मा प्रत्यगात्मैव; तत्रात्मशब्दस्य रूढत्वात्। तस्य च नित्यप्राप्तस्य लाभः अप्राप्तिभ्रमनिवृत्तिरेव नान्यत्। ततश्च आदावेवाद्वैतसिद्धान्तः उपक्षिप्तः। हरदत्ताचार्याश्च इदं सूत्रं एवं विवृण्वन्ति—प्रकृतिमेलनात् तद्धर्मतामुपगतः आत्मा विनष्टस्वरूप इव भवति। यथा क्षीरे उदकं, यथा वा अग्न्ययोगोलकयोरभिसंबद्धयोः अग्निधर्माः उष्णत्वभास्वरत्वादयः अयोगोलके, अयोगोलकधर्माश्च काठिन्यदैर्ध्यादयः अग्नौ अध्यस्यन्ते तद्वत् पुरुषधर्माश्चैतन्यादयः प्रकृतौ, प्रकृतिधर्माश्च सुखदुःखादयः पुरुषेऽध्यस्यन्ते। यथा शबरादिभिः बाल्यात् प्रभृति स्वसुतैस्सह संवर्धितो राजपुत्रः तज्जातीयमात्मानमवलोकयन् मात्रा स्वरूपे कथिते लब्धस्वरूप इव भवति तथा प्रकृत्या वेश्ययेव स्वभावान्तरं नीतः आत्मा मातृस्थानीयया तत्त्वमसीतिश्रुत्या स्वभावं नीयते॥ तदप्येते श्लोका भवन्ति—

नीचानां वसतौ तदीयतनयैः सार्धं चिरं वर्धितः
तज्जातीयमवैति राजतनयः स्वात्मानमप्यञ्जसा।
संघाते महदादिभिः सह वसन् तद्वत्परः पूरुषः
स्वात्मानं सुखदुःखमोहकलिलं मिथ्यैव
धिङ्मन्यते॥

दाता भोगपरः समग्रविभवो यश्शासिता दुष्कृतां
राजा स त्वमसीति मातृमुखतः श्रुत्वा यथावत्स तु ।
राजीभूय यथार्थमेव यतते तद्वत्पुमान् बोधितः
श्रुत्या तत्त्वमसीत्यपास्य दुरितं ब्रह्मैव संपद्यते ॥ इत्यादि ।

इमे च श्लोकाः अतिप्राचीनाः । भगवत्पादैरपि इमानेव श्लोकान् मनसि निधाय बृहदारण्यक-द्वितीयाध्यायभाष्ये "अत्र च संप्रदायविदः आख्या-यिकां संप्रचक्षते—कश्चित्किल राजपुत्रः" इत्यादि-कमुक्तम् ॥

पुनश्च, "तत्रात्मलाभीयान् श्लोकानुदाहरामः" इत्यारभ्य,

"पूः प्राणिनः सर्व एव गुहाशयस्य अहन्यमानस्य विकल्मषस्य अचलं चलनिकेतं येऽनुतिष्ठन्ति तेऽमृताः" इति श्लोकेन आत्मनः निर्लेपत्वरूपं विकल्मषत्वं निर्विकारस्वरूपमचलत्वमभिधाय आत्मान्वेषणमेव कर्तव्यमित्युक्तम् ॥

"आत्मन्नेवाहमलब्ध्वैतद्धितं सेवस्व नाहितं ।
अथान्येषु प्रतीच्छामि साधुष्ठानमनपेक्षया ।
महान्तं तेजस्कायं सर्वत्र निहितं प्रभुम्" ॥

इत्यनेन देह एव निहितः स्वप्रकाशः आत्मा लब्धव्यः इत्युक्तम् ॥

अयमर्थः—आचार्यः शिष्यमाह-"सर्वत्र निहितं प्रभुं स्वतंत्रं गुहाशयं एतावन्तं कालं अहमात्मन् मदीये देहे अन्यानपेक्ष्यैव लब्धुं योग्यमलब्ध्वा इन्द्रियादिषु तं तं विषयं प्रतीच्छामि प्रत्यैच्छं इदानीं तं लब्ध्वा न तथाविधोऽस्मि त्वमप्येतदेव हितं सेवस्व" इति ॥

पुनरपि, "सर्वभूतेषु यो नित्यो विपश्चिदमृतो ध्रुवः ।
अनङ्गोऽशब्दोऽशरीरोऽस्पर्शश्च महान् शुचिः ।
स सर्वं परमा काष्ठा स वैषुवतं सवै वैभाजनं पुरम्" ॥

इत्यत्र आत्मनः निर्गुणत्वं सा काष्ठा सा परा गतिरिति श्रुतिप्रोक्तं परकाष्ठारूपत्वं चाभिहितम् ॥

अन्ते च, "तं योऽनुतिष्ठेत्सर्वत्र प्राध्वं चास्य सदाचरेत् ।
दुर्दर्शं निपुणं युक्तो यः पश्येत् स मोदेत विष्टपे" ॥

इत्यत्र आत्मज्ञानस्य फलं विष्टपे विगततापे स्वे महिम्नि स्थितो मोदते सर्वदुःखवर्जितो भवति इति मोक्षफलमेवाभिहितम् ॥

पुनरपि, "आत्मन् पश्यन् सर्वभूतानि न मुह्येच्चिन्तयन् कविः ।
आत्मानं चैव सर्वत्र यः पश्येत् स वै ब्रह्मा नाकपृष्ठे विराजति" ॥

इत्यत्राऽपि अद्वैतदर्शनमेवानूदितम् ॥

एवं बोधायनोऽपि—

"ओमिति ब्रह्म ब्रह्म वा एष ज्योतिः य एष ज्योतिः य एष तपति एष वेदो य एष तपति वेद्यमेवैतत् ।
य एष तपति एवमेवैष आत्मानं तर्पयति आत्मने नमस्करोति आत्मा ब्रह्म आत्म ज्योतिः"
इति सूत्रे स्पष्टमात्मनः ब्रह्मरूपतामाह ॥

अपिच श्राद्धप्रयोगे शिष्टैः अद्यावधि अनुष्ठीय-माने अनादिपरंपराप्राप्ते "अन्नं च ब्रह्म अहं च ब्रह्म भोक्ता च ब्रह्म" इति कर्तृभोक्त्रन्नानां ब्रह्मरूपत्वे-नानुसन्धानकीर्तनमपि जीवब्रह्मैक्यं अन्नरूपप्रपञ्चस्य ब्रह्मव्यतिरेकेणाभावं च सूचयति ॥

(ऌ) भगवद्गीतायां अद्वैतभावाः

(मण्डलीक वेङ्कटेश्वरशास्त्रिणः)

குருக்ஷேத்திரத்தில் பாண்டவ கௌரவ ஸைன்யங்கள் இரண்டும் யுத்த முஸ்தீப் புடன் கூடி யுத்தத்தைத் துவக்கும் தறுவாயில் அர்ஜுனனுக்கு, "யுத்தம் வேண்டாம், யுத்தத்தில் பந்துக்களை நாசம் செய்து உலகத்தை ஆளுவதை விட பிச்சையெடுப்பது மேல்" என்று தோன்றி, தனக்கு ஸாரதியான ஸ்ரீ கிருஷ்ணபகவானிடம் சரணாகதி யடைய, ஸ்ரீ கிருஷ்ணபகவான் உப தேசித்ததைக்கூறும் 700 சுலோகங்கள் பகவத்கீதை எனப்படும். வேதாந்தங் களில் 'ஆத்மஞானி சோகத்தை விலக்கு கிறான்." (சாந்தோ.) "ஐக்யத்தை யறிந்தவனுக்கு சோகமேது மோகமேது" (ஈசாவா.) என்று சொன்னவாறு "ஞானி கள் சோகப்படுவதில்லை" (2-11) என்று உபதேச ஆரம்பத்திலேயே ஸ்ரீபகவான் ஞானத்தால் மோக்ஷம் என்னும் அத்வைத தத்வத்தை விளக்கினார்.

"அஸத்துக்கு (தேஹாதிகளுக்கு) எப் பொழுதும் இருப்பு என்பதில்லை. ஸத் தான ஆத்மாவுக்கு எப்பொழுதும் இன்மை இல்லை" (2-14) என்றும், "ஸர்வ பூதங்களும் என்னிடமிருக் கின்றன. நான் அவைகளிடமில்லை. பூதங்கள் என்னிடமில்லை." (9-4) என்றும் "பிரபஞ்சம் என்னிடமே தோன்றினாலும் வாஸ்தவமாக என்னிட மில்லை. நானொருவனே ஸத்யம்" என்றும் கூறியிருக்கிறார்.

"ஸர்வ சரீரங்களிலுமுள்ள க்ஷேத் ரக்ஞன் நானே" (13-2) என்று ஜீவேச்வராபேதத்தை உபதேசிக்கிறார்.

இந்த மாயையானது ஈச்வரனிடத்தில் ஆச்ரயித்தது. அவனையே விஷயமாய்க் கொண்டது. என்னையடைந்தவர்கள் (இந்த மாயையிலிருந்து விலகுகிறார்கள்." 7-14) என்று மாயையின் ஸ்வரூபத்தை உபதேசித்து "அஞ்ஞானத்தால் ஞானம் மறைந்திருப்பதால் ஜந்துக்கள் மோஹிக் கிறார்கள்." (5-15). "மோஹத்தால் ஸமஸ்த பிரபஞ்சமும் என்னைத் தெரிந்து கொள்ளவில்லை." என்று அஞ்ஞானமே ஸம்ஸாரத்துக்குக் காரணமென்று விளக்கு கிறார்.

"அநேகர் ஞானத்தால் பரிசுத்தர் களாகி என்னுடைய ஸ்வரூபத்தை யடைந்திருக்கின்றனர்." (4-10). "என் பக்தர்கள் இதையறிந்து என் ஸ்வ ரூபத்தையடைகிறார்கள்" (13-18), "அப்பொழுது பிரம்மமாகிறான்" (13-30) இது போன்ற வாக்யங்கள் முக்தனுக்கு ஈச்வரபாவத்தை யுரைக்கின்றன.

The great importance of the Geetā is that it is the direct teaching of the Lord. What does it really teach? There are seemingly conflicting thoughts in it and the several Achāryas lay emphasis, some on the Jñana, others on the Bhakti and still others on the Karma aspect. As it is, many problems are presented by Arjuna before Sri Krishna who offers corresponding solutions; and the above question looks irrelevant, as irrelevant as the question whether in creating man God lays stress on the head of the limbs.

Man was treated as a unit. Geetā is similarly a unit serving the several needs of suffering humanity; it is an indivisible whole, setting forth monism, the only Truth, the Absolute, Brahman.

Lord Sri Krishna, in order to remove stupefaction of Arjuna, administers to him the Truth of the Jeevātma (Soul) and that it is no other than Brahman the Absolute, The two slokas :

नत्वेवाहं जातु नासं etc., मात्रास्पर्शास्तु कौन्तेय *etc.*, go to establish the indestructibility or the existence सत्ता of the Jeevātma and the unreality of the senses and of matter. The truth contained in the verse:

नासतो विद्यते भावो नाभावो विद्यते सतः।

expels the misery caused by अध्यास (superimposition). The author deals with this at length and concludes that by discriminating between Ātmā and Anātmā, the eternal and the transient the above theory is frustrated. Then the transient nature of the universe and the eternal nature of the Soul are clearly set forth in the verses: अविनाशि तु तद्विद्धि etc.

After administering these truths the Lord states *etc.* which establish the Advaita doctrine that Jeevātma the Soul is no other than the Absolute.

Then one of the fundamental doctrines of the Advaitic philosophy that, by the knowledge of the substance *i.e.*, the Truth all the forms (विकार) of the substance are known is taught in the verses,

ज्ञानं तेऽहं सविज्ञानं etc. in the VII chapter of the Geetā. Several other stanzas are quoted that the substance of the world is the all-pervading whole soul सर्वासत्वं Then in the 13th chapter the verse इदं शरीरं कौन्तेय etc., is taken up and examined. The discrimination between the seer up and the seen दृग्दृश्यविवेक is clearly expounded. It is observed that the singular क्षेत्रज्ञ shows that the seer is only one, though the phenomenon उपाधि is many; and the portion मां विद्धि establishes beyond doubt the identification of the seen with the Absolute Brahman. The author dwells at length about the nature of Knowledge and Ignorance and the relation of Ignorance to Brahman and states that Knowledge removes Ignorance and that by such knowledge ज्ञानं one realises himself (आत्मसाक्षात्कार) and becomes a jeevanmukta, and quotes several verses in support thereof. Finally the author establishes that Geetā expounds the two chief characteristics of Advaita philosophy *i.e.*, (1) knowledge gives moksha and the moksha is no other ब्रह्मावाप्तिः becoming one with Brahman, and quotes the following verses बहवो ज्ञानतपसा पूता मद्भावमागताः etc.

मायाध्यासाश्रयेण प्रविततमखिलं यन्मया तेन मत्स्था-
न्येतान्येतेषु नाहं यदपि हि रजतं भाति शुक्तौ न रूप्ये।
शुक्त्यंशस्तेन भूतान्यपि मयि न वसन्तीति विष्व-ग्विनेता
प्राहास्माद्दृश्यजातं सकलमपि मृषैवेन्द्रजालोप-मेयम्॥
(शतश्लोकी ८२)

निश्चप्रचमिदं विपश्चिदपश्चिमानां यत् "धर्मक्षेत्रे कुरुक्षेत्रे" इत्यारभ्य "यत्र योगेश्वरः कृष्णः" इत्येतदन्तश्लोकजातं साक्षाद्भगवदुक्तार्थप्रतिपादकं गीताशास्त्रमारचितवान्भगवान्बादरायणो वेदव्यासमहर्षिरिति। दृश्यन्ते च भूयांसि व्याख्यानानि गीताशास्त्रस्य, श्रीमदद्वैतमतश्रीमद्विशिष्टाद्वैतमतश्रीमद्द्वैतमतानुयायिभिराचार्यैः कृतानि स्वस्वपक्षोपोद्बलकानि परपक्षप्रतिक्षेपकाणि च। क्रियते च मयेदानीमद्वैते मते परमं तात्पर्यं भगवद्गीतानामिति विचार्य निरूपयितुमयमारम्भः।

लोके हि सर्वे जनाः देहादेरसतः सद्रूपस्यात्मनश्चान्योन्याध्यासेन स्वकीयदेहादिषु स्वकीयदेहादिभ्यः पृथग्भूतेषु दारपुत्रपश्वादिषु च अहंममाभिमानेन तदीयानि स्थूलत्वकृशत्वसुखदुःखानि स्वात्मन्यध्यारोपयन्तः स्थूलोऽहं कृशोऽहं सुख्यहं दुःख्यहमिति बहुधा क्लिश्यन्तः महत्यस्मिन् संसारसागरे जननमरणाद्यावर्तेषु निमज्ज्य चोन्मज्ज्य विषयग्राहग्रस्ताः बह्वीरनर्थपरम्पराः आप्नुवन्तीति प्रत्यक्षत एव सर्वैरनुभूयते । तदुक्तं भगवद्भाष्यकारैरध्यासभाष्ये "तद्यथा पुत्रभार्यादिषु विकलेषु सकलेषु वा अहमेव विकलस्सकलो वेति बाह्यधर्मानात्मन्यध्यस्यति । तथा देहधर्मान् स्थूलोऽहं कृशोऽहं गौरोऽहं तिष्ठामि गच्छामि लङ्घयामि चेति, तथेन्द्रियधर्मान्मूकः काणः क्लीवो बधिरोऽन्धोऽहमिति, तथान्तःकरणधर्मान् कामसङ्कल्पविचिकित्साध्यवसायादीन्" इत्यारभ्य "एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकस्सर्वलोकप्रत्यक्षः" इत्यन्तेन ग्रन्थेन । एतादृशीरनर्थपरम्परास्सन्निवर्तयितुमेव वेदान्तेषु याज्ञवल्क्यमैत्रेयीनारदसनत्कुमारादिसंवादमुखेन आत्मतत्त्वं असद्भ्यो देहादिभ्यः पृथक्कृत्य "आत्मा वा अरे द्रष्टव्यः" "तरति शोकमात्मवि" दित्यादिना बहुधा निरूपितम् । एवमर्जुनोपि सदसतोरात्मानात्मनोरन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्य स्वदेहगुरुपितृभ्रातृपुत्रादिष्वहंममाभिमानेन मोमुह्यमानस्संयुगे कथं तानहं हनिष्यामि, हत्वा च कथन्नु जीविष्यामीत्येवं हननक्रियाकर्तृत्वकर्मत्वबुद्ध्या शोकमहाम्बुधिनिमग्नो बभूव । तमेवं शोकमहाम्बुधिनिमग्नमर्जुनमुद्दिधीर्षुरात्मज्ञानादन्यत्रोद्धरणमपश्यन्भगवान् श्रीकृष्णोऽप्यसतो देहादेः पृथक्कृत्यात्मतत्वं निरूपयितुमेव "अशोच्यानन्वशोचस्त्वम्" इत्यादिनाऽत्मतत्त्वमर्जुनायोपदिदेश । अतः आत्मतत्त्वनिरूपणप्रक्रमेणैव गीताशास्त्रं प्रवृत्तम् ॥

तत्र प्रारम्भे "न त्वेवाहं जातु नासम्" (२, १२-१३) इत्यादिश्लोकद्वयेनात्मनः त्रिकालाबाध्यत्वरूपसत्त्वं "मात्रास्पर्शास्तु कौन्तेय" इत्यादिना अनात्मनः आगमापायित्वरूपमसत्त्वं चाभिधायैवं अत्यन्तविविक्तयोरसदसतोरात्मानात्मनोरन्योन्याध्यासेनान्योन्यधर्माध्यासेन च मोमुह्यमाने लोके तन्मोहनिवृत्त्यर्थं तयोर्विवेकायाह भगवान् "नासतो विद्यते भावो नाभावो विद्यते सतः । उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्वदर्शिभिः" इति । अत्र ह्यसत इति पदेन सत्पदगृहीतत्रिकालाबाध्यस्वरूपविलक्षणमेव जगद् गृह्यते । न तु निस्स्वरूपम् । निस्स्वरूपस्य भावाप्रसक्त्या "नासतो विद्यते भावः" इति निषेधायोगात् । जगतस्तु सत्त्वेन प्रतीयमानत्वेन भावप्रसक्त्या तन्निषेधो युज्यते । तथा च नासतो विद्यते भावः इति निषेधसामर्थ्येन सत्त्वेन प्रतीयमानत्वरूपासद्विलक्षणत्वस्य असत इति पदेन सद्विलक्षणत्वस्य च अनात्मनि लब्धत्वेन सदसद्विलक्षणत्वरूपमिथ्यात्वमनात्मनोऽभिप्रेतमस्मिन् श्लोक इति गम्यते । किञ्चात्र सद्रूप आत्मन्यभावस्य (असत्त्वस्य) तद्विलक्षणे जगति भावस्य (सत्त्वस्य) निषेधेन तयोस्स्वाभाविकत्वे अप्रतीयमानत्वे वा निषेधायोगादात्मगतभावस्य जगति, जगद्गताभावस्यात्मनि च कल्पितत्वं वाच्यम् । धर्माणां कल्पितत्वे च धर्मितादात्म्याध्यासपूर्वको हि धर्माध्यास इति धर्मिणोरपि सदसतोरात्मानात्मनोरध्यासः आवश्यकः । तथा च सद्रूप आत्मन्यसतोऽनात्मनः अध्यस्तत्वमवगम्यते । एतत्सर्वमालोच्यैव भगवता भाष्यकारेणाप्येतच्छ्लोकभाष्यान्तिमभागे सारत्वेन "विकारोऽयमसन्नेव मरीचिजलवन्मिथ्यावभासते इति मनसि निश्चित्य शीतोष्णादींस्तितिक्षस्वेत्यभिप्रायः इत्युक्तम् । एतादृशाध्यासो निवारितो भगवता सदसदोरात्मानात्मनोः पृथक्करणेन "नासतो विद्यते भावो नाभावो विद्यते सतः" इति । तदेवं पृथक्कृत्य सदसद्रूपात्मानात्मानौ तदुत्तरग्रन्थेन "एषा

तेऽभिहिता साङ्ख्ये बुद्धिर्योगे त्विमां शृणु" (२, ३९) इत्येतदर्वाचीनेन तयोस्तत्त्वमभिहितम्। तत्र हि "अविनाशि तु तद्विद्धि" "य एवं वेत्ति हन्तारम्" (२, १९) इत्यारभ्य "अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयं" (२, २५) इत्येवमन्तेन ग्रन्थेन अनात्मतद्धर्मसर्वविक्रियारहितं आत्मनस्तत्त्वमभिधाय "अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत। अव्यक्तनिधनान्येव तत्र का परिदेवना"॥ (२, २८) इति श्लोके अव्यक्तादीनि अव्यक्तनिधनानीति पदद्वयेन देहादिसंघातरूपभूतजातस्य त्रिकालाबाध्यविलक्षणत्वरूपसद्विलक्षणत्वं व्यक्तमध्यानीति पदेन दृश्यमानत्वरूपासद्विलक्षणत्वञ्चाभिधाय पूर्वोक्तं सदसद्विलक्षणत्वरूपमिथ्यात्वं स्पष्टीकृतम्। एवं तयोस्तत्त्वमुक्त्वा "एषा तेऽभिहिता साङ्ख्ये बुद्धिर्योगे त्विमां शृणु"। (२, ३९) इत्यादिना ज्ञानयोग उपसंहृतः। अत्र ह्यशोच्यानन्वशोचस्त्वं इत्यारभ्यैतदन्ते ग्रन्थे जीवात्मतत्त्वनिरूपणेनोपक्रमणं जीवस्य ब्रह्मत्वे लिङ्गम्। अनेन लिङ्गेन पूर्वोक्तरीत्या प्रपञ्चस्य मिथ्यात्वकथनेन च भगवद्गीतानामद्वैते तात्पर्यमित्यवगम्यते। एवं यथा वेदान्तेष्वेकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय तत्समर्थनाय ब्रह्मणस्सकाशात्सर्वस्य प्रपञ्चस्य सृष्टिमभिधाय प्रकृतिविकारन्यायेन ब्रह्मणि विदिते सर्वं विदितं भवेदिति तां समर्थयित्वा ब्रह्मात्मकत्वं सर्वस्याप्यभिहितम्, एवमेव सप्तमेऽध्यायेऽपि "ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः। यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते"॥ (७, २) इति श्लोकेन ब्रह्मज्ञाने सति ज्ञातव्यं नावशिष्यते, किंतु सर्वमेव ज्ञातं भवेदिति एकस्य ब्रह्मणो ज्ञानेन सर्वविज्ञानं प्रतिज्ञाय प्रकृतिद्वयवर्णनपूर्वकं "एतद्योनीनि भूतानि सर्वाणीत्युपधारय। अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा॥ मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय। मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव"॥ (७, ६-७) इत्यादिभिः श्लोकैस्सर्वस्य सकलजगत्कारणत्वप्रतिपादनेन पूर्वोक्तां प्रतिज्ञामुपपाद्य "बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते। वासुदेवस्सर्वमिति स महात्मा सुदुर्लभः"॥ इति श्लोकेन सर्वस्यापि प्रपञ्चस्य ब्रह्मकार्यत्वेन ब्रह्मात्मकत्वकथनपूर्वकं तद्ज्ञानी स्तूयते। यस्मात्कारणादनेकजन्मार्जितपुण्यराशेः पुरुषस्यैव पूर्वोक्तप्रकारेण सर्वस्यापि प्रपञ्चस्य ब्रह्मकार्यत्वेन, वस्तुतः कारणव्यतिरेकेण कार्याभावात् "ब्रह्मैवेदं सर्वं,, "आत्मैवेदं सर्वं" इति श्रुत्युक्तप्रकारेण वासुदेवस्सर्वमिति साक्षात्काररूपं ज्ञानमुदेति, तस्मात्तादृशज्ञानवान्पुरुषः लोके दुर्लभ इति। अस्मिन्नध्याये आदौ एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा कृता। सा तु सर्वस्य प्रपञ्चस्य ब्रह्मकार्यत्वेन, जीवस्य च ब्रह्मस्वरूपत्वेनाद्वैतमतेऽत्यन्तानुकूला स्यात्। आकाशस्याजन्यत्वे तादृशप्रतिज्ञाहान्यापत्तिदोषेणाकाशस्य जन्यत्वं प्रसाधयता भगवता सूत्रकारेण द्वितीयनित्यसद्भावे तादृशप्रतिज्ञाहानिरभ्युपगतेति नित्यजीवेश्वरभेदवादिनां तादृशप्रतिज्ञाहानिरेवेत्यभिप्रायः। एतादृशप्रतिज्ञाकरणेन सर्वस्यापि कार्यस्य कारणब्रह्मात्मकत्वकथनेन "ज्ञानी त्वात्मैव मे मतम्" इति ज्ञानिनो भगवत्स्वरूपत्वकथनेन च भगवद्गीतानामद्वैते तात्पर्यमित्यवगम्यते॥

अपि च क्षेत्रक्षेत्रज्ञयोः परस्पराध्यासेन परस्परधर्माध्यासेन च क्रियमाने लोके तयोर्विभागप्रदर्शनपूर्वकं क्षेत्रज्ञस्य ब्रह्मत्वप्रतिपादनपरे त्रयोदशाध्याये

"इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते। एतद्यो वेत्ति तं प्राहुःक्षेत्रज्ञ इति तद्विदः"॥ इति श्लोके इदमिति पदेन शरीरमिति पदेन च क्षेत्रस्य दृश्यत्वं नश्वरत्वं चाभिधाय तादृशक्षेत्रादेरेतद्यो वेत्तीत्ति वाक्येन तद्द्रष्टृत्वेन क्षेत्रज्ञं पृथक्कृत्य "क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत। क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तद्ज्ञानं मतं मम" इति समनन्तरश्लोके पूर्वश्लोकोक्तरीत्या दृश्यद्रष्टृभावेन पृथक्कृतस्य क्षेत्रज्ञमित्येकवचनेन उपाधिभूतानां क्षेत्राणां बहुत्वेऽपि एकस्य क्षेत्रज्ञस्य, 'मां विद्धीति' ब्रह्मभावं प्रतिपाद्य, तत्ज्ञानं मतं ममेति सङ्ग्रहेण त्रयोदशाध्यायार्थो निरूपितः। तदनन्तरं "तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत्। स च यो यत्प्रभावश्च तत्समासेन मे शृणु"॥ इति श्लोकेनैतदध्यायपरिसमाप्तिपर्यन्तं क्षेत्रस्वरूपक्षेत्रधर्मविकारादिकं क्षेत्रज्ञस्य स्वाभाविकं स्वरूपमौपाधिकं प्रभावञ्च संक्षेपेण वदिष्यामीति प्रतिज्ञा कृता। कृत्वा च प्रतिज्ञां "ज्ञेयं यत्तत्प्रवक्ष्यामि यद् ज्ञात्वाऽमृतमश्नुते। अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते"॥ इति श्लोकेन स्वाभाविकं स्वरूपं "सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम्। सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति"॥ इति श्लोकेनौपाधिकं प्रभावञ्चाभिधाय, "सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्। असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च"॥ इत्यादिभिः श्लोकैः तदन्तर्गतेनैकेन पदेनौपाधिकं स्वरूपं अपरेण पदेन स्वाभाविकं स्वरूपञ्चाभिहितम्। अभिधाय चैवं "अविभक्तञ्च भूतेषु विभक्तमिव च स्थितम्। भूतभर्तृ च तद्ज्ञेयं ग्रसिष्णु प्रभविष्णु च"॥ इत्यत्र "क्षेत्रज्ञञ्चापि मां विद्धि' इति श्लोकोक्तक्रमेण अविभक्तं च भूतेषु इति क्षेत्रज्ञस्य वस्तुतः एकत्वं, विभक्तमिव च स्थितमिति उपाधिभेदेन भेदञ्चाभिधाय "भूतभर्तृ च तद्ज्ञेयं ग्रसिष्णु प्रभविष्णु च" इति उत्तरवाक्येन तत्पदार्थब्रह्मभावः प्रतिपादितः। प्रतिपाद्य च ब्रह्मभावं "इति क्षेत्रं तथा ज्ञानम् ज्ञेयञ्चोक्तं समासतः। मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते"॥ इति श्लोकेनैतद्विज्ञानादेव मद्भावप्राप्तिरूपमोक्षो लभ्यत इति प्रतिपादितम्। तदेतत्प्रकरणपर्यालोचने क्षेत्रज्ञस्य वस्तुत एकत्वकथनेन औपाधिकभेदकथनेन ब्रह्मत्वकथनेन विज्ञानान्मोक्षकथनेन ब्रह्मभावाप्तिरूपमोक्षकथनेन च भगवद्गीतानां अद्वैते तात्पर्यमवसीयते॥

एवमेकस्मिन्ब्रह्मणि "अविभक्तञ्च भूतेषु विभक्तमिव च स्थितम्" इति अज्ञानोपाधिवशेन सर्वेषां जीवानां पृथग्भाव इति, "यावत्सञ्जायते किञ्चित्सत्त्वं स्थावरजङ्गमम्। क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ"॥ इति अज्ञानसम्बन्धादेव स्थावरजङ्गमात्मकनिखिलप्रपञ्चपृथग्भावोऽपि इति चाभिधायैतस्यार्थस्य सङ्ग्राहकः एतदध्यायसारभूतः कश्चन श्लोकः प्रतिपादितः। तत्पर्यालोचनेऽपि भगवद्गीतानामद्वैते तात्पर्यं प्रतीयते। "यदा भूतपृथग्भावमेकस्थमनुपश्यति। तत एव च विस्तारं ब्रह्म सम्पद्यते तदा"॥ (१३, ३०) इति। अत्र हि एकस्थमितिपदेनैकस्मिन्ब्रह्मणि अज्ञानवशेन कल्पितत्वेन स्थितमित्यभिधीयते। तदेकस्थत्वं गीतानुसारेण निरूपयिष्यामि। अस्ति ह्येकं 'त्वमक्षरं सदसत्तत्परं यत्" "अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते" इति श्लोकोक्तं निर्गुणं कार्यकारणातीतं अवाङ्मनसगोचरं ब्रह्म। अस्ति चानादिरनिर्वाच्याऽज्ञानशब्दिता

सत्त्वरजस्तमोगुणात्मिका च काचन मायाशक्तिः। सा च पूर्वोक्तं ब्रह्म आश्रयति। आवृणोति च ब्रह्मैव तदुक्तं भगवता—"दैवी ह्येषा गुणमयी मम माया दुरत्यया"। इति। अत्र हि दैवीतिपदेन स्वयंप्रकाशचित्सम्बन्धोऽभिहितः। ममेत्यत्र षष्ठ्याऽपि सम्बन्ध एवाभिहितः। तदेतत्सम्बन्धद्वयमध्ये एकस्तु आश्रयाश्रयिभावः, अपरस्तु विषयविषयिभाव इति लभ्यते। एषेत्यनेनैतादृशमायायाः प्रत्यक्षप्रमाणसिद्धत्वमप्यावेद्यते। अनादित्वमप्यस्याः "प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि।" इत्यत्र प्रकटीकृतं भगवता। अनादित्वेन कुतस्त्वज्ञानमिति कारणप्रश्नो निराकृतः। न चेयमाशङ्का कार्या—कथं स्वप्रकाशे चिद्रूपे ब्रह्मणि अज्ञानरूपमायाश्रयत्वं तदावृतत्वं चेति। अज्ञानं तावदस्तीत्यवश्यमभ्युपगन्तव्यम्; अहमज्ञ इति प्रत्यक्षप्रतीतेः। "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्", "अज्ञानेनावृतं ज्ञानं", "दैवी ह्येषा गुणमयी मम माया" इत्यादिश्रुतिस्मृतिशतेभ्यश्च॥

अपि च "आत्मा वा अरे द्रष्टव्य" इति श्रुतिप्रतिपादितात्मसाक्षात्कारान्यथानुपपत्त्यापि ज्ञाननाश्यमज्ञानमवश्यमभ्युपेयम्। यदि न स्याद् ज्ञाननिवर्त्यमज्ञानं वैफल्यमेव स्यात् ज्ञानस्य। नहि तेजोनिवर्त्यस्य तमसोऽभावे तेजसस्साफल्यमुन्नीयते। निर्दिष्टं हि भगवद्गीतासु ज्ञाननिवर्त्यत्वेनैवाज्ञानं "ज्ञानेन हि तदज्ञानं येषां नाशितमात्मनः" इति। अत एव चानिर्वाच्यत्वं तस्य। अस्तित्वे चाज्ञानस्य ब्रह्मण एवाज्ञानाश्रयत्वं युज्यते। ब्रह्मातिरिक्तस्य सर्वस्याज्ञानाधीनत्वेन अज्ञानाश्रयकत्वेन च अज्ञानाश्रयत्वानुपपत्तेः। आवृतत्वमपि ब्रह्मण एव। तथा हि—घटपटादिरूपजडवर्गस्य प्रकाशो न स्वतः जडत्वात्। तैजसमन्तःकरणं चक्षुरादिगोलकद्वारा विषयदेशं प्राप्य घटपटाद्याकारेण परिणमते। स एव परिणामो घटादिवृत्तिरित्युच्यते। तद्वृत्त्यापि न प्रकाशो भवितुमर्हति। वृत्तेरपि जडत्वात्। अपि तु तद्वृत्त्यभिव्यक्तचैतन्येनैव घटादि भासते। यथा काचपात्रविशेषाभिव्यक्तविद्युच्छक्त्या घटादीनां प्रतिभासस्तद्वत्। तथा च जडवर्गस्य कुतो न प्रतिभास इति प्रश्ने तस्य चक्षुरादिकरणकलापाव्यवधानादिबहुकारणसामग्रीसाध्यत्वेन सामग्रीविरहादेव न प्रतिभासः इति वक्तुं शक्यत इति न जडे आवरणकृत्यम्। अपि च जडकारणत्वेन जडोत्पत्तेः पूर्वमेव स्थितस्याज्ञानस्य न जडावरकत्वम्। ब्रह्मणस्तु कुतो वा न प्रतिभासः इति प्रश्ने स्वप्रकाशत्वेन सामग्रीविरहादिति वा, व्यापकत्वेन व्यवधानादिति वा वक्तुमशक्यतया आवृतत्वादेवेति वक्तव्यं भवति। उक्तं चैवमेव गीतासु भगवता श्रीकृष्णेन "नाहं प्रकाशस्सर्वस्य योगमायासमावृतः" इति। अत आयातं ब्रह्मण एवावृतत्वमपीति। एतदेवोक्तं संक्षेपशारीरके "आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला। पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः"। स्वप्रकाशचैतन्यविरोधात् ब्रह्मणोऽज्ञानाश्रयत्वाद्यनुपपत्तिरित्यपि न शङ्कनीयम्। स्वरूपचैतन्यस्याविरोधात्, प्रत्युताज्ञानभासकत्वाच्च स्वरूपचैतन्यस्य। तदुक्तं भगवता "मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्" इति। अत्र हि मयि भासकत्वेन स्थिते सति मदाश्रया प्रकृतिः मयि चराचरमुत्पादयतीत्यर्थकथनेन भगवत्स्वरूपचैतन्यभास्यत्वमुक्तमज्ञा-

नस्य । अतो न विरोधशङ्का । तर्हि अज्ञानस्य कथं नाशः इति चेत्, वृत्त्युपारूढचैतन्येनेति ब्रूमः । यदप्युक्तं भगवता "नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता" । इति । तत्र हि यथा काचपात्रविशेषाभिव्यक्तमेव विद्युच्छक्तिस्वरूपं दीपशब्दितं तमोनाशकं, न स्वतः, यथा वा तृणादिभासक एव सूर्यकिरणः सूर्यकान्तमण्युपारूढस्तृणादिदाहकः तद्वत्प्रकृतेऽपि आत्मभावरूपमनोवृत्त्युपारूढमेव चैतन्यं ज्ञानदीपशब्दितमज्ञाननाशकं, न स्वरूपतः । तथा च यस्य तु स्वरूपचैतन्यस्याश्रयत्वमभिप्रेयते न तस्य विरोधित्वं, यस्य तु वृत्त्युपारूढचैतन्यस्य विरोधित्वं न तस्याश्रयत्वमित्यदोषः ॥

न च ज्ञानाभाव एवाज्ञानमस्त्विति वाच्यम् । 'अज्ञानेनावृतं ज्ञानं' इति पूर्वोदाहृतभगवद्वचनप्रतिपादितावारकत्वान्यथाऽनुपपत्त्या तस्य भावरूपत्वात् । अहमज्ञ इति प्रत्यक्षकाले प्रतीयमानस्य ब्रह्मावारकत्वेन जगदुपादानत्वेन च श्रुतिस्मृतिप्रतिपादितस्य ज्ञानाभावरूपत्वायोगात् । एवं ब्रह्माश्रितायां ब्रह्मावारिकायामविद्यायां प्रलयकाले सकलजीवभोगप्रदकर्मोपरमे च पञ्च महाभूतानि स्वस्वपुण्यपापसंस्कारोपेतान्यन्तःकरणानि च संस्काररूपेण लीनानि भवेयुः । अतस्तदानीमपि अन्तःकरणावच्छिन्नचैतन्यरूपस्य तत्प्रतिबिंबचैतन्यरूपस्य वा जीवस्यापि तत्र सत्त्वमस्त्येव । पुनश्च जीवभोगप्रदकर्मोद्बोधने च तादृशमायारूपशक्त्यवच्छिन्नचैतन्यरूपपरमेश्वरः सर्वज्ञः स्वप्रकृत्यन्तर्गतान्तःकरणस्थितपुण्यपापसंस्कारान्ज्ञात्वा तदनुसारेण प्राणिभोगार्थं मायापरिणामरूपकल्पनात्मिकां सृष्टिमकरोदित्यत्र नास्ति संशयलेशोऽपि । एतमेवार्थमाह द्वाभ्यां श्लोकाभ्यां भगवान् गीतासु—

"सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् ।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥
प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात्" ॥ इति ।

एवं भूतपृथग्भावस्सर्गोऽपि ब्रह्मण्यज्ञानकल्पित इत्यवगम्यते ॥

अपि च भगवद्गीतासु विरुद्धार्थत्वेन सम्भाव्यमाना बहवश्श्लोका दृश्यन्ते । तथा हि— "न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः । न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥ नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः । अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥ ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥ पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति । तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः । न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्" ॥ इति ।

न ह्येतेषां काञ्चन व्यवस्थामनभ्युपगम्याविरुद्धार्थत्वेन प्रतिपादनमुपपद्यत इति व्यवहारदशायामज्ञानेन सर्वविभागं परमार्थदशायां सर्वविभागवर्जितमात्मतत्त्वं चाभ्युपेत्य व्यावहारिकपारमार्थिकदृष्टिभेदेन व्यवस्था कल्पनीया । तादृशव्यवस्थाकरणेन "न च मत्स्थानि भूतानि" इति वाक्येन स्वात्यन्ताभावाधिकरणत्वेन प्रतीयमाने ब्रह्मणि "मत्स्थानि सर्वभूतानि" इति वाक्येन सत्त्वेन प्रतीयमानत्वकथनेन स्वात्यन्ताभावाधिकरणे प्रतीयमानत्वरूपमिथ्यात्वलाभेन च सर्वोऽपि भूतपृथग्भाव एकस्मिन्ब्रह्मणि कल्पितत्वेन स्थित इति एतादृशग्रन्थपर्यालोचनादवगम्यते । एतादृशमेव कल्पितत्वेनात्मनि स्थितं भूतपृथग्भावमनुसृत्योक्तं भगवता "यदा भूतपृथग्भावमेकस्थमनुपश्यति" इति । अस्यार्थस्तु—यस्मिन् काले भूतानां प्राणिनां च पृथग्भावमेकस्मिन्

ब्रह्मणि कल्पितत्वेन स्थितं "ब्रह्मैवेदं सर्वं" "आत्मैवेदं सर्वं" "वासुदेवस्सर्वमिति स महात्मा सुदुर्लभः" इति श्रुतिस्मृत्युक्तप्रकारेण शास्त्राचार्योपदेशमनु ब्रह्मणि कल्पितः भूतपृथग्भावः अधिष्ठानभूतब्रह्मव्यतिरेकेण नास्ति ब्रह्मण्येवाज्ञानवशात्कल्पित इति साक्षात्करोति, तस्मिन्नेव काले उपाधिभूताज्ञानतत्कार्यनाशेन ब्रह्म भवति। जीवन्नेव मुक्तो भवति। मुक्त्यै न कालान्तरमपेक्षते इति भावः। एतदेवोक्तं भगवताऽपि— "अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम्" इति। साक्षात्कृतात्मतत्त्वानां जीवतां मृतानां च मोक्षो वर्तत इत्यर्थः। अत्र हि ब्रह्म सम्पद्यते इति जीवस्य ब्रह्मभावकथनेन, तदा ब्रह्म संपद्यते इति साक्षात्कारान्मुक्तिकथनेन, यः भूतपृथग्भावमेकस्थमनुपश्यति सः ब्रह्म सम्पद्यत इति भूतपृथग्भावस्य पूर्वोक्तप्रकारेणैकस्थत्वदर्शनकथनेन च गीताशास्त्रस्याद्वैते तात्पर्यमवसीयते। किंच गीताशास्त्रे मोक्षसाधनविचारेऽपि अद्वैते तात्पर्यमवसीयते। तथा हि "योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये" इत्यत्र कर्मयोगस्य चित्तशुद्धिद्वारा ज्ञानसाधनत्वं अभिधाय "भक्त्या मामभिजानाति" "मद्भक्त एतद्विज्ञाय" इत्यादिभिः श्लोकैः भक्तेरपि ज्ञानसाधनत्वं प्रतिपाद्य "बहवो ज्ञानतपसा पूता मद्भावमागताः। गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः॥ अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम्। मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते॥ भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः। ततो मां तत्वतो ज्ञात्वा विशते तदनन्तरम्॥ ददामि बुद्धियोगं तं येन मामुपयान्ति ते"। इत्यादि बहुस्थलेषु ज्ञानस्यैव मोक्षसाधनत्वं प्रतिपाद्य "न हि ज्ञानेन सदृशं पवित्रमिह विद्यते। तत् स्वयं योगसंसिद्धः" इत्यत्र ज्ञानस्यैव श्रेष्ठत्वं भक्तिकर्मयोगसाध्यत्वं चाभिहितम्। यद्यपि तत्र तत्र भक्तियोगकर्मयोगभगवत्प्रसादादीनां मोक्षसाधनत्वप्रतिपादकानि वाक्यानि गीतासूपलभ्यन्ते, तथापि ज्ञानस्य मोक्षसाधनत्वप्रतिपादकवाक्यानुसारेणैतेषां ज्ञानसाधनत्वप्रतिपादकवाक्यानुसारेण च ज्ञानद्वारा मोक्षसाधनत्वं भक्त्यादीनामित्यत्रैव तेषां तात्पर्यम्। तथा च ज्ञानान्मोक्ष इति भगवद्गीतानामद्वैते तात्पर्यम्॥

किञ्च मोक्षप्रतिपादनावसरे "मद्भावायोपपद्यते" "ब्रह्म सम्पद्यते तदा" "मद्भावं सोऽधिगच्छति" "सगुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते" इत्यादिस्थलेषु ब्रह्मभावस्य मोक्षत्वकथनेन च भगवद्गीतानामद्वैते तात्पर्यम्॥

एवञ्च जीवस्य ब्रह्मत्वसूचकजीवतत्त्वनिरूपणोपक्रमणरूपलिङ्गेन द्वैतप्रपञ्चस्य सदसद्विलक्षणत्वरूपमिथ्यात्वस्य स्वात्यन्ताभावाधिकरणे एव प्रतीयमानत्वरूपमिथ्यात्वस्य ज्ञाननिवर्त्यत्वरूपमिथ्यात्वस्य च कथनेन, एकविज्ञानेन सर्वविज्ञानप्रतिज्ञापूर्वकं सर्वप्रपञ्चस्यापि ब्रह्मणस्सकाशात्सृष्टिमभिधाय ब्रह्मात्मकत्वकथनेन, जीवस्य ब्रह्मत्वकथनेन, वस्तुतः आत्मन एकत्वकथनेन, जीवविभागस्यौपाधिकत्वकथनेन, ज्ञानान्मोक्ष इति कथनेन, ब्रह्मभावस्य मोक्षत्वकथनेन, जीवन्मुक्तिकथनेन च भगवद्गीतानां अद्वैतमते तात्पर्यमिति तु सारम्॥

(ख) भगवद्गीतायां अद्वैतभावाः

(श्रीकाशी श्रीकरपात्रस्वामिजी महराज्)

ईश्वरो वस्तु तत्त्वज्ञो न चाहं तेष्ववस्थितः।
न च मत्स्थानि भूतानीत्येवमेव व्यचीक्लृपत् ॥
सत्यं यदि स्याज्जगदेतदात्मनोऽनन्तत्वहानिर्निगमाप्रमाणता।
असत्यवादित्वमपीशितुः स्यात् नैतत्त्रयं साधुहितं महात्मनाम् ॥ [विवेकचूडामणिः २३५, २३४]

उपक्रमोपसंहारादिभिः षड्विधतात्पर्यलिङ्गैर्भगवद्गीताया परमं तात्पर्यं सजातीयविजातीयस्वगतभेदशून्ये प्रत्यक्चैतन्याभिन्ने परब्रह्मण्येव। अत एव गीताध्याने "अद्वैतामृतवर्षिणीं भगवतीमष्टादशाध्यायिनीम्" इत्यत्र "अद्वैतामृतवर्षिणीम्" इत्युक्तम् ॥

"अशोच्यानन्वशोचस्त्वं" इत्युपक्रमे शोकस्यानौचित्यमुक्त्वा उपसंहारे "मा शुचः" इति शोकनिषेधः उक्तः। मध्ये च "तत्र का परिदेवना", "नैवं शोचितुमर्हसि" इति शोकनिवृत्तिरेवाभ्यस्ता। तत्रैवोपपत्तिश्च दर्शिता। शोकनिवृत्तिश्च एकत्वज्ञानादेव मुख्या। "तत्र को मोहः कः शोक एकत्वमनुपश्यतः" इति श्रुतेः ॥

"तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि" इति स्पष्टं ज्ञानादेव शोकनिवृत्तिर्गीतायामपि स्मर्यते ॥

ततः शोकमोहोपलक्षितसंसारनिवृत्तिपरं गीताशास्त्रं ज्ञानशास्त्रमित्यपि व्यक्तमेव। "इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया। विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ॥" इत्यत्रापि विमर्शनीयत्वेनोपस्थापितस्याशेषगीताशास्त्रस्य ज्ञानमिति ज्ञानशास्त्रत्वमेवोक्तम्। ज्ञायते पुरुषार्थसम्बन्धि अशेषं वस्तु अनेनेति ज्ञानम्। अतो ज्ञानशास्त्रमित्येतत् ॥

"भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम्" इत्यत्रापि भूतानां तत्प्रकृतेश्च मोक्षं—बाधम् अधिष्ठानात्मके ब्रह्मणि ये विदुस्ते परं यान्ति। इति प्रतिपाद्यस्य निष्प्रपञ्चत्वेनाद्वितीयत्वमुक्तम् ॥

केचित्तु "कार्पण्यदोषोपहतस्वभावः", "शाधि मां त्वां प्रपन्नम्" इत्युपक्रमं "शरणं व्रज" इत्युपसंहारश्चोपेत्य शरणागतावेव तात्पर्यमुपगच्छन्ति ॥

शरणागतौ तात्पर्यस्वीकारेऽपि त्वां प्रपन्नमित्यस्योपक्रमत्वं नाभ्युपगन्तुं युक्तम्; भगवदुपदेशभूतगीतायाः अशोच्यानन्वशोचस्त्वमित्यत एवोपक्रमदर्शनात्। अत एव "धर्मक्षेत्रे" इत्यतः "धृतराष्ट्र उवाच" इत्यतो वा उपक्रम इत्ययुक्तम्; सर्वस्यैव भगवदुपदेशभूमिकात्वेन तदनुपपत्तेः। "प्रज्ञावादांश्च भाषसे" इत्यत्र प्रज्ञावादस्य परिहासात् प्रज्ञामान्द्यादेव शोकः,

प्रज्ञायां सत्यां कुतस्त्यः शोक इत्युक्तम् । साधारण्यां द्वैतप्रज्ञायां सत्यां अर्जुनस्य शोकदर्शनात् अद्वैतज्ञानवतो भगवतः शोकाभावदर्शनाच्च "नानुशोचन्ति पण्डिताः" इति भगवता कण्ठोक्तेश्च अद्वैतदर्शनात् शोकोपलक्षितप्रपञ्चनिवृत्तिरुपक्रमे प्रोक्ता । उपसंहारे च "मामेकं शरणं व्रज" "मा शुचः" इति, अनेनाद्वैतब्रह्मशरणावगतौ शोकनिवृत्तिमुपदिश्य शरणागतेरेव शोकनिवृत्तिहेतुत्वमुक्तम् । न चात्र व्रजेति गमनमेव प्रोक्तं न ज्ञानमिति वाच्यम् । गत्यर्थकव्रजेर्ज्ञानार्थकत्वे बाधकाभावात् । न च गमनार्थस्वीकारेऽपि बाधकाभावस्तुल्य इति वाच्यम् । नभोवद्व्यापकस्य गन्तव्यत्वासंभवात् । परिच्छिन्नग्रामादीनामेव व्यापारसाध्यप्राप्तव्यत्वदर्शनाच्च ॥

ननु भेदमूलैव शरणागतिर्भेदज्ञानमपेक्षते इति कुतोऽद्वैतावगतिः शरणपदवाच्येति चेन्न । 'तस्यैवाहं' 'ममैवासौ' सोऽहमेवेति शरणागतित्रैविध्योपपत्त्या तददोषात् । अपि च शरणं गृहरक्षित्रोरिति कोशबलादाश्रयो रक्षिता च शरणपदवचनार्हः । तथा चायमर्थस्सम्पद्यते । एकमद्वितीयं सर्वविधभेदवर्जितं मां अस्मत्प्रत्ययगोचरं प्रत्यक्चैतन्याभिन्नं परमात्मानं शरणं गृहमाश्रयं रक्षितारं वा व्रज अवगच्छ, निश्चिन्विति । यथा घटादीनां पृथ्वी, यथा तरङ्गबुद्बुदादीनां वारि, घटाकाशादीनां महाकाशः आश्रयः, तथैव भगवदंशस्य जीवस्य भगवानेवाश्रयः इति भगवदाश्रयत्वनिश्चय एव शरणागतिः ॥

उपादानोपादेययोर्घटाकाशमहाकाशयोः यथा वस्तुभेदो नास्ति तथैव जीवात्मपरमात्मनोरपि भेदो नास्ति । अत एव 'क्षेत्रज्ञञ्चापि मां विद्धि' इति क्षेत्रज्ञस्य परमात्मत्वं उक्तम् । ततश्च जीवात्मपरमात्माभेदावगतिरेव शरणागतिः । सा च द्वैतानर्थनिवर्तकत्वेन शोकनिवृत्तौ परमोपयोगिनी । अत एत शरणागत्या शोकनिवृत्तिरुपसंहारे कथिता सर्वभवनिवर्तकत्वेन विदितप्रत्यक्चैतन्याभिन्नभगवत एव रक्षकत्वमपि युक्तम् । "स एनमविदितो न भुनक्ति" इति श्रुत्या विदितपरमात्मन एव रक्षकत्वं स्पष्टम् । "द्वितीयाद्वै भयं भवति", "उदरमन्तरं कुरुते", "अथ तस्य भयं भवति' इत्यादिश्रुतिभिर्भिन्नदर्शिनां भयश्रवणात् अभेदभावेन दृष्टस्य भगवत एव रक्षकत्वमिति रक्षितृत्वेन गृहत्वेनवा भगवच्छरणागतिरभेदावगतिरेव। न च मामिति पदस्य सगुण एव साकारश्श्रीकृष्ण एव अर्थ इति वाच्यम् । "मया ततमिदं सर्वं 'जगदव्यक्तमूर्तिना" इत्यत्राव्यक्तमूर्तिविशेषणात् ते प्राप्नुवन्ति मामेव" इत्यव्यक्तोपासकप्राप्य-, त्वेन भगवतोऽव्यक्तत्वोपपत्तेः। न चाऽव्यक्तोपासकानां व्यक्तप्राप्तिर्युक्ता । "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहं" इति विरोधात् । "देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि" इति विरोधाच्च । न चाव्यक्तोपासनं न प्रकृतम्;

'ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते' इति प्रकृतत्वात्। तस्माद्यथायथं सगुणो निर्गुणश्च भगवान् मामहमित्यादिपदानामर्थः। अद्वैतेऽभ्यासोऽपूर्वता फलमुपपत्तिश्च दृश्यते। देहाद्युपाधिमनुसृत्य "न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः" इत्यादिना द्वैतोक्तिरनुवाद एव। "नैनं छिन्दन्ति शस्त्राणि"। "अचलः स्थाणु"रित्यादिना च तत्त्वैकत्वमेव तत्र तत्र प्रतिपादितम्। "नासतो विद्यते भावो नाभावो विद्यते सतः" इत्यनेन सतः परमात्मनः असत्वं असतोऽनात्मनः सत्वं च प्रतिषिद्धम्। अनात्मनोऽसत्वे परमात्मन एव सत्वे च निश्चितेऽद्वैतमेव तत्वमिति निश्चीयते। न चात्र सदसत्पदाभ्यामात्मानात्मनोरेव ग्रहणे मानाभाव इति वांच्यम्। परस्तात्तद्विवरणदर्शनात्। तथा हि—किं तदसत् यस्य सत्वं प्रतिषिध्यते इत्याकांक्षायामुक्तम् "अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः" इति। अत्र देहपदेन समष्टिव्यष्टिस्थूलसूक्ष्मकारणात्मकास्सर्वे देहा विवक्षिताः। 'महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च। इन्द्रियाणि दशैकञ्च पञ्चचेंद्रियगोचराः॥ एतत् क्षेत्रं समासेन" इति सर्वस्यैव जगतो देहापरनाम्नि क्षेत्रे अन्तर्गतत्वप्रतिपादनात्। तथा च सर्वे देहा अन्तवन्त इति प्रतिपादनेनानात्मनोऽसत्वं स्पष्टमेव। किं तत्सत् यस्य कदाप्यसत्वं न भवतीति प्रतिपित्सायामुक्तम्—"अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्" इत्यत्राभिन्ननिमित्तोपादानेन येन सर्वं ततं तस्याविनाशित्वोपपत्त्या तस्यैव सर्वाधिष्ठानत्वेन सर्वबाधावधित्वम्। "यो मां पश्यति सर्वत्र सर्वञ्च मयि पश्यति" इति स्पष्टं भगवता स्वस्यैव सर्वकल्पनाधिष्ठानत्वमुक्तम्। यथा रज्वां सर्पधारामालादयः कल्पिताः सन्ति तेषु चाधिष्ठानरूपेण इदमंशोऽनुभूयते तथैव परमात्मनि सर्वाणि भूतानि तेषु च परमात्मोपलभ्यते। प्रकारान्तरेण च यथा रज्ज्वां सर्पादयोऽध्यस्ताः न सर्पादिषु रज्जुस्सम्भवति तथैव परमात्मनि सर्वाणि भूतानि सन्ति परमात्मा च तेषु न भवति। सर्वभूत्वेऽपि असंगत्वेन वस्तुतस्सर्वविवर्जितत्वमेव। "अविभक्तञ्च भूतेषु विभक्तमिव च स्थितम्" इत्येतेनापि सर्वभूतस्थस्यात्मनः सर्वत्राविभक्तत्वमेवोक्तम्। "सर्वभूतेषु येनैकं भावमव्ययमीक्षते" इति सर्वभूताधिष्ठानैकत्वज्ञानस्यैव सात्विकत्वमुक्तम्। भिन्नदर्शिज्ञानस्य च "पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान्। वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्"॥ इति राजसत्वमेवोक्तम्। किञ्च 'वेदैश्च सर्वैरहमेव वेद्यः" इत्यनेन भगवता वेदादिसकलशास्त्रतात्पर्यं स्वस्मिन्नेव प्रतिपादितम्। एवकारेण स्वातिरिक्तस्य वेदतात्पर्याविषयत्वञ्च प्रत्यपादि॥

न च तत्र तत्र वेदेषु "द्वा सुपर्णा" इत्यादिना भगवदतिरिक्तस्य स्पष्टं प्रतिपादनमस्ति। गीतायामपि "द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च। क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर

उच्यते ।। उत्तमःपुरुषस्त्वन्यः परमात्मेत्युदाहृतः" इत्यादिना विभिन्नवस्तु प्रतिपादितमिति वाच्यम्। तात्पर्यानवबोधात् । "अहमेव वेद्यः" इति भगवता स्वस्यैव महातात्पर्यविषयत्वमुक्तम्, तदतिरिक्तस्य तत्प्रतिपत्त्यंगत्वेनावान्तरतात्पर्यविषयत्वमेव । "त्रैगुण्यविषया वेदाः" इत्यस्याप्ययमेवार्थः । येषां व्यवसायात्मिका बुद्धिर्नास्ति तेषां त्रैगुण्यविषयत्वमाभाति ।।

वेदानां कर्मकाण्डस्यापि महातात्पर्यं ब्रह्मण्येव । अन्यथा "सर्वे वेदा यत्पदमामनन्ति" "वेदैश्च सर्वैरहमेव वेद्यः" इत्यादिभिः विरोधापत्तेः । द्वाविमावित्यादिनापि न भेदप्रतिपादनम्, अपि तु मायातत्कार्यात्प्रपञ्चाद्धिष्ठानस्य निस्संगत्वप्रतिपादनमेव । क्षरः कार्यं अक्षरस्तत्कारणम् माया, ताभ्यामन्यस्तदधिष्ठानभूतः परमात्मा, यथा स्वाज्ञानतत्कार्याभ्यामन्यद्रज्जुतत्त्वमिति तद्वत् । न चात्र क्षेत्रज्ञपरमात्मनोरेव द्वाविमावित्यादिना ग्रहणमिति वाच्यम् । तथात्वेऽन्यतरस्य क्षरत्वेन विनाशित्वाभ्युपगमापातात् । "क्षरः सर्वाणि भूतानि" इति तद्विवरणे भवनशीलानां कार्यभूतानामेवावगमात् । ततो मिथ्याभूताभ्यां मायातत्कार्याभ्यां अधिष्ठानस्य पृथक्त्वप्रतिपादन एव तात्पर्यमुक्तवाक्यस्य । न च क्षेत्रज्ञपरमात्मनोर्भेदस्सम्भवति । "क्षेत्रज्ञं चापि मां विद्धि" इति तदभेदप्रतिपादनात् । क्षेत्रविवरणे सर्वदृश्यस्य क्षेत्रान्तर्गतत्वमुक्तम् । तद्भासकस्य चिदात्मनश्च ऐकत्वमेव, तन्नानात्वे मानाभावात् । अत एव क्षेत्रविवरणानन्तरमेव क्षेत्रज्ञाभिन्नस्य परमात्मनः "ज्ञेयं यत्तत्प्रवक्ष्यामि" इत्यादिना प्रतिपादनावसरे निर्विशेषत्वमेवोक्तम् । "न सत्तन्नासदुच्यते" इति कार्यकारणवैलक्षण्यप्रतिपादनात् । न च "सर्वतः पाणिपादं तत्" "इत्यादिना विशेषप्रतिपादनमप्यस्तीति वाच्यम् । सर्वशून्यत्वभ्रमनिरासे एव तत्तात्पर्यात् । "उपद्रष्टाऽनुमन्ता च भर्ता भोक्ता महेश्वरः । परमात्मेति चाप्युक्तः देहेऽस्मिन्पुरुषः परः ।।" इत्यत्र चैकस्यैवोपाधितो भोक्तृत्वादिकं परमार्थतश्च परमात्मत्वमुक्तमेव । न च "अश्वत्थं प्राहुरव्ययम्", "नान्तो न चादिर्न च संप्रतिष्ठा" इत्यादिवचनैश्च संसारस्याव्ययत्वं अनन्तत्वं च प्रतिपादितम्, तथाच कथमद्वैते तात्पर्यमिति वाच्यम् । भावानवबोधात् । तथाहि "अनित्यमसुखं लोकं" "दुःखालयमशाश्वतम्" इत्यादिना प्रपञ्चस्याशाश्वतत्वप्रतिपादनेन न संसाराव्ययत्वप्रतिपादने उक्तवाक्यस्य तात्पर्यम् । किंतु अव्ययमिति प्रवाहरूपेण नित्यत्वप्रतिपादनम् । आहुरित्यस्वारस्येनान्यमतप्रदर्शनं वा । नान्त इत्यस्यापि ज्ञानं विनाऽस्य नान्त इत्येवार्थः । "मायामेतां तरन्ति ते" इत्यादिना प्रपञ्चमूलमायातरणेन तद्बाधाधिष्ठानभूतः परमात्मैवावशिष्यते । न च तत्र तरणशब्देनातिक्रमणमेव विवक्षितम्, न बाधो नाशो वा तरणशब्दार्थ इति वाच्यम् ।

तरति वीरहत्यामित्यादौ तरणशब्दस्य नाशार्थ कताश्रवणेनात्रापि तथात्वौचित्यात् ॥

संक्षेपेण गीताशास्त्रस्यायं तत्त्ववृत्तान्तः। स्वजनविनाशसम्भावनोद्भूतशोकमोहाभिभूतविवेकविज्ञानः शोकसंविग्नचेता अर्जुनो विरक्तस्सन् शोकनिवर्तकं मार्गं जिज्ञासुर्भगवन्तं पृष्टवान्। यथा विषेण विषस्योपशान्तिर्भवति तथैव दोषान्तरेण दोषस्याऽपि क्वचिन्निवृत्तिर्भवति। क्रोधोत्पत्तौ कामनिवृत्तिवदत्रापि ममाहंभावमूलकात्कार्पण्यलक्षणात्स्नेहात् पूर्वं राज्यसुखादिकामोऽपसृतः। पश्चात्त्रैलोक्यराज्यान्तात् सुखाद्विरक्तिर्जाता। मरणान्तं कष्टमङ्गीकृत्यापि राज्यसुखलोभेन अप्रतीकारं मां घ्नतोपि न हनिष्यामीति मतिर्जाता। स्वयमर्जुनस्य महाविरक्तौ तितिक्षायाञ्च संवृत्तायां तन्नान्तरीयकाणि सर्वाण्यपि ज्ञानसाधनानि सम्पन्नानि। ततश्च "यच्छ्रेयस्स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्" इत्युपसन्नाय आत्मज्ञानादन्यत्र विश्रान्तिमपश्यन्नात्मविद्यामुपदिदेश भगवान्। "कुमतिमहरदात्मविद्यया यः स्वजनवधाद्विमुखस्य दोषबुद्ध्या" इति भागवतेऽपि तथैव भीष्मोक्तेः। अशोच्यानन्वशोचस्त्वमित्यारभ्य नानुशोचितुमर्हसि इत्यन्तेन पूर्वं देहातिरिक्तत्वनित्यत्वाकर्तृत्वाविकार्यत्वैकत्वसर्वगतत्वादिकमात्मनः प्रतिपादितम्। "न त्वेवाहं जातु नासम्" इत्यादिना शरीरानित्यत्वम्, नासतो विद्यते इति प्रत्यक्चिदात्मनोऽविनाशित्व मनात्मनश्चान्तवत्त्वं प्रतिपादितम्। एतेन तत्त्वैकत्वमपि स्पष्टमेव। "य एनं वेत्ति हन्तारम्" इत्यारभ्य "उभौ तौ न विजानीत" इति "वेदाविनाशिनं नित्यं य एनमजमव्ययम्। कथं स पुरुषः पार्थ कं घातयति हन्ति कम्" ॥ इत्यन्तेन हन्तृत्वघातयितृत्वाक्षेपेण सर्वविधकर्तृत्वमेवाक्षिप्तं वेदितव्यम्; न्यायस्य समानत्वात्। अविनाशित्वाव्ययत्वाद्युक्त्या कण्ठतश्चाच्छेद्यादाह्याक्लेद्यत्वोक्त्या निर्विकारत्वमुक्तम्। न त्वं नेमे इत्यादिना लोकसिद्धं भेदमनूद्य पूर्वं देहातिरिक्तत्वमात्रमुक्तम्। पश्चात्परिशुद्धस्य तस्यैव "देही नित्यमवध्योऽयं देहे सर्वस्य भारत" इति सर्वदेहेष्वेकत्वमेव देहिनो गदितम्। आश्चर्यवदित्यनेन एतादृशस्य नित्यशुद्धबुद्धमुक्तस्वभावस्य अद्वितीयचिदात्मनोऽपूर्वत्वं चोक्तम्। सद्वितीयत्वसप्रपञ्चत्वादेस्तु लोकसिद्धत्वेनापूर्वत्वाभावात्। तत्प्रतिपादकस्यानुवादकत्वेनाप्रामाण्यापत्त्या स्वार्थे तात्पर्यासम्भवात्। अनन्तरं च साधकस्य स्वात्मशुद्धये, सिद्धस्य ज्ञानिनो लोकसंग्रहाय च वर्णाश्रमानुसारिश्रौतस्मार्तकर्मणां कर्तव्यत्वमुक्तम्। भगवता साधकानामनुष्ठेयत्वेन सिद्धानां स्वभावभूता गुणाश्चोक्ताः। ज्ञानकर्मणोरधिकारिभेदेन व्यवस्था चोक्ता। अभेदप्रसंगेन "प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः। अहंकारविमूढात्मा कर्ताहमिति मन्यते" ॥ इत्येतेन प्रकृतिगुणानामेव कर्तृत्वमात्मनश्च कर्तृत्वाभिमतिः मूढतैवेत्युक्तम्। पारिशेष्यादविवेकप्रयुक्तमेव

कर्तृत्वमात्मनः यथा जीवात्मनोऽविद्यावशाज्जन्म। परमात्मनश्च धर्मग्लान्यधर्माभ्युत्थाननिवृत्तये धर्मसंस्थापनाय च लीलया जन्म भवतीत्युक्तम्। "तस्य कर्तारमपि मां विद्धयकर्तारमव्ययम्" इति चातुर्वर्ण्यकर्तुरपि भगवतो वास्तवमकर्तृत्वमेवोक्तम्। तथा चौपाधिकमेव कर्तृत्वं भगवतो जीवात्मनश्च। न वास्तवम्। "कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः। स बुद्धिमान्" इति सर्वेषामेव कर्मणां अकर्माधिकरणत्वोक्त्या कर्मनिष्टाकर्मत्वोक्त्या च स्फटिके लौहित्यारोपवन्निर्व्यापारप्रत्यक्चिदात्मनि व्यापारवत्सङ्घात सान्निध्येन व्यापारारोप उक्तः। तत एव व्यापारवत्यपि सङ्घाते चिदात्मनो निर्व्यापारत्वं स्फटिकस्वाच्छ्यमिवोक्तम्। संघातस्य कर्मणि व्यापारे सत्यपि सङ्घातासंस्पृष्टस्य चिदात्मनो

निर्व्यापारत्वं जपाकुसुमसन्निधानेन लौहित्यभानकालेऽपि स्फटिकस्य वास्तवं स्वच्छत्वं यथा जायते, तथैवात्रापि बोध्यम्। वास्तवाकर्तृत्वविज्ञानादेव सर्वतस्सम्प्लुतोदकस्थानीयस्वरूपभूतब्रह्मावाप्त्या वापीकूपतटाकादिस्थानीयकृत्स्नकर्मफलस्य तत्रैवान्तर्भावात् कृत्स्नकर्मकृत्त्वं दग्धकर्मत्वं नित्यतृप्तत्वं कर्मणि प्रवृत्तस्यापि सर्वथाऽकर्तृत्वं च सम्पद्यते। सर्वमेतत् "कृत्स्नकर्मकृत्", "ज्ञानाग्निदग्धकर्माणम्", "कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित्करोति सः" इत्यादौ प्रदर्शितम्। ब्रह्मार्पणमित्यनेन यज्ञप्रसङ्गेन सर्वसम्भारेषु ब्रह्मत्वोक्त्या ब्रह्मविवर्तत्वमुक्तम्। "सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते" इति ज्ञान एव सर्वकर्मणां पर्यवसानोक्त्या ज्ञानफलमेव परः पुमर्थ इत्युक्तम्। सर्वानर्थनिवृत्तिपरमानन्दावाप्तिलक्षणस्य परमपुमर्थस्य ज्ञानप्राप्यत्वोक्त्याऽपि निबर्हणीयस्य बन्धस्य मिथ्यात्वम्, प्राप्यस्य परमानन्दस्य स्वस्वरूपत्वं च व्यज्यते। सत्यस्य ज्ञाननिवर्त्यत्वासंभवात् भिन्नस्य ज्ञानप्राप्यत्वासम्भवाच्च तत्त्वदर्श्युपदिष्टज्ञानेन सर्वभूतानां आत्मनि भगवति च दर्शनमुक्तम्। यदि भगवानात्मनो भिन्नः स्यात्तदा सर्वभूतानामुभयत्र स्थितिः कथमुपपद्येत। तथा च "द्रक्ष्यस्यात्मन्यथो मयि" इत्यत्र सामानाधिकरण्येन भगवदभिन्ने चिदात्मन्येव सर्वभूतदर्शनमुक्तम्। असङ्गे चिदात्मनि सम्बन्धान्तरेण सर्वभूतावस्थित्यनुपपत्त्या आध्यात्मिकसम्बन्धेनैव तद्वक्तव्यम्। तथा च सर्वकल्पनाधिष्ठानत्वेन बाधावधेरधिष्ठानभूतस्य प्रत्यक्चैतन्याभिन्नस्य भगवतोऽद्वितीयत्वमर्थाद्भवति। प्रपञ्चस्य कर्मणां तत्फलानां च मिथ्यात्वावगमेनैव सर्ववृजिनसन्तरणमुपपद्यते। "वृजिनं सन्तरिष्यसि" इत्यत्र सन्तरणशब्देन समूलनाश एवोक्तः, अवशिष्टस्य कालान्तरे बन्धकत्वप्रसङ्गात्। "ज्ञानाग्निस्सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन"। इत्यत्र ज्ञानेन कर्मणां भस्मीभावप्रतिपादनात्। पवित्रज्ञानेनैव संशयच्छेदः प्रोक्तः।

"योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते॥
नैव किञ्चित्करोमीति युक्तो मन्येत तत्ववित्।
पश्यञ्छृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपञ्छ्वसन्॥

इत्यादिना विशुद्धात्मनः सर्वभूतात्मभूतत्वं, कुर्वतोपि सर्वकर्मरहितत्वमुक्तम् । भ्रान्तस्य उन्मादिनो वा कुर्वतः कर्मराहित्यभानमपि संभवतीति तद्वारणाय युक्तस्तत्त्वविदिति चोक्तम् ।

"न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ।।"

इत्यनेन कर्तृत्वकारयितृत्वनिषेधः स्वभावपदव्यपदेश्येनानाद्यनिर्वाच्याज्ञानेन ब्रह्मणो विश्वोत्पादनादित्वम् । वस्तुतस्तु निर्विशेषत्वं निर्विकारत्वञ्च तत्र तत्रोक्तम् "नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः । अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः" ।। इत्यनेन स्पष्टमद्वैतसङ्केतः कृतः । अत्राज्ञानपदेन न ज्ञानाभावः, किन्तु भावरूपमनिर्वाच्यं आवारकं ज्ञाननिवर्त्यं तत्त्वान्तरमेव । अन्यथाऽऽवारकत्वोक्तिर्न सङ्गच्छते । ज्ञानपदेन च "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यत्रेव त्रिकालाबाध्यं स्वप्रकाशं ब्रह्मैव विवक्षितमं, तथा चाज्ञानेन ज्ञानं ब्रह्मावृतं, तेनैव कर्तृत्वादिव्यामोहः ।

"ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ।।"

इति ज्ञानेनाज्ञाननाशे ब्रह्मनिष्ठानां अपुनरावृत्तिलक्षणस्य मोक्षस्य प्राप्तिरप्युक्ता । ज्ञाननिर्धूतकल्मषाणां विदुषां विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि शुनि चैव श्वपाके च निर्दोषसमब्रह्मदृष्टिरेव भवतीत्यपि प्रोक्तम् । विविधवैषम्योपेते जगति निर्दोषं समं ब्रह्मैवाधिष्ठानरूपेण परिलक्ष्यते, ततोऽपि विश्वस्य मिथ्यात्वं अधिष्ठानभूतस्य निर्दोषसमस्य ब्रह्मण एव पारमार्थिकत्वमुक्तम् ।

"सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ।।"

इत्यनेन योगयुक्तस्य सर्वभूतस्थात्मदृष्टिः आत्मस्थसर्वभूतदृष्टिरप्युक्ता । "यो मां पश्यति सर्वत्र सर्वञ्च मयि पश्यति" इत्यनेन प्रपञ्चस्य ब्रह्माणि कल्पितत्वेन तत्स्थत्वं, अधिष्ठानरूपेण ब्रह्मणश्च भूतस्थत्वमुक्तम् । "सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः" इत्यनेन सर्वभूतस्थितस्य भगवतः एकत्वेनाश्रयणमुक्तम् । "भूमिरापोऽनलो वायुः" इत्यादिनाऽष्टप्रकृतिमपरां जीवभूतां पराञ्च प्रकृतिमुक्त्वा सर्वाणि भूतान्येतद्योनीनि इति चोक्तम् । परापरप्रकृतिद्वारा कृत्स्नस्य जगतो भगवत्प्रभवप्रलयत्वे निरूपिते "मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव", "रसोऽहमप्सु" इत्यादिना च भगवत एव सर्वकारणत्वेन सर्वसारत्वमुक्तम् ।।

"मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि"

इत्यनेनापि स्वस्यैवाधिष्ठानत्वमुक्तम् । "दैवी ह्येषा गुणमयी मम माया दुरत्यया ।" इति दुरत्ययया मायया भगवत्तिरोधानेन संसृतिः, भगवदाश्रयणेन च तत्तरणमुक्तम् । अत्र तरणपदेन नाश उक्तः । न च तरणमतिक्रमणमात्रम् । वृजिनं सन्तरिष्यामीत्यादौ तरणपदस्य नाशार्थ-

कत्वोक्तेः । यथाऽज्ञानेन परमात्मनः आवृतत्वमुक्तम्, तथा "नाहं प्रकाशस्सर्वस्य योगमायासमावृतः" इति मायया आवृतत्वं च भगवता उक्तम् । तथा चाज्ञानं माया च नार्थान्तरम् । यथा "ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः" इति ज्ञानेनाज्ञाननाशः उक्तःतथैव भगवत्प्रपत्त्या मायातरणमुक्तम् । तरणे नाशे च नार्थभेदः । "वासुदेवस्सर्वमिति स महात्मा सुदुर्लभः ।" इति सर्वं वासुदेव इति भावनाया दुर्लभत्वोक्त्या च तस्यां परमादरस्सूचितः ।

"परस्तस्मात्तु भावोऽन्यो व्यक्तोऽव्यक्तात्सनातनः ।
यस्स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ।।"
इत्यत्र मायालक्षणादव्यक्तात् परस्य सनातनस्य विनश्यत्सु अविनाशित्वं उक्तम् ।

"मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ।।"
इत्यनेनं मृत्तिकामयघटशरावादिकं यथा मृत्तिकया ततम्, तथैवाऽऽकाशादिकं सर्वं जगत् अव्यक्तमूर्तिना मया ततमित्युक्तम् ।।

"सर्वभूतानि मत्स्थानि न चाहं तेष्ववस्थितः ।" "न च मत्स्थानि भूतानि" इत्युक्त्या भूतानां ब्रह्मनिष्ठात्यन्ताभावप्रतियोगित्वमुक्तम् ।।

"भूतभृन्न च भूतस्थ" इत्यादिना भूतभृत्त्वमपि मायाद्वारा परमात्मन एवोक्तम् । मायाया भिन्नत्वविवक्षया भगवदध्यक्षतायामेव मायया चराचरं सूयते इत्युक्तम् । अज्ञातचैतन्ये अज्ञानप्राधान्येन मातृत्वं चैतन्यप्राधान्येन पितृत्वं चोक्तम् । प्रभवप्रलयस्थानत्वेन सर्वात्मत्वं चोक्तम् । "भवन्ति भावा भूतानां मत्त एव पृथग्विधाः" इत्यनेन सर्वकारणत्वमुक्तम् । "अहमात्मा गुडाकेश" इत्यारभ्य तेषु तेषु भूतेषु स्वविभूतिमुक्त्वा "विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्" इति सर्वस्यैव जगतः स्वात्मैकदेशमात्रत्वमुक्तम् । "सर्वं समाप्नोषि ततोऽसि सर्वः" इत्यत्र सर्वकारणत्वेनार्जुनेनापि तथाविधमेव भगवतस्स्वरूपमुक्तम् ।।

अचिन्त्यानन्तकल्याणगुणनिलयत्वेन सगुणोपासनमुक्त्वा निर्गुणोपासकानां ज्ञानसमकालं तदवाप्तिस्सूचिता । त्रयोदशे सर्वमेव जगत् क्षेत्रपदेनोक्त्वा तद्भासकस्य क्षेत्रज्ञत्वमुक्तम् । "क्षेत्रज्ञं चापि मां विद्धि" इति क्षेत्रक्षेत्रज्ञयोरुभयोरपि भगवदात्मकत्वं सङ्क्षेपेणोक्त्वा क्षेत्रविवरणञ्च कृत्वा क्षेत्रज्ञपरमात्मानौ एकीकृत्य "ज्ञेयं यत्तत्प्रवक्ष्यामि न सत्तन्नासदुच्यते..." इति कार्यकारणमूर्तामूर्तादिनिषेधमुखेन निर्विशेषं सर्वाधिष्ठानं प्रतिपादितम् । सदसन्निषेधेन शून्यत्वाशङ्कायाम् "सर्वतः पाणिपादं तत्" इत्यादिना वस्तुनोऽसत्त्वं वारितम् । साधारणशिरःपाण्यादिमानपि नावस्त्विति वक्तुं शक्यते । कुतः सर्वतः पाणिपादं वस्तु असदिति वक्तुं शक्यते इति व्यञ्जितम् । सर्वेन्द्रियगुणाभासत्वेन सत्त्वमुपपाद्येन्द्रियादिमत्त्वेन संसारित्वप्राप्तौ "सर्वेन्द्रियविवर्जितम्" इति तदपि निषिद्धम् । सर्वभृतोप्यसङ्गत्वं निर्गुणस्यापि सगुणत्वमौपाधिकनिरुपाधिकभेदेन युज्यते इत्यपि

व्यक्तम् । "बहिरन्तश्च भूतानाम्" इति सर्वस्य बाह्यमाभ्यन्तरञ्च ब्रह्मेत्युक्तौ यस्य बाह्यमाभ्यन्तरञ्च ब्रह्म तस्य चरस्याचरस्य चातिरिक्तत्वशङ्कायाम्, उक्तम् "अचरं चरमेव च" इति । "सर्वं खल्विदं ब्रह्मे" तिवद्बाधायां सामानाधिकरण्येन चराचरस्य ज्ञेयब्रह्मात्मकत्वं बोधितम् । सर्वात्मत्वात्तर्हि कथन्न स्पष्टं विज्ञायते इति शङ्कायाम् "सूक्ष्मत्वात्तदविज्ञेयं" इत्युक्तम् । शास्त्राचार्योपदेशसंस्कारविरहिणामविदुषां कल्पकोटिशतैरप्यलभ्यत्वाद्दूरस्थम्, विदुषामात्मत्वादन्तिके च इत्युक्तम् "दूरस्थं चान्तिके च तत्" इति । विभक्तमिव यद्यप्याभाति तथापि सर्वभूतेष्वविभक्तमेकमेवेत्यपि "अविभक्तञ्च भूतेषु विभक्तमिव च स्थितम्" इत्युक्तम् । मायया तस्यैव भूतभर्तृत्वप्रभविष्णुत्वग्रसिष्णुत्वादिकमुक्तम् । "ज्योतिषामपि तज्ज्योतिः" इति बाह्यज्योतिषां सूर्यचन्द्रविद्युदग्नचादीनां आन्तरज्योतिषां इन्द्रियमनोबुद्धचादीनामपि तज्ज्ञेयमेव ज्योतिः तदनुग्रहेणैव सर्वत्र स्फूर्तिदर्शनात् । तस्य चावेद्यत्वे सति अपरोक्षत्वेन स्वप्रकाशत्वमेव ॥

भूतभर्तृत्वादिना यस्य कारणत्वं तस्यैव "ज्योतिषामपि" इति स्वप्रकाशत्वमुक्तम् । यदि तटस्थमेव ज्ञेयं विवक्षितं स्यात् तदा तस्य स्वप्रकाशत्वं कथमपि वक्तुं न शक्यते, तथात्वे विप्रतिपत्त्यसंभवापातात् । प्रत्यक्चैतन्यस्यैव निरुपचरितस्वप्रकाशत्वोपपत्तिः । तथा च प्रत्यक्चैतन्याभिन्नत्वेनैव ज्ञेये ज्योतिषां ज्योतिष्ट्वेन स्वप्रकाशत्वमुपपादनीयम् । अनिर्वाच्यानाद्यविद्याप्रत्युपस्थापितनामरूपाद्युपाधिमाश्रित्य भेदोऽपि तत्र तत्रोक्तः । अनिर्वाच्याविद्यामेव प्रकृतित्वेन तदुपहितचेतनमेव पुरुषत्वेन विवक्षित्वा प्रपञ्चनमपि नाद्वैतप्रतिकूलम् । परस्तादेव "उपद्रष्टाऽनुमन्ता च" इत्यादिना एकस्यैवौपाधिकानौपाधिकभेदेन संसारित्वासंसारित्वबोधनात् । विविधवैषम्योपेतेषु विनश्यत्सु सममविनश्वरमात्मानं यः पश्यति स पश्यतीति "समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् । विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥" इत्यस्मिन्वचने प्रोक्तम् । भूतानां विनाशित्वोक्त्या तत्स्थस्य समस्यात्मनः अविनाशित्वोक्त्या च स्पष्टमद्वैतमुच्यते । "समं पश्यन्हि सर्वत्र समवस्थितमीश्वरम् । न हिनस्त्यात्मनाऽऽत्मानं ततो याति परां गतिम् ॥" इति समब्रह्मदर्शनादेव आत्महत्वनिवृत्तिमुक्त्वा समब्रह्मदर्शिनः प्रशंसाऽपि कृता । अद्वैतमनुरुद्ध्यैव सर्वकर्मणां प्रकृतिकर्तृत्वमात्मनश्चाकर्तृत्वमप्युपपद्यते । "प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः । यः पश्यति तथात्मानमकर्तारं स पश्यति ॥" इत्यनेनात्मनोऽकर्तृत्वमुक्त्वा "यदा भूतपृथग्भावमेकस्थमनुपश्यति । तत एव च विस्तारं ब्रह्म संपद्यते तदा ॥" इत्यनेन चैकस्मादेव भूतानां विस्तारं तत्रैव स्थितिं चोक्त्वा कर्तृत्वादिविवर्जितमेकमेवाद्वितीयमात्म-

तत्त्वं इत्यपि स्पष्टमेव उच्यते । "अनादित्त्वान्निर्गुणत्त्वात्परमात्माऽयमव्ययः । शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ॥" इति शरीरस्थस्यापि चिदात्मनो निर्गुणत्त्वादव्ययत्वान्निर्लेपत्वेन अकर्तृत्वमुक्तम् । न ह्यन्यवादिनामात्मनोऽकर्तृत्वमिष्टम् । सांख्यदृष्ट्या तदुपपत्तावपि एकस्थत्वं नोपपद्यते । "यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते । सर्वत्रावस्थितो देहे तथाऽऽत्मा नोपलिप्यते ॥" इति प्रपंचानुपलेपमुक्त्वा "यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः । क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥" इत्येकत्वमपि प्रोक्तम् । कृत्स्नस्य क्षेत्रस्यैकक्षेत्रिप्रकाश्यत्वोक्त्याऽऽत्मभेदो निषिद्धः । क्षेत्रक्षेत्रज्ञयोरन्तरं, भूतप्रकृतिमोक्षं, बाधं च ज्ञानचक्षुषा विदितवतः परा गतिरुक्ता ॥

चतुर्दशे ब्रह्मचैतन्यप्रतिबिम्बसमन्वितप्रकृतेः सृष्टिरुक्ता । गुणेभ्यः परमकर्तारं विदितवतः गुणातीतत्वमुक्तम् । ब्रह्ममूलत्वेन संसारवृक्षस्य महत्त्वमुक्त्वा ब्रह्मज्ञानेन तच्छेदनमुक्तम् । "न तद्भासयते" इत्यग्राह्यत्वेन प्रत्यगात्मत्वमप्युक्तं परमतत्त्वस्य जीवस्य च भगवतः सनातनांशत्वोक्त्या घटाकाशमहाकाशन्यायेनैकत्वं परापरात्मनोर्विवक्षितम् । "वेदैश्च सर्वैरहमेव वेद्यः" इति वेदानामपि महातात्पर्यं भगवत्येव प्रतिपादितम् । क्षराक्षराभ्यां कार्यकारणाभ्यामधिष्ठानस्यान्यत्वप्रतिपादनेन वस्तुतो निष्प्रपंचत्वमात्मनः उक्तम् "उत्तमः पुरुषस्त्वन्यः" इत्यादिना । "ये चैव सात्विका भावा राजसास्तामसाश्च ये । मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि ॥ " इति सर्वाधिष्ठानत्वेन गुणादिभ्यः परत्वमसकृदुक्तमेव । "हत्वाऽपि स इमान्लोकान्न हन्ति न निबध्यते" इति पुनः पुनः प्रसङ्गेनाकर्तृत्वमुक्तम् । "सर्वभूतेषु येनैकं भावमव्ययमीक्षते । अविभक्तम् विभक्तेषु तज्ज्ञानं विद्धि सात्विकम् ॥" इत्यविभक्तज्ञानस्यैव सात्विकत्वं अन्यस्य राजसतामसत्वोक्त्या अद्वैतज्ञानस्यैव यथार्थज्ञानत्वं सूचितम् । उपसंहारे "मामेकं शरणं व्रज" इत्येकत्वावगतिरुपदिष्टा । एवं आत्मोपदेशं प्राप्यार्जुनोऽपि गतसंदेहो नष्टमोहस्संपन्नः । "नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत । स्थितोऽस्मि गतसंदेहः करिष्ये वचनं तव ॥" इति वचनात् । अन्यत्रापि ब्रह्मविज्ञानादेव संशयनिवृत्तिः श्रूयते । "भिद्यते हृदयग्रन्थिः" इत्यादिश्रुतेः ॥

अत्रेदमवगन्तव्यम् । जीवेश्वरौ भिन्नरूपौ, आत्मनिष्ठं कर्तृत्वं वास्तवं, शरीरत्रयसंयुक्तो जीवः संसारी, जगत्कारणरूपस्य विकारित्वं, कारणाद्भिन्नजगतः सत्यत्वमिति पञ्चविधो भ्रम एव संसारः, तन्निवृत्तिश्च मोक्षः प्रोक्तः शास्त्रेषु । तत्र गीतायां भेदमनूद्य "नित्यस्सर्वगतस्स्थाणुः", "अविनाशि तु तद्विद्धि", "क्षेत्रज्ञं चाऽपि मां विद्धि" इत्यादिना जीवेशभेदभ्रमो निवारितः । "नायं हन्ति न हन्यते", "प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः । यः पश्यति तथाऽऽत्मान-

मकर्तारं स पश्यति ।।", "अहंकारविमूढात्मा कर्ताऽहमिति मन्यते", "न करोति न लिप्यते ।" इत्यादिना आत्मनि वास्तवकर्तृत्वभ्रमो निषिद्धः। "असक्तम् सर्वभृच्चैव", "यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते" इत्यादिना सङ्गित्वभ्रमोऽपि निवारितः । "अन्तवन्त इमे देहाः", "अविनाशि तु तद्विद्धि, "न च मत्स्थानि भूतानि" , "यदा भूतपृथग्भावमेकस्थमनुपश्यति" इत्यादिना जगत्सत्यत्वभ्रमो वारितः । "न जायते म्रियते", "परमात्माऽयमव्ययः" । इत्यादिना विकारित्वभ्रमोऽपि निवर्तितः । "सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः । पार्थो वत्सस्सुधीर्भोक्ता दुग्धं गीतामृतम् महत् ।।" इत्युक्त्या उपनिषद्गोदुग्धामृतत्वाद्गीतायाः तत्रापि उपनिषदर्थेनैवावश्यं भवितव्यम् । उपनिषत्सु चैकत्वप्रतिपादनप्रसङ्गे "एकमेवाद्वितीयम्" इत्येवकारः समायाति । द्वैतप्रतिपादनप्रसङ्गे "द्वैतमिव" इतीवकारः समायाति । तेनैकत्वस्य दाढर्यान्निरुपचरितत्वेन पारमार्थिकत्वम् । द्वैतस्यादाढर्यादुपचरितत्वेनापारमार्थिकत्वं निश्चीयते। तथैव गीतायामपि द्वैतज्ञानस्य राजसत्वोक्त्या भ्रमत्वेन द्वैतस्यापारमार्थिकत्वं, अद्वैतज्ञानस्य सात्विकत्वोक्त्या यथार्थत्वेनाद्वैतस्य पारमार्थिकत्वमुक्तम् । भूतपृथग्भावस्य एकस्थत्वदर्शनेन ब्रह्मसंपत्तिवचनेन तद्ज्ञानस्यैव प्रतिपिपादयिषा "नात्र काचन भिदास्ति", "नेह नानास्ति किंचन" इति कांचनकिंचनपदाभ्यां उपनिषत्सु सर्वविधभेदस्य निषेधो विवक्षितः । ततो गीतायामपि सर्वविधभेदविवर्जितमेव तत्त्वम् । "न सत्तन्नासदुच्यते" इति सर्वनिषेधः उक्तः । अज्ञानमायाद्यावृतस्य चेतनब्रह्मणः जगदुपादानत्वं यथोपनिषत्सु प्रत्यपादि तथैव गीतायामपि । "अज्ञानेनावृतं ज्ञानं", "नाहं प्रकाशस्सर्वस्य योगमायासमावृतः " इति प्रतिपादितम् । ज्ञानेनाज्ञाननिवृत्तिश्च उपनिषत्स्विव गीतायामपि "ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।", "मायामेतां तरन्ति ते" इति प्रतिपादितम् । यथा असङ्गत्वाकर्तृत्वादिकं उपनिषत्सु आत्मनःप्रतिपादितं, तथैव गीतायामपि तत्र तत्र स्पष्टमुक्तम् । "मायां तु प्रकृतिं विद्यात्" इत्यादौ मायायाः प्रकृतित्वं यथोक्तं तथैव अज्ञानापरपर्यायमायाया एव प्रकृतिरूपेण गीतायां प्रतिपादनं कृतम् । यथा ज्ञानादेव कैवल्यप्राप्तिरुपनिषत्सु प्रोक्ता तथैव "ये विदुर्यान्ति ते परं" इति ज्ञानादेव परप्राप्तिरुक्ता गीतायामपि । प्रपंचस्य मिथ्यात्वे, चिदात्मनश्चासङ्गत्वेऽकर्तृत्वे, सर्वभेदविवर्जितत्वे, नित्यत्वे अज्ञानमात्रव्यवहितत्वे, एवैतत्सर्वमुपपद्यते । तथा च तत्त्ववृत्तान्तपर्यालोचनया अद्वैततत्त्व एव गीताशास्त्रस्य तात्पर्यमिति सुनिश्चितम् ।।

।। श्रीमद्रामार्पणमस्तु ।।

(ए) भगवद्गीतायां अद्वैतभावाः

(R. V. सीतारामशास्त्री B.A ,B.L.)

सूत्रम्—श्रीमद्भगवद्गीता ह्यद्वैतपरैव न द्वैतपरा—कुतः ? जगन्मिथ्यात्वबोधनात्, जीवब्रह्मैक्यदर्शनाच्च ॥ व्याख्यानम्—

श्रीमन्महाभारतयुद्धप्रारम्भसमये अर्जुनः योद्धुं समुपस्थितान् सर्वान् बन्धून् गुरूंश्च दृष्ट्वा शोकमोहनिमग्नः कृपणः धर्मसम्मूढचेताश्च भूत्वा 'न योत्स्ये' इति स्वस्य सारथिं श्रीकृष्णमुक्त्वा सशरं चापं विसृज्य रथोपस्थे तूष्णीं बभूव ॥

एवं विषीदतः अर्जुनस्य श्रीकृष्णः प्रहसन् ज्ञानबोधनं कृत्वा, अज्ञानजनितमोहं शोकं च नाशयित्वा अकरोत्तं गतसन्देहम् । तदा अर्जुनः "नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाऽच्युत । स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव ॥" इत्युक्त्वा युद्धमकरोत् ॥

एवं श्रीकृष्णेन अर्जुनस्य बोधितं तत्त्वं किं ? द्वैतं, उत विशिष्टाद्वैतं आहोस्वित् अद्वैतं इति संशयः ।

"न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः" इति जीवनानात्वश्रवणात्, "प्रकृतिस्त्वां नियोक्ष्यति", "प्रकृतिस्सूयते सचराचरम्" इति प्रपञ्चस्य पृथग्भावकथनात्, "तमेव शरणं गच्छ" इति भजनीयस्य ईश्वरस्य भेदेन विवक्षितत्वाच्च, द्वैततत्त्वमेव बोधितं गीतायाम्, अथवा "ममैवांशो जीवलोके जीवभूतस्सनातनः" इति अंशांशिभावस्य शेषशेषिभावस्य च कथनात्, विशिष्टाद्वैततत्त्वं वा बोधितम्, यथा वाऽपि अद्वैततत्त्वं नोपदिष्टं इति पूर्वपक्षः ॥

एवं प्राप्ते ब्रूमः—श्रीमद्भगवद्गीता ह्यद्वैतपरैव, न द्वैतपरा, नापि विशिष्टाद्वैतपरा, कुतः ? जगन्मिथ्यात्वबोधनात्, जीवब्रह्मैक्यदर्शनाच्च, इति सूत्राभिप्रायः ॥ व्याख्येयं प्रारभ्यते अस्य सूत्रस्य —

त्रयो विषयास्सर्वैरप्यनुभूयन्ते आस्तिकैः—ईश्वरः, जीवः, प्रपञ्चः इति । तेषां अन्योन्यसम्बन्धः कीदृशः ? विषयमेनमधिकृत्य उपन्यस्यते अधुना । "न त्वेवाहं" इत्यनेन श्लोकेन जीवनित्यत्वं प्रतिपादितं भवति । "अन्तवन्त इमे देहाः नित्यस्योक्ताश्शरीरिणः" इत्यनेन—शरीरी एकः, किन्तु तस्य देहाः बहवः इति जीवनानात्वं निरस्तम् । तस्मात् नानात्वं उपाधिभेदेनैव ज्ञातव्यम्, न स्वरूपभेदेन इति स्पष्टं भवति ॥

किञ्च 'न त्वेवाहं' इति श्लोकेन त्रिकालाबाध्यः सत्पदार्थः प्रतिपादितः । "मात्रास्पर्शास्तु कौन्तेय" इति श्लोकेन अनित्यं असद्वस्तु सूचितम् । इदमेव जगदिति बोध्यते । एवं प्राप्तयोः सदसद्वस्तुनोः अन्तः स्वरूपनिर्णयः "नासतो विद्यते भावः" इति श्लोकेन स्पष्टीकृतः । कोऽयमितिं चेत्, अत्रोच्यते—असतः भावो न । सतः अभावो न इति । असन्नाम किमिति चेत्—न तत् शशशृङ्गवत् अत्यन्तासत् । शशशृङ्गं हि न कदापि प्रतीयते । किञ्च, एतादृशस्य अत्यन्तासतः भावो न इति बोधस्याप्यप्रसक्तिः । ततः एतादृशं असत् न विवक्षितमस्मिन् श्लोके इति स्पष्टं भवति । तथैव, सत्पदार्थस्य भावः सर्वदा प्रतीयमानश्चेत्, तस्य अभावो न इति बोधोऽपि न प्रसज्येत । तावता किं प्राप्तमिति चेत्, असच्छब्देन वर्णितं जगत् न

अत्यन्तासत्; प्रतीयमानत्वात्। किन्तु, इदं भाववस्तु वा इति भ्रमस्संजायते। एतादृशभ्रमनिवारणाय "नासतो विद्यते भावः" इति श्रीकृष्णेन उक्तम्। एवमेव सच्छब्देन वर्णितस्य वस्तुनः अप्रतीयमानत्वात्, तस्मिन्नभावप्रत्ययनिरासार्थं, "नाभावो विद्यते सतः" इति च प्रोक्तम्। तस्मात् जगत् न सत्, भावरहितत्वात्, न वा असत्, प्रतीयमानत्वात्, किन्तु सदसद्विलक्षणं इति प्राप्तम्। एतत्सदसद्विलक्षणत्वमेव मिथ्यात्वमिति कथ्यते। ततः जगन्मिथ्या इति निरूपितं भवति गीतायाम्। किञ्च, सद्वस्तु अप्रतीयमानमपि, त्रिकालाबाध्यं सत्यं चेति बोधनात् तदेव सद्रूपं ब्रह्म सत्यमिति च स्पष्टं भवति ॥

अथ जीवब्रह्मैक्यं गीतायां कथं वा दर्शितं इति चेत्, अत्रोच्यते। "न त्वेवाहं" इति श्लोकेन, जीवस्य त्रिकालाबाध्यत्वं "अन्तवन्त इमे देहाः नित्यस्योक्ताश्शरीरिणः" इत्यनेन श्लोकेन जीवस्य एकत्वं नित्यत्वं च दर्शितम्। किञ्च "मात्रास्पर्शास्तु", "अन्तवन्त इमे देहाः" इत्येवं कथनेन देहादिसंघातस्य अनित्यत्वं बोधितम्। जीवस्य एकत्वं नित्यत्वं त्रिकालाबाध्यत्वं देहादिप्रपञ्चस्य अनित्यत्वं मिथ्यात्वं च दर्शयित्वा "एषा तेऽभिहिता सांख्ये बुद्धिः" इति सांख्यबोधोपन्यासः समापितः। अयमुपन्यासः "अशोच्यानन्वशोचस्त्वं" इत्युपक्रान्तः। एवं शोकमोहसन्तरणार्थं ज्ञानोपदेशमुपक्रम्य जीवनित्यत्वं जगन्मिथ्यात्वं च दर्शयित्वा इदमेव ज्ञातव्यं तत्त्वं इति श्रीकृष्णेन बोधितम्। किन्तु शोकमोहसन्तरणं ब्रह्मज्ञानेन विना न कथमपि सम्भवति किल। केवलजीवस्वरूपज्ञानेन एतादृशशोकतरणं कथं भवति? तस्माद्धेतोः सांख्यज्ञानमिति यदुक्तम्, तद् ब्रह्मज्ञानमेव नान्यदिति स्पष्टम्। एवं जीवस्वरूपकथनेन ब्रह्मज्ञानमुपदिष्टम्। तावता किं प्राप्तमिति चेत्, जीवो ब्रह्मैव नापरः इति सिद्ध्यति। एवं जीवब्रह्मैक्यं जगन्मिथ्यात्वं च दर्शितं गीतायां भगवता श्रीकृष्णेन द्वितीयाध्याये तत्त्वोपदेशप्रारम्भ एव। शेषस्तु ग्रन्थः तद्व्याख्यानरूपः ॥

किञ्च सप्तमाध्याये प्रथमश्लोके तावत् "यज्ज्ञात्वा नेह भूयोऽन्यत् ज्ञातव्यमवशिष्यते" इति एकविज्ञानेन सर्वविज्ञानं स्यादिति उपदिष्टम्। एतादृशप्रतिज्ञा अद्वैतसिद्धान्त एव उपपद्यते, न द्वैते, नापि विशिष्टाद्वैते। जीवः जगत् ब्रह्म इति त्रयो विषयाः ज्ञायन्ते किल। तेषु ब्रह्मणो ज्ञानेन जगतः ज्ञानं सम्भवितुमुपपद्यते; ब्रह्मणो जगदुपादानत्वात्। मृद्ज्ञानेन सर्वं मृण्मयं ज्ञातं भवति किल। किन्तु ब्रह्मभिन्नो जीवश्चेत् ब्रह्मणो ज्ञानेन जीवतत्त्वं कथमवगम्यते? जीवो न जगद्वस्तु; जीवस्य नित्यत्वात्, जगतोऽनित्यत्वाच्च। तस्मात् ब्रह्मणो ज्ञानेन जीवो नावगम्येत भिन्नश्चेत्। तथा चेत् एकविज्ञानेन सर्वविज्ञानं स्यादिति प्रतिज्ञा कथमुपपद्यते? जीवब्रह्मणोः ऐक्येनैव सा प्रतिज्ञा उपपन्ना भवति। एवं जीवब्रह्मैक्यं सप्तमाध्यायेऽपि दर्शितम् ॥

किञ्च "यदा भूतपृथग्भावं एकस्थमनुपश्यति। तत एव च विस्तारं ब्रह्म सम्पद्यते तदा॥" इत्यादिभिः श्लोकैश्च जीवब्रह्मैक्यं बोधितम्। अपि च "अभितो ब्रह्म निर्वाणं वर्तते विदितात्मनाम्" इत्यादिवचनैः जीवन्मुक्तिः प्रदर्शिता। जीवन्मुक्तिस्तु द्वैते विशिष्टाद्वैते वा न कदाऽप्युपपद्यते। अद्वैतसिद्धान्त एव जीवन्मुक्तेरवकाशोऽस्ति। एवंरीत्या अपि गीताशास्त्रमद्वैतपरमेव नान्यसिद्धान्तपरम् इति सिद्धान्तः ॥

न हि द्वैतपरा गीता किन्त्वद्वैतपरैव सा।
जगन्मिथ्यात्वलिङ्गाच्च जीवब्रह्मैक्यबोधनात् ॥

—o—

(ऐ) व्याकरणशास्त्रे अद्वैतभावाः

(कालि-रङ्गाचार्याः, मधुरा-कृष्णमूर्तिशास्त्रिणः)

வேத வசனங்களின் பொருளை அறிந்து கொள்வதற்காக வேதாங்கம் ஆறனுள் ஒன்றாக அமைந்த வியாகரண சாஸ்திரத்திலே, "சொற்களின் நேரான பொருளை விளக்கும்போதும் அத்வைதக்கருத்தே அமைந்துள்ளது" என்பது பல இலக்கண நூல்களினின்றும் அவற்றின் உரைகளினின்றும் நிரூபிக்கப் படுகின்றது.

'அ இ உண்' என்று தொடங்கும் மாஹேச்வர ஸூத்ரங்களுக்கு உரை கூறும் நந்திகேச்வரர், "அகரம் எல்லாப் பொருட்களிலுமுள்ள நிர்குணப் பிரும்மம்; அதுவே இகரமாகிய சித் கலையோடு சேர்ந்து ஜகத் ரூபமான 'உண்' ஈச்வரன், அகரம் எழுத்தெல்லாவற்றிற்கும் முதலான ஒளியாகிய பரமேச்வரன்; (ஸூத்திரங்களின்) முதலெழுத்தையும் கடை யெழுத்தையும் சேர்த்தால் (அது) 'அஹம்' என்றாகின்றது". என்கிறார். மேலும், அவரே, "அகரம் ஜ்ஞப்தி மாத்திரம்; இகரம் சித்கலை, அகரத்தின் முன்னிலையாகி ஜகத்தின் காரணமாவதால்; உகரம் எங்கும் பரந்துள்ளதால் (அதை) விஷ்ணு 'மஹேச்வரன்' என்கிறார்கள்" என்று நிர்குணப் பிரும்மமே எல்லாவற்றிற்கும் காரணம் என்பதையும் ஹரிஹர அபேதத்தையும் விளக்குகிறார். நந்திகேச்வர காரிகையின் விருத்தியில் உபமன்யு மஹரிஷியும் அத்வைதக் கருத்தை விளக்குகிறார். நியாய ரக்ஷாமணி, "ஸ்போடம் என்றும் பிரும்மம் என்றும் பெயர் மாத்திரமே வித்யாசம். உண்மையில் மாறுபாடு இல்லை" என்று ஸ்போடாத்வைதத்தைக் கூறுகின்றது. இவ்வாறே 'வாக்யபதீயம்' இயற்றிய ஹரியும் பாணினியும் அத்வைதக் கொள்கைகளையே ஆங்காங்கு எடுத்தாளுகின்றனர். பாணினியின் முதல் ஸூத்ரமே மூவகைப் பரிச்சேதமுமில்லாத அத்வைதப் பிரும்மத்தையே குறிக்கும் (வ்ருத்தி) என்னும் மங்களச்சொல்லோடு தொடங்குகிறது.

வரருசி காத்யாயனர் என்னும் வார்த்திககாரர்களும் கையடர் முதலியவர்களும் அத்வைதவுண்மைகளையே கையாளுகிறார்கள் என்பதும், பாஷ்யகாரரான பதஞ்ஜலி மகரிஷிக்கு அத்வைத சித்தாந்தத்திலுள்ள ஆதரவும், பட்டோஜி தீக்ஷிதர், நாகேச பட்டர், தத்வபோதினீகாரர் முதலியவர்கள் அவற்றை விளக்கிக் காட்டுவதாலே தெளிவாகின்றது.

சர்வதர்சன ஸங்கிரஹத்திலிருந்தும் பாணினி வரருசி பதஞ்சலி ஹரி முதலியோர்களின் கருத்து அத்வைத சித்தாந்தத்திலே தான் என்று தெரிகின்றது.

Vyakarana, one of the six Vedāṇgas, aims at elucidating the exact meanings of the Vedic passages; and the expounders of this śastra make it clear that not only the vedāntic but their own conception of the Truth is *advaitic.*

Nandikeśvara in explaining the Māheśvara Sutras says that *a-kāra* is the all-pervading Nirguṇa Brahman, which is Īśvara when, with the *Chit-Kalā i-kara*, it takes form as *Jagat* (the universe). *A-kāra*, the source of all letters, is the Effulgent *Parameśvara*. The first letters of the first sutra and of the last together read as '*aham.*' Further, *Nandikeśvara* points out that *a-kāra* is pure Jñapti (Intelligence), *ikāra* is *Chitkalā* which in *akarā's* presence is the cause of the Universe; as *akāra* is all pervading, It is known as Vishnu, Maheswara. Thus, it is clear that he considers the *Nirguṇa* Brahman to be the cause of the entire universe and makes no difference between Hari and Hara.

A passage in *Nyāya-rakshāmaṇi* expounding *Spoṭādvaita* says that *Spoṭa* and *Brahman*

are mere differences in nomenclature; and the ideas in that work find many parallels in advaitic thought.

Illustrative passages are culled from the works of the great grammarians Hari and Pāṇini; and it is pointed out that the opening sūtra beginning with the word *Vṛddhi* clearly indicates the nature of Brahman according to the advaita siddhānta. From Vararuchi's *Vārttika* and Kātyāyana's, passages are extracted which by themselves and in the light of later annotators show that they were all advaitins to the core. From the fact that the Bhāshyakāra Patanjali mentions the *advaita* argument reverently and cites from the undoubted advaitic passages of the Māṇḍūkyopanishad, his regard for advaita is made clear; and the many passages from his Bhāshya with their commentaries by later grammarians show conclusively that the great sage regarded the Advaita Siddhānta as the truth.

A Passage from the *Sarva-darśanasangraha* explaining the *darśana* of the grammarians of the Paniniyan school also proves that Vidyāraṇya considered Pāṇini's *darśana* to be on all points identical with the Advaita Vedānta.

इह वेदार्थावगमोपयोगितया वेदाङ्गस्य व्याकरणस्यापि सत्यपि साधुशब्दव्युत्पादने तात्पर्ये अद्वितीये ब्रह्मण्यपि विद्यते एव तात्पर्यमिति सप्रमाणं निरूप्यते।

तत्र सनकादिसिद्धोद्धारणार्थं परमेश्वरेण प्रवर्तितानां सर्वव्याकरणमूलभूतानां "अइउण्" इत्यादिचतुर्दशसूत्राणामपि अद्वैत एव तात्पर्यं उद्घाटितं भगवता नन्दिकेश्वरेण—

"अकारो ब्रह्मरूपस्स्यान्निर्गुणस्सर्ववस्तुषु।
चित्कलामिं समाश्रित्य जगद्रूप उणीश्वरः॥
अकारः सर्ववर्णाग्र्यः प्रकाशः परमेश्वरः।
आद्यमन्त्येन संयोगादहमित्येव जायते॥"

'अइ उण्' सूत्रस्थाकारेण 'हल्' सूत्रस्थहकारसंयोजने अहमिति भवति इत्यर्थः।

सर्वं परात्मकं पूर्वं ज्ञप्तिमात्रमिदं जगत्।
ज्ञप्तेर्बभूव पश्यन्ती मध्यमा वाक्ततस्स्मृता॥
अकारो ज्ञप्तिमात्रं स्यादिकारः चित्कला स्मृता।
अकारं सन्निधीकृत्य जगतां कारणत्वतः।
उकारो विष्णुरित्याहुः व्यापकत्वान्महेश्वरः॥

इत्यादितदीयश्लोकेषु निर्गुणस्य ब्रह्मण एव सर्वकारणत्वं हरिहराभेदश्च दर्शितः। कारिकाव्याख्यायां उपमन्युरपि "अग्रे सृष्टेः पूर्वं इदं अकाररूपाक्षरात्मकमासीत्। वागेव विश्वा भुवना विजज्ञे वाचैव विश्वं बहुरूपम् निबद्धं। तदेव चैकं प्रविभज्योपभुङ्क्ते।" इत्याह॥

"सर्वं परात्मकं पूर्वं ज्ञप्तिमात्रम् इति सर्वस्य प्रपञ्चस्य सृष्टेः पूर्वं ज्ञप्तिमात्रस्वरूपपराभिधस्फोटाख्यशब्दतत्त्वात्मकत्वाभिधानात् स्फोटस्य अद्वितीयचैतन्यरूपत्वम् उक्तम्। तदुक्तं न्यायरक्षामणौ "अन्यभावव्यावृत्तेश्च" इति सूत्रे एवं चेद्ब्रह्म स्फोट इति नाममात्रे विवादस्स्यात्, न वस्तुनि, मुक्त्यन्वयिसकलजीवाभेदं जडप्रपञ्चराहित्यं चानभ्युपगम्य स्फोटाद्वैतोपपादनायोगात् इति॥"

अयमेव सिद्धान्तोऽभिप्रेतो वैयाकरणसार्वभौमस्य हरेरपि। तथाहि।

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥"

इति अर्थात्मकप्रपंचात्मना विवर्तमानं स्फोटाख्यमक्षरतत्त्वं ब्रह्मेति व्यपदिश्यते॥

"स्वरूपज्योतिरेवान्तः परा वागनपायिनी।
तस्यां दृष्टस्वरूपायामधिकारो निवर्तते॥"

(अधिकारनिवृत्तिः मोक्षः) इति तस्यैव चेतनरूपत्वं मुक्त्यन्वयिसर्वजीवाव्यतिरेकश्च प्रदर्शितः ॥

" तस्मात्सर्वमभावो वा भावो वा सर्वमिष्यते ।
न त्ववस्थान्तरं किंचित् एकस्मात्सत्यतः
स्थितम् ॥"

सत्यस्यैकस्य ब्रह्मणः अवस्थान्तरं किञ्चिन्नास्ति । सर्वं हि वस्तु ब्रह्मव्यतिरेकेणालोच्यमानं नास्त्येव ; अविद्यमानत्वात् , ब्रह्मरूपेण तु सत्यमेव इत्यर्थः ॥

तथा व्याकरणसूत्रप्रणेता पाणिनिरपि अद्वितीयमात्मतत्त्वं तत्र तत्र स्फोरयति । तथा हि निर्विघ्नं सूत्राणि प्रणिनीषुरेष भगवानादौ " वृद्धिरादैच् " इति उपचक्रमे । अत्र च भाष्यम् " एतदेकमाचार्यस्य मङ्गलार्थं मृष्यताम् । मांगलिक आचार्यः महतः शास्त्रस्य मङ्गलार्थं वृद्धिपदमादौ प्रयुङ्क्ते ।" इति । अत्र च मंगलं वस्तुनिर्देशात्मकमेव । बृहिसमानार्थकवृधुधातुनिष्पन्नस्य निरुपचरितवृद्धिशब्दस्य त्रिविधपरिच्छेदशून्यं अत एव अद्वैतं ब्रह्मैवार्थः । तदेवात्र माङ्गलिकेनाचार्येण निर्दिश्यते ॥

" अतिकल्याणरूपत्वान्नित्यकल्याणसंश्रयात् ।
स्मर्तॄणां वरदत्वाच्च ब्रह्म तन्मङ्गलम् परम् ॥"

इति च ब्रह्मणः परममङ्गलत्वं प्रसिद्धमेव ॥

तथा वार्तिककारो भगवान्वररुचिरपि " धातोः कर्मणस्समानकर्तृकात् . . . . " इति सूत्रे " सर्वस्य चेतनावत्त्वात् " इति वार्तिकं पठति । तत्र च, " सर्वस्येति - आत्माद्वैतदर्शनेनेति भावः " इति कैयटव्याख्या । ततश्च सर्वस्यापि परमात्माभेदाच्चेतनावत्त्वमुपपादयतो वार्तिककारस्याद्वैतसिद्धान्ते तात्पर्यमिति स्फुटम् ॥

एवं 'सिद्धन्तु निवर्तकत्वात्' इति वार्तिकमपि कात्यायनस्य महर्षेः अद्वैतभावमावेदयति । तस्यार्थः " सत्यं ज्ञानमनन्तम् ब्रह्म " " तत्त्वमसि " इत्यादिवाक्यैः अहमनुभवे प्रसिद्धस्यैव ब्रह्मणः प्रतिपादनेन कथं शास्त्रप्रामाण्यमिति चेन्न, एतेषां वाक्यानां ज्ञातज्ञापकत्वेऽपि भ्रमविशेषनिवृत्तिरूपप्रयोजनवत्त्वात्प्रामाण्यं सिद्धमिति ।" भगवान्भाष्यकारोऽपि " स्त्रियाम् ' इति सूत्रस्थवार्तिकव्याख्यानावसरे ' असत्तु मृगतृष्णावद्गन्धर्वनगरं यथा ' इति पठन्नद्वैतसिद्धान्तस्य सर्वादर्तव्यतां अभिप्रैति । तत्र हि भ्रमे भासमानस्य सदसद्विलक्षणत्वरूपानिर्वाच्यत्वं महाभाष्यकाराभिप्रेतम् । तथा हि स्त्रियामिति सूत्रे भाष्यं " कथं पुनरसल्लिङ्गं शक्यं द्रष्टुम् । मृगतृष्णावत् । तद्यथा मृगास्तृषिताः अपां धाराः पश्यन्ति, न च तास्सन्ति यथा गन्धर्वनगराणि दूरतो दृश्यन्ते, उपसृत्य च नोपलभ्यन्ते " इति । अत्र गन्धर्वनगरदृष्टान्तेनान्यथाख्यातिर्व्यावर्तिता; तस्य पूर्वाननुभवात् । दृश्यन्ते इत्युक्त्या अख्यातिर्वारिता । न च तास्सन्ति इत्यनेन च सत्ख्यातिः परास्ता । ततः भ्रमे भासमानस्य सदसद्विलक्षणत्वरूपानिर्वाच्यत्वं अद्वैतिनाममिमतं श्रीमहाभाष्यकाराणाममिमतमित्येतत् सिद्धं भवति ॥

अपि च " वर्तमाने लट् " इति सूत्रे भाष्यं " अन्ये आहुः नास्ति वर्तमानः काल इति । अपि चात्र श्लोकानुदाहरन्ति—

" न वर्तते चक्रमिषुर्न पात्यते
न स्यन्दन्ते सरितस्सागराय ।
कूटस्थोऽयं लोको न विचेष्टितास्ति
यो ह्येवं पश्यति सोप्यनन्धः ॥" इति

अत्र कैयटः " एवं यो वेत्ति सोप्यनन्धः । किं पुनर्योऽनुष्ठाता योगीत्यर्थः ।" स ह्यविकृतमात्मतत्त्वं भावयन्प्रत्यक्षीकरोतीत्यर्थः । तथा चोक्तं भगवता—

" ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥" इति

एवं कैयटव्याख्यानुरोधेन भाष्योदाहृताः श्लोकाः अध्यात्मविदुपज्ञा इति स्पष्टं प्रतीयते। क्षणभंगवादिनामयं पक्षः इति प्रकृत्य तदुदाहृतश्लोकं व्याकुर्वता नागेशभट्टेनापि आत्मा न क्रियाश्रयः कूटस्थत्वात्। नाप्ययं लोकः, क्षणभंगुरत्वादिति व्याकृत्य इमे च श्लोकाः अद्वैतिनामेवानुकूलाः। तथापि आपाततः क्षणभंगवादिभिरात्मपक्षसाधनत्वेनोपक्षिप्ता इति वदता अयमर्थो दृढीकृतः॥

भाष्यकारा अपि एवंविधस्य प्रत्यवस्थानस्य अद्वैतिनां पक्षे एव स्वारसिकत्वमभिप्रयन्तः नास्ति वर्तमानः कालः इति प्रत्यवतिष्ठमानान् "अन्ये आहुः" इति बहुवचनप्रयोगेण सबहुमानमभिधाय 'अन्य आह अस्ति वर्तमानः काल इति' इति वर्तमानकालास्तितावादिनं प्रकृतनिर्वाहकमपि एकवचनेनैव निर्दिशन्ति इति अहो भक्तिर्भाष्यकाराणामद्वैतवादिषु॥

किं च "निवृत्तपदार्थः सः" इति नञ्सूत्रस्थभाष्येण नञ आरोपार्थकत्वं समर्थयद्भिः भाष्यकारैः अद्वैतसिद्धान्तः सूचितः। यतो हि नञः आरोपितार्थकत्वे "शान्तं शिवमद्वैतम्" इति माण्डूक्यवाक्यगताद्वैतपदेनैव आरोपितद्वैतवदित्यर्थकेन प्रपञ्चस्य परमात्मन्यारोपितत्वं कण्ठत एवोक्तं भवेदिति। आरोपार्थकत्वमेव नञः अनुभवसिद्धं इति च भाष्ये सप्रपञ्चं निरूपितम्। अनूद्य प्रतिपादितं चेत्थं मञ्जूषायां नागेशभट्टेन "अत्रेदं बोध्यं प्रतियोग्यारोपः अभावज्ञाने तद्व्यवहारे च हेतुः। प्रतियोग्यनालिंगिताभावबुद्धेरनुदयात्। सर्षपे सुमेरुभेदतदत्यन्ताभावयोरभावाच्च अत्र ब्राह्मणो नास्तीत्यादावपि एतद्देशाधिकरणिका आरोपितब्राह्मणकर्तृका सत्तेत्येव बोधः। आर्थस्तु तदभावबोधः। अत एव तत्र तत्सदृशेतरसत्ताप्रतीतिः। अत एव 'न न एकं प्रियं' इत्यादौ स्वसम्बन्ध्येकप्रियनिषेधे अनेकप्रियप्रतीतिरिति भाष्ये उक्तम्। एवञ्च "यत्र तादात्म्यारोपः तत्रारोपितत्वं नामार्थगतम्। एवं यत्र संसर्गारोपः तत्र क्रियागुणगतं तदिति व्यवस्था"॥

अत एव "तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञर्थाष्षट् प्रकीर्तिताः॥" इत्यभियुक्तवाक्ये सादृश्याद्यार्थिकार्थेषु भेदाभावयोर्ग्रहणमिति दिक्" इति॥

तथा "कर्मवत्कर्मणा तुल्यक्रियः" इति सूत्रे भाष्यं "आत्मा आत्मानं जानातीत्यत्र अन्तःकरणावच्छिन्नः कर्ता शरीरावच्छिन्नः कर्म" इत्युक्तम्। एतच्च अन्तःकरणावच्छिन्नादेः कर्तृत्वाद्युपपादनं अद्वैतसिद्धान्ते एव प्रसिद्धम्। अन्यत्रानुपयुक्तं च॥

उदितवति परस्मिन्प्रत्यये शास्त्रयोनौ
गतवति विलयञ्च प्राकृतेऽपि प्रपंचे।
सपदि पदमुदीतं केवलः प्रत्ययो यत्
तदियदिति मिमीते को हृदा पण्डितोऽपि॥

इति प्राचीनवैयाकरणैः पठ्यमानं पद्यमिदं अद्वैतपरमेवेति विशदमेव॥

श्रीमान् भट्टोजिदीक्षितोऽपि

श्रौत्राहन्तीचणैर्गुण्यैः महर्षिभिरहर्निशम्।
तोष्टूयमानोऽप्यगुणः विभुर्विजयतेतराम्॥

इत्यत्र महर्षिभिरहर्निशं तोष्टूयमानोऽप्यगुणः इति सचमत्कारोक्त्या सकलकल्याणगुणैरप्यस्पृष्टत्वं परमात्मनो व्यञ्जयति। तट्टीकाकृतश्च तत्त्वबोधिन्यां "अपि शब्दः आपाततः विरोधं द्योतयति। वस्तुतस्तु न विरोधः। स्तुतिप्रयोजकीभूतानां अनन्तकल्याणगुणानां श्रुतिस्मृतिसिद्धत्वेऽपि वियदादिवद्व्यावहारिकत्वात् तदभावस्य पारमार्थिकत्वात्" इति विवव्रुः॥

अपि च "जनिकर्तुः प्रकृतिः" इति सूत्रे उदाहृतं "ब्रह्मणः प्रजाः प्रजायन्ते" इति। अत्र श्रीनागेशभट्टः

"प्रकृतिः उपादानकारणं मायाशबलं च जगदुपादानकारणम्" इति व्याचख्यौ। "ब्रह्म मायाशबलम्" इति मनोरमाकारः। "ब्रह्म मायोपहितं चैतन्यं, तच्च जगदुपादानम्" इति तत्त्वबोधिनीकारः। अत्र सर्वत्रापि शुद्धस्य कारणत्वाभावः उपहितस्यैव कारणत्वं इति वेदान्तसमयसिद्धोऽर्थः प्रकाशितः॥

तथा "असत्योपाध्युपलक्षितं सत्यमुपाध्यनादरेणैव सत्यैरभिधीयते" इति हेलाराजः।

एवं शाब्दिकसिद्धान्तघण्टाघोषं अनुरुन्धानः श्रीनागेशोऽपि "एतच्छास्त्रसाध्यप्रयोगव्यङ्ग्यस्य ध्वनिरूपवैखरीरूपरूषितस्यैव तैर्वाचकत्वस्वीकारेण तस्य च अत्यन्तविचारे ब्रह्मातिरेके मानानुपलम्भेन तत्तदुपाधिभिन्नचित एव बोधकतया तैर्ग्रहात्। एवं सर्वबोधकेषु ब्रह्मबुद्धौ जातायां तेनैव दृष्टान्तेन सर्वपदार्थेषु ब्रह्मबुद्धिर्वैयाकरणानाम्" इत्याह। एतेन भिन्नप्रवृत्तिनिमित्तानां पदानां एकार्थवृत्तित्वरूपं सामानाधिकरण्यमभ्युपगम्य "सत्यं ज्ञानं अनन्तं ब्रह्म" इत्यादिवाक्येषु 'सत्यत्वादिबहुगुणविशिष्टमेव ब्रह्म प्रतिपाद्यते' इति केषांचित्सविशेषब्रह्मसिद्धान्तिनां उक्तिः निरस्ता। असत्यतदुपाध्यनादरेणोपलक्षितस्यैव वाच्यत्वस्य सिद्धत्वात्॥

भगवानपि हरिः वाक्यपदीये तत्र तत्र निरर्गलं अद्वैतसिद्धान्तसिद्धानर्थान् निबध्नन् अद्वैतसिद्धान्तानुरोधिनामेव ग्रन्थानां प्रामाण्यं व्यञ्जयति। तथा हि वाक्यपदीयस्यादिमः श्लोकः -

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥" इति।

सर्वदर्शनसंग्रहेऽपि "तस्मादद्वयं सत्यं परं ब्रह्मतत्त्वं सर्वशब्दार्थः" इति स्थितम्। तदुक्तम्—

तस्माच्छक्तिविभागेन सत्यः सर्वः सदात्मकः।
एकोऽर्थः शब्दवाच्यत्वे बहुरूपः प्रकाशते॥ इति।

सत्यस्वरूपमपि हरिणोक्तं सम्बन्धसमुद्देशे

"यत्र द्रष्टा च दृश्यं च दर्शनञ्चापि कल्पितम्।
तस्यैवार्थस्य सत्यत्वमाहुस्त्रय्यन्तवेदिनः॥" इति

अत्र स्पष्टमेव "यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्केन कं विजानीयात्" इति श्रुतिसिद्धं दर्शनादिव्यवहारातीतं ब्रह्माभिहितम्। पुञ्जराजकृतायां वाक्यपदीयटीकायामपि "ग्राह्यग्राहकादिप्रपञ्चस्य विकल्पपरिघटितस्यासत्यत्वात् सर्वप्रपञ्चसमतिक्रान्तं वाङ्मनसातीतं तत्त्वं अविकल्पं परं ब्रह्मानादिनिधनं ब्रह्म सत्यमिति प्राहुः" इत्यादिना अयमर्थः स्फुटीकृतः॥

तथा वाक्यपदीये द्रव्यसमुद्देशेऽपि

"वाच्या सा सर्वशब्दानां शब्दाच्च न पृथक्ततः।
अपृथक्त्वेपि सम्बन्धस्तयोर्जीवात्मनोरिव॥"

इति प्रदर्शितम्। कालसमुद्देशेऽपि

"निर्भासोपगमो योऽयं क्रमवानिव दृश्यते।
अक्रमस्यापि विश्वस्य तत्कालस्य विचेष्टितम्॥"

इत्युक्तम्। अत्र भूरिराजतनयहेलाराजव्याख्या—

"सम्बन्धसमुद्देशे प्रदर्शितदिशा अक्रमं ब्रह्मविवर्तरूपं विश्वम्। तस्य यदिदं क्रमेणावभासनं तत्कालशक्तिकृतप्रतिबन्धाभ्यनुज्ञासामर्थ्यम्। कालाख्या हि ब्रह्मशक्तिः अविद्यैव क्रमावभासकारितया जीवात्मसु सफलेति ब्रह्मकाण्ड एव निर्णीतम्। एतावत्प्रथमः कालव्यापारोऽत्र क्रमावभासः" इति॥

अन्यत्र च वाक्यपदीये

"सम्बन्धिभेदात्सत्तैव भिद्यमाना गवादिषु।
जातिरित्युच्यते तस्यां सर्वे शब्दाः व्यवस्थिताः॥
तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते।
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः॥"
इति।

अत्र ब्रह्मरूपैकैव सत्ता गवाश्वादिविविधोपाधिसम्बन्धवशात् गोत्वाश्वत्वादिभेदव्यपदेशभागिनीवानुभूयते इत्युक्तम् ॥

तथा सर्वदर्शनसङ्ग्रहेपि पाणिनीयदर्शनप्रकरणे "भाष्यकारेणापि 'सिद्धे शब्दार्थसम्बन्धे' 'इत्येतद्वार्तिकव्याख्यानावसरे 'द्रव्यं हि नित्यम्' इत्यनेन ग्रन्थेन असत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं द्रव्यशब्दवाच्यं सर्वशब्दार्थः इति निरूपितम्" इत्युक्तम्। कैयटोऽपि "असत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वमत्र द्रव्यशब्दवाच्यम्" इत्याह। कैयटे एव "असत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वमेव वाच्यं च वाचकञ्च" इति। भूषणसारेऽपि 'ब्रह्मतत्त्वमेव शब्दस्वरूपतयाभाति' इति।

अन्यत्र च वाक्यपदीये

"सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ।
सत्यं यत्तत्र सा जातिः असत्या व्यक्तयो मताः ॥"

इति प्रतिभावं व्यावर्तमानासत्यांशातिरेकेणानुवर्तमानं सत्प्रतीत्यवलंबनं सत्ताख्यं ब्रह्म प्रतिपादितम् ॥

(ओ) न्यायशास्त्रे अद्वैतभावाः

(आचार्यकिंकरः)

நியாயதர்சனம் என்பது கௌதம மஹர்ஷி அருளிச் செய்த நியாய ஸூத்திரம், வாத்ஸ்யாயன பாஷ்யம், அதற்கு வியாக்யானமான வார்த்திகம், அதன் உரையான ஸ்ரீ வாசஸ்பதிமிச்ரர் அருளிய தாத்பர்ய டீகை, அதன் உரையான தாத்பர்ய பரிசுத்தி என்னும் ஐந்து கிரந்தங்களாகும், நவீன தர்க்கம் என்று சொல்லப்படும் நூல்கள் இவைகளின் பரிஷ்காரங்களேயல்லாது வேறல்ல. வைசேஷிகம் என்னும் தர்சனம் கணாத ஸூத்ரம், பிரசஸ்ததேவர் பாஷ்யம் கிரணாவளி முதலிய கிரந்தங்களாகும். நியாயத்துக்கும் வைசேஷிகத்துக்கும் அதிக பேதமில்லை. நியாயசாஸ்திரம் செய்தவர்கள் தமக்கு உண்மையாக அத்வைதத்தில் தாத்பர்யமிருந்தபோதிலும் அதை வெளிப்படையாகக் காண்பிக்காமல் பிரபஞ்சம் ஸத்யம் என்றும் ஜீவன் வேறு பிரம்மம் வேறு என்றும் உபதேசித்துள்ளனர். ஏனெனில், மந்தாதிகாரிகளுக்கு உபதேசம் செய்யும்போது இவ்வுண்மைகளை யுரைத்தால் அவர்களுக்கு மனதில் பதியாது. ஞானம் கர்மம் இரண்டு உபாயங்களையும் விட்டு அதோ கதியை யடைவார்கள். அதற்காக த்வைதத்தை நேரிலுரைத்து பின்பு வேதாந்தத்தை ஸேவியுங்கள் என்று சொல்லியிருக்கிறார்கள். அவர்களுக்கு அத்வைதத்திலேயே தாத்பர்யமிருக்கிறதென்பது அவர்கள் மதக்கொள்கைகளிலிருந்தே வெளியாகிறது.

உதாஹரணமாக-ஆகாயம் என்னும் பூதம் ஒன்று. ஒவ்வொரு ஜீவனுக்கும் உள்ள சிரவணேந்திரியம் (காது) என்பது ஆகாசமே ஆயினும், அந்தந்த புருஷர்களின் காதுகளால் குறுக்கப்பட்டு அந்தந்த புருஷர்களின் சிரவணேந்திரியம் என்று சொல்லப்படுகிறது என்று நியாய மதக்கொள்கை. இதையே ஆத்ம விஷயத்தில் உபயோகப்படுத்தினால் ஸகல தேஹங்களிலும் ஒரே ஆத்மா, அவனே அந்தந்த தேஹத்தால் குறுக்கப்பட்டு வெவ்வேறு பெயர்களையும் ஸுகாதிகளையுமனுபவிக்கிறான் என்று ஏற்படும். இதே வேதாந்தத்தின் கொள்கை.

உதயனாசார்யர் என்னும் தார்க்கிக நிபுணர் தம்முடைய ஆத்ம தத்வ விவேகத்தில் "புத்திக்கு வெளி விஷயங்களை விட்டு இருப்பது என்பது துர்லபம். பிரபஞ்சாதிஷ்டான பிரம்ம ஸாக்ஷாத்காரம் ஏற்படும்பொழுது

அவ்விதமேற்படலாமெனில் பலமுள்ள வேத மார்க்கத்திற்கே ஜயம். ஸாக்ஷாத்காரமேற் படாமலிருக்கும்பொழுது பிரபஞ்சம் ஸத்யமே. பௌத்த மதத்திற்கு ஏது அவகாசம்?'' என்ற வாறு பௌத்த சாஸ்திரத்தைவிட தர்க்க சாஸ்திரத்தில் மேன்மை, தர்க்க சாஸ்திரத் தை விட அத்வைதத்தில் மேன்மை என் றுரைத்தார்.

The sage Gautama founded the Nyāya School of Philosophy. Vātsyāyana, Baradvaja, Vāchaspati and Udayana have written valuable works upon this system. Maharishi Kanāda Prasasta deva and Srihara are the principal authors of the Vaiseshika-philosophy. These two systems do not diverge on matters of philosophical importance. Though duality is assumed for the sake of discussion Advaita is the supreme purpose of the Sastra. Udayanacharya says in Atmatatvaviveka "knowledge cannot be divorced from its objects". Is it be said that it can be without objects at the time of the realization of Brahman. Then the Vedic path wins when there is no such-realization the universe is real and there is no hope for the Buddhists. In Kiraṇavali he says "on the view of the Vedantins that when the ign orance is destroyed Atman alone exists in moksha we have nothing to dispute".

तत्रभवान् महर्षिप्रवरो गौतमः स्वप्रणीते न्यायदर्शने आदौ 'तत्त्वज्ञानान्निःश्रेयसाधिगमः' इति प्रतिज्ञाय आत्यन्तिकदुःखनिवृत्तिरूपनिःश्रेयसं प्रति कथं तत्त्वज्ञानस्य हेतुत्वमिति जिज्ञासायां 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानां उत्तरोत्तरापाये तदनन्तरापायादपवर्गः' इति द्वितीयसूत्रे मिथ्याज्ञानमूलकस्य सांसारिकदुःखस्य तत्त्वज्ञानान्मिथ्याज्ञाननिवृत्तौ निवृत्तिरिति दृष्टेनैव द्वारेण तत्त्वज्ञानस्य निश्रेयसोपयोगं अद्वैतदर्शनवदेव समाचक्षाणः अद्वैतदर्शने निरतिशयमादरमाविष्करोति। अत एव [illegible] समन्वयसूत्रे इदमेव सूत्रं उक्तार्थे प्रमाणतया उदाजह्रुः। अपि च कर्णशष्कुल्यवच्छिन्नस्य महाकाशस्यैव श्रोत्रत्वं तस्य च एकत्वेऽपि तत्तत्पुरुषीयकर्णशष्कुलीरूपोपाधिभेदात् भिन्नत्वं शब्दज्ञानस्य असाङ्कर्यं चेति वदद्भिः अद्वैतवादः दत्तहस्तावलम्बः। यतो हि अनेनैव न्यायेन एक एवात्मा, तस्य च तत्तच्छरीराद्युपाधिभेदादेव भेदव्यपदेशः। सुखादेरुपाधिगतत्वात् न तत्सांकर्यं इति तार्किकाभिमतामेव प्रक्रियां अन्यत्र संचार्याद्वैतवादे अवतारयन्तं को वा तार्किको निराकर्तुं प्रभवेत्। एवं एक एव समवायः, तस्य च प्रतियोग्यनुयोगिभेदात् घटसमवायः पटसमवायः इति व्यपदेशः इति वदद्भिस्तार्किकैः सत्ताद्वैतवादस्सम्मत एवेत्यंगीकरणीयम्। तथा हि—एकैव सत्ता, तस्याः श्रुत्यनुसारेण घटपटादिषु उपादानतया तादात्म्येन संबद्धायाः घटावच्छिन्नत्वेन घटत्वजातिरिति व्यपदेशः पटावच्छिन्नत्वेन पटत्वजातिरिति व्यपदेशः इत्येवं व्यवस्थासंभवात् घटत्वपटत्वादिनानाजात्यंगीकारो निरर्थकः इति। अत एवोक्तं हरिणा—

" संबन्धिभेदात् सत्तैव
भिद्यमाना गवादिषु।
जातिरित्युच्यते तस्यां
सर्वे शब्दा व्यवस्थिताः॥" इति॥

श्रीमहामहोपाध्यायनागोजिभट्टैः वैय्याकरणसिद्धान्ते लघुमञ्जूषायां लिङर्थविचारावसरे "गौतमोऽपि 'स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः'" 'मायागन्धर्वनगरमृगतृष्णिकावद्वा', 'हेत्वाभासादसिद्धिः' इत्याह। प्रत्यवतिष्ठते विज्ञानवादीत्येवं वाचस्पतिमिश्रैः अवतारितेन आद्यसूत्रद्वयेन 'यथा स्वप्ने विषयाः न सन्ति अथ चाभिमानो भवति एवं प्रमाणप्रमेयानि न सन्ति। अथ च तदभिमानः। एवञ्च विज्ञानधारारूपचित्ताव्यतिरेकिणो विषयाः। जाग्रत्प्रत्यया अपि निर्विषया दृष्टाः मायागन्धर्वनगरादिप्रत्ययाः'

इति पूर्वपक्षं कृत्वा 'यद्यपि स्वप्नादिविषयाणां असत्वं; प्रतिबोधादावनुपलम्भात्, तथापि जाग्रदवस्थायां समीप एवोपलभ्यमानानां यावद्व्यवहारमबाध्यमानजातीयानां चित्तव्यतिरेकेणोपलभ्यमानानां तत्त्वे न हेतुः' इति भाष्यवार्तिकादौ तृतीयं सिद्धान्तत्वेन व्याख्यातम्। एवञ्चानिर्वचनीयतावादस्य सूत्रसम्मतत्वमर्थादुक्तप्रायम्। तस्य श्रुतिमूलकत्वेन "हेत्वाभासादसिद्धि" रित्यनेन खण्डनासम्भवाच्च। तद्वदेव चानिर्वचनीयस्य व्यावहारिकसत्यत्वाङ्गीकाराददोषः" इति ग्रन्थेन तर्कशास्त्रस्याद्वैतपरत्वं प्रत्यपादि ॥

एवमध्यात्मशास्त्राङ्गत्वमेव सर्वेषां शास्त्राणाम्। अध्यात्मशास्त्रन्त्वद्वैतशास्त्रमेव। तथाचात्मतत्त्वे विषये अध्यात्मशास्त्रमेव बलीयः। बौद्धादितर्कैः ग्रस्तस्य तन्मते विश्वासस्य निराकरणाय केवलं न्यायशास्त्रस्य तत्खण्डनमात्रे तात्पर्यमित्यपि न्यायसूत्रकारैः सूचितं "तत्त्वाध्यवसाये" त्यादिसूत्रेण। तथा हि तत्रैव मञ्जूषायां "यमनियमाभ्यां आत्मसंस्कारो योगाच्चात्मविद्युपायैः" इति न्यायसूत्रोक्तयोगपदस्य वेदान्तोपलक्षणतामुपवर्ण्य तदनन्तरेण, नन्वेवं तेनैव सिद्धे इदं शास्त्रं व्यर्थमत उक्तम् "तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कंटकशाखावरणवत्" इति। "अनुत्पन्नतत्त्वज्ञानानां अप्रहीणदोषाणां तदर्थं घटमानानां उपायायैतत्" इति तद्भाष्यम्। तस्यामवस्थायां सौगतादिकृततर्कैः ग्रस्तस्य तन्मतविश्वासस्य नाशाय जल्पवितण्डाभ्यां तन्मतखण्डनतात्पर्यकमिदं शास्त्रम्। स्थूलसूक्ष्मशरीरातिरिक्तात्मसाधनद्वारा अध्यात्मशास्त्रमिदं इति तदाशयः। गुर्वादिभिर्वादेन तत्त्वनिर्णयार्थंश्चैतत्। अनेन अद्वैतशास्त्रातिरिक्तसर्वशास्त्राणामेवंविधत्वं सूचितं" इति ॥ एवं अद्वैतसिद्धान्तस्यैव निर्दोषश्रुतिसंमततां न्यायाचार्याः प्रोचुर्न्यायकुसुमाञ्जलौ "शुद्धबुद्धस्वभाव इत्यौपनिषदाः" इति। नात्र शैववैष्णववादयः औपनिषदा इत्युच्यन्ते। अनन्तरं शैववैष्णवादेः पृथक् परिगणनात्। किञ्च परिगणक्रमोऽपि उक्तौपनिषदमतस्य परमाभ्यर्हिततां दर्शयति। उत्कृष्टोपक्रममपकृष्टान्तं हि प्रकृते परिगणनं दृश्यते। अत एव चार्वाकस्यान्ते निवेशः। किञ्च बौद्धाधिकारापरनामके आत्मतत्त्वविवेके उदयनाचार्यैः अद्वैतमतं सर्वमतश्रेष्ठतया अवधारितम्। तथा हि "न ग्राह्यभेदमवधूय धियोऽस्ति वृत्तिः तद्बाधके बलिनि वेदनये जयश्रीः। नो चेदनित्यमिदमीदृशमेव विश्वं तथ्यं तथागतमतस्य तु कोऽवकाशः॥" इति। अयमर्थः:- ग्राह्यभेदं-घटादिबाह्यार्थं तिरस्कृत्य ज्ञानस्य वृत्तिः संबन्धः क्वापि नास्ति। घटादिबहिरर्थबाधके अद्वैतब्रह्मरूपाधिष्ठानसाक्षात्कारे जाते तु सर्वेभ्यो द्वैतवादिमतेभ्यो बलवति वेदनये वेदान्तदर्शने जयश्रीः जयोत्कर्षकाष्ठा, बौद्धमतापेक्षया तार्किकमते जयः, तदपेक्षयापि सांख्यादिमते आत्मनोऽसंगत्वादिस्वीकारात्, तदपेक्षया वेदांतिमते द्वैतमिथ्यात्वादिस्वीकारात्, अतो जयोत्कर्षकाष्ठा। नो चेदिति—यदि चित्तं न शुद्धं इत्यर्थः। इदं विश्वं ईदृशमेव सत्यं व्यावहारिकसत्यं। तथागतमतस्य तु बौद्धमतस्य कोऽवकाश इति। किंचोदयनाचार्याणां अद्वैतदर्शने एव महती श्रद्धा; बौद्धाधिकार एव सर्वदर्शनानि निराकृत्य वेदान्तदर्शनस्यैव पुरस्करणात्। तथा हि तत्रोक्तं तैः "अस्तु तर्हि शून्यतैव परं निर्वाणमिति चेन्न सा हि यद्यसिद्धा कथं तदवशेषं विश्वं, परतश्चेत् सिद्धा परोऽप्युपगन्तव्यः, स च परो यदि संवृतिरेव विश्वशून्यतयोर्न कश्चिद्विशेषः कथं तदप्यवशिष्येत, असंवृतिश्चेत् परः परत एव सिद्धा अनवस्था। स्वयमसिद्धा चेत् कथं शून्यत्वमपि साधयेत्। स्वतस्सिद्धा चेत् आयातोऽसि मार्गेण। तथा हि—स्वतःसिद्धतया तदनुभवरूपं, शून्यत्वादेव न तस्य कालावच्छेद इति नित्यम्। अत [illegible] न तस्य देशावच्छेद इति व्यापकम्, अत एव [illegible]

विचारासृष्टम्, अत एव तस्य विशेषाभाव इत्यद्वैतं, प्रपञ्चस्यापारमार्थिकत्वादेव निष्प्रतियोगिकमिति विधिरूपं, अविचारितप्रपंचाक्षेपात्तु शून्यमिति व्यवहारः। तथापि प्रपञ्चशून्यस्यानुभवमात्रस्य प्रपंचेन कः संबन्धः, येनायं प्रकाशत इति चेत्? वस्तुतो न कश्चित्, संवृत्त्या तु गगनगन्धर्वनगरयोराधाराधेयभाव इव विषयविषयिभावः। स च यथा नैय्यायिकैस्समर्थयिष्यते तथैव वेद्यनिष्ठत्वसावस्मिन् दर्शन इति विशेषः। अविद्यैव हि तथा तथा विवर्तते यथा यथा अनुभवीयतया व्यवह्रियते तत्तन्मायोपनीतोपाधिभेदाच्चानुभूतिरपि भिन्नेव व्यवहारपथमवतरति गगनमिव स्वप्नदृष्टघटकटाहकोटरकुटीकोटिभिः। तदास्तां तावत् किमार्द्रकवणिजो वहित्रचिन्तयेति। तस्मादनुभवव्यवस्थितौ अनात्माऽपि स्फुरतीत्यवर्जनीयमिति प्रविश वा अनिर्वचनीयख्यातिकुक्षिं तिष्ठ वा मतिकर्दममपहाय न्यायानुसारेण नीलादीनां पारमार्थिकत्वे" इति। अत्राद्वैतप्रक्रिया सुस्पष्टमभिहिता। अन्ते च "ततः संस्काराभिभवात् केवलोऽपि न विकल्प्यते। यमाश्रित्य चरमवेदान्तोपसंहारः। तत्प्रतिपादनार्थं "यतो वाचो निवर्तन्ते अप्राप्य मनसा सहे" त्यादि। सा चावस्था न हेया मोक्षनगरगोपुरायमाणत्वात्। निर्वाणं तु तस्य स्वयमेव। यामाश्रित्य न्यायमतोपसंहारः। 'अथ यो निष्काम आप्तकाम आत्मकामः स ब्रह्मैव सन् ब्रह्माप्येति, न तस्य प्राणा उत्क्रामन्ति अत्रैव समवलीयन्ते' इत्यादीनि" इत्यत्रापि अद्वैतमेवोपसंहृतं, अत्र यामाश्रित्य न्यायमतोपसंहार इति चरमामद्वैतावस्थामाश्रित्यैव च न्यायमतस्यापि मोक्षसाधनोपदेष्टृत्वं इति स्पष्टीचकार। वैशेषिकतन्त्रप्रवर्तकः महर्षिः कणादोऽपि निरवयवयोः द्वयोः परमाण्वोः संयोगेन द्व्यणुकोत्पत्तिं ब्रुव[illegible]गतः अतात्त्विकत्वमभिप्रैति। तथा हि अव्याप्य[illegible]गः इति वैशेषिकाणां मतम्। न च निरव[illegible]याप्यवृत्तिसं[illegible]ः संभवी। यदि तु परमाणुद्वयसंयोगस्य व्याप्यवृत्तित्वं तदा द्व्यणुकस्य प्रथिमानुपपत्तिः। परमाणुषु कल्पिताः प्रदेशाः स्युरिति चेत् तर्हि द्व्यणुकादेरपि कल्पितत्वापत्तिः। सोऽयमद्वैतमतप्रवेशः। तदुक्तं—

> कणादः पारिमाण्डल्यसंयोगात् द्व्यणुकक्रमात्।
> जगदुत्प्रेक्षयन् मायावादसादरमानसः॥ इति॥

एवं वैशेषिकभाष्यटीकायां न्यायकन्दल्यां "ध्यानैकतानमनसो विगतप्रचाराः पश्यन्ति यं कमपि निर्मलमद्वितीयम्। ज्ञानात्मने विघटिताखिलबन्धनाय तस्मै नमो भगवते पुरुषोत्तमाय॥" इति मङ्गलश्लोके परमात्मनः अद्वितीयत्वं केवलज्ञानरूपत्वं च वदन् अद्वैतपक्षमेवावालंबत॥

किरणावल्यां उदयनाचार्या अपि वेदान्तिनामपि अविद्यायां निवृत्तायां केवलमात्मैव अपवर्गे वर्तत इति मते न नो विवादः इति ब्रुवन्तः न केवलं स्वस्य, अपि तु वैशेषिकतंत्रस्यापि अद्वैते न विवाद इति स्फुटीचक्रुः॥

नवीनतर्कशास्त्रप्रवर्तकः गंगेशोपाध्यायोऽपि "गुणातीतोऽपीशस्त्रिगुणसचिवस्त्र्यक्षरमयः त्रिमूर्तिर्यस्सर्गस्थितिविलयकर्माणि तनुते" इति मंगलश्लोके परमात्मनः निर्गुणत्वेपि सृष्टिकर्तृत्वकृपाश्रयत्वादिकं वदन् स्वतः निर्गुणत्वं औपाधिकं च सगुणत्वं अभिप्रैति। नव्यतार्किकाणां मूर्धन्यः श्रीरघुनाथशिरोमणिरपि "ओं नमः सर्वभूतानि विष्टभ्य परितिष्ठते। अखण्डानन्दबोधाय पूर्णाय परमात्मने॥" इति पद्ये परमात्मनः अद्वैताभिमतं अखण्डानन्दबोधरूपत्वं स्वस्याप्यभिमतमित्याविष्करोति। न हि बहुव्रीह्याश्रयणमत्र युक्तं क्लिष्टकल्पनापत्तेः। परमात्मनि आनन्दानङ्गीकाराच्च।

अत्र गादाधरी ओमिति समस्तैरकारोकारमकारैः सन्धिवशेन प्रणवभावमावहद्भिः अव्ययतया लुप्त-

चतुर्थीकैः प्रत्येकशक्त्युपस्थापितस्य वासुदेवादित्रयस्याभेदेन परमात्मनो विशेषणत्वमत्राभिहितम्। अत्र जगतः पालनकर्तृत्वं नाकारादिपदार्थतावच्छेदकम्। उद्देश्यतावच्छेदकस्य परमपदार्थोत्कर्षस्यापि तद्रूपतयाऽन्वयानुपपत्तेः। अपि तु विग्रहविशेषवत्वमेव। परमार्थतः पदार्थस्य एकत्वेपि पदार्थतावच्छेदकानां नारायणादेशरीराणां भेदो द्वन्द्वस्य साधुतामुपपादयति। अखण्डेति-अत्र नित्यसुखात्मकायेति यद्यपि वेदान्तिनामेव शोभनं तथापि ग्रन्थकृता नित्यसुखाभिव्यक्तिरित्यंगीकृतत्वान्न दोषः इति ॥

अपि च तर्कसंग्रहदीपिकाकारः अन्नंभट्टोऽपि लक्षणानिरूपणावसरे जहदजहल्लक्षणायाः तत्त्वमसिवाक्यमुदाजहार। तत्त्वमसि-वाक्ये उक्तलक्षणया अखण्डार्थत्वांगीकारः अद्वैतिनां मत एव प्रसिद्धः न तार्किकमते। तदेवं तर्कशास्त्रसंग्रहे प्रवृत्तस्यान्नंभट्टस्य तत्त्वमसिवाक्ये अखण्डार्थत्वांगीकरणं तार्किकाणामिदं संमतमेवेति सूचयति ॥

(औ) पूर्वमीमांसादर्शने अद्वैतभावाः

(शङ्करकिङ्करः)

பூர்வமீமாம்ஸை என்னும் சாஸ்திரமானது வேதத்தின் தாத்பர்யத்தை சரிவர அறிவிக்கும் நூல் ஆயினும், கர்மங்களில் கர்த்தாவாயும் பிறகு வேறு தேகத்தில் பலன்களை அனுபவிப்பவனாயுமுள்ள ஆத்மா யார் என்பதை அவசியம் நிரூபிக்கவேணும். இல்லையேல் தேகமே ஆத்மா என்று சங்கித்து யாரும் கர்மமுறையில் ஈடுபடமாட்டார்கள். ஆதலின் மீமாம்ஸாபாஷ்யம் அருளிய ஸ்ரீ சபரஸ்வாமி முதலிய மஹான்கள் ஜீவ ஸ்வரூபத்தை நிரூபிக்க முயன்றிருக்கின்றனர். ஜீவனுடைய ஸ்வரூபம் இருவகைப்படும். ஒன்று நான் கர்த்தா. நான் இக்கர்மத்தின் பலத்தை அனுபவிப்பவன் என்று உலகில் பிரசித்தமாயும் சாஸ்திரயுக்திகளால் தேகாதிகளைக் காட்டிலும் வேறாக நிரூபிக்கப்பட்டதாயுமுள்ள ஸ்வரூபம். மற்றொன்று சாஸ்திர மாத்திரத்தில் தோன்றும் குணாதீதமான சுத்த ஞானானந்த ஸ்வரூபம். இவைகளில் இரண்டாவது ஸ்வரூபம் கர்மத்திற்கு உபயோகமில்லை. மற்றும் கர்மத்தில் ஈடுபடுவதற்கு விரோதமானது. முதல் கூறிய ஸ்வரூபமோ கர்மத்திற்கு அவசியமானது. ஆதலின் கர்மத்தை விவரிக்கவந்த மீமாம்ஸகர்கள் அதற்குரிய ஸ்வரூபத்தை நிரூபித்து 'இந்த ஜீவன் விஷயமான உண்மையை வேதாந்தங்களில் அறிக' என்று கூறியுள்ளார்கள்.

பிரபாகரர் என்னும் மஹாமீமாம்ஸகர் "'நான்' என்று பிரகாசிக்கும் அஹங்காரம், 'என்னுடையது' என்று பிரகாசிக்கும் மமகாரம் இரண்டும் ஆத்மாவிடத்தில் அனாத்மதர்மங்களின் தோற்றம் என்பது உண்மையே. ஆயினும் இந்த உண்மை ஆசையற்றவர்களுக்கே சொல்லத்தகுந்தது, கர்மிகளிடமன்று" என்றுரைத்து அத்வைதமே தத்வம் என்பதை அபிமானத்துடன் புகழ்கிறார்.

The purpose of the Mimāmsā Darśana is to set forth rules of interpretation for reconciling the apparently conflicting texts of the Vedas and clearing doubts in the procedure of the sacrifices enjoined in them. The a[illegible]rs cannot stop with this because nobody w[illegible] his attention to these sacrifices if he [illegible] does not live to enjoy the fruits in t[illegible] world. Hence they hav

existence of an Atman different from the body, mind and the senses. The nature of the jiva is two-fold : one, the 'I' of well known daily experience in the world, namely, I am responsible for this act and I enjoy the results thereof; and the other is the pure Soul no other than knowledge and bliss, above all characteristics, as expounded in the Vedānta. Sri Kumarila deals elaborately with this subject in his Vārtika and finally concludes by saying that for understanding the true nature of Atman one must go to the Vedānta.

It is to be noted that Kumarila has explained the nature of the Ātman which is the agent in the sacrifices and the enjoyer of pleasures and pains and has deliberately put off the Advaitic Ātman since the knowledge of that Ātman is not only unnecessary but also detrimental to the performace of Dharma (Vide Br. Sūtra उपमर्दं च 3-4).

That Kumarila's view is such can be determined from the words of Prabhākara the author of other school of mimāmsā.

"It is true that the notions 'I' and 'mine' are super-impositions. But it should be pointed out only to the ascertics and not here. The revered Dvaipāyana says "one should not poison the minds of the ignorant who are inclined to perform Karma".

पूर्वमीमांसादर्शनस्यापि अद्वैत एव परमं तात्पर्यमित्येतत् तद्दर्शनकाराणां जैमिनिप्रभृतीनां अद्वैतपुरस्कारादिभिरवगम्यते । तथा हि—ब्रह्ममीमांसायां चतुर्थतृतीये "कार्यं बादरिरस्य गत्युपपत्तेः" इत्यधिकरणे विचारितं—स एनान्ब्रह्म गमयतीत्यत्र उपासकप्राप्यत्वेन निर्दिष्टं ब्रह्म परं उत अपरं इति विशये जैमिनिपक्षः परमेव ब्रह्मेति । तथाच सूत्रं "परं जैमिनिर्मुख्य[illegible] अत्र प्रश्नोपनिषदि परं चापरं च [illegible]णोर्मध्ये यत्परं निर्गुणं [illegible] प्रत्यभिज्ञायते । तदनेन जैमिनेर्भगवतः परब्रह्मप्राप्तिरूपमोक्षः ब्रह्मणि परापरविभागः अपरब्रह्मरूपेश्वरास्तित्वं च संमतमित्यवगम्यते ॥

तथा मीमांसावार्तिककाराः श्रीकुमारिलपादा अपि देहान्तरानुभाव्यफलार्थकर्मणः प्रापकस्य विधेः प्रामाण्यसिद्ध्यर्थं देहातिरिक्तस्य जीवात्मनः सद्भावं निरूप्य, तज्ज्ञानस्य च कर्मप्रवृत्तिहेतुत्वमुक्त्वा, आत्मानं च "ज्ञानशक्तिस्वभावोऽतो नित्यः सर्वगतः पुमान्" इति विभुं निरूप्य "इत्याह नास्तिक्यनिराकरिष्णुः आत्मास्तितां भाष्यकृदत्र युक्त्या । दृढत्वमेतद्विषयः प्रबोधः प्रयाति वेदान्तनिषेवणेन ।" इत्यादिना जीवविभुत्वप्रतिपादकमद्वैतमेव वेदान्तशब्देनाभिदधत् तस्यैवौपनिषदस्य दर्शनस्य निषेवणेन केवलयुक्त्यनुच्छेद्यानां आत्मविषयकसर्वसंशयानामपि निवर्तकत्वमुद्घोषयन् परमाद्वैते परमं समादरमाविष्करोति ॥

एवं तन्त्रवार्तिके व्याकरणाधिकरणेऽपि "सर्वत्रैव हि विज्ञानं संस्कारत्वेन गम्यते । पराङ्गं चात्मविज्ञानादन्यत्रेत्यवधारणा ॥" आत्मज्ञानं हि संयोगपृथक्त्वात् क्रत्वर्थपुरुषार्थत्वेन गम्यते । तेन विना परलोकफलेषु कर्मसु प्रवृत्तिनिवृत्त्यसंभवात् । तथा "य आत्मा अपहतपाप्मा विजरो विमृत्युर्विशोकः विजिघत्सोऽपिपासः सत्यकामस्सत्यसङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः", तथा "मन्तव्यो बोद्धव्यः", तथा "आत्मानमुपासीत" इति कामवादलोकवादवचनविशेषैः जिज्ञासामननसहितात्मज्ञानकेवलावगतिपर्यन्तस्पष्टात्मतत्त्वज्ञानविधानापेक्षितवाक्यान्तरोपात्तद्विविधाम्युदयनिःश्रेयसरूपफलसंबन्धः "सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्", "तरति शोकमात्मवित्", तथा "स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरस्समुत्तिष्ठन्ति तेन पितृलोकेन संपन्नो महीयते ।" इत्यादिना भोगजन्माणिमाद्यष्टगुणैश्वर्यफलानि वर्णितानि । तथा "स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभि-

संपद्यते न स पुनरावर्तते ” इत्यपुनरावृत्त्यात्मकपरमात्मप्राप्त्यवस्थावचनम् । अप्रकरणगतत्वेन अनैकान्तिकक्रतुसंबन्धासंभवाच्च न अञ्जनखादिरस्रुवादिफलश्रुतिवदर्थवादत्वम् ॥

न च ज्ञानविधानेन कर्मसंबन्धवारणम् । प्रत्याश्रमवर्णनियतानि नित्यनैमित्तिककर्माण्यपि पूर्वकृतदुरितक्षयार्थं अकरणनिमित्तागतप्रत्यवायपरिहारार्थं च कर्तव्यानि । न च तेषां भिन्नप्रयोजनत्वाद्भिन्नमार्गत्वाच्च बाधविकल्पपरस्पराङ्गाङ्गिभावासंभवन्ति ” इति आत्मज्ञानस्य स्वातन्त्र्येण पुरुषार्थत्वप्रतिपादनं मीमांसकमूर्धन्यस्य भट्टपादस्य अद्वैतसिद्धान्ते अन्यादृशमादरमाविष्करोति ॥

यत्तु “ न च ज्ञानविधानेन कर्मसंबन्धवारणं ” इत्यारभ्य, “ न च तेषां भिन्नप्रयोजनत्वाद्भिन्नमार्गत्वाच्च बाधविकल्पपरस्पराङ्गाङ्गिभावासंभवन्ति ” इत्यनेन सन्दर्भेण ज्ञानकर्मसमुच्चयाभिप्रायाविष्करणं, तदपि अद्वैत्येकदेशिभूतभर्तृप्रपंचाद्यभिमतमेवेति नात्यन्तमस्थाने ॥

भट्टसोमेश्वरेणापि वार्तिकव्याख्यायां न्यायसुधायां संबन्धग्रन्थे “ कर्मप्रवृत्तिहेतुत्वमात्मज्ञानस्य लक्ष्यते ” इत्यनेन अर्थवादाधिकरणे “ क्रत्वर्थकर्तृप्रतिपादनेन उपनिषदां नैराकाङ्क्ष्यं ” इत्यनेन च व्याकरणाधिकरणस्थनिर्दिष्टवार्तिकसंदर्भस्य विरोध इत्याशंक्य शरीरादिव्यतिरिक्तसंसारिकर्तृभोक्तृनित्यात्मप्रतिपादनपूर्वकस्य “ आत्मा वाऽरे द्रष्टव्यः ” इत्यात्मज्ञानविधेः क्रत्वर्थत्वमुक्तम् । अत एव “ आत्मा ज्ञातव्य इत्येतन्मोक्षार्थं न हि चोदितम् । ” इत्येतच्छब्दप्रयोगेण संसारिरूपात्मज्ञानस्यैव मोक्षार्थत्वनिरासेन कर्मप्रवृत्तिहेतुता उक्ता । असंसारिरूपात्मज्ञानस्य तु कर्मप्रवृत्त्यर्थत्वायोगात् पुरुषार्थतैव युक्तेत्याशयः इति विवेचितम् ॥

एवं निःश्रेयसरूपफलप्रतिपादकं वचनविशेषमुदाहरति तथेति इत्यवतार्य स्थानविशेषात्मकब्रह्मलोकप्राप्तेर्जन्यत्वेन अक्षयत्वानुपपत्तिमाशङ्क्य, परमात्मैव ब्रह्मशब्दवाच्यः परमानन्दोपभोगे हेतुत्वात् कर्मधारयसमासाश्रयणेन लोको विवक्षितः । तत्प्राप्तेश्च शरीरसंबन्धोपाधिकर्तृभोक्तृत्वात्मकसंसारिरूपावस्थापरित्यागेन अकर्त्रभोक्तृत्वात्मकासंसारिरूपनिजावस्थात्मकत्वेन अजन्यत्वात् युक्तं अक्षयत्वमिति व्याख्यातम् ॥

एवं आत्मज्ञानपरिपाकात्प्रागेव पुरुषं विधिर्नियोजयति । परिपाके तु सति, तस्य नास्त्येव कर्मसंबन्ध इति स्पष्टयन्ननुष्ठाने अद्वैतसिद्धान्तेनेषदपि विरोधो नास्ति स्वस्य वार्तिककारस्य च इति स एव सूचयति ।

तथा प्रभाकरगुरुरपि बृहत्यां “ यस्तु ब्रह्मविदामेष निश्चयः यदुपलभ्यते न तत्तथ्यमिति, यन्नोपलभ्यते तत्तथ्यमिति नमस्तेभ्यः विदुषां नोत्तरं वाच्यम् । ”, “ यदुक्तं अहङ्कारममकारौ अनात्मनि आत्माभिमानौ ” इति, मृदितकषायाणामेवैतत्कथनीयम् , न कर्मसङ्गिनामित्युपरम्यते । आह च भगवान् द्वैपायनः “ न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ” इति रहस्याधिकारे । तस्मान्न विवृतमत्र भाष्यकारेण भगवता वचनानुरोधान्नाज्ञाना ” दिति । अतो ज्ञायते परमात्मा एक एव तथ्यः, प्रपंचस्तु अतथ्यः इत्यस्मिन्नेव विषये ब्रह्मवादिसंमते वेदानां परमतात्पर्यमिति गुरोरभिप्राय इति । अस्य च विषयस्य मीमांसाशास्त्रे ऐदम्पर्येणानुपवर्णनं मन्दाधिकारिणां कर्मठानामनुरोधेन इति कीर्तनेन कर्ममीमांसायाः दर्शनान्तराणां च तत्तदधिकार्यानुगुण्येनैव द्वैतात्मप्रतिपादनं अद्वैततत्त्व एव च परमं तात्पर्यमिति, स्पष्टमुक्तं स ब्रह्म भवति ॥

महामहोपाध्यायगागाभट्टोऽपि भाट्टचिन्तामणौ प्रपंचसबंन्धविलयपूर्वकनित्यानन्दरूपात्माभिव्यक्तेः मुक्तित्वाङ्गीकाराद्वा इति नित्यानन्दात्मक[illegible]भिव्यक्तेर्मुक्तित्वं अभिप्रैति ॥

भाट्टदीपिकाकारः श्री[illegible] तस्य “ चोदनायां फलाश्रुतेः ”

ज्ञानकर्मसमुच्चयोपि प्रामाणिकः" इति वदन् ज्ञानकर्मसमुच्चयस्य अप्रामाणिकतामभिप्रैति । तत्र टीकायां शम्भुभट्टः "प्रामाणिकपदेन व्यञ्जनया सूचितस्य दूषणसहत्वस्योपपादनं शारीरकमीमांसाभाष्यकारैः भगवत्पूज्यपादैरेव कृतं तत्रैव द्रष्टव्यम्" इति व्याकुर्वन् श्रीखण्डदेवस्य स्वस्य च श्रीशङ्करभगवत्पादेषु निरतिशयमादरं सूचयति ॥

(अं) सांख्ययोगयोः अद्वैतभावाः

(S. सुब्रह्मण्यशास्त्री)

ஸாங்க்ய சாஸ்திரம் ஸ்ரீ கபிலமஹர்ஷியால் ஸ்தாபிக்கப்பட்டு ஆஸுரி பஞ்சசிகாசார்யர் ஈச்வரகிருஷ்ணர் முதலிய பெரியோர்களால் சிஷ்யர்கள் மூலமாகவும் கிரந்தங்கள் மூலமாகவும் பிரசாரத்துக்குக் கொண்டு வரப்பட்டது. ஸாங்கியத்தின் மஹிமையை ஸ்ரீ பகவான் सांख्ये कृतांते प्रोक्तानि என்ற வாக்யத்தில் கீதையில் புகழ்ந்துள்ளார். கபிலர் மஹிமையை ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येत् (எந்த ஈச்வரன் கபிலரிஷியை உண்டுபண்ணி பூர்ண ஞானத்தை உபதேசிக்கிருரோ அவரைக் காண்க) என்று சுவேதாச்வதர உபநிஷத் புகழ்ந்துள்ளது. ஸ்ரீமத் பாகவதத்தில் தேவஹூதிதேவிக்கு கபிலர் உபதேசம் முழுவதும் அத்வைதக் கருத்துகள் நிரம்பியுள்ளன.

யோகசாஸ்திரமாவது முதலில் ஹிரண்யகர்பன் என்னும் பிரம்மதேவனுல் ஸ்தாபிக்கப்பட்டு பதஞ்சலி வியாசர் வாசஸ்பதிமிச்ரர் முதலிய பெரியோர்களால் புஸ்தகரூபமாக வெளியிடப்பட்டது. ஸாங்க்யத்திலும் யோகத்திலும் அத்வைதக்கருத்துகள் ததும்பியுள்ளன. அவைகளில் சிலமட்டுமே இவ்வுபந்நியாஸத்தில் குறிப்பிடப்பட்டிருக்கின்றன.

The Sā[illegible] Darsana was founded by [illegible]i Kapila. The Sānkhya [illegible]hna is one of the oldest [illegible] The Sankhyas' Ātman [illegible] free from bondage or [illegible]arallel to the Advaitic Ātman. Kapila's teaching in Srimad Bhāgavatam overflows with Advaitic truths.

The Yoga Śūstra owes its origin to Hiranyagarbha the Brahmā. It was the Maharshi Patanjāli who systematised its tenets in his 'Yoga Sūtras. These Sūtras were commented upon by the great Vysa. The Yoga is a means to bring about the Advaita Sākshātkāra through the concentration of mind with which it largely deals. That the purpose of the Yoga school is Advaita is set both in this essay,

सांख्यशास्त्रं हि भगवता कपिलेन प्रवर्तितम् । यस्य हि माहात्म्यं च श्रुतावपि गीयते 'ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्ये' दित्यादौ । कपिलप्रोक्तं सांख्यशास्त्रं आसुरिपंचशिखाचार्यादिशिष्यपरंपरया लोके प्रचारं शिष्टमन्वादिपरिग्रहं च प्राप । तदिदं ईश्वरकृष्णाख्यो मुनिः सप्तत्या श्लोकैः संचिक्षेप । अयमेव च ग्रन्थः अधुना उपलभ्यमानसांख्यग्रन्थेषु प्राचीनतमः । सांख्यसप्ततेः तत्वकौमुदीगौडपादभाष्यादयः व्याख्यानरूपाः । परं तु अधुना अनुपलभ्यमाना अपि पंचशिखादिप्रणीता ग्रन्थाः पूर्वमासन्निति गम्यते; वाचस्पत्यादिभिः तत्तद्ग्रन्थोदाहरणात् ॥

सांख्यशास्त्रमपि पर्यालोच्यमाने तस्मिन् अद्वैतपक्षमेवोरीकरोति। तथा हि ईश्वरकृष्णस्तावत् "तस्मान्न बध्यते नापि मुच्यते नापि संसरति कश्चित्" इति जीवे संसारमोक्षयोः मिथ्यात्वं ब्रुवन् "न निरोधो न चोत्पत्तिः न बद्धो न च साधकः। न मुमुक्षुः न वै मुक्तः इत्येषा परमार्थता॥" इति गौडपादाचार्योक्तामद्वैतसरणिमेवानुरुन्धे। बन्धस्य जीवे अध्यासः अनिर्वचनीयख्यातिः इति वेदान्तिनः, असंसर्गाग्रहः इति सांख्याः इत्येवं कियत्येवांशे भेदसत्त्वेऽपि भूयानंशः समानः। विप्रतिपन्नोप्यंशः "अहं कर्ता" इत्यादिसंसृष्टव्यवहारानुरोधेन अनिर्वचनीयख्यातितया स्थापयितुं शक्यत एव। यत्तु सांख्यतन्त्रस्य निरीश्वरत्वात् कथ सेश्वरेण वेदान्तशास्त्रेण सांगत्यमिति। तन्न। सांख्याभिमते पुरुषे ईश्वरान्तर्भावात्। पुरुषो हि द्विविधः ईश्वरः जीवश्चेति। उत्कृष्टोपाध्युपहितः ईश्वरः, निहीनोपाध्युपहितो जीवः इति उपाधिभेदेनैव भेदः, न तु स्वभावतः इत्याशयेनैव पुरुषशब्देन उभयोः निर्देशः। योगशास्त्रेऽपि वेदान्तसंवादो दृश्यते। तथा हि— "कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात्" इति पातञ्जलसूत्रे दृश्यस्य वस्तुनः ज्ञानिनं प्रति नष्टत्वं इतरान्प्रति अनष्टत्वं चोच्यते। तदिदं वस्तूनां अनिर्वचनीयत्वं गमयति। अनिर्वचनीयमेव हि शुक्तिरजतादिकं कंचित् निवृत्तभ्रमं प्रति नष्टं, अन्यं प्रति अनष्टं च दृश्यते। न तु पारमार्थिकं घटादि। ज्ञानेन दृश्यनाशाभिधानाच्च द्वैतवस्तूनां ज्ञाननिवर्त्यत्वरूपं मिथ्यात्वं स्पष्टमेवोक्तं भवति॥

अपि चाचार्यवाचस्पतिराह "एतेन योगः प्रत्युक्तः" इत्यधिकरणे "न चैतानि योगशास्त्राणि प्रधानादिसद्भावप्रतिपादनपराणि, किंतु योगस्वरूपतत्साधनतदवान्तरफलविभूतितत्परमफलकैवल्यव्युत्पादनपराणि, तच्च यत्किंचिन्निमित्तीकृत्य व्युत्पाद्यमिति प्रधानं सविकारं निमित्तीकृतं न तु तद्विवक्षितम्। अत एव योगं व्युत्पादयिता भगवान् वार्षगण्यः—

"गुणानां परमं रूपं न दृष्टिपथमृच्छति।
यत्तु दृष्टिपथं प्राप्तं तन्मायेव सुतुच्छकम्॥"

इति प्रपंचमिथ्यात्वं अद्वैतिनामभिमतं कण्ठरवेणाह। इति॥

(अः) वाल्मीकिरामायणे अद्वैतभावाः

(देवङ्गुडि - पञ्चापगेशशास्त्रिणः)

"சூர்யனுக்குச் சூர்யன் ஆவான்; அக்னிக்கு அக்னி, பிரபுவிற்குப் பிரபு, திருவுக்கும் உயர்திரு ஆவான்; கீர்த்திக்கும் கீர்த்தி, பொறுமைக்குப் பொறுமை" (அயோத்யா காண்டம்) என்று ஸ்ரீ ராமனை வர்ணிப்பதாலே சூர்யன் முதலியவற்றிற்கும் ஸ்வதேஜஸ் முதலியன இல்லை; எல்லாம் ஒரே உண்மைப்பொருளின் தேஜஸைக் கொண்டே விளங்குகின்றன" என்று விளக்கப்படுகின்றது. இது அத்வைதத்திற்குப் பரமானுகூலமான "காதிற்குக் காது, மனதிற்கு மனம், வாக்குக்கு வாக்கு, பிராணனுக்குப் பிராணன்; கண்ணிற்குக் கண்" என்னும் கேனோபநிஷத் வாக்கியத்தைப் பின்பற்றியது.

உத்தரகாண்டத் [illegible] ரும்மா ஸ்ரீராமனைப் பார்த்து "[illegible] விரும்பிக்கொள்ளுகிறே[illegible] அந்த வைஷ்ணவ உட[illegible] சநாதனமான ஆகா[illegible] முது கிறார். அப்ராக்ருத [illegible]

கல்யாணகுணங்களோடு விளங்கும் ஸகுணப்பிரும்மமும் அதைக் காட்டிலும் வேருயும் மகாப்பிரளய காலத்தில் அந்த மூர்த்தியையும் தன்னுள் லயிக்க, என்றுமுள்ளதான நிர்குணப் பிரும்மமும் குறிப்பிடப்படுகின்றன.

யுத்தகாண்டத்திலுள்ள பிரும்மஸ்துதியில் 'ப்ரஹ்ம ஸத்யம்' என்பதால் 'ஜகத் மித்யை' என்பது சுட்டப்படுகின்றது; இதர சித்தாந்தங்களிலே உலகபபொருட்கள் இருப்பதற்கு பிரும்மம் தேவையில்லையாதலால் 'உன்னையன்றி யாதொன்றுமில்லை'' என்பதிற்கு அத்வைதவுண்மையே பொருத்தமாகின்றது.
சுந்தர காணடத்தில் "வெறுப்பு விருப்புகளினின்று விடுபட்ட மஹாத்மாக்களுக்கு நமஸ்காரம்'' என்றுள்ள சீதாவசனம் ஜீவன்முக்தர்களைக் குறிக்கின்றது.

இவ்வாறு அத்வைத வுண்மைகள் பல ஸ்ரீராமாயணத்திலே விளக்கமுறுகின்றன.

"He is the Sun of the Sun, Fire of the Fire, Lord of the Lord, Foremost Grace of Grace, Fame of Fame, Endurance of Enduance" says Sumitrā on Rāma to Kausalyār (Ayodhya. 44, 15) This passage accords with the Upanishadic text : "He is the Ear of the ear, Mind of the Mind, Breath of the breath, Eye of the eye." and points clearly to the Advaitic Truth of the nonexistence of things apart from Brahman.

"Re-enter your old and beloved Form as Vishnu or the eternal Akāsa" says Brahmā to Śri Rāma (Uttara. 120-9). This passage justifies the Advaitic concepts of Saguṇa Brahman and of Nirguṇa Brahman, the latter alone being ever-existent. And in Brahmā's praise of Śri Rāma (Yuddha. 120, 14) the words 'Brahma Satyam' imply 'Jagat is mithya' and the word 'there is anything without you' Yuddha, 120, 14) fit in with the denial of seperate [illegible] of the universe peculiar to

[illegible] च्चेतसेन तत्र तत्रोपक्षिप्ता
इति [illegible]
[illegible] र्दृश्यन्ते ॥

[illegible] ५)

" सूर्यस्यापि भवेत्सूर्यो ह्यग्नेरग्निः प्रभोः प्रभुः ।
श्रियः श्रीश्च भवेदग्र्या कीर्त्याः कीर्तिः क्षमाक्षमा ॥"

इति कौसल्यां प्रति सुमित्रावाक्ये, " तद्देवा ज्योतिषां ज्योतिः ", " श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स उ प्राणस्य प्राणः । चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति ॥"

इति श्रुतौ यस्य ज्योतिषः सान्निध्यवशादेव श्रोत्रादीनां शब्दाद्यवभासकत्वं यच्च ज्ञात्वा संसारादतिमुच्य केचन धीरा अमृता भवन्ति इत्युक्तं तदेवात्र सूर्यादीनां सूर्यत्वाद्यापादकत्वप्रतिपादनेन प्रत्यभिज्ञायते । एवं च सूर्यादीनामपि स्वतो भानाभावस्य स्वयंप्रकाशचिद्भानानुभानस्य च प्रतीतेरद्वैतसिद्धान्तोऽस्मिन्वाक्ये आविष्कृतो महर्षिणा ॥

तथा अयोध्याकाण्ड एव " आकाशप्रभवो ब्रह्मा शाश्वतो नित्य अव्ययः" (११०,४) इति भगवता वसिष्ठेन रामभद्रायोक्तं श्रूयते । तदपि सकलजगत्स्रष्टुः सगुणस्य ब्रह्मणः अभिव्यक्त्यधिष्ठानतया " आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म " इति श्रुतिप्रतिपादितं अद्वितीयं ब्रह्माभिदधत्स्वस्य औपनिषदमद्वैतसिद्धान्तमेवाधारीकरोति ॥

स्पष्टं चैतदस्मिन्नेव ग्रन्थे उत्तरकाण्डे । तत्र हि स्वर्गारोहणाय अयोध्यातः प्रस्थितं रघुनन्दनं प्रति पितामहः—

" आगच्छ विष्णो भद्रं ते दिष्ट्या प्राप्तोऽसि राघव ।
भ्रातृभिस्सह देवाभैः प्रविशस्व स्विकां तनुम् ॥
यामिच्छसि महाबाहो तां तनुं प्रविश स्विकाम् ।
वैष्णवीं तां महातेजःयद्वाऽऽकाशं सनातनम् ॥"

(१२०, ८-९)

इति वदति । अत्र च वैष्णवीं स्विकां तनुं प्रविशेति, सकलकल्याणगुणगणोपेतं अप्राकृतं शरीरं प्रविशेत्यभिधाय, आकाशं वा सनातनमिति वाकारेणा-

प्राकृतात्तस्मादतिरिक्तं निर्लेपं स्वस्वरूपं प्रविशेति वदन् आकाशप्रवेशस्यादरणीयतामपि आह सनातनमिति विशेषणेन। इदं च विशेषणं स्वविशेषितस्य आकाशस्य त्रिकालाबाध्यतां बोधयदत्र वाकारव्यवच्छिन्नायाः भक्तभोग्यायाः अप्राकृतवैष्णवतनोरपि मायिकत्वेन तिरोधानप्रसक्तिं द्योतयति। अतो नित्यशुद्धमद्वैतसिद्धान्तपरमतात्पर्यगोचरमद्वितीयं ब्रह्मैव प्रतिपादयति वाल्मीकिरिति स्पष्टमेव। रावणवधानन्तरं ब्रह्मकृतरामस्तुतावपि—

"अक्षरं ब्रह्म सत्यं च मध्ये चान्ते च राघव" ॥यु. (120. श्लो 14.) इत्युक्तम्। अत्र वस्तुमात्रस्य सत्यत्वाभ्युपगमे सत्यमिति पदस्य भगवद्‌तासाधारणधर्मानभिधायकतया स्तुतित्वमेव न संगच्छेत। प्रपञ्चस्य मिथ्यात्वं परमात्मन एकस्यैव सत्यत्वं चाङ्गीकुर्वति अद्वैतसिद्धान्ते एवास्य स्वरसतेति परमार्थसत्याद्वैतस्वरूपपर्यवसन्नमेवेदं वचनम्। तथा ब्रह्मस्तुतावेव "न तदस्ति त्वया विना" (यु. 210. 25.) इति वचनमपि सर्वानुस्यूतब्रह्मसत्तामात्रेण अस्तीति व्यवहारगोचरतानिर्वाहे प्रपञ्चस्यातिरिक्तसत्ताकत्वं वारयदद्वैतसिद्धान्त एव सामञ्जस्यमञ्चति। दर्शनान्तरेषु बाह्यार्थानामस्तितांशे ब्रह्मणोऽनपेक्षणात्॥

सुन्दरकाण्डे, सीतायाः—

"धन्याः खलु महात्मानो मुनयस्त्यक्तकिल्बिषाः।
जितात्मानो महाभागा येषां न स्तः प्रियाप्रिये॥
प्रियान्ते सम्भवेद्दुःखमप्रियादधिकं भयम्।
ताभ्यां हि ये वियुज्यन्ते नमस्तेषां महात्मनाम्"

(२६,४९-५०)

इत्युक्तावपि "न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति। अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः।" इति श्रुत्युक्तां त्यक्तदेहाभिमानानां मुक्तानां प्रियाप्रिययोरपहतिमनुवददद्वैतसिद्धान्तसिद्धां जीवन्मुक्तिं व्यञ्जयति। एवं तत्र तत्रोपनिबध्यमानैरद्वैतभावैराबद्धामोदमिदमादिकाव्यम्॥

(पोलकं - सुन्दरेशशास्त्रिणः)

'உலகம் ஸ்வப்னத்தோற்றம் போன்றது' என்பது சுருதி. ஆகையால், 'உலகம் மித்யையன்று, ஸ்த்யமே என்று சொல்வோர் ஸ்வப்னமும் ஸத்யமென்னல் வேண்டும். ''ஸத்யமாகாமல் ஸத்யம்போலத் தோன்றுவது மித்யை. ஸ்ரீராமன் தங்கிய இடத்தை குகன் காட்டியபோது பரதனுடைய பிரபாவத்திலும், இராவணன் செத்துக்கிடந்ததைப் போர்க்களத்திலே கண்ட போது மண்டோதரி பிரலாபித்ததிலும், "ஸத்யம் போற் காணும் இக்காட்சி நம்பத்தக்கதன்று; ஸ்வப்னம்போலவே எனக்குத் தோன்றுகிறது" என்றுள்ளதால் ஸவப்னம் மித்யை என்னுங் கொள்கையே விளக்கப்படுகின்றது.

உத்தரகாண்டத்தில், ஸ்ரீ ராமனிடம் காலன்பேச்சிலே, தான் பரப்பிரும்மத்தினின்று மாயையால் உண்டானவன் என்பதாலும், ஹிரண்யகர்ப்பனும் ஆதிசேஷனும் அவ்வாறே தோன்றினர்கள் என்பதாலும், சிருஷ்டி மாயாகல்பிதம் என்பதாலும், மாயையின் சொரூபம் பாகவத பாரத வசனங்களால் விளக்கப்பட்டதோடு ஒத்தவாறு விளக்கப்படுகின்றது. 'தத்வாகாசம் ஸநாதனம்' என்று மேற்குறித்த பிரும்மவசனத்தால் நிர்க்குணப் பிரும்மவுண்மையும் உறுதிபெறுகின்றது.

'The universe is like what is seen in a dream' says the Śruti. Th[illegible] deny the Mithyā character of the un[illegible] to state that the dream [illegible] passages in the Rāmā[illegible]n. The a[illegible] at the sight of the p[illegible]se nobody w[illegible] Guha's guest and [illegible] sacrifices if he [illegible] sight of Rāvaṇa ly[illegible] the fruits in t[illegible] refer to the respecti[illegible]

as a dream; thus they all support Advaita. And the purport of Kāla's talk with Śrī Rāma (Uttara Kāṇḍa) about creation and Māyā accords only with Advaita.

Emphasis is once again laid on the word "or the Eternal Akāśa" occurring in Brahmā's speech noted above.

अयोध्याकाण्डे "अश्रद्धेयमिदं लोके न सत्यं प्रतिभाति मा। मुह्यते खलु मे भावः स्वप्नोऽयमिति मे मतिः॥" (८८-१०) इति। एतत् गङ्गातीरे गुहेन प्रदर्शितं रामस्य तृणशय्यादिकं दृष्ट्वा रामस्य दुर्दशां मन्यमानस्य तामसहमानस्य भरतस्य वाक्यम्। रामकर्तृकस्य भूशयनादेरश्रद्धेयत्वेनासत्यत्वं सम्भाव्य, तदनुभवस्य स्वप्नदर्शनरूपत्वं निश्चिकाय। स्वाप्निकस्य च पदार्थस्य प्रातिभासिकत्वेनासत्यत्वमद्वैतिनामेव सम्मतम्। इतरैस्त्वास्तिकैः सत्यत्वमभ्युपगतमिति जगन्मिथ्यात्वसाधने प्रवृत्तानामद्वैतिनां स्वाप्निकवस्तुलक्षणदृष्टान्तसिद्धिः अनेन श्लोकेन संपादितेवाभाति। तथा युद्धकाण्डे मण्डोदरीवाक्यं "हा स्वप्नस्सत्यमेवेदं त्वं रामेण कथं हतः। त्वं मृत्योरपि मृत्युस्स्याः कथं मृत्युवशं गतः॥" (११४-४८) अत्र रावणवधस्य स्वप्नरूपत्वेन सत्यत्वासंभवेऽपि कथं सत्यता भातीत्याश्चर्यवर्णनात् स्वप्नोऽसत्य इति द्योत्यते॥

उत्तरकाण्डे "कस्यचित्त्वथ कालस्य रामे धर्मपथे स्थिते। कालस्तापसरूपेण राजद्वारमुपागमत्" (१-१३०) इत्युपक्रम्य-"तवाऽहं पूर्वके भावे पुत्रः परपुरञ्जय। मायासंभावितो वीर कालस्सर्वसमाहरः॥" (१०४-२) इत्युक्तम्। अनन्तरञ्च "पितामहश्च [illegible] [illegible]ः प्रभुः। समयस्ते कृतस्सौम्य [illegible] संक्षिप्य हि पुरा लोकान् मायया स्वयमेव हि। महार्णवे शयानोऽप्सु मां त्वं पूर्वमजीजनः॥ भोगवन्तं ततो नागमनन्तमुदकेशयम्। मायया जनयित्वा त्वं द्वौ च सत्वौ महाबलौ॥" इति वर्णितम्। अत्र तापसरूपेणागतः कालः 'एकान्ते रामसन्निधौ स्वस्य रामपूर्वभवमायासंभावितकालरूपत्वं सर्वसंहारकत्वञ्चावोचत्। तदेतन्मायाचित्संबन्धरूपस्याद्वैतिसंमतस्य सूतसंहितादिग्रन्थप्रतिपादितस्य परिग्रहे स्वारसिकम्। अनन्तरश्लोकद्वयेन च सर्वजगदुपसंहारस्य हिरण्यगर्भशेषादिजननस्य च मायाधीनत्वं वर्णितम्। माया च—"ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि। तद्विद्यादात्मनो मायां यथाऽऽभासो यथा तमः॥", "सेयं भगवतो माया यन्नयेन विरुध्यते। ईश्वरस्य विमुक्तस्य कार्पण्यमुत बन्धनम्॥" इति भागवतवचनाभ्यां "माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद। सर्वभूतगुणैर्युक्तं नैवं मां ज्ञातुमर्हसि॥" इति भारतवचनेन च अविद्यमानार्थप्रदर्शिनी वस्तुतत्त्वाच्छादिनी नयेन विरुध्यमाना स्वयमसत्यभूता भगवद्वशवर्तिनी जीवेश्वरादिभेदकल्पिकेति निर्णीयते। तादृशमायाधीनत्वस्य सृष्ट्यादौ वर्णनादिदमुत्तरकाण्डवाक्यजातमद्वैतमेव हृदि कृत्वा प्रावर्तिष्ट इति निश्चिनुमहे। अत एव दशोत्तरशततमसर्गे "यामिच्छसि महाबाहो तां तनुं प्रविश स्विकाम्। वैष्णवीं तां महातेजो यद्वाकाशं सनातनम्॥" इति ब्रह्मप्रार्थनायां वैष्णवतनुव्यतिरिक्तसनातनाकाशप्रवेशनं रामस्य वर्ण्यमानं वैष्णवतनोः सनातनत्वाभावं द्योतयत्, आकाशशब्दितस्य चिदाकाशस्वरूपस्य परब्रह्मणः नित्यसिद्धत्वं ब्रुवत् रामस्य पारमार्थिकं स्वरूपं निर्विशेषमेवेति निश्चाययति॥

ज्ञात [illegible]

[illegible]

[illegible] ic [illegible]

[illegible] s [illegible]

(क) अध्यात्मरामायणे अद्वैतभावाः

(देवङ्गुडि - पञ्चापगेशशास्त्रिणः)

அத்யாத்ம ராமாயணம் ஆதிமுதல் அந்தம்வரை அத்வைதத்தை விளக்குகின்றது. தொடக்கத்திலே பரமசிவன் பார்வதி தேவிக்கு ஸ்ரீராம தத்துவத்தை உபதேசிக்கும்போது மாயை, அவித்யை, ஞானம், அக்ஞானம், ஜீவப்ரும்ம ஐக்யம் முதலியவற்றைப் பற்றிய அத்வைதக் கொள்கைகளையே கூறுகிறார். ஸீதா தேவியும் ஆஞ்ஜநேயருக்கு, ‘பரப்பிரும்மமாகிய ராமர் நிர்குணர், மாறுபாடுறாதவர்; அவர் எங்கும் செல்வதுமில்லை, தங்குவதுமில்லை. மாயையாகிய நானே இயங்குகிறேன். அவர் அசைவற்று பரிணாமமின்றி எப்பொழுதுமுள்ள பொருள்’ என்கிறாள். ஸ்ரீராமரும் ‘ஆகாசத்திற்குப் போலவே ஆத்மாவுக்கும் பேதம் கல்பிதம்’ என்று கூறுகிறார். மூன்றாம் ஸர்க்கத்திலுள்ள கௌஸல்யையின் ஸ்துதியும் ஐந்தாம் ஸர்க்கத்திலுள்ள அஹல்யாஸ்துதியும், ஏழாம் ஸர்க்கத்திலுள்ள பரசுராம ஸ்துதியும் அத்வைத பரமாயமைந்துள்ளன.

இவ்வாறே மற்ற காண்டங்களினின்றும் அத்வைதத்தைக் தெளிவாகக் கூறுகின்ற சுலோகங்கள் எடுத்துக்காட்டப் பெற்றுள்ளன,

Adhyātma Rāmāyaṇa is consistently advaitic in import. The Bāla Kāṇḍa opens with a discourse on Rāma, the Brahman by Śiva, emphasising the fundamental concepts of Māyā, avidyā and jnāna leading to a perception of oneness of God and jivas. Sītā explains the true nature of Rāma to Hanumān. "All actions are by me, though they are attributed to the unchanging, unconditioned One, Rama. He does not stay anywhere nor does he go about ; nor does he do anything." Rāma Himself explains with the advaitic similes of the apparently different *ākāśa's*. Kausalyā's stotra in the third sarga and Ahalyā's in the fifth and Parasurāma's in the seventh are similarly advaitic.

Similarly from the other khāṇḍas also extracts are given which are obviously of advaitic import.

वालकाण्डे प्रथमसर्गे शिवेन रामाख्यं अद्वैततत्त्वं पार्वत्यै प्रतिपादितम् । अद्वैतसिद्धान्तश्चात्र सम्यक्प्रतिपादितः । तथा हि—

रामः परात्मा प्रकृतेरनादि-
रानन्द एकः पुरुषोत्तमो हि ।
स्वमायया कृत्स्नमिदं हि सृष्ट्वा
नभोवदन्तर्बहिरास्थितोऽजः ॥
सर्वान्तरस्थोऽपि निगूढ आत्मा
स्वमायया सृष्टमिदं विचष्टे ।
जगन्ति नित्यं परितो भ्रमन्ति
सत्सन्निधौ चुम्बकलोहवद्धि ॥
एवं न जानन्ति विमूढचित्ताः
स्वाविद्यया सम्वृतमानसास्ते ।
स्वाज्ञानमप्यात्मनि शुद्धबोधे
स्वारोपयन्तीह निरस्तबाधे ॥
संसारमेवानुसरन्ति ये वै
पुत्रादिसक्ता उरुकर्मयुक्ताः ।
जानन्ति नैनं हृदयस्थितं वा
चामीकरं कण्ठगतं यथाऽज्ञाः ॥
यथाऽप्रकाशो न तु विद्यते [illegible] seen in
[illegible] deny the
ज्योतिःप्रभावात्परमेश्व[illegible]
विशुद्धविज्ञानघने रघूत्त[illegible]n. The a[illegible]
ऽविद्या क[illegible]se nobody w[illegible]
नाहो न [illegible] sacrifices if he [illegible]
ly the fruits in t[illegible]
प्र[illegible]pecti[illegible]av

ज्ञानं तथाऽज्ञानमिदं द्वयं परे
रामे कथं स्थास्यति शुद्धचिद्घने ॥
तस्मात्परानन्दमये रघूत्तमे
विज्ञानरूपे न हि विद्यते तमः ।
अज्ञानसाक्षिण्यरविन्दलोचने
मायाश्रयत्वान्नहि मोहकारणम् ॥

एवमत्र अद्वैतसिद्धान्तस्स्पष्टीकृतः ॥

आञ्जनेयं प्रति सीतोपदेशेप्यद्वैतसिद्धान्तस्सम्यक्प्रतिपादितः । तथा हि—

रामं विद्धि परं ब्रह्म सच्चिदानन्दमद्वयम् ।
सर्वोपाधिविनिर्मुक्तं सत्तामात्रमगोचरम् ॥
आनन्दनिर्मलं शान्तं निर्विकारं निरञ्जनम् ।
सर्वव्यापिनमात्मानं स्वप्रकाशमकल्मषम् ॥
मां विद्धि मूलप्रकृतिं सर्गस्थित्यन्तकारिणीम् ।
तस्य सन्निधिमात्रेण सृजामीदमतन्द्रिता ॥
तत्सान्निध्यान्मया सृष्टं तस्मिन्नारोप्यते बुधैः ॥
इति ॥

अथ श्रीरामचरित्रसङ्ग्रहानन्तरम्

एवमादीनि कर्माणि मयैवाचरितान्यपि ।
आरोपयन्ति रामेऽस्मिन्निर्विकारेऽखिलात्मनि ॥

रामो न तिष्ठति न गच्छति नानुशोच-
त्याकाङ्क्षते त्यजति नो न करोति किञ्चित् ।
आनन्दमूर्तिरचलः परिणामिहीनः
[illegible] हि तथा विभाति ॥ इति ।

[illegible] श्रीरामवाक्यं च । तथा

ज्ञात [illegible] त्मपरात्मनाम् ।
[illegible] दृश्यते महान् ॥

जलाशये महाकाशस्तदवच्छिन्न एव च ।
प्रतिबिम्बाख्यमपरं दृश्यते त्रिविधं नभः ॥
बुद्ध्यवच्छिन्नचैतन्यमेकं पूर्णं तथा परम् ।
आभासस्त्वपरं बिम्बभूतमेवं त्रिधा भिदा ॥
साभासबुद्धेः कर्तृत्वमविच्छिन्नेऽविकारिणि ।
साक्षिण्यारोप्यते भ्रान्त्या जीवत्वं च तथा बुधैः ॥
आभासस्तु मृषाबुद्धिः अविद्याकार्यमुच्यते ।
अविच्छिन्नन्तु तद्ब्रह्म विच्छेदस्तु विकल्पतः ॥
अवच्छिन्नस्तु पूर्णेन एकत्वं प्रतिपद्यते ।
तत्त्वमस्यादिवाक्यैश्च साभासस्याहमस्तथा ॥
ऐक्यज्ञानं यदोत्पन्नं महावाक्येन चात्मनोः ।
तदाऽविद्या स्वकार्येण नश्यत्येव न संशयः ॥ इति ।

तृतीयसर्गे रामस्य परब्रह्मत्वेन कौसल्यास्तुतिः अद्वैततत्त्वं निरूपयति । पञ्चमे अहल्यास्तुतावपि सर्वोपनिषत्प्रतिपादिताद्वैतसिद्धान्तः निरूपितः । सप्तमे परशुरामस्तुतौ "निर्गुणं निराकारं निर्विकारं ब्रह्मैव एकं परमार्थतत्वम् । तस्यैव बुद्ध्यादिषु प्रतिबिम्बः जीवः । तस्यैव अविवेकात्संसारदुःखम् । सत्सङ्गभक्तिद्वारा जनितज्ञानेन अविद्यानिवृत्तौ मुक्तिस्सम्भवति ।" इति, अन्ते "ऐक्यज्ञानं गुरोर्लब्ध्वा तत्प्रसादाद्विमुच्यते" इति चैवमद्वैतसिद्धान्तः प्रतिपादितः ॥

अयोध्याकाण्डप्रथमसर्गे नारदस्तुतौ "परं ब्रह्मैव राघवः सर्वात्मकः सर्वजगत्कारणभूतः, तस्यैव स्थूलसूक्ष्मकारणाख्योपाधित्रितयबलाज्जीवभावः, ब्रह्मात्मतत्वाज्ञानात् रज्जौ सर्पभ्रान्तिवत् जीवजगद्भ्रान्तिः, तत्वसाक्षात्कारात् भ्रमनिवृत्तिदुःखनिवृत्त्युपलक्षितमुक्तिस्सम्भवति" इत्येवमद्वैतसिद्धान्तः प्रतिपादितः । चतुर्थसर्गे श्रीरामेण लक्ष्मणं प्रति उपदेशो अद्वैतोपदेश एव कृतः । तेन लक्ष्मणकौसल्ये निर्दुःखे अभूताम् । सप्तमे भरतं प्रति वसिष्ठोपदेशे अद्वितीयात्मविषये न शोकः कार्यः,

अनित्यदेहादिविषये अपरिहार्य एव शोकः इति, एवं दशरथविषये न शोकः कार्य इत्युक्तम् । एतेनात्र अद्वैततत्त्वं निरूपितं भवति । सुतीक्ष्णस्तुतौ " अरूपिणोपि अशेषदेशकालाद्युपाधिरहितं घनचित्प्रकाशम् " इत्यादिना निर्विशेषमद्वैततत्त्वं स्फुटीकृतम् । अगस्त्येनापि रामस्तवे निर्गुणमद्वैततत्त्वमाविष्कृतम् ॥

आरण्यकाण्डचतुर्थसर्गे लक्ष्मणं प्रति रामोपदेशे " निर्गुणपरब्रह्मणि कल्पितमायाशक्तिः आवरणविक्षेपशक्तिद्वयवती परमार्थस्वरूपमावृत्य जगद्भ्रान्तिं करोति । यदा आचार्यशास्त्रोपदेशपुरुषप्रयत्नैश्च उद्युक्तः पुरुषः, तदा मायानाशे मोक्षो भवति । एक एवाद्वितीयश्च सत्यज्ञानादिलक्षणः । " इति ॥

उत्तरकाण्डपञ्चमसर्गे लक्ष्मणं प्रति रामोपदेशे

आदौ पदार्थावगतिर्हि कारणं
वाक्यार्थविज्ञानविधौ विधानतः ।
तत्त्वंपदार्थौ परमात्मजीवकौ
असीति चैकात्म्यमथानयोर्भवेत् ॥
प्रत्यक्परोक्षादिविरोधमात्मनो-
र्विहाय संगृह्य तयोश्चिदात्मताम् ।
विशोधितां लक्षणया च लक्षितां
ज्ञात्वा स्वमात्मानमथाद्वयो भवेत् ॥
एकात्मकत्वाज्जहती न संभवेत्
तथाऽजहल्लक्षणताविरोधः ।
सोऽयंपदार्थाविव भागलक्षणा
युज्येत तत्त्वंपदयोरदोषतः ॥

इत्येवमारभ्य स्थूलसूक्ष्मकारणात्मकोपाधित्रयं निरूप्य अवस्थात्रयञ्च प्रतिपाद्य तेषामात्मनि कल्पितत्वञ्चोक्त्वा—

" कदाचिदात्मा न मृतो न जायते
न क्षीयते नापि च वर्धतेऽमरः ।
निरस्तसर्वातिशयस्सुखात्मकः
स्वयंप्रभस्सर्वगतोऽयमद्वयः ॥
एवंविधे ज्ञानमये सुखात्मके
कथं भवो दुःखमयः प्रतीयते ।
अज्ञानतोऽध्यासवशात्प्रतीयते
ज्ञाने विलीयेत विरोधतः क्षणात् ॥
अन्योन्यमध्यासवशात्प्रतीयते
जडाजडात्मत्वमिहात्मचेतसोः ।
गुरोस्सकाशादपि वेदवाक्यतः
सञ्जातविद्यानुभवो निरीक्ष्यताम् ॥
स्वात्मानमात्मस्थमुपाधिवर्जितं
त्यजेदशेषं जडमात्मगोचरम् ।
प्रकाशरूपोऽहमजोऽहमद्वयः
सकृद्विभातोऽहमतीव निर्मलः ॥
विशुद्धविज्ञानमयो निरामयः
सम्पूर्ण आनन्दमयोऽहमक्रियः ।
सदैव मुक्तोऽहमचिन्त्यशक्तिमान्
अतीन्द्रियज्ञानमविक्रियात्मकः ॥
अनन्तपारोऽहमहर्निशं बुधैः
विभावितोऽहं हृदि वेदवादिभिः
एवं सदात्मानमखण्डितात्मना
विचार्यमाणस्य विशुद्धभावना ।
हन्यादविद्यामचिरेण कारकैः
रसायनं यद्वदुपासितं रुजः [illegible]
[illegible]द्यते [illegible]

इत्यादिना अद्वैतसिद्धान्तं [illegible] परमेश्व[illegible] भूत्वा विश्वादीन्क्रमेण तु[illegible] घूत्त[illegible] भवतुष्टः मुक्तस्तिष्ठ[illegible]

(ख) आनन्दरामायणे अद्वैतभावाः

(देवङ्गुडि - पञ्चापगेशशास्त्रिणः)

ஆனந்தராமாயணம் ஸாரகாண்டத்திலே ஸ்ரீ ராமர் தசரதருக்குத் தத்துவோபதேசஞ் செய்கிறார். 'ஜகத் மாயையால் உண்டாகும் வெறுந் தோற்றமே. கிளிஞ்சலில் வெள்ளியின் தோற்றம் போலவும் மருபூமியிலே கானல் நீரின் தோற்றம் போலவும் ஆத்மாவிலே ஜகத் தோன்றுகிறது என்பர் ஞானிகள்" என்கிறார், "பரமாத்மாவாகிய இந்த ராமர் நீரால் நனையாத தாமரையிலைபோல மாறுபடாதவராகி கர்த்ருத்வமின்றி சுய ஆனந்த பூர்ணராயிருக்கிறார்" என்று ஓரிடத்தில் அத்வைதவுண்மை விளக்கப்படுகிறது.

ஸ்ரீ ராமாஷ்டோத்தரசதநாம ஸ்தோத்ரமும் (யாக காண்டம், 5) ஷ காண்டம் ஏழாவது சர்க்கமும் ஸ்ரீராமரை அத்வைத ப்ரும்மரூபர், சின்மயமான நிர்க்குணப்பொருள் என்று கூறுகின்றன. இவையும் இவை போன்று விலாஸ காண்டத்து 12-வது சர்க்கத்திலும், மனோஹர காண்டத்து 2,4,5,7 சர்க்கங்களிலும் அத்வைதப் பிரக்ரியைகள் கையாளப்படுகின்றன. அத்வைத சித்தாந்தத்திற்கே சிறப்பாக அமைந்த ஹரிஹராபேதம் இதே காண்டத்து 7, 12 சர்க்கங்களில் வற்புறுத்தப்படுகின்றது, ஸ்ரீராமரே துவைத புத்தியைக் கண்டனஞ் செய்தார் என்னும் வாக்கியத்தோடு 'ராமாயணங்களில் அத்வைதம்' என்னும் ஆராய்ச்சி முற்றுப்பெறுகின்றது.

In the fifth Sarga of Rāmāyaṇa Sārakāṇḍa of Ānanda Rāmāyaṇa, Rāma explains the Advaitic tattva to Daśaratha. 'The universe is a [illegible]pearance born of Māyā; like the [illegible] in the shell and of [illegible] appearance of the [illegible]ding to the wise'. [illegible]ater is the Supreme [illegible]maculate, action-free [illegible] says another

[illegible]

[illegible] stotra (Yāga [illegible] Rama is called 'Advaita-Brahma-Rūpa', 'Chinmātra', 'Nirguṇa'—attributes peculiar to the Advaita Siddhānta. Similarly in the 12th sarga of Vilāsa Kāṇḍa and the 2nd 4th 5th & 7th sargas of Manohara Kāṇḍa, Another feature of Advaita, non difference of Hari and Hara is emphasized in the 7th and 12th sārgas of the same Kāṇḍa.

आनन्दरामायणसारकाण्डपञ्चमसर्गे दशरथं प्रति रामोपदेशे अद्वैततत्त्वं प्रकटितम् । तथा हि—

नश्वरं भासते चैतत् विश्वं मायोद्भवं नृप ।
यथा शुक्तौ रौप्यभासः काचभूम्यां जलस्य च ॥
यथा रज्जौ सर्पभासः मृगतोये जलस्पृहा ।
तद्वदात्मनि भासोऽयं कल्प्यते नश्वरो बुधैः ॥
अज्ञानदृष्टिभिर्नित्यं मन्यते न तु पण्डितैः ।
आत्मा शुद्धो निर्व्यलीकस्सच्चिदानन्दलक्षणः ॥
स्थित्युत्पत्तिविनाशार्थं नानारूपाणि नीयते ।
धार्यते नटवद्राजन् न तेष्वासक्त एव सः ॥

यथा पद्मं न स्पृशति जलं मायां तथाऽमलः ।

इत्यादिना, द्वादशे—

रामोऽयं परमात्माऽपि कामी चक्षेऽतिनिर्मलः ।
कर्तृत्वादिविहीनोऽपि निर्विकारोऽपि सर्वदा ॥
स्वानन्देन परं तुष्टः शोकिनामुपदेशकृत् ।
इत्यादिनाचाद्वैततत्त्वं निरूपितम् ॥

योगकाण्डे पञ्चमसर्गे रामाष्टोत्तरशतनामस्तोत्रे—
"अद्वैतब्रह्मरूपाय चिन्मात्राय परात्मने ।"

इत्यादिना अद्वैततत्त्वं प्रकटितम् ॥

सप्तमे, "यद्ब्रह्म परमं धाम सर्वलोकोत्तमोत्तमम् ।
निर्गुणं परमं सूक्ष्मम् ।" इत्यद्वैततत्त्वं प्रकटितम् ॥

विलासकाण्डद्वितीयसर्गे—

"निरामयं निराभासं निरवद्यं निरञ्जनम् ।
नित्यानन्दं निराकारमद्वैतं तमसः परम् ॥
परात्परतरं नित्यं सत्यानन्दचिदात्मकम् । इति"

'सर्वात्मकं सर्वगतस्वरूपं नमामि रामं परतः परस्तात्' ॥ इति च, मनोहरकाण्डद्वितीयसर्गे 'सर्वं ब्रह्म न संशयः', 'अहमेव परं ब्रह्म' 'मत्तो ब्रह्म परं न हि', 'एवं यद्दृश्यते चेदं मायेयं तव राघव,' 'नश्वरं बुद्बुदाकारं ज्ञातं चेदं मया प्रभो', चतुर्थे च

'सर्वासूपनिषत्स्वेवं ब्रह्माद्वैतं सुनिर्मितम् ।'
"ब्रह्मैवेदममृतमित्याह चाथर्वणी श्रुतिः ।"
तत्त्वमेव त्वमेवैतदिति कैवल्यगं वचः ।
तत्त्वमसीति छान्दोग्ये ब्रह्मात्मैक्यं न भेदधीः ॥
एकत्वं पदयोस्स्पष्टं श्रुत्या यत्प्रतिपादितम् ।
साक्षान्मुक्तेः कारणं तद्बोधस्तेषां स एव हि ॥
इदं सर्वं यदयमात्मैकमेवाद्वितीयकम् ।
सर्वं खल्विदमित्यादिश्रुतयो यद्ब्रुवन्ति हि ॥
सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ।
सम्पश्यन्नात्मयाजीति परमार्थं मनोर्वचः ॥
एतादृशेन बोधेन भूत्वा ब्रह्मात्मरूपकाः ।
कृतकृत्यास्स्वयं तीर्त्वा सच्छिष्यानाह्वयन्ति च ॥ इति ।
पञ्चमे, "तद्ब्रह्म परमं लिङ्गं मङ्गलं भद्रवाचकम् ।
मङ्गलं मङ्गलानां च शिवं शान्तमिति स्फुटम् ।
लीयन्ते यत्र भूतानि निर्गच्छन्ति यतः पुनः ॥
तेन लिङ्गं परं व्योम निष्कलः परमश्शिवः ।
एकोऽद्वितीयः परमो नान्तःप्रज्ञादिलक्षणः ॥
अक्षरस्सच्चिदानन्दोऽमरोऽजर उत्तमः ।
निर्विकारो निराकारो निरामय उदीरितः ॥
वस्तुतस्तु परं तत्त्वं सजातीयादिहीनकम् ।
एवं सर्वं शिवो भाति न सर्वं शिव एव हि ॥
सच्चित्सुखत्रयं नामरूपे ब्रह्मैव केवलम् ॥
जातं पञ्चात्मकं नान्यद् ब्रह्मैवेदमिति श्रुतिः ।
भोगो भोक्ता भोजयिता सर्वं ब्रह्मैव नो पृथक् ॥"

इत्यादिना अद्वैतसिद्धान्तः श्रुतिसिद्धः सम्यङ्निरूपितः ॥
सप्तमे ; राम एव परो ज्ञेयः शिव एव रघूत्तमाः ।

उभयोर्नान्तरं ज्ञेयं भेदद्दङ्नारकी नरः ॥
रामशङ्करयोरत्र भिन्नत्वं येन मानितम् ।
अजागलस्तनवच्च तस्य जन्म वृथा गतम् ॥
शम्भोश्च हृदयं रामः रामस्य हृदयं शिवः ।
नैवान्तरं कल्पनीयं कुतर्कैर्विविधैर्नरैः ॥

इत्यादिना हरिहराभेदः निरूपितः । द्वादशे, 'रामस्साक्षान्महादेवः नात्रः भेदः कदाचन ।' इति दुर्गावाक्यं हरिहराभेदं ज्ञापयति ।

एवं शिष्यजनानाञ्च रामेण परमात्मना ।
द्वैतबुद्धिः खण्डिताऽत्र वने कृत्वा तु कौतुकम् ॥

इत्यादिना श्रीरामेण परब्रह्मणैव भेदबुद्धिखण्डनं कृतं इति सम्यगुक्तमिति शिवम् । एवञ्च निखिलेष्वपि रामायणेषु तात्पर्यविशेषेण अद्वैततत्त्वमेव सम्यगुपदिष्ट[illegible]शुभम् ॥

आचार्यवर्यकृपया [illegible] विते [illegible]
रामायणे [illegible] परमेष्ठ [illegible]
अद्वैततत्त्वमधुना [illegible] घूत्त [illegible]
पश्चा [illegible]

(ग) तुलसीदासरामायणे अद्वैतभावाः

(विजयानन्द त्रिपाठी)

துளஸிதாஸ கோஸ்வாமிகள் ஹிந்தியிலே ஸ்ரீராமாயணம் பாடியவர். அந்த ராமாயணம் வட்நாடெங்கும் பரவியுள்ளது. நூலாசிரியரின் உட்கருத்தை இரண்டு வகையிலே தெரிந்து கொள்ளலாம். நூலிலே காணப்படும் அகச்சான்றுகளை ஆராய்வது ஒரு வகை. நூலின் பாயிரத்திலும் புறத்திலுமுள்ள புறச்சான்றுகளை ஆராய்வது இரண்டாவது வகை. இவ்விருவகையாராய்ச்சியாலும் கோஸ்வாமிகள் அத்வைத சித்தாந்தியே என்பது புலப்படுகின்றது. அகச்சான்றுகளை ஆறுவித அறிகுறிகளைக்கொண்டு வகுக்கலாம். அவை (1) தொடக்கவுரையும் முடிவுரையும் (2) அப்யாஸம் (3) அபூர்வதை (4) பயன் (5) அர்த்தவாதம் (6) உபபத்தி என்பன. ஆறுவிதங்களாலும் அத்வைதக் கொள்கைகளே வற்புறுத்தப்பட்டிருக்கின்றன. விவர்த்த வாதத்தை அங்கீகரிப்பது, ரஜ்ஜுஸர்ப்ப உவமை, பாரமார்த்திக ஸத்யம், வ்யாவஹாரிக ஸத்யம் என்னும் பாகுபாடு, பிரும்மம் எவ்வகைப் பேதமுமற்றது என்பது, நூற்பயன் அந்தராத்மாவின் சுகமே என்பது, பேதவாதத்தை நிந்திப்பது முதலியவையெல்லாம் இந்நூலுட் காணப்படுகின்றன.

குருவணக்கத்திலே, (அத்வைத ஸ்தாபகர்களான) சங்கர குருவை வணங்குவதாலும், அத்வைதாசார்யரான மதுசூதன ஸரஸ்வதீ ஸ்வாமிகள் துளசி தாஸரைப் புகழ்வதாலும் ஸாயுஜ்ய முக்தியைக் கருதியே அவர் காசியிலுள்ள அஸீஸங்கமத்திலே சரீரத்தியாகஞ் செய்ததாலும் துளசிதாஸர் அத்வைதியே [illegible] விளங்குகிறது.

the [illegible] uthor of the Hindi [illegible] North India. That [illegible] nta in his poem [illegible] to (1) abheda [illegible] bheda jñāna [illegible] two kinds of [illegible] pāramārthika [illegible] icia of advaitic [illegible] s the sixfold process of examination of (1) the commencement of the work and its concluding portion (2) emphasis by repetition throughout the work (3) apūrvatā (4) consequential result (5) arthavāda and (6) upapātti for arriving at a proper conclusion of the import of a work and establishes the thesis that the purport of Tulasidās's work's is clearly advaitic. Eternal evidence also point to this conclusion; for in the prefatory portion, Tulasidās reveres Śankara as his Guru and tne famous advaitin Madusūdhana Saraswati speaks of him with reverence.

ज्ञात [illegible]

येषां श्रीगोस्वामिनां रचना दिगन्तानामृशति, येषां भारती लक्षाधिकमनुष्याणां धर्मशास्त्रं भवति, येषां चतुष्पदीनां प्रामाण्यरूपेणावतरणं हिन्दीभाषाभाषिणां प्रतिपदं उपतिष्ठते, यन्निर्मितग्रन्थानां प्रचारः निखिलसंस्कृतहिन्दीनिबन्धेभ्यः आधिक्येन वर्तते तेषां श्रीगोस्वामिनां कस्मिन् दर्शने समादरः ? एतद्विषयनिर्णये कौतूहलप्रादुर्भावः स्वाभाविकः ॥

प्रकृतग्रन्थकारस्य सिद्धान्ताः तदीयग्रन्थेभ्य एवावधारयितुं शक्याः । श्रीगोस्वामिनां ग्रन्थेषु श्रीरामचरितमानसरामायणं सर्वलक्षणसंपन्नं वर्वर्ति । तदीय एव च प्रचारो भूयान् वर्तते । अतः तदेवाधिकृत्य विमृश्यते ॥

सुप्रसिद्धोऽयं श्लोकस्तात्पर्यनिर्णयविषये " उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् । अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये " इति । अतः एतद्रीत्यापि विचार्य गोस्वामिचरणानां ऐदम्पर्यं कस्मिन्वादे वर्तते इति निर्णयामः । तत्रोपक्रमोपसंहारौ तावत्—इदानीमिदं द्रष्टव्यं यदुपक्रमे अन्ते च श्रीरामचरितमानसे दार्शनिकः

सिद्धान्तः प्रतिपादितो न वेति। विलोक्यतां मङ्गलश्लोकः
" यन्मायावशवर्ति विश्वमखिलं ब्रह्मादिदेवासुराः
यत्सत्वादमृषैव भाति सकलम् रज्जौ यथाऽहेर्भ्रमः।
यत्पादप्लवमेकमेव हि भवाम्भोधेस्तितीर्षावतां
वन्देऽहं तमशेषकारणपरं रामाख्यमीशं हरिम् ॥
वाल-६

एवमुपसंहारस्थलेऽपि दृश्यते। यथा- 'द्वैतबुद्धि विनु क्रोध किमि द्वैतकि विनु अज्ञान' द्वैतबुद्धि विना कथं क्रोधः, अज्ञानं विना कथं द्वैतमित्यर्थः। उपक्रमोपसंहारयोः श्लोकद्वितयात्तत्रभवतां श्रीगोस्वामिनां विवर्तवाद एवाभ्युपगत इति प्रतीयते। त्रय एव वादा दार्शनिकसंमताः आरंभवादः परिणामवादः विवर्तवादश्च। तथा चात्रोपक्रमोपसंहारयोः ग्रन्थकारो विवर्तमभ्युपैतीति स्पष्टम्। विवर्तवादश्चाद्वैतवादिनां सिद्धान्तः नान्येषां केषाञ्चित्। 'कहि न जाय रवि वारि सत्य भ्रमते दुख होई विशेष' इति विनयपत्रिकायाम्। इदं दृष्टान्तद्वयमीदृशमस्ति यदद्वैतवादिनो विहाय नापरे उपक्रमोपसंहारयोस्स्थापयेयुः ॥

इदानीमिदं विभावनीयं यदस्याभ्यासोपि क्वचित्क्रियते न वेति,

कुहहु सत्य जाहि विनु जाने।
जिमिभुजंग विनु रजुपहि चाने॥
जेहि जाने जगजाइ हे रा ई।
जागे जथा सवन भ्रमजाई॥
वन्दौ वालरूप सोइ राम।
सवसिधि सुलभजयत जिसुराम्॥

अत्रापि सैव रज्जुभुजङ्गोपमा। अत्रेयान्विशेषोपि प्रत्यपादि। यद्रज्ज्वज्ञानमेव रज्जुगतस्य सर्पस्य कारणम्। एवमेव ब्रह्मणोऽज्ञानमेव संसारस्य बीजमस्ति ज्ञानेन तद्बाध्यते, यथा जागरणेन स्वप्नः। एतस्मादधिकमद्वैतवादस्य कृते स्पष्टमुदाहरणं किमपेक्षितम्॥

'जासु सत्यता ते जड माया भास सत्य इव मोह सहाया। रजत सीप महुँ भास जिमि यथा भानु कर वारि॥' जदपि मृषा तिहुँ काल सोइ। भ्रम न कइ को उटारि। स हि विधि जगहरि आश्रित रह ई जदपि असत्य देत दुख अइ। जौसपने सिरकाटौ को ई विनुजाने न दूर दुख हो ई जासु कृपा अस भ्रम मिटि जा ई विनुजासो कृपालु रघुराई।

अत्रेयान्विशेषोऽभ्यधायि यन्माया जडरूपा ब्रह्म चेतनम्। माया मिथ्याऽस्ति, सत्यञ्च ब्रह्म, विर्वतवादः पुनरुदाहारि 'रजतसीय' इत्यादिना। यद्यपि जगतस्सत्ता त्रिकाले मिथ्या कथिता, परन्तु तदीयसत्वस्य भ्रमो नापाकर्तुं शक्यः। एतद्भ्रमस्य निवारणसाधनं स्वप्नस्य जाग्रदवस्थेव श्रीरामचन्द्रानुग्रहासादितं अद्वितीयवस्तुविषयकं ज्ञानमेव॥

'योग वियोग भाग भलमंक्षा हित अन हित मध्यं भ्रम फ़न्दा। जनन मरण जहं लगि जग जाल्ह सेपति वियति कुम्भ अरुकाल्ह। धरनि धाम धन पुरपरिवारु। सरग नरक जहलगि व्यवाहरन। देखि अछुजि अगुनिय मनमाही। मोहमूल परमार्थ नाही।'

अत्र इमानि सर्वाणि मोहमूलानि भणितानि। एतेषां सर्वेषां व्यावहारिकी सत्ता, पारमार्थिकी सत्ता नास्ति। अत्रापरो विशेषः प्रतिपादित [illegible] सत्यमपि द्विविधमस्ति, एकं पारमा [illegible] संयोगः, वियोगः म [illegible] स्यश्चेति भ्रमस्य [illegible] संसक्तम्। सम्प [illegible] गृहं धनं राज्यं [illegible] एषु पारमार्थिकी [illegible] त्रिकालाबाध्ये [illegible]

'राम ब्रह्म परमार्थरूपा अविगत अलख अनादि अनूपा। सकल विकार रहित गतभिदा कहिनित नेति निरूपहि वेदा ॥'

एवं रीत्या आम्रेडनेन विवर्तवादः, ब्रह्म सत्यं, जगन्मिथ्या इत्येवंरूपः यथावत्समभिहितः। अतोऽभ्यासेनापि ग्रन्थकारस्य अद्वैतवाद एव सिद्धान्तः ॥

अपूर्वता - एतस्यापूर्वता तु उमाप्रश्नेनैव प्रकटिता भवति। यथा—

'ब्रह्मजो व्यापक अज अकल अनीह अभेदा। सौकिदेह धारि होइ नर। जहिन जानत वेद।'

अर्थात् अद्वैतब्रह्मणोऽवतारः कथं सम्भवति। तस्मादद्वैतब्रह्मणोऽवतारश्चरितञ्चास्मिन्ग्रन्थे वर्णितं, दिङ्मात्रं कथयामः। विस्तरस्य कृते तु ग्रन्थ एव जागर्ति। यथा जलराशिस्स्वाभाव्यादेव तरलो भवति, परन्तु सदा सर्वत्र सर्वांशस्तस्य तरलो न भवति कदाचित्कुत्रचित् शैत्यवशाद्घनीभावमापद्यते तथैव ब्रह्मणोऽवतारोऽपि जातुचिद्भक्तस्य प्रेमवशाद्भवति। यथा—

जो गुनरहित स गुन सो कैसे।
जल हिमि उपल विलगन हि जैसे।
अगुन अरूप अलख अज जोई।
भक्तप्रेमवश सगुन सो होई।

अत्राभेदशब्देन विविधभेदशून्यता अद्वैतब्रह्मविषयकप्रश्ने त[illegible] [illegible]चाखिले रामचरितमानसे यथायथं [illegible]

[illegible] गोस्वामिनः भाषाया- [illegible] स्सुखाय तुलसी- ज्ञात [illegible] ति। पर्यवसाने [illegible] ते भक्तिमन्द [illegible] राम समान्प्रभू [illegible]

नाही कहूँ।' अतः अन्तस्सुखं प्रत्यक्चेतनाधिगमः परमविश्रामप्राप्तिर्वा एतस्य फलम् ॥

५ अर्थवादः, यथा—

एकवात नहि मोहि सोहानी।
जदपि मोहवस केह उमवानी।
तुँ जो कहा राम कोउ आना।
जेहि श्रुतिगावधरहि मुनिध्याना।
कह हिं सुनहि अस अधम नर
ग्रसे जो मोह पिसाच।
पाखण्डी हरिपद विमुख, जानहि
मूढ न सा च।
अज्ञ अकेविद अन्ध अभागी।
काई विषय मुकुर मनलागी।
लंपट कपटी कुटि विशेषी।
सपने हु सन्तसमान हि दोषी।
कहहि ते वेद असमयत वानी।
जिन हि न सूमूलाभन हि हानी।
मुकुर मलिन अरू नयन विहीना।
रामरूप देख हिँ किमिदाना।
निजके अगुनन सगुन विवेका।
जल्प किं कल्पित वचन अनेका।
हरिमाया वसन गतभ्रमाही तिनहि
कहतकछु अधरित नाही।
वातुलभूत विवस मत्तवारे।
तिनहि वोलहि वचन विचारे।
जित कृत भटा मोह मदपाना।
तिनकरकहा करिय न हि काना।

अत्र भेददर्शिनो निन्द्यन्ते। सर्वे रामरूपा एव सन्ति। अविद्योपाधिवशाज्जीवरूपतां गताः। अत्र रामः किमपरोऽस्ति? । अयं प्रश्न एव न युज्यते। एवंभूता वाणी वेदविप्रतिपन्ना। यस्त्वयमेवाविवेकी

मलिनान्तःकरणः स आत्मारामं नैव शक्नोति द्रष्टुम्। अत्र विवेको नयनशब्देनोक्तः। मनश्च मुकुरशब्देन॥

यथा—तेहि करिविमल विवेक विलोचन। निज मन मुकुर सुधारि। दर्शनार्थं तु नेत्रे स्त एव। परन्तु आत्मस्वरूपविलोकनार्थं निर्मलमुकुरस्य असाधारणावश्यकता। अतोऽत्रात्मारामस्य दर्शनविषयेऽभिदधाति। यत् य आत्मारामं न पश्यति स एव पृच्छति "अस्ति रामः कश्चिदन्यः" इति। एवं रामविषये न युज्यते। युज्यते तूपाधिविषये, यन्मायाऽस्ति अविद्या वा। यदि माया उपाधिस्तदा ईश्वरोऽस्ति। यदा अविद्या तदा जीवः। त्वं तु परीक्ष्याद्राक्षीः यथा—'कच्छुति ज माया प्रकारिदिरवा वा।' अतोऽत्राप्यद्वैतवादोऽभिहितः। एवं गरुडचरितमपि अर्थवादरूपम्। तस्यापि संशयः उमावदासीत् यथा—

व्यापक ब्रह्म विरजवारीसा माया
मोहपार परमीस्व।
सो अवतार सुने उदगमाही।
देखे उँ सो प्रमाव कछुनाही॥

अत्रापि परिगृहीतैर्विशेषणैरद्वैतं ब्रह्मैव सूच्यते। अतोऽर्थवादेनापि अद्वैतवाद एवात्रेष्यते।

६ उपपत्तिः—इदमिदानीं द्रष्टव्यं यच्छ्रीगोस्वामिमहोदयाः अद्वैतवादं कथमुपपादयन्ति। 'ज्ञानमान जहँ एकौ नाही। देख हिं ब्रह्म समान सवमा हि।' इत्यभिधाय ज्ञानं परिभाषन्ते॥

'मूढह्नु सत्य जाहि विनु जाने। जनुभुजङ्ग विनु रजुयहि चाने। इत्याख्यायाज्ञानेनैव जगतः उत्पत्तिर्न्यगादि। अथ द्वैतं जुगुप्सित्वा खण्ड्यते।

(१) कोध कि द्वैतबुद्धि विनु
द्वैतकि विनु अज्ञान।

(२) द्वैतरूप तमकूपपरौ न हि
अस कछु जतनविचारु।

(३) सेवत साधु द्वैत भय आ गै।

विनये कथयन्ति—

"तुलसी दास जग आपत हि
तजवलमि निर्मूलन जाई।
तवल गि कोटि कल्प उपायकारि
मरिय तरिअ न हिचा ई।
सोक मोह भय हार वादी
वसतिसिदेस कालतह नाही॥
तुलसीदास रहि दासहीन
संसय निर्मूल न जाही।

एवं सर्वैः प्रकारैः श्री गोस्वामिनां तात्पर्यसात्कृतस्सिद्धान्तः अद्वैतवाद एव सिद्ध्यति। इयं त्वन्तरङ्गपरीक्षाया वार्ता समभूत्। सम्प्रति बहिरङ्गमपि परीक्ष्यते

'वंदे वोधमयं नित्यं गुरुं शङ्कररूपिणम्'।

अत्र गोस्वामिनः गुरुं शङ्कररूपेण व्यवहरन्ति। किं कश्चिदन्यो विवादी गुरुं शङ्कररूपेण वक्तुं वाञ्छति। किमेभिरक्षरैः शाङ्करसम्प्रदायो नाभिव्यज्यते। किं कारणमस्ति यदाब्रह्मण आ च कीटपतङ्गेभ्यः सर्वं प्रणमता ग्रन्थकर्त्रा कस्यापि सम्प्रदायस्याचार्याः नोल्लिखिताः॥

"गनप गौरि त्रिपुरारि [illegible] पागमन पदवन्दिवटोरी।" इत्युच्यते [illegible]
पासनाऽदर्शि तथाऽन्नत्परमे [illegible]
[illegible] रघूत्त [illegible]

श्रीगोस्वामिन [illegible]
यदद्वैतसिद्धेर्लें [illegible]
श्रीरामचरितमा [illegible]
इमं श्लोकं व्य [illegible]

" आनन्दकानने ह्यस्मिंस्तुलसी जङ्गमस्तरुः ।
कवितामञ्जरी यस्य रामभ्रमरभूषिता ॥ "

एतेषामद्वैतवादिनामग्रेगणनीयानां महात्मनां प्रशंसायाः कश्चिदर्थोऽस्ति । तेऽपि श्रीरामचरितमानसे अद्वैतवादमेवोपालभन्त । काश्यामसीसङ्गमहरद्वारतीर्थे श्रीगोस्वामिनां शरीरत्यागेनापीदमेव निश्चेतुं शक्यते यत्तेषां चरमं लक्ष्यं सायुज्यमुक्तिरेवासीत् , यथा —

मुक्तिजन्ममहि जामि ज्ञानखानि अजहानिकर ।
जहं वससम्भु भवानि सोकाशीसे इ अ कस्रन् ॥

अतोऽन्तरङ्गबहिरङ्गपरीक्षाभ्यामिदं साधयितुं सुशकं यच्छ्रीगोस्वामिमहोदयानां अद्वैतसिद्धान्त एवाभिमत इति ॥

(मुडिकोण्डान् M. वाञ्चिनाथार्यः)

"ராமன்" எனப்படும் ஈசனே உண்மைப் பொருள். வேறு உண்மைப் பொருள் இல்லை. ரஜ்ஜுவிலே தோன்றும் பாம்பைப்போல அவனிடத்தே மாயையாலே உண்மை போலத்தோன்றும் ஜகத் பொய்" என்று துளஸிதாஸர் மங்கள சுலோகத்திலேயே அத்வைதத்தைக் கூறுகிருர். ஜடப் பொருள், சேதனப்பொருள் எல்லாவற்றையும் ராமனுகக்கொண்டு வணங்குகிருர். உமாதேவிக்குச் செய்யும் உபதேசத்திலே சிவபிரான் "பிரும்மம் நிர்க்குணம், நாம- [illegible] கிருர். 'ஞானத்தாலே [illegible] ராமர் லக்ஷ்மணனுக்கு [illegible] ங்கர் பேத புத்தி- [illegible] ஸாயுஜ்யத்தைப் [illegible] கிருர். இராமரி- [illegible] கள் மித்யை' [illegible] அங்கதனிடம் [illegible] ரும்மமென்று [illegible] காண்டத்- [illegible] அகற்று' [illegible] க சமயத்தில், சிவபிரான் 'தசரதர் மோக்ஷத்தை அடையவில்லை, அதற்குக் காரணம் அவரது பேத புத்தியே' என்று பார்வதியிடம் கூறுகிருர். 'மாயையால் ஏற்படும் பிரமையும் பேத புத்தியும் மித்யை' என்று ஸ்ரீராமர் தன்னிடம் சொன்னதை காகபுசுண்டி சொல்கிருர். "அஞ்ஞானத்தால் த்வைத புத்தியும் த்வைத புத்தியாலே குரோதமும் உண்டாகின்றன. ஜகத்தையெல்லாம் பிரும்மமாகக்காண்போன் தன்னினும் வேருக எதையும் காணுததால் யாரைக் கோபிப்பது?" என்கிருர் துளசிதாஸர். "ஸோஹமஸ்மி" என்னும் அபேதஞானத்தால் பேதப் பிரமை ஒழியும் என்கிருர் காகபுசுண்டி. இன்னும் எத்தனையோ வாக்கியங்கள் அத்வைத பரமாகவே காணப்படுகின்றன.

In the second article, Tulasi Rāmāyaṇa is examined Khāṇḍa by Khāṇḍa. The invocation to Hari whose name is Rāma refers to God as the only truth and to the rajju-sarpa illustration and to Māyā, mushā (falsehood) when speaking about the universe. The poet reveres all inanimate and animate creation as Rāma. Śiva explains to Umā that Rāma, the Brahman, is nirguṇa and without name and form. That jñāna alone leads to release is the teaching of Rāma to Lakshmaṇa. Śarabhanga and Daśaratha did not achieve release because of their bhedabuddhi. Sugrīva submits before Rāma his perception that joys and sorrows are all *mithyā*. Jāmbavān tells Angada that Rāma is to be known as Nirguṇa Brahman.

In the Lankā Khāṇḍa Brahmā praises Rāma and prays that his preoccupation with *bheda* may be eradicated. Kāka Bhusāṇḍi explains that the confusion and *bheda-budhi* caused by Māyā is mithyā. Out of ajnāna is born bheda-buddhi which in its turn causes Krodha. How can one who sees everything as the Brahman and noth ing as different from himself get angry? For, there is no second object to be angry with. He also explains that the bhedabuddhi ceases when abheda jnana is attained throug the formula 'Sōham-asmi'. These and many other passages are cited and explained and the advaitic character of Tulasi Rāmāyaṇa established.

पञ्चदशशताब्द्यामुत्तरभारते तुलसीदासा इति प्रसिद्धाः, गोस्वामिनामानः भक्ताः कवयः पण्डिता ब्रह्मविदश्चासन् । ते च संस्कृतमजानतां हितार्थं रामचरितमानसनामकग्रन्थं अयोध्याप्रान्तावधिभाषायां रचितवन्तः । तस्मिन्ग्रन्थेऽपि तत्र तत्र श्रीभगवत्पादाभिमतः अद्वैतसिद्धान्तः उपलभ्यते ॥

तथा हि—

" यन्मायावशवर्तिविश्वमखिलम् ब्रह्मादिदेवासुराः
यत्सत्त्वादमृषैव भाति सकलं रज्जौ यथाहेर्भ्रमः ।
यत्पादप्लव एक एव हि भवाम्भोधेस्तितीर्षावतां
वन्देऽहं तमशेषकारणपरं रामाख्यमीशं हरिम् ॥
(बालका-श्लो ६)

अस्मिन् मङ्गलश्लोके जगतो मिथ्यात्वं ब्रह्मसत्तानतिरिक्तसत्ताकत्वरूपं प्रदर्शितम् ॥

अनन्तरं गुरुब्राह्मणान्नमस्कृत्य सर्वं रामस्वरूपत्वेन ज्ञात्वा सर्वेषां चरणकमलेषु प्रणमन्ति । यथा च—

जड चेतन जग जीव जत सकल राममय जानि ।
बन्दौ सबके पदकमल सदा जोरि जुग पानि ।
(बालका दो. ७)

" जगति यावन्तो जडाश्चेतनाश्च प्राणिनस्सन्ति सर्वान् राममयान् ज्ञात्वा सर्वेषां चरणकमलेषु अञ्जलिबन्धं कृत्वा वन्दे " इति । अत्र जडचेतनानां सर्वेषां ब्रह्मस्वरूपत्वं प्रदर्शितम् । रामनाममहिमकथनावसरे तुलसीदासा वदन्ति

' व्यापकु एकु ब्रह्म अविनासि ।
सत चेतन घन आनन्दरासी ॥ ' (बा-दो-२२)

" व्यापकमेकं ब्रह्माऽविनाशी
सच्चेतनं घनमानन्दस्वरूपम् " इति ।

अत्र ब्रह्मतत्त्वस्यैकत्वं व्यापकत्वं आनन्दस्वरूपत्वं सत्यत्वं च प्रदर्शितम् ॥

श्रीशिवो रामं सच्चिदानन्दस्वरूपत्वेन ज्ञात्वा अवन्दत । पार्वती तद् दृष्ट्वा विस्मयमाना अशङ्कत । तत्स्थलीयोऽयं श्लोकः—

ब्रह्म जो व्यापक विरज अज अकल अनीह अभेद ।
सोकि देह धारि होइ नर जाहि न जानत वेद ॥
(बा-दो-५०)

" यद् ब्रह्म व्यापकं विरजमजं अकलमनीहमभिन्नं तत्किं देहं धृत्वा मनुष्यो भवितुमर्हति " इति । अत्र ब्रह्मणोऽभिन्नत्वं प्रदर्शितम् ॥

रामस्य बाल्यलीलावर्णनावसरे गोस्वामिनो वदन्ति—

व्यापक ब्रह्म निरञ्जन निर्गुण वरात विनोद ।
सो अज प्रेम भगति वश कौसल्याके गोद ॥
(१९८)

" निर्गुणं व्यापकं ब्रह्म भक्तिवशात्कौसल्याया उत्सङ्गे वर्तते " इति ।

व्यापक अकल अनीह अज निर्गुण नाम न रूप ।
भगतहे तुनाना विधि करत चरित अनूप ॥ (२०५)

" उक्तब्रह्म भक्तार्थं नानाविधचरित्रं करोति " इति । अत्र ब्रह्मणो निर्गुणत्वनामरूपरहित [illegible] ॥

सीताविवाहानन्तरं प्र[illegible] वदति [illegible] ।

[illegible]

व्यापक [illegible] रघुत्त [illegible]
चिदान [illegible]
महिमा [illegible]
जो [illegible]

" यस्य ब्रह्मणः स्वरूपं वेदो नेति नेति इति कथयित्वा प्रदर्शयति, यत् कालत्रयेऽप्येकरसं वर्तते " इति। अत्रापि ब्रह्मणो निर्गुणत्वमुक्तम् ॥

अथायोध्याकाण्डस्थश्लोका उच्यन्ते।

" सो जानई जेहि देहु जनायी। जानत तम्हहि तुह्मइ होइ जाइ। यस्य ज्ञानं ददासि स तत्त्वं जानाति, त्वां ज्ञात्वा त्वमेव भवति। अत्र तत्त्वज्ञानाद् ब्रह्मसायुज्यं प्राप्यत इत्यर्थस्सूचितः ॥

गुरुरिन्द्रस्य ' रावणवधो न भवेत्किम् इति चिन्तां अपनयन्वदति—

अगुन अलेप अमान एक रस। रामुसगुन भये भगत प्रेमवस। २१८ " भक्तप्रेमवशादगुणो भवति " इति। अत्र रामाख्यस्य ब्रह्मणो निर्गुणत्वमुक्तम् ॥

अथारण्यकाण्डस्थश्लोका उच्यन्ते—

रामः पञ्चवट्यां वसति। तदा ज्ञानवैराग्यादिकं पृच्छन्तं लक्ष्मणं प्रति वदति।

मैं अरु मोर तोर तैं माया। जेहि बसकीन्हे जीवनिकाया। १४

" अहं, मम, त्वं, तव, इयमेव माया यया च जीवसमूहो वशीकृतः "

धर्म तैं बिरति जोगतें ज्ञान। ज्ञान मोच्छ-प्रद वेद

[illegible] मोक्षप्रदमिति वेदो [illegible] कारणवशाज्जीवो [illegible] भवति इत्यादिना ज्ञात [illegible] अद्वैतसिद्धान्तः [illegible]

शरभङ्गमुनेः देहत्यागानन्तरं तुलसीदासा वदन्ति—

" तातें मुनि हरिलीन न भयइ प्रथमहि भेद
भगतिव रलयऊ ॥ ८

मुनिर्ब्रह्मलीनो नाभवत्, यतः प्रथमतो भेदभक्तिवरं प्राप्तवान्। अत्र भेदबुद्धिरूपप्रतिबन्धवशात् ब्रह्मसायुज्यं मुनिना न प्राप्तमिति स्पष्टं उक्तम् ॥

शिवः पार्वतीं प्रति वदति—

उमा कहउँ मैं अनुभव अपना। सत हरि भजन जगत सब सपना। ३९ उमे अहं स्वानुभवं कथयामि " मामेकं शरणम् व्रज " इतिवत् एकत्वेन हर्यभेदप्रतिपत्तिः सत्या, जगत् स्वप्नः। अत्र जगतः स्वप्नवन्मिथ्यात्वं उक्तम् ॥

पंपावर्णनावसरे शिवो वदति

" मायाच्छन्न न देखि जैयेसे निर्गुन ब्रह्म। ४०

यथा मायाच्छन्नो निर्गुणम् ब्रह्म न पश्यति। अत्र मायायाः निर्गुणब्रह्मसाक्षात्कारप्रतिबन्धकत्वं उक्तम् ॥

अथ किष्किन्धाकाण्डस्थश्लोका उच्यन्ते। सुग्रीवो रामं स्तुवन्वदति—

सत्रु मित्र सुख दुःख जग माहीं मायाकृत परमार्थ नाहीं। सुखदुःखादीनां सर्वेषां मिथ्यात्वमेव ' न तात्विकत्वमित्युक्तम् ॥

अङ्गदं खिन्नं दृष्ट्वा जाम्बवानुपदिशन्वदति

तात राम कहुनर जनि मानहु।
निर्गुन ब्रह्म अजित अज अजानहु। (२६)

तात रामं नरमिति न मन्यस्व, निर्गुणं ब्रह्मेति जानीहि, अत्र रामस्य निर्गुणब्रह्मत्वमुक्तम् ॥

अथ लङ्काकाण्डस्थश्लोकाः। रावणविजयानन्तरं मातलिः रामं स्तुवन् वदति। तुह्म (त्वं) सम रूप

ब्रह्म अविनासी। सदा एक रस सहज उदासी (उदासीनः)।

अकलं अगुन अघ अनघ अनामय।
अजित अमोघशक्ति करुनामय॥ २६

ब्रह्मा रामं स्तुवन् वदति—

अब दीनदयाल दया करिये।
मति मोरि विभेदकरी हरि ये।
जेहि ते विपरीत क्रिया करि ये।
दुःख सो सुख मानि सुखी चरिये॥

दीनदयालो मदीयां भेदबुद्धिं निवारय। यया विपरीतकर्म करोमि दुःखं सुखं मत्वा सानन्दं सञ्चरामि॥

शिवः पार्वतीं प्रति वदति।—
ताते उमा मोच्छ नहिं पावा।
दशरथ भेद भक्ति मन लावा॥
उमे दशरथो मोक्षं न प्राप्तवान्।
यतस्तस्य मनसि भेदबुद्धिरासीत्।
अत्र भेदबुद्धेर्मोक्षप्रतिबन्धकत्वं व्यक्तम्॥
अथ उत्तरकाण्डस्थाः श्लोका उच्यन्ते।

रामो रावणादिकं जित्वा अयोध्यायां सुखं वसति। तत्स्थलीयाः श्लोकाः—

ग्यान् गीरा गोतीत अज माया मन गुन पार।
सोइ सच्चिदानन्दघन कर नरचरित उदार॥ २५

यन्निर्गुणम् मायातीतं सच्चिदानन्दघनं तद्रामरूपेणावतीर्य नरचरितं अनुकरोति॥

काकभुशुण्डिर्गरुडस्य निकटे रामगुणान् वर्णयति। तत्स्थलीयाः श्लोका दृश्यन्ताम्।

सो दासी रघुवीरकै समुझे मिथ्या सोपि॥
छूटन राम कृपाविनु नाय कहौं पदरोपि।

सा माया रघुवीरस्य दासी यद्यपि मिथ्या तथाऽपि रामकृपां विना न निवर्तते। अत्र मायाया मिथ्यात्वं प्रदर्शितम्॥

अगुन अदभ्र गिरा गोतीता।
सबदर्शी अनवद्य अजीता।
विमल निराकर निर्मोहा।
नित्यनिरञ्जन सुख सन्दोहा॥

अत्र रामरूपस्य ब्रह्मणः निर्गुणत्वादयो दर्शिताः॥

मुधाभेद जद्यपि कृत माया। विनु हरि जाई न कोटि उपाया। यद्यपि मायाप्रयुक्तभेदो मिथ्या तथापि हरिं विना कोट्युपायैरपि सा न निवर्तेत। अत्र मायाप्रयुक्तभेदस्य मिथ्यात्वं प्रदर्शितम्॥

काकभुशुण्डिः स्वनिकटे रामेण यदुक्तम् तदनुवदति—

"माया संभव भ्रम सब अबन नापि हहिं ताहि।

जान सु ब्रह्म अनादि।
अज अगुण गुनाकर मोहि।

मायाप्रयुक्तभ्रमस्त्वां न व्याप्नुयात् यतो मामनाबगुणाजब्रह्मत्वेन त्वं ज्ञातवान्। मायाप्रयुक्तभेदबुद्धिर्न स्यादिति सूचितम्॥

कलियुगीयप्राणिनां वर्णनावसरे श्लोकाः—

लाशे करन ब्रह्म उपदेसा।
अज अद्वैत अगुन हृदयोर [illegible]
अकल अतीह अ[illegible]वित [illegible]
अनुभवगम्य [illegible]परमेश्[illegible]
मनगोती[illegible] रघुत्त[illegible]
निर्विक[illegible]
सोतै [illegible]
बारि[illegible]

स मुनिर्ब्रह्मोपदेशं कर्तुं प्रारभत। तमजमद्वैतमकलमगुणम् अकलमनीहमनामरूपम्। .... सत्वं तस्य तव इति भेदो नास्ति। यथा च जलतरङ्गयोर्भेदो नास्ति एवं वेदा गायन्ति। अत्र ब्रह्मणो निर्गुणत्वादिकमुक्त्वा "तत्त्वमसि" इति वाक्यबोधितजीवब्रह्माभेदो वर्णितः॥

"द्वैतबुद्धि विनु क्रोध किमि द्वैत कि विनु अज्ञान।

द्वैतबुद्धिं विना कथं क्रोधः। अज्ञानं विना कथं द्वैतत्। अत्र द्वैतस्य अज्ञानकार्यत्वमुक्तम्॥

निज प्रभुमय देख हिं जगत। केहि सन करहिं विरोध।

ये जगद् ब्रह्ममयं पश्यन्ति ते कं प्रति विरोधं कुर्युः। अत्र ब्रह्मसाक्षात्कारवतः स्वभिन्नपदार्थाभावात् कुत्रापि विरोधाभावस्सूचितः॥

भुशुण्डिः ज्ञानभक्त्योः को भेद इति पृच्छन्तं गरुडं प्रति वदति—

"ग्यान हिं भगति हिं अन्तर केता।
सकल कहौ प्रभु कृपा निकेता।
भगति हिं ज्ञान हिं नहिं कछ भेदा।
उभय हरहिं भवसंभवखेदा॥

ज्ञानभक्तयोः को भेद; प्रभो कृपानिकेतन सर्वं वद इति प्रश्नः। ज्ञानभक्त्योर्नकोपि भेदः। उभयमपि भवजन्यखेदं हरति। तत्र तत्र भेदज्ञानस्यानर्थहेतुत्वं भेदज्ञानवतां शरभङ्गदशरथादीनामपि मोक्षाभावं च वर्णयद्भिर्गोस्वामिभि[illegible] [illegible]ज्ञानरूपत्वकथनेन अद्वैतसिद्धान्त- [illegible] तु भेदबुद्धिपूर्वकोपासनादि [illegible] [illegible]रितमानसे बहुषु स्थलेषु [illegible] कथं ज्ञानमेव [illegible] [illegible]सीदासानां मते

ज्ञात [illegible]

आतम् अनुभवसुख सुप्रकासा।
तब भवमूल भेदभ्रम नासा।

सोऽहमस्मीत्यखण्डाकारा वृत्तिः सैव परमप्रचण्डा दीपशिखा। आत्मानुभवसुखस्य सुप्रकाशो यदा तदा भवमूलभेदभ्रमो नश्यति। अत्र सोऽहमस्मीत्यभेदबोधे भेदभ्रमनाश उक्तः॥

जौ निरविघन् पन्थ निर्वहइ।
सो कैवल्य परं पद लहई।

यो निर्विघ्नं ज्ञानमार्गं निर्वहति स कैवल्याख्यं परमं पदं लभते। अत्र ज्ञानान्मोक्षप्राप्तिरद्वैतवादिभिः अभ्युपगतकैवल्यस्यैव परममोक्षत्वं सूचितम्। पूर्वोक्तोदाहरणैरिदमेव निश्चीयते। भगवान्लीलया सगुणत्वेन प्रतीयमानोऽपि तत्त्वतो निरञ्जनः एक एव। अर्थादद्वैतसच्चिदानन्दं परब्रह्मैव। तदेव परमार्थसत्यम्। तद्भिन्नः प्रपञ्चः मायाविलासस्स्वप्नवन्मिथ्या च। एवं श्रीरामचरितमानसे अद्वैतभावा एव पौनःपुन्येन निरूपिताः। अन्ततस्तुलसीदासमधिकृत्यापि-ते पञ्चदेवोपासकाः। तेषां न कमपि देवं प्रति विरोधभावः। अपि तु भगवति रामे इष्टदेवत्वबुद्धिः। ते सर्वं श्रीराममयत्वेनापश्यन्। तेषां दृष्ट्या रामो न देशकालादिपरिच्छिन्नः। सीतापि पृथक्सत्तावती न। साक्षाद्राम एव शुद्धबुद्धमुक्तैकरसाद्वितीयपरमार्थतत्वम्; तदधीना या माया तस्या विलास एवायं प्रपञ्चः। अतो राम एव शिवः, शिव एव रामः॥

अन्ते भगवन्तं प्रार्थ्य तुलसीदासानां श्लोकमेकं उक्त्वा लेखनादस्माद्विरमामि।

"वामाङ्के च विभाति भूधरसुता देवापगा मस्तके
भाले बालविधुर्गले च गरलम् यस्योरसि व्यालराट्।
सोऽयं भूतिविभूषणः सुखकरः सर्वाधिपस्सर्वदा
शर्वस्सर्वगतश्शिवः शशिनिभः श्रीशङ्करः पातु माम्॥

(अयोध्याका॰ श्लो २)

(घ) महाभारते अद्वैतभावाः

(पूना - ब्रह्मश्री K. V. अनन्तनारायणशास्त्रिणः)

மஹா பாரதத்திலே அத்வைத தத்துவம் பல ஸம்வாதங்களாலே விளக்கப்படுகின்றது. ஜனமேஜய வைசம்பாயன ஸம்வாதத்திலே "ஸாங்கியர் 'புருஷர் பலர்' என்ருலும் வியாஸர் புருஷைகத்வத்தையே நிருபிக்கிருர்" என்றுள்ளது. "ஜீவர்கள் பலரும் நிர்குணராகி நிர்குணப் பிரும்மத்திலே புகுகிருர்கள்." என்று பிரும்மா ருத்ரரைப் பார்த்துச் சொல்வதும் அத்வைதத்தையே குறிக்கின்றது. இவ்வாறே மனு பிருஹஸ்பதி ஸம்வாதமும் நிர்குணப் பிரும்மத்தைப் பிரதிபாதிக்கின்றது. ஸுவர்ச்சலா ச்வேதகேது ஸம்வாதமும் விஞவிடையாய் அமைந்து அத்வைதசித்தாந்தத்திலுள்ள சந்தேகங்களை நிவர்த்திக்கின்றது.

'மோக்ஷதர்ம'த்திலே 'ஸர்வகர்மபரித்யாகத்தோடு விளங்கும் அத்வைத ஞானமே மோக்ஷ ஸாதனம் என்பதும் பீஷ்மயுதிஷ்டிர ஸம்வாதத்திலே ஜீவன் முக்தியும் கூறப்படுகின்றன. சிவ விஷ்ணு அபேதம் மோக்ஷ பர்வத்திலும் பாரதத்தின் எஞ்சிய பகுதியான 'ஹரிவம்ச'த்திலும் விளக்கப் பெற்றுள்ளது.

Advaita Siddhānta is expounded in the many Samvādas (dialogues) of the Mahābhārata. Janamejaya - Vaiśampāyana samvāda states that although the Sānkhyas postulate many purushas, Vyāsa expounds the doctrine of one and only the Purusha. Brahmā explains to Rudra that the jivas become Nirguṇa and enter Nirguṇa Brahman. Manu-Brhaspathi samvāda explains the Nirguṇa Brahman concept; and Suvarchalā's questions and Śvetaketu's answers resolve all doubts about Advaita Siddhānta.

Moksha Dharma states that Jñana entailing the cessation of all Karma is requisite for release; and Bhishma-Yudhisthira Samvada describes the jīvan-muktā; while Siva-Vishnu-abheda is explicitly stated in Moksha Parvan and in Hari-Vamśā (the sequel to the Mahabharata). All these statements are characteristic features of ādvaitic thought.

महाभारतोक्ताखिलाम्नायशीर्ष-
प्रकृष्टान् विशिष्टान्निवृत्यात्मधर्मान् ।
विविच्य प्रवक्तुं प्रवर्ते प्रहर्ष-
प्रकर्षेण सन्तोऽत्र हृष्टा दयन्ताम् ॥

तथा हि—मोक्षधर्मे षट्त्रिंशाध्याये पुरुषविषये एकत्वानेकत्वाभ्यां सन्दिहानेन जनमेजयेन परिपृष्टो वैशम्पायनः, "बहवः पुरुषा लोके सांख्ययोगविचारिणाम्" इति सांख्ययोगयोरनेकपुरुषसिद्धान्तमभिधाय "समासतस्तु यद्व्यासः पुरुषैकत्वमुक्तवान्" इति व्यासाभिप्रायस्याद्वैतसिद्धान्तेनैककण्ठ्यं वर्णयति ॥

तथा रुद्रं प्रति ब्रह्मोक्तावपि—

"बहूनां पुरुषाणां च यथैका योनिरुच्यते ।
तथा तं पुरुषव्याघ्रं परमं सुमहत्तरम् ।

निर्गुणं निर्गुणा भूत्वा प्रविशन्ति सनातनम् ॥"

इति एक एव परमात्मा योनिः, जीवानां सर्वेषां ज्ञानेन भेदविशये योनिभूतपरमात्मप्रवेश एव मोक्षः इति प्रतिपादनं अद्वैतमतमेव सूचयति ॥

भीष्मस्तवराजे—

"यमनन्यो व्यपेताशीः आत्मानं वीतकल्मषम् ।
इष्ट्वाऽऽनन्त्याय गोविन्दं ... ॥
नान्यभक्ताः क्रिया विद्यते ... ।
यमेकं बहुधा ... परमेश्व ...
... रघूत्त ...

इत्यत्र एकस्य पर ...
तत्रैव "यं पु ...
तस्मै मोक्षा ...
निगदि ...

मनुबृहस्पतिसंवादे—

" रसैर्विमुक्तं विविधैश्च गन्धैः
अशब्दमस्पर्शमरूपवच्च ।
अग्राह्यमव्यक्तमवर्णमेकं
पञ्चप्रकारान् ससृजे प्रजानाम् ॥
न स्त्री पुमान्नापि नपुंसकञ्च
न सन्न चासत्सदसच्च तन्न ।
नोष्णं न शीतं मृदु नापि तीक्ष्णं
नाम्लं कषायं मधुरं न तिक्तम् ॥
न शब्दवन्नापि च गन्धवत्तत्
न रूपवत्तत्परमस्वभावम् ।
स्पर्शं तनुर्वेद रसं च जिह्वा
घ्राणं च गन्धान् श्रवणे च शब्दान् ।
रूपाणि चक्षुर्न च तत्परं यत्
गृह्णन्त्यनध्यात्मविदो मनुष्याः ॥ "

ब्रह्मरुद्रसंवादे—

" ते त्रयः परमात्मा हि स नित्यो निर्गुणः स्मृतः "
इत्यादिना निर्गुणत्वमात्मनः स्पष्टमुपपादितम् ॥

" यथा च कश्चित्परशुं गृहीत्वा
धूमं न पश्येत् ज्वलनं च काष्ठे ।
तद्वच्छरीरोदरपाणिपादं
छित्वा न पश्यन्ति ततो यदन्यत् ॥
तान्येव काष्ठानि यथा विमथ्य
[illegible] च पश्येज्ज्वलनं च योगात् ।
[illegible]स्यार्थैः
[illegible]स्वभावम् ॥ "

[illegible] योगेनात्रैवाध्य-
[illegible]मिति गम्यते ॥

इत [illegible]
[illegible]दा ।
[illegible]ता ॥ "

इति सुवर्चलया पृष्टः श्वेतकेतुः,

" यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
वर्तते तेन लोकोऽयं संकीर्णश्च भविष्यति ।
संकीर्णे च तथा धर्मे वर्णस्सङ्करसेति च ॥ "

इत्यादिना 'स्वयं ज्ञानी अपि लोकसंग्रहार्थं कर्माणि करोमि' इति वदन् ज्ञानकर्मणोर्विरोधं श्रेयसोः कर्मानपेक्षत्वं च दर्शयति ॥

सुवर्चला—

" सदाहंकारशब्दोऽयं व्यक्तमात्मनि संश्रितः ।
न वाचस्तत्र वर्तन्ते इति मिथ्या भविष्यति ॥ "

श्वेतकेतुः—

" अहंशब्दो ह्यहंभावो नात्मभावे शुभव्रते ।
न वर्तन्ते परेऽचिन्त्ये वाचः सगुणलक्षणाः ॥ "

सुवर्चला—

" अहंभावोऽत्र को नाम आत्मभावस्तथैव च । "

श्वेतकेतुः—

" मृन्मयो हि घटाभासः तादृग्भाव इहेष्यते ।
अहंभावः परेऽचिन्त्ये ह्यात्मभावो महान्परः ॥
न वाचस्तत्र विद्यन्ते इति नैव विरुद्ध्यते । "
इति ॥

अत्र शब्दार्थयोः वाच्यवाचकभावसम्बन्धोऽस्ति चेत् कथं अहंशब्दः आत्मवाचको न भवति इति प्रश्ने कृते अहंशब्दः आत्मनि न मुख्यया वृत्त्या प्रवर्तते, किं तु अहमर्थे इति उत्तरिते, ततः को नामाहमर्थादन्यः आत्मेति पृष्टे, मृदि घटाभासवत् आत्मनि अहंभावोऽपि आभासः इत्यहमर्थादात्मनो विवेकं दर्शयित्वा कल्पिताकारोपधानेन प्रवर्तमानः शब्दः न शुद्धाधिष्ठानपर्यन्तं प्रवर्तते राजतोपधानेन प्रवर्तमानः शुक्तौ रजतशब्द

इव । अतः कल्पितोपाधिनिमित्तोऽहंशब्दो न शुद्धे प्रवर्त्तत इति न विरुद्ध्यते इति सन्दर्भार्थः ॥

एतेन वस्तुतः एकस्य शुद्धस्यैव परमात्मनः औपाधिकमेव जीवत्वमिति विशदीकृतम् ॥

सुवर्चला—

"निर्विकारं ह्यमूर्तं च निरंशं सर्वगं यथा ।
दृश्यते च वियन्नित्यं तादृगात्मा न दृश्यते ॥"

श्वेतकेतुः—

"त्वचा स्पृशति वै वायुं आकाशस्थं पुनः पुनः ।
तत्स्थं गन्धं तथाऽऽघ्राति ज्योतिः पश्यति चक्षुषा ॥
तमो रश्मिगणश्चैवं मेघजालं तथैव च ।
वर्षतारागणश्चैव नाकाशं दृश्यते पुनः ॥
आकाशस्याप्यथाकाशं सद्रूपमिति निश्चितम् ।
सदर्थे कल्पितं सर्वं तत्सत्यं विष्णुरेव च ॥
केवलज्ञानमात्रं तत्तस्मिन्सर्वं प्रतिष्ठितम् ॥"

"आकाशवत्प्रपञ्चाधिष्ठानं ब्रह्म कुतो न दृश्यते" इति प्रश्ने, "आकाशस्थस्य वाय्वादेरेव ग्रहणमस्ति, न तु विविच्याकाशस्य । यदा लौकिकाकाश एवेयं गतिः तदा कैव कथा तस्यापि कारणे ततोऽपि सूक्ष्मे परमात्मनि । ततः सदर्थे कल्पितं सर्वम् । तच्च सद्रूपं सर्वाधिष्ठानत्वाद्व्यापकम् । तत्रोपाधिमाश्रित्य प्रवर्तमाना शब्दाः शुद्धे न साक्षात्प्रवर्तन्ते" इत्युत्तरमुक्तम् । अस्यामाख्यायिकायां "मृण्मयो हि घटाभासः" इति दृष्टान्तेन वाचारम्भणश्रुतिप्रतिपादितं प्रपञ्चमिथ्यात्वमुक्तम् । आत्मरूपेणोपक्रम्य 'तत्सत्यं विष्णुरेव च' इति परमात्मरूपेणोपसंहारात् महावाक्यार्थः जीवब्रह्मैक्यं, 'सदर्थे कल्पितं सर्वं' इत्यनेन "ऐतदात्म्यमिदं सर्वम्" इति श्रुतिप्रतिपादितं निष्प्रपञ्चत्वं सार्वात्म्यं चाभिहितम् । तथा 'केवलज्ञानमात्रं तत्' इति ज्ञानस्वरूपत्वमपि ॥

मोक्षधर्मे—

"सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ।
यदा पश्यति भूतात्मा ब्रह्म सम्पद्यते तदा ॥
प्रवृत्तिलक्षणो योगः ज्ञानं सन्न्यासलक्षणम् ।
तस्माज्ज्ञानं पुरस्कृत्य सन्न्यसेदिह बुद्धिमान् ॥
सन्न्यासी ज्ञानसंयुक्तः प्राप्नोति परमां गतिम् ।
अतीतोऽद्वन्द्वमभ्येति तमोमृत्युजरातिगः ॥
तस्माद् गुणं च तत्त्वञ्च परित्यज्येह तत्त्ववित् ।
क्षीणदोषो गुणान्हित्वा क्षेत्रज्ञं प्रविशत्यथ ॥
निर्द्वन्द्वो निर्नमस्कारो निस्स्वधाकार एव च ।
अचलश्चानिकेतश्च क्षेत्रज्ञः स परो विधिः ॥"

इति सर्वकर्मपरित्यागपूर्वकज्ञानस्यैव मोक्षजनकत्वं स्पष्टमभिहितम् ॥

२४७ तमाध्यायेऽपि—

"कर्मणा जायते प्रेत्य मूर्तिमान् षोडशात्मकः ।
विद्यया जायते नित्यमव्ययो ह्यक्षरात्मकः ॥
कर्मणः फलमाप्नोति सुखदुःखे भवाभवौ ।
विद्यया तदवाप्नोति यत्र गत्वा न शोचति ॥"

इत्यादिना दुःखसंसृष्टमेव कर्मफलमभिधाय विद्याया एव नित्यनिरतिशयमोक्षप्रतिपादनेन पूर्वोक्त एवार्थो दृढीकृतः ।

रुद्रं प्रति—

"पुरुषश्चैको निर्गुणो विश्वरूपो निर्गुणं तं पुरुषं चाविशन्ति"

हित्वा गुणमयं [illegible] वेद्यते [illegible]
उभे सत्यानृ[illegible]

इत्यादिब्रह्मोक्ति[illegible]

"मन्ता [illegible]

द्रष्टा द्रष्टव्यं श्राविता श्रावणीयम्
ज्ञाता ज्ञेयं सगुणं निर्गुणं च ॥"

"विचित्ररूपो विश्वात्मा एकाक्षर इति स्मृतः ।"
"एष वै विक्रियापन्नः सृजत्यात्मानमात्मना ।"
"त्वमन्नं प्राणिभिर्भुक्तं अन्तर्भूतो जगत्पते ।
नित्यप्रवृद्धः पचसि त्वयि सर्वं प्रतिष्ठितम् ॥"

इत्यादिना सर्वात्मत्वं परमात्मनो विशदीकृतम् ॥

"त्यक्त्वा यः प्राकृतं कर्म नित्यमात्मरतिर्मुनिः ।
यथा वारिचरः पक्षी सलिलेन न लिप्यते ॥

एवमेत्र कृतप्रज्ञः भूतेषु परिवर्तते ।
अशोचन्नप्रहृष्यंश्च समो विगतमत्सरः ॥"

इति भीष्मयुधिष्ठिरसंवादे जीवन्मुक्तिः प्रतिपादिता ॥
कैराते-" शिवाय विष्णुरूपाय शिवरूपाय विष्णवे ।
दक्षयज्ञविनाशाय हरिरुद्राय ते नमः ॥"

मोक्षपर्व-नारायणीये—

" कपर्दी जटिलो मुण्डः श्मशानगृहसेवकः ।
नारायणात्मको ज्ञेयः पाण्डवेय युगे युगे ॥"

भारतशेषे हरिवंशे च—

" अहं त्वं सर्वगो देव त्वमेवाहं जनार्दन ।
आवयोरन्तरं नास्ति शब्दैरर्थैर्जगत्पते ॥"

इत्यादिना शिवविष्ण्वोरभेदो वर्णितः ॥

(ङ) शिवरहस्ये अद्वैतभावाः

(प्रान्तियङ्करै - सुब्रह्मण्यशास्त्री)

'சிவ ரஹஸ்யம்' ஞானகாண்டம் உபாஸனா காண்டம் என்று இரண்டு காண்டங்களையும் கொண்டு பன்னிரண்டு அம்சங்களாகப் பிரிக்கப்படுகின்றது. முதலம்சத்திலேயே அநேக அத்வைதக் கொள்கைகள் விளக்கப்படுகின்றன. 'ரஜ்ஜு ஸர்ப்பம் போன்றது ஜகத்', 'பிரும்மம் நிர்குணம்', பிரபஞ்சம் மித்யை', 'பிரும்மம் ஒன்று உள்ளது எனினும் மாயையால் அது இந்திரன் மித்ரன் முதலி... நாமரூபங்களையும் குணங்களையு ... ப்படுகின்றது,' "சிருஷ்டி ... ன நிர்க்குணப்பொருள் ... ந்து பல ஜீவர்களைப் ... குும்", நானாவிதப் ... இது அன்று, ... கூறியே விளக்கு ... ளது" ஒன்றே ... மே மோக்ஷ ... கருத்துகள்

மேலும், "ரிபுகீதை என்று அத்வைதத்திற்கு அடிப்படையாக அமைந்த நூலும் சங்கர பகவத்பாதர்களின் அவதாரத்தைக் கூறும் பகுதியும் சிவரஹஸ்யத்திலுள்ளன" என்பதே இந்நூல் முழுவதும் அத்வைதத்தை விளக்குவதேயாகும் என்பதை மறுக்க முடியாத வகையிலே நிரூபிக்கின்றது.

Śiva-rabasya consists of two Kāṇḍas Jnāna and Upāsana and of twelve aṁśas (sections). In the first aṁśa occur passages which describe (1) the universe as a Kalpana like the serpent in the rope, that Brahman is Nirguṇa that prapañca (universe) is Mithyā and that the One only exists, though because of Māyā, man thinks of it as with names, forms and gunas, Īndra, Mitra and the others. Creation is explained as the of the multiform manifestationunchanging One and its appearance in the several bodies as jivas. "There is no multiplicity whatsoever

but only Brahman which can be realised only by negations, "Not this., not this." Jnāna that One only exists is stated to be the requisite for moksha.

Ṛbhu Gita which is the bedrock of Advaita and the prophecy about the advent of Śankara Bhagvatpāda are irrefutable proofs of the advaitic purport of Śiva-Rahasya,

विदितं खल्विदं तत्रभवतां भवतां यत् शिवरहस्याख्यमितिहासरत्नं अतिगमीरं द्वादशांशात्मकं ज्ञानोपासनाख्यकाण्डद्वयगतं सकलमपि विषयजातं प्रतिपादयतीति । अत्रापि समुपलभ्यन्ते विस्पष्टं अद्वैतभावाः ॥

तथा हि प्रथमांशे ।

रज्जौ कल्पितदन्दशूकसदृशं
देवा न किंचिज्जगत्
जातं चापि जनिष्यमाणमपि
वा भूतं हि रज्जौ भ्रमः ।
तद्वत्सर्पदशोपमानमिति या
धीर्वै परं मुक्तये
सा धीश्चापि निरन्तरं भगवतः
शंभोः कृपायाः फलम् ॥ (१, २, ६४)

अत्र प्रपंचस्य रज्जुसर्पवत् कल्पितत्वं तद्धियः मुक्तिहेतुत्वं ईश्वरानुग्रहलभ्यत्वं चेति अद्वैतिनामभिप्रेता अर्थाः स्पष्टीकृताः ॥

"सोऽन्तिके हि दूरस्थः स बाह्याभ्यन्तरेऽपि च ।
स सत्यं ज्ञानमानन्दो गुणैर्हीनश्च
निर्गुणः ॥" (१, ३, ९)

इत्यत्र परमात्मनः निर्गुणत्वं स्फुटम् ॥

"ज्ञानमात्मा त्वहं ब्रह्म ज्ञानं शान्तिरनुत्तमा ।
स एकः परमात्मा हि नेह नानास्ति किंचन ॥"
(१-३-१९)

"यस्यैकत्वं हि विज्ञाय शोकं तरति मानवः ।
एकमेव महादेवं इन्द्रमित्रादिभिः सुरैः ॥
नामरूपगुणैश्चैव मायया मन्यते जनः ॥"

अत्र प्रपञ्चमिथ्यात्वम्, एकस्यैव परमात्मनः मायया अनेकधाभावश्च कथितः ॥

"इदं जगत्पुरा सृष्ट्वा तस्मिन् प्राविशदीश्वरः ।
व्याकुर्वन्नामरूपे तु व्यवहारीव भासते ॥"
(१,३,३१)

अत्र परमात्मनः अविकृतस्यैव देहेषु प्रवेशेन जीववत् अवभासः स्पष्टीकृतः ॥

"नेति नेति च वेदान्तैः तल्लिङ्गं प्रतिपाद्यते ।
तदेव ब्रह्म त्वं विद्धि नेह नानास्ति किंचन ॥"
(१,३६,७)

अत्र ब्रह्मणः निर्धर्मकतया इतरनिषेधमुखेन प्रतिपाद्यत्वं प्रपंचमिथ्यात्वं च प्रथितम् ॥

वेदरहस्यकथननामके सप्तचत्वारिंशेऽध्यायेऽपि अद्वैतस्यैव वेदार्थत्वं संकीर्तितम् । तथा हि—

"स एवानन्दमूर्तिर्हि तस्यानन्दैकलेशतः ।
प्रियात्मकं जगज्जालं कुरुते दुःखदायकम् ॥
असत्यमेतच्च जडं स्वसत्यात् सत्यवत् स्थितम् ।
करोति च जडं सर्वं चेतनानां स चेतनः ॥
संगवानिव विश्वेशोऽसंगः सर्वान्तर[illegible]
यस्य ज्ञानेन सर्वेषां मुक्त[illegible]
सर्वं शिवतया भाति परमे[illegible]
स षोडशात्मा [illegible]रघूत्त[illegible]
(१-४७)

अत्र प्रा[illegible]
प्रातीतिकः [illegible]

ज्ञानस्यैव मुक्तिहेतुत्वं इत्येषोऽप्यर्थः स्फुटीकृतः ॥

मां विज्ञायेदमखिलं जानन्त्येकं सनातनम् ।
ममैकत्वपरिज्ञानात् को मोहोऽत्र निर्लिपकाः ॥
(१-५०-१७)

अत्र एकत्वज्ञानपरपर्यायस्य अद्वैतसाक्षात्कारस्य संसारनिवृत्तिहेतुत्वं कथितम् ॥

पञ्चकोशविहीनश्च पञ्चभूतातिगो ह्यहम् ।
पञ्चप्राणातिगश्चाहं क्वेदं देहेन्द्रियं सुराः ॥
(१, ५०, २६)

इत्यत्र अन्नमयादिषु आनन्दमयस्य कोशत्वेन पञ्चसंख्यागणनात् तस्य अब्रह्मत्वं सूच्यते, पुच्छब्रह्मवादश्च दृढीक्रियते ॥

इयं मम परा शक्तिः विक्षेपावरणात्मिका ।
यथा संमोहिता यूयं जगत्सासुरमानुषम् ॥ (१-५१)

इत्यत्र मायाशक्तेः आवरणविक्षेपशक्तिमत्वमुक्तम् ॥

मत्प्रसादादावरणशक्तिनाशः प्रजायते ।
यावत्कर्मविपाको हि देहिनां भवतां सुराः ॥
विक्षेपाय च सा शक्तिः अनुवर्तेत सत्तमाः॥(१-५१)

अत्र ज्ञानादावरणशक्तिमात्रनाशः, जीवन्मुक्तौ विक्षेपशक्तिमात्रस्यानुवृत्तिः सूचिता ॥

ममैवांशो जीव एव स्वाज्ञानात् परिजृंभते ।
ब्रह्मैव संसरत्येषः स्वाविद्यातो दिवौकसः ॥
स्वविद्यया मुच्यते च तपसा केवलेन हि ।
एक [illegible] तश्च [illegible]शिव एव हि ॥

[illegible] च ऋभुगीतायाम्—

[illegible]भवा ज्ञानसिद्ध्यै
[illegible]धरा. ।

[illegible]

[illegible]वादान्यहो ॥

इति श्रीपरमेश्वरानुग्रहेण व्यासस्य सूत्रलाभं प्रपञ्च्य

जन्माद्यस्य यतोऽस्य चित्रजगतो
मिथ्यैव तत्कारणम्
ब्रह्म ब्रह्मात्मनैव
प्रकृतिपरमदो वर्तमानं विवर्तेत् ।
श्रुत्या युक्त्या यतो वा इति पदघटि-
तोद्बोधतो वक्ति शंभुं
नाणुः कालविपाक-
कर्मजनितेज्याचोदना वै मृषा ॥
(६, २, २)

इति जन्मादिसूत्रविवरणपरश्लोके प्रपञ्चमिथ्यात्वं स्फुटमाह ॥

न वक्तुश्चात्मा वै स खलु शिव भूमा हि विहितः
तथैवायुर्देहे अरनिवहतश्चक्रगमने ।
अदृश्योऽप्यात्मा वै स हि सुदृशतश्चान्ननिवहैः
शिवो वामोदेवो मुनिरपि च सार्वात्म्यमभजन् ॥
(६,२,२२)

इत्यत्र च 'न वक्तुरात्मोपदेशा'सूत्रविवरणव्याजेन मुक्तौ वामदेवस्य सार्वात्म्यं अद्वैतशास्त्रसंमतं व्याचष्टे ॥

अन्यत्रापि 'ब्रह्ममात्रमिदं सर्वं ब्रह्ममात्रमसन्न हि ।
ब्रह्ममात्रमनन्तात्मा ब्रह्ममात्रं परं सुखम् ॥' (६,१४,९)

इत्यादिषु सर्वं ब्रह्ममात्रमिति प्रपञ्चितम् । किं बहुना । सर्वाऽपि ऋभुगीता वासिष्ठरामायणादिवत् अद्वैतव्यतिरिक्तं न किंचिद्वदति ॥

अपि चात्रैव नवमांशे षोडशाध्याये श्रीशङ्करभगवत्पादानामवतारः अद्वैतस्थापनं इत्यादयो विषयाः सविस्तरं वर्णिताः । तदेतदेव समस्तस्य शिवरहस्यस्य अद्वैते परमादरमाविष्करोति इति सर्वं सुस्थम् ॥

(च) श्रीमद्भागवते अद्वैतभावाः

(मण्डलीक - वेङ्कटेश्वरशास्त्रिणः)

உலகில் மிகவும் பிரஸித்தி பெற்ற பக்தி நூல்களில் உயர்ந்ததான ஸ்ரீ மத் பாகவதத்தின் பரமதாத்பர்யமும் அத்வைதக்கொள்கையையே அனுசரிக்கிறது. ஸ்ரீமத் பாகவதத்தின் முடிவில் ஸர்வ வேதாந்தங்களுக்கும் ஸாரமான அத்விதீய ப்ரம்மஸ்வரூபம் என்று சொல்லப்படுகிற ஜீவப்ரம்ம ஐக்யத்தில் நிஷ்டையையுடையது; கைவல்யப்ரயோஜனத்தைக் கொடுப்பது'' (12-13-12) என ஸ்ரீ ஸூதபுராணிகர் ஸ்ரீ மத் பாகவததாத்பர்யத்தை விளக்கியுள்ளார்.

''நான் உபதேசிக்கும் தத்வஞானத்தை அறிந்துகொள். நானே முதலில் இருந்தேன். சிருஷ்டிக்குப் பின்பும் இருக்கிறேன். கடைசியில் மிச்சப்படுவதும் நானே. வஸ்துவின்றி தோற்றமே மாயை'' என்பதாக பகவான் பிரபஞ்சம் மித்யை என்றும் ப்ரம்ம ஸ்வரூபமே ஸத்யமென்றும் உரைத்தார்.

''ஆகையால் ஸமஸ்த பிரபஞ்சமும் ஸ்வப்னம்போல் பொய்யானதே. மாயையால் உண்டாகி உள்ளதுபோல தோன்றுகிறது.'' (10-14-21) "ஸர்வஜீவர்களுக்கும் ஆத்மனுயுள்ள உன்னை உபநிஷத்துக்களால் குரு உபதேச மூலமாய் அறிந்தவர் பொய்யான ஸம்ஸாரஸாகரத்தை தாண்டுகிறவர்போலாவர்'' (10-14-22). இவ்விடம் '' ஸம்ஸாரம் பொய்; மோக்ஷம் புதியதாயுண்டாகிற அவஸ்தையன்று, நித்யாத்ம ஸ்வரூபமே," என்கிற தத்வங்கள் தோன்றுகின்றன.

''அறிஞர்கள் தேஹத்திலேயே அனாத்ம வஸ்துக்களை விலக்கி உன் ஸ்வரூபத்தைக் காண்கிறார்கள். கயிற்றில் ஸர்ப்பபாவனையை விலக்குவதின்றி ரஜ்ஜுஸ்வரூபத்தை யறிவது வேறு உண்டோ?" (10-14-27).

ஒரே ஈச்வரன் வெவ்வேறு குணங்களால் பிரம்மாவென்றும், விஷ்ணுவென்றும், சிவனென்றும் மூன்று பெயர்களை யடைகிறானென்னும் அத்வைதக் கொள்கையும் ஸ்ரீ பாகவதத்தில் பல இடங்களில் கூறப்பட்டிருக்கிறது.

"ஸத்வம், ரஜஸ், தமஸ் என்று மூன்று குணங்களும் ப்ரகிருதியைச் சேர்ந்தவை. ஒரே புருஷன் இந்த குணங்களை ஆச்ரயித்து ஸ்ருஷ்டி, ஸ்திதி, ஸம்ஹாரங்களில் பிரம்ம, விஷ்ணு, சிவ என்ற பெயர்களை யடைகிறான்". (1-2-23).

நான், பிரம்மா, சிவன் மூவரும் ஜகத்துக்குக் காரணம். குணமயமான மாயையை யெடுத்து ஸ்ருஷ்டி ஸ்திதி ஸம்ஹாரம் செய்வதால் அந்தந்த கார்யத்துக்குத் தகுந்த பெயரை அடைகிறேன்.

"எங்களை எவன் வேறாகப் பார்க்கிறதில்லையோ அவனே மோக்ஷத்தை யடைகிறான்" (4-7-54).

That the subject natter of the Bhagavatam is the sublime Vedanta philosophy cannot be gainsaid. It is pointed out that in the beginning, the middle and in the end, the work teaches the identity of the individual soul with the supreme soul. which is none other than Advaita philosophy. In the very first stanza जन्माद्यस्य यतः—सत्यं परं धीमहि The illusion of the dvaitic world made up of three gunas, Satva, Rajas and Tamas is shown distinctly as also the oneness of the jiva and Brahman. Several stanzas have been quoted to establish the fact that the purport of the work is the truth that, the Dvaita world is all illusion and that nothing but Truth exists. Copious quotations hava been made and the following f... Sruti Gita is illustrative.

This gives an ... is seen ... the various sch... deny the ... blishes the subl...

Jivanm... n. The a... words of Sr... se nobody w... portion of ... nd sacrifices if he ... The ... ly the ... fruits in th... spectrav

महाहं ...

establish the same fact. Thus ths noble purpose of Bhagavatam consists in teaching and infusing Bhakti, love of God and thus removing from the mind all impure thoughts by filling it with the love of Lord Krishna, and in the end, in the realization of the illusory nature of this visible world and the identity of the jiva with the Supreme Soul.

यस्त्वत्र बद्ध इव कर्मभिरावृतात्मा
भूतेन्द्रियाशयमयीमवलंब्य मायाम् ।
आस्ते विशुद्धमविकारमखण्डबोध-
मातप्यमानहृदयेऽवसितं नमामि ॥
(२ स्क, ३१ अ, १३ श्लों)

सुविदितमेवैतत्रभवतां भवतां सर्वेषां श्रीमद्भागवत-मित्येकं पुराणं महाभारतादिग्रन्थनिर्माणेऽप्यपरितुष्यता भगवता वेदव्यासेन रचितमिति । तदेतद्भागवतमादि-मध्यावसानेषु वैराग्योत्पादकमहापुरुषकथावर्णनद्वारा वैराग्यं, भगवल्लीलावर्णनद्वारा भगवति भक्तिं चित्तशुद्धिं चोत्पाद्य तद्द्वारा जीवब्रह्मैकत्वलक्षणं ज्ञान-मुत्पादयत् सर्ववेदान्तसारभूते तत्रैव परिसमाप्तं सत् मुक्तिप्रयोजनकमित्यत्र नास्ति संशयलेशोऽपि । एतदे-वोक्तं श्रीमद्भागवते—

"आदिमध्यावसानेषु वैराग्याख्यानसंयुतम् ।
हरिलीलाकथाव्रातामृतानन्दितसत्सुरम् ॥
सर्ववेदान्तसारं यद्ब्रह्मात्मैकत्वलक्षणम् ।
वस्त्वद्वितीयं तन्निष्ठं कैवल्यैकप्रयोजनम् ॥"
[illegible] १२, अ. १३, श्लो. १०-११)

[illegible] स्तुनः सर्ववेदान्त-
[illegible] विशेषणेन च तत्रैव
[illegible]
[illegible] मभिहितमिति

तत्र तावत् उपक्रमोपसंहारभूताभ्यामाद्यन्तकृतमङ्गल-श्लोकाभ्यामेतादृशात्मतत्त्वे भागवतस्य तात्पर्यमित्यवगन्तुं शक्यते । तथा हि—

"जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः ।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥
कस्मै येन विभासितोऽयमतुलो ज्ञानप्रदीपः पुरा
तद्रूपेण च नारदाय मुनये कृष्णाय तद्रूपिणा ।
योगीन्द्राय तदात्मनाऽथ भगवद्राताय कारुण्यतः
तच्छुद्धं विमलं विशोकममृतं सत्यं परं धीमहि ॥"

अत्राद्यश्लोके 'तेजोवारिमृदां यथा विनिमय' इत्यत्र मरुमरीचिकासु जलाध्यास इव, काचरूपमृत्तिकायां जलाध्यास इव, वारिणि काचाध्यास इवेति दृष्टान्तान्प्रदर्श्य 'यत्र त्रिसर्गो मृषा' इत्यत्र परब्रह्मणि सात्त्विकराजस-तामसप्रपञ्चसृष्टेर्मिथ्यात्वमभिधाय 'निरस्तकुहक' मित्यनेन द्वैतप्रपञ्चशून्यत्वमभिहितम् ॥

अन्तिमश्लोके च येन स्वयं ब्रह्मणः, ब्रह्मरूपिणा नारदाय, नारदरूपिणा व्यासाय, व्यासस्वरूपिणा श्रीशुकाय, श्रीशुकस्वरूपिणा भगवद्राताय च इति कथनेन जीवब्रह्मणोरेकत्वमेवाभिहितम् । तथा च उपक्र-मोपसंहाराभ्यां द्वैतप्रपञ्चशून्ये जीवाभिन्ने ब्रह्मणि भाग-वततात्पर्यं निश्चीयते ॥

एवं ब्रह्माणम् प्रति साक्षात् भगवता 'ज्ञानं परमगुह्यं मे' इत्युपक्रम्य,

अहमेवासमेवाग्रे नान्यद्यत्सदसत्परम् ।
पश्चादहं तदेतच्च योऽवशिष्येत सोऽस्म्यहम् ॥
ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि ।
तद्विद्यादात्मनो मायां यथाभासो यथा तमः ॥
(स्क २, अ. ९, श्लो. ३२. ३३)

इत्यादिना स्वात्मतत्त्वमभिहितम् । अत्र च प्रथमश्लोके सृष्टेः प्रागहमेक एवासम्, मदन्यत्किमपि स्थूलं वा सूक्ष्मं वा तत्परमज्ञानं वा नासीत् । सृष्ट्यनन्तरमपि अहमेवास्मि तदा यदेतद्दृश्यमानं जगत् तदपि अहमेवास्मि न मद्व्यतिरेकेणास्ति, लयानन्तरमपि योऽवशिष्यते सोऽप्यहमेवास्मि । यथा लोके घटोत्पत्तेः प्राक्, घटकाले, घटनाशानन्तरं च मृत्तिकैव अस्ति, एवमेव कालत्रयेऽपि अहमेवास्मि इत्यभिधाय, कालत्रयेऽपि सतः ब्रह्मस्वरूपस्य कुतो न भानं कालत्रयेऽप्यर्थस्य कुतो भानमित्याशङ्कायां द्वितीयः श्लोकः प्रारब्धः 'ऋतेऽर्थं' मिति, तत्र च वास्तविकप्रपञ्चरहितेऽप्यात्मनि प्रपञ्चभाने सतोऽपि ब्रह्मस्वरूपस्याभाने 'तद्विद्यादात्मनो माया' मित्यादिना विक्षेपावरणशक्तिमत्याः मायायाः प्रयोजकत्ववर्णनेन तादृशशङ्काद्वयं निराकृत्यासतोऽप्यर्थस्य मायावशाद्भाने 'यथाभास' इति, सतोऽप्यभाने 'यथा तम' इति दृष्टान्तद्वयमभिहितम् ॥

एतत्पर्यालोचने सर्वोऽपि द्वैतप्रपञ्चः कल्पित इति मिथ्याभूतद्वैतप्रपञ्चशून्यमेवात्मतत्त्वं भागवताभिप्रेतमिति स्वात्मतत्त्वप्रतिपादकभगवद्वचनेनैवावगम्यते ॥

एवं वत्सापहारसमये ब्रह्मकृतश्रीकृष्णस्तुतौ—

तस्मादिदं जगदशेषमसत्स्वरूपं
स्वप्नाभमस्तधिषणं पुरुदुःखदुःखम् ।
त्वय्येव नित्यसुखबोधतनावनन्ते
मायात उद्यदपि यत्सदिवावभाति ॥
एकस्त्वमात्मा पुरुषः पुराणः
सत्यः स्वयंज्योतिरनन्त आद्यः ।
नित्योऽक्षरोऽजस्रसुखो निरञ्जनः
पूर्णोऽद्वयो मुक्त उपाधितोऽमृतः ॥
(स्क. १०, अध्या. १४, श्लो. २१-२२)

इत्यत्राद्यश्लोके प्रथमचरणे जगतोऽसत्स्वरूपम्, स्वप्नाभमिति विशेषणद्वयेन अनृतत्वमस्तधिषणमिति विशेषणेन जडरूपत्वम्, पुरुदुःखदुःखमिति विशेषणेन दुःखरूपत्वं चाभिधाय एतादृशानृतजडदुःखात्मके प्रपञ्चे कथं सत्त्वादीनां भानमिति चाशङ्क्य, उत्तरचरणे एतादृशप्रपञ्चविलक्षणे सच्चिदानन्दस्वरूपे त्वयि अस्य प्रपञ्चस्य मायावशेन कल्पितत्वात् पुनस्तत्रैव लीनत्वादधिष्ठानगतमेव सत्त्वादिकमादाय जगदपि सदिव चिदिव सानन्दमिव भासत इति समाहितम् ॥ अनेन च द्वैतप्रपञ्चस्सर्वोऽपि मिथ्याभूत इति सर्वद्वैतप्रपञ्चशून्यमेव भगवत्स्वरूपमित्यवगम्यते । उपसंहृतमेतच्छ्लोकोक्तमेव भगवत्स्वरूपमुत्तरश्लोके ॥

उपसंहृत्य च तत्रैव तदनन्तरश्लोके

एवंविधं त्वां सकलात्मनापि
स्वात्मानमात्मात्मतया विचक्षते ।
गुर्वर्कलब्धोपनिषत्सुचक्षुषा
ये ते तरन्तीव भवानृताम्बुधिम् ॥ २३

इति गुरुरूपसूर्यानुग्रहलब्धोपनिषद्रूपदृष्ट्या सकलजीवानामपि स्वरूपभूतं पूर्वश्लोकोक्तमद्वितीयं ब्रह्मस्वरूपं त्वां स्वरूपत्वेन ये जनास्साक्षात्कुर्वन्ति ते जनाः मिथ्याभूतं संसारसमुद्रं तरन्तीवेति प्रतिपादितम् ॥

अत्र हि त्रयो विशेषाः । एकस्तु ज्ञानादेव मोक्ष इति । द्वितीयस्तु तरन्तीवेत्यत्र इवशब्देन तरणस्याप्यवास्तविकत्वं, तृतीयस्तु अहं [illegible] रूपत्वेन ज्ञानादेव मोक्ष इति [illegible] विद्यते [illegible] । [illegible] श्लोकचतुष्टयमारभ्य [illegible] त्परमेश्[illegible]

आत्मा[illegible] रघूत्त[illegible]
[illegible]

अज्ञानसंज्ञौ भवबन्धमोक्षौ
द्वौ नाम नान्यौ स्त ऋतज्ञभावात् ।
अजस्रनित्यात्मनि केवले परे
विचार्यमाणे तरणाविवाहनी ॥ २५

त्वामात्मानं परं मत्वा परमात्मानमेव च ।
आत्मा पुनर्बहिर्मृग्यः अहोऽज्ञजनताज्ञता ॥ २६

अन्तर्भवेऽनन्त भवन्तमेव
ह्यतत्त्यजन्तो मृगयन्ति सन्तः ।
असन्तमप्यन्त्यहिमन्तरेण
सन्तं गुणं तं किमु यन्ति सन्तः ॥ २७

अत्र प्रथमश्लोकेन रज्ज्वज्ञानेन रज्जौ सर्पाध्यासः रज्जुज्ञानेन तन्निवृत्तिरिति दृष्टान्तकथनपुरस्सरं स्वस्वरूपभूतपरब्रह्मस्वरूपं स्वरूपत्वेनाविजानतां तेनैवाज्ञानेन निखिलप्रपञ्चाध्यासः ज्ञानेनैव च तदज्ञानपूर्वकनिखिलप्रपञ्चनिवृत्तिरित्युपवर्ण्य ज्ञानादेव मोक्ष इति विशेषः प्रतिपादितः । द्वितीयश्लोके च यथा नित्यप्रकाशात्मके सूर्ये उदयास्तमयौ द्रष्टृभिरारोप्येते वस्तुतो न स्तः, एवमेव नित्यमुक्तस्वरूपे ब्रह्मणि अज्ञानप्रतीतावेव बन्धमोक्षौ, तस्मान्न वस्तुतोऽन्यौ स्त इति इवार्थ उपपादितः ।

तृतीयचतुर्थश्लोकयोः यस्य देहादेरनात्मनोऽध्यासात् स्वस्वरूपब्रह्मभावास्फुरणं तस्य देहादेः निराकरणपुरस्सरं स्वस्वरूपत्वेन ब्रह्मज्ञानांदेव मोक्ष इति तृतीयोऽपि विशेषः प्रतिपादितः । तथाचैतत्प्रकरणपर्यालोचने जीवब्रह्मणोरेकत्वं एकत्व[illegible] मोक्षः द्वैतस्य मिथ्यात्वं चावगतमिति [illegible] ॥

[illegible] न्दिनः स्तुवन्ति [illegible] ः भगवन्त-

ज्ञात [illegible]

[illegible] ।

त्रिगुणमयः पुमानिति भिदा यदबोधकृता
त्वयि न ततः परत्र स भवेदवबोधरसे ॥
(श्रु-गीता, श्लो-२५)

अत्रासतः कार्यस्योत्पत्तिरिति सतः नाश इति ये तार्किका वदन्ति, ये च द्वैतिनः सर्वेऽपि आत्मनि भेदं वदन्ति ये च मीमांसकाः कर्मफलं सत्यमिति वदन्ति ते सर्वेऽपि भ्रमैरेवैवमुपदिशन्ति । त्रिगुणमयः पुमानिति हेतोर्यद्भेदादिकं तैस्स्वीकृतं तत्सर्वं त्वद्विषयकाज्ञानकृतम् । तद्यज्ञानमस्तीत्याशङ्क्य तस्मादज्ञानात्परस्मिन् चिन्मात्रस्वरूपे त्वयि तदपि नास्तीत्युक्तं तत्रैव—

न यदिदमग्र आस न भविष्यदतो निधना-
दनुमितमन्तरा त्वयि विभाति मृषैकरसे ।
अत उपमीयते द्रविणजातिविकल्पपथैः
वितथमनोविलासमृतमित्यवयन्त्यबुधाः ॥
(श्लो-३७)

एतद् दृश्यमानं जगत् सृष्टेः पूर्वं नासीत् प्रलयात्परमपि न भविष्यत्यतो मध्यकालेऽपि चिन्मात्रस्वरूपे त्वयि मृषैव विभाति इत्यनुमीयते इत्युक्त्वा अत एव द्रव्यमात्राणां मृल्लोहादीनां कार्यविशेषप्रकारैः श्रुतिरूपमीयते जगदित्युपवर्णनपूर्वकं मिथ्याभूतमनोविलासमेतादृशं जगत् सत्यमिति ये जानन्ति ते हि अबुधा इत्युक्तम् ॥

पूर्वश्लोके आत्मभेदस्य भ्रमकल्पितत्वकथनेन ब्रह्मणि वस्तुतोऽज्ञानरहितत्वकथनेन चास्मिन् श्लोके जगतः मिथ्यात्वकथनेन चाज्ञानतत्कार्यरूपद्वैतवर्जितं जीवाभिन्नमात्मतत्त्वं भागवताभिप्रेतमिति गम्यते ॥

वत्सापहारसमये ब्रह्मकृतस्तुत्यनन्तरं स्वसंतानापेक्षयाऽपि गोगोपीनां कृष्णे प्रेम अधिकमिति शुकमुखादुपश्रुत्य राज्ञा पृष्टम्—

" ब्रह्मन् परोद्भवे कृष्णे इयत् प्रेम कथं भवेत् ।
योऽभूतपूर्वस्तोकेषु स्वोद्भवेष्वपि कथ्यताम् ॥
इति ।"

तदनु श्रीशुकेनैवं समाहितम्—

" सर्वेषामपि भूतानां नृप स्वात्मैव वल्लभः ।
इतरेऽपत्यवित्ताद्यास्तद्वल्लभतयैव हि ॥
तद्राजेन्द्र यथा स्नेहस्स्वस्वकात्मनि देहिनाम् ।
न तथा ममतालम्बिपुत्रवित्तगृहादिषु ॥"

इत्यारभ्य,

" तस्मात्प्रियतमः स्वात्मा सर्वेषामपि देहिनाम् ।
तदर्थमेव सकलं जगदेतच्चराचरम् ॥
कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम् ।
जगद्धिताय सोऽप्यत्र देहीवाभाति मायया ॥"
इत्यन्तेन ॥

अत्र हि सर्वेषामप्यात्मनि निरुपाधिकप्रेमविषयत्वमितरेषु भार्यापुत्रादिषु आत्मप्रेमाधीनप्रेमविषयत्वमित्युपवर्ण्य श्रीकृष्णस्य साक्षादात्मस्वरूपत्वेनात्मीयेभ्यः भार्यापुत्रादिभ्योऽपि प्रेमाधिक्यमित्युक्तम् । एतत्पर्यालोचने जीवब्रह्मणोरेकत्वे तात्पर्यमित्यवगम्यते ॥

नवाभवन् महाभागा मुनयोह्यर्थशंसिनः ।
श्रमणा वातरशना आत्मविद्याविशारदाः ॥
(स्क. ११, अ. २, श्लो. १९)

इत्यारभ्य,

त एते भगवद्रूपं विश्वं सदसदात्मकम् ।
आत्मनोऽव्यतिरेकेण पश्यन्तो व्यचरन्महीम् ॥"
अव्याहतेष्टगतयः सुरसिद्धसाध्य-
गन्धर्वयक्षनरकिन्नरनागलोकान् ।
मुक्ताश्चरन्ति मुनिचारणभूतनाथ-
विद्याधरद्विजगवां भुवनानि कामम् ॥
इति ॥

अत्र हि आत्मविद्याविशारदा मुनयः स्वकीयात्मसाक्षात्कारवैभवेन भगवत्स्वरूपभूतं स्थूलसूक्ष्मात्मकं जगत् वामदेववत् स्वाव्यतिरेकेण पश्यन्तः सर्वान्लोकान्मुक्ताश्चरन्तीत्युक्तम् । अत्र मुक्ताश्चरन्तीति जीवन्मुक्तिकथनेन भगवत्स्वरूपभूतं जगत् स्वाव्यतिरेकेण पश्यन्तीति कथनेन चाद्वैते तात्पर्यमवसीयते भागवतस्य । एवं तदनन्तरमप्येते निमिकृतसत्रयागं प्रति गताः, निमिना च "धर्मान् भागवतान् ब्रूत" इत्यादिना पृष्टास्सन्तः क्रमेण भागवतान् धर्मान् वक्तुं प्रवृत्ताः । तत्र हि प्रथममेतेषां मध्ये कविरिति कश्चन ऋषिः 'कायेन वाचा मनसेन्द्रियैरि' त्यादिना शरीरेन्द्रियादिकृतं कर्म नारायणायेति समर्प्यते चेत् भागवतधर्मो भवतीत्युक्त्वा किमेवं परमेश्वरभजनेन ? अज्ञानकृतस्य भयस्य ज्ञानैकनिवर्त्यत्वादित्याशङ्कायामिदमाह—

" भयं द्वितीयाभिनिवेशतः स्या-
दीशादपेतस्य विपर्ययोऽस्मृतिः ।
तन्मायाऽतो बुध आभजेत्तं
भक्त्यैकयेशं गुरुदेवतात्मा ॥
अविद्यमानोऽप्यवभाति हि द्वयो-
र्ध्यातुर्धिया स्वप्नमनोरथौ यथा ।
तत्कर्मसंकल्पविकल्पकं मनो
बुधो निरुन्ध्यादभयं ततः स्यात् ॥ इति ॥

अत्र हि प्रथमश्लोके यस्मादीश्वरानुग्रहरहितस्येश्वरमायया स्वस्वरूपास्फुरणे विपरीता[illegible] सूक्ष्मशरीरादिरूपद्वितीयाभिनिवेशाद्भयं [illegible] विद्यते [illegible] तमाभजेदित्युक्त्वा [illegible]त्परमेश्व[illegible] भक्तिरित्याशङ्क्य [illegible] रघूत्त[illegible] रथाविव ध्या[illegible] क[illegible] चारिणी [illegible] समा[illegible] ता[illegible]

एकादशस्कन्धे तत्र तत्र विस्तरेणोक्तज्ञानयोगस्य संक्षेपेण प्रतिपादनपरेऽष्टाविंशाध्याये साक्षात् भगवता श्रीकृष्णेनोद्धवं प्रति "परस्वभावकर्माणि न प्रशंसेन्न गर्हयेत्" इत्यादिना परस्वभावकर्मणां निन्दा वा स्तुतिर्वा न कार्येत्युपक्रम्य, तत्र हेतुत्वेन "किं भद्रं किमभद्रं वा द्वैतस्यावस्तुनः कियत् । वाचोदितं तदनृतं मनसा ध्यातमेव च ॥" इति श्लोकेन वाङ्मात्रस्य द्वैतस्य मिथ्यात्वमुपवर्ण्य, मिथ्याभूतस्य कथमर्थक्रियाकारित्वमित्याशङ्कायाम्,

"छायाप्रत्याह्वयाभासा ह्यसन्तोऽप्यर्थकारिणः ।
एवं देहादयो भावा यच्छन्त्यामृत्युतो भयम् ॥"

इति श्लोकेन प्रतिबिम्बप्रतिध्वनिरज्जुसर्पाभासदृष्टान्तैरसतामपि देहादीनां मृत्युमभिव्याप्य, भयादिरूपार्थक्रियाहेतुत्वमित्युपवर्ण्य,

प्रत्यक्षेणानुमानेन निगमेनात्मसंविदा ।
आद्यन्तवदसज्ज्ञात्वा निस्सङ्गो विचरेदिह ॥

इति श्लोकेन प्रत्यक्षानुमानागमप्रमाणैरात्मानुभवेन चाद्यन्तवतः प्रपञ्चस्यानृतत्वं ज्ञात्वैतादृशे द्वैतप्रपञ्चे परस्वभावकर्मादिरूपे सङ्गवर्जितः जीवन्मुक्तस्सन्नस्मिन् लोके सञ्चरेदित्युपसंहृतम् । एतत्पर्यालोचने च स्पष्टमद्वैते भागवततात्पर्यमित्यवगम्यते ॥

अपि च तदनन्तरमुद्धवकृतप्रश्नस्य श्रीकृष्णसमाधानपर्यालोचनेनापि एवमेवेति गम्यते ।

नैवात्मनो न देहस्य संसृतिर्द्रष्टृदृश्ययोः ।
[illegible] स्यादुपलभ्यते ॥
[illegible] ज्योतिरनावृतः ।
[illegible] तिः ॥

[illegible] यागुणस्यात्म-
ज्ञात [illegible] य दृश्यस्य
[illegible] क्षाभि-
[illegible] ही-

कृत्य उभयोः पृथग्विवेकाभावनिबन्धनभ्रमवशादेव संसार इति —

यावद्देहेन्द्रियप्राणैरात्मनः सन्निकर्षणम् ।
संसारः फलवान् तावदपार्थोऽप्यविवेकिनः ॥
अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते ।
ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ॥

इत्यादिभिः पञ्चभिः श्लोकैरुपवर्ण्य,

यथा हिरण्यं स्वकृतं पुरस्तात्
पश्चाच्च सर्वस्य हिरण्मयस्य ।
तदेव मध्ये व्यवहार्यमाणं
नानापदेशैरहमस्य तद्वत् ॥
न यत्पुरस्तादुत यन्न पश्चात्
मध्ये च तन्न व्यपदेशमात्रम् ।
भूतं प्रसिद्धं च परेण यद्यत्
तदेव तत्स्यादिति मे मनीषा ॥
अविद्यमानोऽप्यवभासते यो
वैकारिको राजस सर्ग एषः ।
ब्रह्म स्वयंज्योतिरतो विभाति
ब्रह्मेन्द्रियार्थात्मविकारचित्रम् ॥

इति त्रिभिः श्लोकैरात्मनस्तत्त्वं प्रपञ्चस्य मिथ्यात्वं चाह भगवान् । तत्र प्रथमश्लोकेन यथा हिरण्यं सर्वेषां हिरण्यविकाराणां स्वोत्पत्तिप्राक्काले स्वनाशोत्तरकाले च हिरण्यमिति व्यवह्रियमाणं सत् मध्यकाले कटककुण्डलादिशब्दैर्व्यवह्रियमाणमपि तदेव स्यात् तद्वत् अहमेवास्य प्रपञ्चस्य कारणभूतो नानाव्यवहारालम्बनं न मत्तः पृथक् वस्त्वस्ति इति कालत्रयेऽपि ब्रह्मस्वरूपत्वमेवाभिधाय द्वितीयश्लोकेन पूर्वोत्तरकालयोरसतः प्रपञ्चस्य मध्यकालेऽपि वस्तुतोऽसत्वमेव, तथापि मध्यकाले घटपटादिव्यपदेशमात्रमेव स्यादिति प्रपञ्चस्य मिथ्यात्वमभिधाय, तादृशमिथ्याभूतेन्द्रियार्थात्मविकारचित्रस्वरूपेण ब्रह्मैव भातीति प्रपञ्चस्य मिथ्यात्वं ब्रह्मणस्तत्त्वं च तृतीयश्लोके

प्रतिपादितम्। एतादृशतत्त्वविज्ञानेन मिथ्याभूतप्रपञ्च-निरसनेन पूर्वोक्तात्मानात्माविवेकनिबन्धनसंसारहेतुभ्रान्तिं निराकृत्य स्वानन्दतुष्टः निखिलभोगेभ्यः उपरमेतेत्यु-पसंहृतम्। एतत्पर्यालोचनेऽपि भागवतस्याद्वैते तात्पर्यं अवधार्यते॥

द्वादशस्कन्धे पञ्चमाध्याये परीक्षिन्महाराजाय भाग-वतमुपदिश्य गमनसमये श्रीशुकेन "त्वन्तु राजन् मरिष्येति पशुबुद्धिमिमां जहि" इत्युपक्रम्य,

घटे भिन्ने यथाकाश आकाशः स्यात् यथा पुरा।
एवं देहे मृते जीवो ब्रह्म संपद्यते पुनः॥
मनः सृजति वै देहान् गुणान् कर्माणि चात्मनः।
तन्मनः सृजते माया ततो जीवस्य संसृतिः॥

इत्यादिना जीवस्य ब्रह्मभावं द्वैतस्य मिथ्यात्वं चाभिधाय,

"अहं ब्रह्म परं धाम ब्रह्माहं परमं पदम्।
एवं समीक्षन्नात्मानमात्मन्याधाय निष्कले॥
दशन्तं तक्षकं पादे लेलिहानं विषाननैः।
न द्रक्ष्यसि शरीरं च विश्वं च पृथगात्मनः॥

इति भागवतसारत्वेनान्ते प्रतिपादितम्॥

शिवविष्ण्वोश्च स्वरूपतो न भेदः किंतु गुणभेद-प्रयुक्त एव भेदः इति स्पष्टमुक्तं भागवते तत्र तत्र। तथा हि चतुर्थस्कन्धे

"अहं ब्रह्मा च शर्वश्च जगतः कारणं परम्।
आत्मेश्वर उपद्रष्टा स्वयं दृगविशेषणः॥

आत्ममायां समाविश्य सोऽहं गुणमयीं द्विज।
सृजन् रक्षन् हरन् विश्वं दध्रे संज्ञां क्रियोचिताम्॥
त्रयाणामेकभावानां यो न पश्यति वै भिदाम्।
सर्वभूतात्मनां ब्रह्मन् स शान्तिमधिगच्छति॥"

इति॥

—०—

(छ) देवीभागवते अद्वैतभावाः

(आङ्गरै. रङ्गस्वामिशास्त्रिणः)

தேவீ பாகவதத்தில் அத்வைதபாவங்கள் நிரம்பவுள்ளன. முதல் ஸ்கந்தத்தில் 5-வது அத்யாயத்தில் ''பொய்யான பிரபஞ்சத்தை எப்படி சிருஷ்டிக்கிருய்?'' என்று தேவி கேட்கப்படுகிருள். 15-வது அத்யாயத்திலே ''இது எல்லாம் நானே; என்றுமுள்ள பொருள் வேறு இல்லை'' என்றுள்ளது. 18-வது அத்யாயத்திலே "நானே எப்பொழுதும் பிரும்மமும் ஜீவனும்; பேத புத்தி ஸம்ஸாரத்திலே யுள்ளது. இது அவித்யை; இது மாறுவதே வித்யை. வெயில் இல்லையாலுல் நிழலின் சுகம் அறியப்படாது என்பது போல அவித்யை இல்லையாலுல் வித்யை அறியப் படாது'' என்று தேவி கூறுகிருள்.

நான்காம் ஸ்கந்தம் 18-வது அத்யாயத்திலே, சிலந்தியின் உதாரணத்தால் பிரும்மமே உலகிற்கு அபின்னநிமித்தோபாதானம் என்னுங் கொள்[illegible] விளக்கப்படுகிறது.

ஏழாம் [illegible] திலே, ''[illegible] [illegible]ரும்மா அது சித்; [illegible] மன்று இ[illegible] கூறப்ப[illegible] 'பரம[illegible] [illegible]பொழுது தே[illegible] [illegible]

ஜீவன்முக்தியுண்டு; 'தத்த்வமஸி' முதலிய மகாவாக்யங்கள் ஜீவப்ரும்மைக்யத்தைத் தெரிவிப்பன'' என்று அத்வைதமே விளக்கப் படுகின்றது. 27-வது அத்யாயத்திலும் 'அஞ்ஞான நாசத்தாலே புதிதாக ஒன்றும் ஏற்படுவதில்லை; உள்ளதே அறியப்படு கின்றது' என்று அத்வைதப்படி மோக்ஷ ஸ்வரூபம் விளக்கப்படுகின்றது.

பதினொன்ருவது ஸ்கந்தத்திலும், தேவி! நான் பிரும்மமே; துக்கம் என்னைச் சாராது; நான் ஸச்சிதானந்தரூபன்'' என்று சிந்தனை செய்யவேண்டும் என்று அத்வைத மார்க்க உபாஸனையே உபதேசிக்கப்படுகின்றது.

The Devi Bhāgavata is full of Advaitic passages. "HoW do you create the unreal world?" is the question asked of the Devi (Skandha 1, Adhyaya 5). "All this I am; there is no other lasting object" says the Devi (1. 15). "I am ever the Brahman and the Jiva. The idea of difference is in Samsāra; it is Avidyā; its destruction is Vidyā; without the sun's heat, the delight of a shady place will not be known; so, Avidyā helps in the realization of Vidyā." (1. 18).

The illustration of the spider (4, 18) signifies that the Brahman is abhinna-nimitta-kārana. "Brahman alone was in the beginning; it is Chit; its Śakti is Māyā, which neither is nor is not." (7, 32). "The Paramātman appears as Jiva because of upādhi. Ajñāna is the cause; if it is removed, life's purpose is achieved. There is Jivan-mukti (release when one is alive). The mahāvākyas like 'Tat-tvam-asi' teach the oneness of Jiva and Brahman" [illegible] new is obtained when [illegible] The Ever-existent is [illegible] the Upāsanā must [illegible]; sorrow cannot [illegible]nda" (the advaitic [illegible]ndha.

श्रात [illegible]

[illegible] तात्पर्यमिति

तत्र प्रथमस्कन्धे पञ्चमाध्याये—" कथं मिथ्या विश्वं सकलमपि चैका रचयसि " इति श्लोके मिथ्या विश्वं सर्वं कथं रचयसीति प्रश्नेन जगन्मिथ्यात्ववादद्वैत-सिद्धान्तो दृढीकृतः ॥

पञ्चदशाध्याये —" सर्वं खल्विदमेवाहं नान्यदस्ति सनातनम् " इति श्रूयमाणं श्लोकार्धं, " सर्वं खल्विदं ब्रह्म " इति छान्दोग्यश्रुतिरिव, यद्रजतमभात्सा शुक्तिरि-तिवत् बाधायां सामानाधिकरण्येन इदं सर्वमहमेवेति जगन्मिथ्यात्वमवगमयति ॥

अष्टादशाध्याये-" जीवो ब्रह्म सदैवाहं नात्र कार्या विचारणा ।

भेदबुद्धिस्तु संसारे वर्तमाना प्रवर्तते ॥
अविद्येयं महाभाग विद्या चैतन्निवर्तनम् ।
विद्याविद्ये च विज्ञेये सर्वदैव विचक्षणैः ।
विनाऽऽतपं च छायायां ज्ञायते हि कथं सुखम् ।
अविद्यया विना तद्वत्कथं विद्यां च वेत्ति वै ॥ "

इति त्रिभिः श्लोकैः ब्रह्मैव जीव इति, भेदो व्यावहारिक इति, विद्यया अविद्यानिवृत्तिरेव मुक्तिरिति च अद्वैत-सिद्धा अर्थाः स्फुटं निरूपिताः ॥

तृतीयस्कन्धे पञ्चमाध्याये " एकमेवाद्वितीयं यद् ब्रह्म वेदा वदन्ति हि । " इति श्लोकार्धेन " सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम् " इति छान्दोग्यश्रुत्येव सजातीयविजातीयस्वगतभेदशून्यं ब्रह्मैव निर्दिश्यते । षष्ठाध्याये च—

" दृश्यं च निर्गुणं लोके न भूतं न भविष्यति ।
निर्गुणः परमात्मासौ न तु दृश्यः कदाचन ॥ "

" निर्गुणश्च निरामयः " इति च नवमे । अत्र विनैव कंचिदाक्षेपं सर्वप्रसिद्धमेव निर्गुणत्वं हेतुतया निर्दिश्य तेन परमेश्वर्याः अविषयत्वं उपपादितम् ॥

एवं सप्तमाध्याये अष्टमश्लोकादारभ्य एकविंशश्लोकपर्यन्तेन भागेन अयमेव विषयः अहङ्कारसंवलितया वृत्त्या न शुद्धं गोचरीकर्तुं शक्यमिति सयुक्तिकं विस्तरेण प्रतिपादितम् ॥

चतुर्थस्कन्धे चतुर्दशाध्याये चतुर्दशश्लोके "पञ्चकोशान्तरगते पुच्छब्रह्मस्वरूपिणि" इति अद्वैतदर्शनस्य परमसिद्धान्तः उद्घोषितः । अष्टादशाध्याये "ऊर्णनाभवया तन्तुः" इति "यथोर्णनाभिस्सृजते गृह्णते च" इति मुण्डकश्रुतिनिरूपितोर्णनाभिदृष्टान्तेन ब्रह्मणः अभिन्ननिमित्तोपादानत्वं कथ्यते ॥

पञ्चमस्कन्धे—

> "अकर्ता पुरुषो द्रष्टा दृश्यं सर्वमिदं जगत् ।
> दृश्यस्य जननी सैव कृत्वा ब्रह्माण्डनाटकम् ॥"

इति पुरुषः सर्वदा दृग्रूपः कर्तृत्वादिकं तस्य नास्ति इत्युक्तम् ॥

सप्तमस्कन्धे अष्टाविंशाध्याये—"नमः कूटस्थरूपायै", "नेति नेतीति वाक्यैर्यद्बोध्यते सकलागमैः" इति च इदं न इदं नेति इतरनिषेधमुखेनैव प्रतिपादनीयेति कूटस्थरूपेति चोच्यते । एकत्रिंशाध्याये—"पुनस्त्वंपदलक्ष्यार्था प्रत्यगर्थस्वरूपिणी ।" इति जहदजहल्लक्षणया किंचिज्ज्ञत्वोपलक्षितचैतन्याभिन्नस्वरूपा देवीति अद्वैतसिद्धान्तः आविष्कृतः ॥

सप्तमस्कन्धे द्वात्रिंशाध्याये—

> "अहमेवास पूर्वं तु नान्यत्किंचिन्नगाधिप ।
> तदात्मरूपं चित्संवित्परब्रह्मैकनामकम् ॥
> अप्रतर्क्यमनिर्देश्यं अनौपम्यमनामयम् ।
> तस्य काचित्स्वतस्सिद्धा शक्तिर्मायेति विश्रुता ॥
> न सती सा नासती नोभयात्मा च विरोधतः ।
> तस्या जडत्वं दृश्यत्वात् ज्ञाननाशात्ततोऽसती ॥
> चैतन्यस्य न दृश्यत्वं दृश्यत्वे जडमेव तत् ।
> स्वप्रकाशं च चैतन्यं न परेण प्रकाशितम् ॥
> अत एव च नित्यत्वं सिद्धं संवित्तनोर्मम ।
> आनन्दरूपता चास्याः परप्रेमास्पदत्वतः ॥
> मा न भूवं हि भूयासं इति प्रेमात्मनि स्थितम् ।
> सर्वस्यान्यस्य मिथ्यात्वादसङ्गत्वं स्फुटं मम ॥

इति श्लोकैः स्पष्टमद्वैतसरणिः प्रादर्शि ॥

सप्तमस्कन्धे चतुस्त्रिंशाध्यायः समग्रोऽपि अद्वैतसिद्धान्तमेव दृढीकरोति ।

> "प्रकृतं श्रृणु राजेन्द्र परमात्माऽत्र जीवताम् ।
> उपाधियोगात्संप्राप्तः कर्तृत्वादिकमप्युत ॥
> अज्ञानमेव मूलं स्यात्ततः कामस्ततः क्रिया ।
> तस्मादज्ञाननाशाय यतेत नियतं नरः ॥
> एतद्धि जन्मसाफल्यं यदज्ञानस्य नाशनम् ।
> पुरुषार्थसमाप्तिश्च जीवन्मुक्तदशाऽपि च ॥
> अज्ञाननाशने शक्ता विद्यैव तु पटीयसी ।
> न कर्म तद्वन्नोपास्तिः विरोधाभावतो गिरे ॥
> यौगपद्यं न संभाव्यं विरोधात्तु ततस्तयोः ।
> तमःप्रकाशयोर्यद्वत् यौगपद्यं न संभवि ॥
> तत्त्वमस्यादिवाक्यं तु जीवब्रह्मैक्यबोधकम् ।
> ऐक्ये ज्ञाते निर्भयस्तु मद्रूपो हि प्रजायते ॥
> तत्पदस्य च वाच्यार्थो गिरेऽहं परिकीर्तितः ।
> त्वंपदस्य च वाच्यार्थो [illegible] ॥
> उभयोरैक्यमसि[illegible] विद्यते [illegible] ।
> वाच्यार्थयोर्वि[illegible]ात्परमेश्व[illegible]
> लक्षणाऽत[illegible] रघूत्त[illegible]
> चिन्मा[illegible] कथं [illegible]
> [illegible]

अत्र हि निगदव्याख्यातैः श्लोकैः तत्त्वमसिवाक्यार्थः आचार्यसिद्धान्तानुसारी निरूपितः ॥

सप्तविंशाध्याये च

> "मम संवित्परतनोः तस्य प्राणा व्रजन्ति न ।
> ब्रह्मैव सन् तदाप्नोति ब्रह्मैव ब्रह्म वेद यः ॥
> कण्ठचामीकरसमं अज्ञानात्तु तिरोहितम् ।
> ज्ञानादज्ञाननाशेन लब्धमेव हि लभ्यते ॥

इत्यादिना अज्ञानतिरोहितो ब्रह्मभावः ज्ञानादाविर्भवति न त्वपूर्वं किंचिज्जायत इत्यद्वैतसिद्धान्तः स्पष्टीकृतः ॥

एकादशस्कन्धे—

> "अहं देवि न चान्यो हि ब्रह्मैवाहं न शोकभाक् ।
> सच्चिदानन्दरूपोऽहं स्वात्मानमिति चिन्तयेत् ॥"

इत्यत्र आत्मेत्येवोपासीत, आत्मेति तूपगच्छन्ति इत्यादिशास्त्रार्थः प्रदर्शितः ॥

दिङ्मात्रमिह प्रदर्शितम्, पुराणरत्नमिदं आदित आरम्य आन्तं अद्वैतभावनिबिडितमिति सर्वेऽप्यास्तिकाः तदवगत्य निःश्रेयसं प्राप्नुयुरिति भगवतीमभ्यर्थये ॥

(ज) विष्णुपुराणे अद्वैतभावाः

(वेप्पत्तूर् - वैद्यनाथशास्त्रिणः)

பதினெட்டு புராணங்களுக்குள் திரிமதஸ்தர்களாலும் பிரமாணமாக ஒப்புக்கொள்ளப்பட்ட ஸ்ரீ விஷ்ணு புராணம் பெரும்பாலும் அத்வைதக்கொள்கைகளையே விளக்குகிறது.

"ஒரே ஈச்வரன் ரஜோகுணத்தை யடுத்து ஜகத்தை சிருஷ்டிப்பதால் பிரம்மா என்றும், ஸத்வகுணத்தையடுத்து பரிபாலிப்பதால் விஷ்ணு என்றும், தமோகுணத்தை யடுத்து ஸம்ஹரிப்பதால் ருத்ரன் என்றும் கூறப்படுகிருர்", "ஞானமயமான பிரம்மமே ஜகத்தின் ஸ்வரூபம். அதை சாச்வதருபமாக நி[illegible] மோஹிக்கிருர்கள்; பிரபஞ்சம் [illegible]யே. பிரம்மம் நித்ய [illegible] என்று பலவாறு அத் [illegible]ரைக்கப்பட்டிருக் [illegible]

[illegible] ...manuja and Sri [illegible] ...d the Vishṇu- [illegible] ...he nature [illegible] ...unlike the [illegible] to be [illegible] ...Madhva:

upon a close study we find in Vishṇupurāṇa nothing but the exposition of Advaitic principles as exemplifiedbelow.

"Then he becomes identical with Paramātman, dualism being the product of nescience" (6—7—93).

"The whole universe is of the nature of knowledge. The ignorant think that it is the external object." (2—14—33).

"When only one Atman exists in all bodies, the terms 'you' 'he' and 'I' are meaningless.

[illegible]ज्ञात [illegible]

विष्णुपुराणं हि वासुदेवादिशब्दाभिधेयं परमात्मानमेकमेव परमार्थसत्यं व्यवस्थापयितुं, तस्य नित्यनिर्मलविज्ञानरूपता, जीवाभेदः, प्रपञ्चात्मता, निर्गुणत्वं इत्येवमादिकं प्रतिपादयत्सर्ववेदान्तानां परमतात्पर्यविषयभूते अद्वैततत्व एव तात्पर्यवत् प्रतिभाति ॥

तथा हीदं पुराणरत्नम् (२-१४-२९)

" एको व्यापी समश्शुद्धः निर्गुणः प्रकृतेः परः ।
जन्मवृद्धयादिरहितः आत्मा सर्वगतोऽव्ययः ॥ "

इत्यात्मानं उपस्थाप्य

" तद्भावभावमापन्नस्ततोऽसौ परमात्मना ।
भवत्यभेदी भेदश्च तस्याज्ञानकृतो भवेत् । "

(६-७-९५)

" सितनीलादिभेदेन यथैकं दृश्यते नभः ।
भ्रान्तदृष्टिभिरात्माऽपि तथैकोऽपि
पृथक्पृथक् ॥ " (२-१६-२९)

" एकस्समस्तं यदिहास्ति किञ्चित्
तदच्युतो नास्ति परं ततोऽन्यत् ।
सोऽहं स च त्वं स च सर्वमेतत्
आत्मस्वरूपं त्यज भेदमोहम् ॥ "(२-१६-२३)

" विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते ।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥ "

(६-७-९६)

" तस्यात्मपरदेहेषु सतोऽप्येकमयं हि यत् ।
विज्ञानं परमार्थोऽसौ द्वैतिनोऽतथ्यदर्शिनः ॥ "

(२-१४-३१)

" तदेतदुपदिष्टं ते संक्षेपेण महामते ।
परमार्थसारभूतं यत्तदद्वैतमशेषतः ॥ "

(२-१६-१८)

इति द्वैतस्याताविकत्वकथनपूर्वकं अद्वैततात्त्विकत्वं कण्ठत एव अभिधत्ते ॥

" अपि च " ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः ।
तदेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम् ॥ "

(१-२-६)

" संज्ञायते येन तदस्तदोषं
शुद्धं परं निर्मलमेकरूपम् ।
सन्दृश्यते वाप्यवगम्यते वा
तज्ज्ञानमज्ञानमतोऽन्यदुक्तम् ॥ "

(६-५-८७)

इत्यादिपद्यैः निर्मलः नित्यज्ञानरूपः परमात्मैव परमार्थः, तदीयज्ञानमेव ज्ञानं, प्रपञ्चस्तु भ्रान्तिज्ञाननिबन्धनो मिथ्या तदीयज्ञानमज्ञानमेव इति प्रतिपादितं भवति । स एषोऽर्थो बहुधाऽस्मिन्ग्रन्थेऽभ्यस्तः । खाण्डिक्येनात्यन्तिकक्लेशनिवृत्तिसाधनं पृष्टः केशिध्वजः उपदिशति—

तदिदं ते मनो दिष्ट्या विवेकैश्वर्यतां गतम् ।
तच्छूयतामविद्यायाः स्वरूपं कुलनन्दन ॥

(६-७-१०)

अनात्मन्यात्मबुद्धिर्या चास्वे स्वमिति या मतिः ।
संसारतरुसंभूतिबीजमेतद् द्विधा स्थितम् ॥

(६-७-११)

आकाशवाय्वग्निजलपृथिवीभ्यः पृथक्स्थिते ।
आत्मन्यात्ममयं भावं कः करोति कलेवरे ॥

(६-७-१३)

मोहश्रमे शमं याते स्वस्थान्तःकरणः पुमान् ।
अनन्यातिशयाबाधं परं निर्वाणमृच्छति ॥

(६-७-२१)

निर्वाणमय एवायं आत्मा ज्ञानमयोऽमलः ।
दुःखाज्ञानमया धर्माः प्रकृतेस्ते तु नात्मनः ॥

(६-७-२२)

चतुर्विधोऽपि देहोऽयं [illegible] ॥
[illegible] विद्यते [illegible]

सद्भाव एवं [illegible]

ज्ञानं [illegible]

एतत् [illegible]

तस्मान्न विज्ञानमृतेऽस्ति किंचित्

क्वचित्कदाचिन्नृप वस्तुजातम् ।

विज्ञानमेकं निजकर्मभेद-

विभिन्नचित्तैर्बहुधाभ्युपेतम् ॥ (२. १२.४३)

वस्त्वस्ति किं कुत्रचिदादिमध्य-

पर्यन्तहीनं सततैकरूपम् ।

यच्चान्यथात्वं द्विज याति भूयः

न तत्तथा तत्र कुतो हि तत्त्वम् ॥ २-१२-४१

प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरम् ।

वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥

(६-७-५३)

ज्ञानस्वरूपो भगवान्यतोऽसा-

वशेषमूर्तिर्न तु वस्तुभूतः ।

ततो हि शैलाब्धिधरादिभेदाद्

जानीहि विज्ञानविजृम्भितानि ॥

परमार्थस्तु भूपाल संक्षेपाच्छ्रूयतां मम ।

(२-२४-२८)

परज्ञानमयोऽसद्भिर्नामजात्यदिभिर्विभुः ।

न योगवान् न युक्तोऽभू-

न्नैव पार्थिव योक्ष्यते ॥ (२-१४-३०)

त्वं राजा शिबिका चेयमिमे वाह्याः पुरस्सराः ।

अयञ्च भवतो लोकः न सदेतन्नृपोच्यते ॥

(२-१३-९२)

[illegible] राजभटादिकम् ।

[illegible] सङ्कल्पनामयम् ॥

(२-१३-९)

ज्ञात [illegible] प्रपञ्चिता

"अविद्यामोहितात्मानः पुरुषा भिन्नदर्शिनः ।

वदन्ति भेदं पश्यन्ति चावयोरन्तरं हर ॥

(५-३३-४९)

इति महादेवं प्रति श्रीनारायणवचनस्य,

जुषन्रजोगुणं तत्र स्वयं विश्वेश्वरो हरिः ।

ब्रह्मा भूत्वास्य जगतः विसृष्टौ सम्प्रवर्तते ॥

सृष्टं च पात्यनुयुगं यावत्कल्पविकल्पना ।

सत्त्वभृद्भगवान्विष्णुरप्रमेयपराक्रमः ॥

तमोद्रेकी च कल्पान्ते रुद्ररूपी जनार्दनः ॥

मैत्रेयाखिलभूतानि भक्षयत्यतिदारुणः ॥

(१-२-६१-६३)

इत्येतेषां पद्यानां च पर्यालोचने एक एव परमेश्वरः सृष्टिस्थितिसंहारानुगुणं अवाप्ततत्तद्गुणः ब्रह्मविष्णु-महेश्वराभिधो भवति इति स्फुटमवगम्यते । तथा स्रष्टा सृजति चात्मानमित्युक्त्या सृज्यमानस्य सर्वस्य स्रष्टृव्यति-रेकमुखेन सर्वस्य प्रपञ्चस्य ब्रह्मात्मता चावगम्यते ॥

तथा अद्वैतावबोधकेऽस्मिन्पुराणे तदुपोद्बलकतया जीवब्रह्माभेदोऽपि

तं ब्रह्मभूतमात्मानमशेषजगतः पतिम् ।

प्रपद्ये शरणं शुद्धं त्वद्रूपं परमेश्वर ॥

(१-१२-५६)

सर्वगत्वादनन्तस्य स एवाहमवस्थितः ॥

(१-१९-८५)

अहमेवाक्षयो नित्यः परमात्माऽऽत्मसंश्रयः ।

ब्रह्मसंज्ञोऽहमेवास्मि तथान्ते च परः पुमान् ॥

(१-१९-८६)

"सकलमिदमहं च वासुदेवः

परमपुमान् परमेश्वरः स एकः ।"

यदा तु शुद्धं निजरूपि सर्वं
कर्मक्षये ज्ञानमपास्तभेदम् ॥ (२-१२-४०)

इति पद्यैर्निरणायि ।

"यदा समस्तदेहेषु पुमानेको व्यवस्थितः ।
तदा हि को भवान् सोहमित्येतद्विफलं वचः ॥
(२-१३-९१)

इति जीवानां परस्परमप्यभेदप्रतिपादकं वचनं भक्तैः ब्रह्मणि संचिन्त्यमानानां नामरूपगुणानामपि नाद्वैतविरोधिता ; तेषां ब्रह्मणि परमार्थतोऽसत्त्वात् इतीममर्थं दर्शयति ॥

निर्गुणस्याप्रमेयस्य शुद्धस्याप्यमलात्मनः ।
कथं स्वर्गादिकर्तृत्वं ब्रह्मणोऽभ्युपगम्यते ॥
शक्तयस्सर्वभावानां अचिन्त्यज्ञानगोचराः ।
यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः ॥
(१, ३, १-२)

शुक्लादिदीर्घादिघनादिहीन-
मगोचरं यच्च विशेषणानाम् । (३-१७-३२)

शुद्धस्संलक्ष्यते भ्रान्त्या गुणवानिव योऽगुणः ।
(१-१४-३७)

न स्थूलं न च सूक्ष्मं तत्
न विशेषणगोचरम् । (१-९-५२)

त्वमक्षरमनिर्देश्यमचिन्त्यानामवर्णवत् ॥
(५-१-३९)

परज्ञानमयोऽसद्भिर्नामजात्यादिभिर्विभुः ।
न योगवान्न युक्तोऽभून्नैव पार्थिव योक्ष्यते ॥
(२-१४-३०)

परः पराणां परमः परमात्मात्मसंस्थितः ।
रूपवर्णादिनिर्देशविशेषणविवर्जितः ॥
(१, २, १०) इत्यादि ॥

मत्तः सर्वमहं सर्वं मयि सर्वं सनातने ।
(१-९-७५)

यत्र सर्वं यतः सर्वं यः सर्वं सर्वसंश्रयः ॥
(१-९-८४)

अत्र यः सर्वमिति सामानाधिकरण्यनिर्देशेन मृद्घट इत्यादाविव उपादानत्वं, यतः सर्वं मत्तः सर्वं इति निमित्तत्वं च ब्रह्मणः ब्रुवन् भिन्ननिमित्तोपादानकत्वप्रयुक्तां द्वैतप्रसक्तिं वारयति । एवमद्वैतसिद्धान्तैकपरिरब्धा जीवन्मुक्तिरपि—

सर्वभूतान्यभेदेन ददृशे स तदात्मनः ।
यदा ब्रह्मपरो मुक्तिमवाप परमां द्विजः ॥
(२-१६-२०)

इतीरितस्तेन स राजवर्यः
तत्याज भेदं परमार्थदृष्टिः ।
स चापि जातिस्मरणाप्तबोधः
तत्रैव जन्मन्यपवर्गमाप ॥ (२-१६-२४)

इत्यत्र स्फुटमभ्यधायि ॥

इत्थमिदं विष्णुपुराणं आमूलाग्रं परामृश्यमानं रसानां रसतमं आनन्दरूपमद्वैतमाविष्करोति ॥

इति विष्णुपुराणस्य [illegible] [illegible] ॥
अद्वैततत्त्व[illegible] विद्यते [illegible]

परमे[illegible]
रघूत्त[illegible]

(झ) इतरवैष्णवपुराणेषु अद्वैतभावाः

(उमयाळ्पुरं - रामनाथशास्त्रिणः)

விஷ்ணு புராணம் அத்வைதத்தையே போதிக்கிறதென்று நிரூபிக்கப்பட்டது. இப்பொழுது மீதியுள்ள மத்ஸ்ய நாரத கருட வராஹாதி வைஷ்ணவ புராணங்களுக்கும் அத்வைதத்திலேயே தாத்பர்ய மென்பதை இந்த வியாஸம் நிரூபிக்கிறது,

எவ்விதம் ஒரு கயிறு ஸர்ப்பம் தடிக்கம்பு ஜலதாரை முதலிய நாநாரூபங்களாக விகல்பிக்கப்படுகிறதோ அவ்விதமே ஆத்ம ஸ்வரூபமானது ஆகாயம் முதலிய பூதங்களாக விகல்பிக்கப்படுகிறது. (கருடபுராணம்). பரமார்த்தவஸ்து வென்பது இதரர்களுக்கு பேதத்தைக்காட்டுகிறது,ஸ்வயம்பேதமுள்ளதல்ல. இதைத்தவிர வேறு வஸ்து பொய்யே. (நாரதபுராணம்)

அநாதி அவித்யையால் ஜீவனிடம் ஜன்ம மரணங்கள் காணப்படுகின்றன. அவை அவனிடம் இல்லை. அந்த அவித்யை நிவர்த்தியடைந்தால் சுத்தபிரம்மமாக பிரகாசிக்கிறான் (பாத்மம்). நான் அவனே என்ற ஞானம் மோக்ஷகாரணம். வேறு மோக்ஷத்திற்கு வழி இல்லை. (நாரதீயம்).

Like *Vishnupuranah*, the other Vaishnavite puranas (viz). *Matsya*, *Nāradiya*. *Varana* and *Garuda* also expound the Advaitic truths in abunda[illegible] "As a rope shines forth like a ser[illegible]ick so also Brahman shines [illegible]" (*Garuda*). The nature [illegible]rom which speech retires [illegible]penetrate (*Nāradīya*)

[illegible]n the Jiva on [illegible]idyā; when it [illegible] Brahman.

[illegible]am are [illegible]n the

ज्ञात [illegible]

The knowledge derived from the text that thou art' is the means mukti.

तत्र भागवतविष्णुपुराणव्यतिरिक्तानां पाद्मनारदगारुडवाराहमात्स्यकौर्मादिवैष्णवपुराणानां अद्वैततत्त्वपरत्वं प्रदर्श्यते । तत्र इमानि प्रपञ्चमिथ्यात्वपरवचनानि भवन्ति । तथा हि गारुडे आचारखण्डे पठ्यते—

" सर्पधारादिभिर्भेदैरन्यथा वस्तुकल्पनम् ।
व्योमादिनामरूपाद्यैरन्यथाऽऽत्मा प्रकल्प्यते ॥
प्रत्यक्षमपि यद्द्रव्यं दुर्दर्शमिति भाष्यते ।
तथा हि रज्जुरुरगः शुक्तिकारजतं यथा ॥
आदावन्ते न सन्त्येव नामरूपक्रियादयः ।
सत्त्वावकल्पनं काले न सन्ति परमार्थतः ॥
मायाऽविचारसिद्धैव विचारेण विलीयते ।
आपातरमिता सापि कल्पनाकालवर्तिनी ॥ इति ।

नारदीये ज्ञानोपायवर्णनं च—

" नासद्रूपा न सद्रूपा माया नैवोभयात्मिका ।
अनिर्वाच्या ततो ज्ञेया भेदबुद्धिप्रदायिनी ॥
मायैवाज्ञानभेदेन बुध्यते मुनिसत्तम ।
अज्ञानं नाशयेद्योगी योगेन मुनिसत्तम ॥
तन्नाशे निर्मलं ब्रह्म प्रकाशयति पण्डित ।
यथा हस्तिपदे सर्वं पदमात्रं विलीयते ॥ इति ।

तत्रैव बृहदुपाख्याने श्रूयते —

भेदकारि परेभ्यस्तु परमार्थो न भेदवान् ।
मिथ्यैतदन्यद् द्रव्यं हि नैतद् द्रव्यमयं यतः ॥
इति ॥

तदेवं गरुडवचनैः रज्जुसर्पशुक्तिकारजतमरुमरीचिकादिदृष्टान्तोपन्यासपुरस्सरं वियदादिप्रपञ्चस्य मायिकत्वं प्रपञ्चितम् ॥

सा च माया अविचारक्षमा आपातरमणीया कल्पनामात्रजीवना विचारेणात्मविज्ञानेन च विलीयते इति सम्यगुपपादितं भवति । नारदीयवाक्यजातेनापि तस्याः मायायाः सदसद्भ्यां अनिर्वचनीयत्वं भेदबुद्धिजनकत्वं ज्ञाननाश्यत्वं च वर्णितम् । हस्तिपदादिदृष्टान्तेन च विष्ण्वाख्ये ब्रह्मणि लीयमानत्वं निरूप्य मिथ्यैतदन्यद् द्रव्यं हीत्यनेन द्रव्यशब्दोपात्तस्य मिथ्यात्वमपि स्पष्टमुच्यते ॥

पुनश्च तत्रैवान्ते पठ्यते—

यतो वाचो निवर्तन्ते न मनो यत्र संविशेत् ।
तद्विद्यादात्मनो रूपमसङ्गस्य चिदात्मनः ॥
यस्य सत्यतया सत्यं जगदेतद्विकाशते ।
निरंजनात्समुत्पन्नं जगदेतच्चराचरम् ॥
तिष्ठत्यप्येति वा यस्मिंस्तत्सत्यं ज्ञानमद्वयम् ।
ब्रह्माद्वितीयं तद्वन्दे नामरूपक्रियास्पदम् ॥ इति ॥

अनेनापि पारमार्थिकतत्वमेकमेव सच्चिदानन्दात्मकं प्रपञ्चश्च तदधीनसत्ताकः निरञ्जनपदोपादानेन तद्विवर्तश्चेत्युक्तं भवति ॥

जीवपरमात्मनोरभेदबोधकवाक्यान्युदाह्रियन्ते ।

तथा हि पाद्मे उत्तरखण्डे कालिन्दीमाहात्म्ये मृतं शिष्यं आक्रन्दतः बन्धून् इदमाह वेदायनो गुरुः—

अनाद्यविद्यया दृष्टे जीवे मरणजन्मनी ।
देहस्यात्मन्यहंबुद्ध्या मन्येते न हि तत्र ते ॥
तन्निवृत्तौ स त तद्ब्रह्म शुद्धं रूपविवर्जितम् ।
नित्यं विज्ञानमानन्दं स्वभासा भासयज्जगत् ॥

अतीतमिन्द्रियेभ्यस्तत्स्वप्रकाशकमात्मदृक् ।
अविषयं मनोदूरं बुद्धेरपि न गोचरम् ॥ इति ॥

अत्र सः तद्ब्रह्मेति स्फुटः ऐक्योपदेशः ॥

वाराहे च पञ्चमाध्याये रैभ्यवसुचरिते लुब्धकस्य निष्ठुरकस्य संयमननामानं विप्रं प्रति वचनम्—

परमात्मा त्वयं भूतैः क्रीडते भगवान् स्वयम् ।
कृता मायावली मन्त्रैस्तद्वदेतन्न संशयः ॥
अहंभावस्सदा ब्रह्मन्न विधेयो मुमुक्षुभिः ।
प्राणयात्रारतं सर्वं जगदेतद्विचेष्टितम् ॥
तत्राहमिति यः शब्दः स साधुत्वं न गच्छति ।
अद्वैतवासनासिद्धं योगाद्ब्रह्मशरीरकम् ॥
एवं ज्ञानं भवेत्कर्म कुर्वतोऽपि स्वजातिकम् ।
तस्मात्त्वमपि राजेन्द्र देवं नारायणं प्रभुम् ।
अभेदेन स्वदेहे तु पश्यत्वाराधयन् प्रभुम् ॥ इति ॥

अत्रापि जीवानां परमात्मरूपत्वं स्वाभाविकम्, अहंकारादिप्रयुक्तलौकिकवैदिकव्यवहारस्यासाधुत्वापरपर्यायौपाधिकत्वं चोक्त्वा अद्वैतवासनया अभेदयोगेनात्मयाथात्म्यमधिगन्तव्यमिति निरूप्यते ॥

गारुडेऽपि आचारखण्डे ब्रह्मज्ञानप्रकरणे गीतासारे भगवतो गरुडस्य वाक्यानि अमुमर्थं सयुक्तिकं प्रपञ्चयन्ति । तथा हि—

अहं ब्रह्म परं ज्योतिः [illegible] ॥
ब्रह्मात्मनोर्यदेकत्वं [illegible] ॥
सोऽहमस्मी[illegible] विद्यते [illegible] ।
व्यापकत्व[illegible]
अनन्[illegible]

जाग्रत्स्वप्नसुषुप्तं च मायया परिकल्पितम् ।
सदा सर्वत्र सर्वज्ञः सर्वस्य हृदये न चेत् ॥
साक्षिभूतः समाश्रित्य को जानाति विचेष्टितम् ।
अहं ब्रह्म परं तत्त्वं ज्ञात्वा त्वखिलविद्भवेत् ॥
यथैकमृन्मये ज्ञाते सर्वमेतच्चराचरम् ।
यथैकहेममणिना सर्वं हेममयं भवेत् ॥
ज्ञातं तथैवमीशेन ज्ञानिनाप्यखिलं जगत् ।
यथान्धकारदोषेण रज्जुस्सम्यङ् न दृश्यते ॥
तथा संमोहदोषेण चात्मा सम्यङ् न दृश्यते ।
मायेच्छया द्विधा सः स्यात् पतिःपत्नी सुखं जगत् ॥
अष्टाविंशतिभेदैस्तु त्रैगुण्यं विद्यते पृथक् ।
चतुरशीतिर्लक्ष्यन्ते नरनार्याकृतीनि च ॥
एवं विश्वं प्रभवति खण्डजं मायया यथा ।
यथा रथादयः स्वप्ने सन्तो नैव च सत्यतः ॥
तथा जाग्रदवस्थायां भूतानि न तु सन्निधौ ।
द्वैरूप्यं मायया भाति जाग्रत्स्वप्नपदद्वयोः ॥
एवमेतत्परं ब्रह्म स्वप्नजाग्रत्पदद्वये ।
सुषुप्तमचलं रूपं अद्वयं पदमुच्यते ॥
आत्मलाभः परो नान्यः आत्मा देहादिवर्जितः ।
इन्द्रियग्राममखिलं मनस्यभिनिवेश्य च ॥
[illegible] प्रतिष्ठाप्य च पाण्डव ।
[illegible] द्र च प्रकृतावपि ॥
[illegible] णि न्यसेत् ।
[illegible] मुच्यते ॥
[illegible] तः ।
[illegible] ॥
[illegible] ॥

अनेन वाक्यजातेन जीवपरमात्मनोरेकत्वं आत्मनः सच्चिदानन्दाद्वितीयत्वं असंगोदासीनस्वभावत्वं जाग्रत्स्वप्नयोरनुभूयमानव्यावहारिकत्वप्रातिभासिकत्वाख्यरूपद्वयस्य मायाकार्यत्वं सुषुप्ते आत्मनः सर्वसंसारधर्मविवर्जितत्वं सर्वक्रियाकारकफलायासशून्यत्वं अपहतपाप्मत्वाभयत्वादि बृहदारण्यकप्रसिद्धं चेत्येतेऽर्थाः सविस्तरं सोपपत्तिकं निरूपिता भवन्ति ॥

नारदीये च ३३ अध्याये ज्ञानोपायवर्णने श्रूयते—

आत्मानं द्विविधं प्राह परापरविभेदतः ।
परस्तु निर्गुणः प्रोक्तो ह्यहङ्कारयुतोऽपरः ॥
तयोरभेदविज्ञानं योग इत्यभिधीयते ॥
यदा त्वभेदविज्ञानं जीवात्मपरमात्मनोः ।
भवेत्तदा मुनिश्रेष्ठ पाशच्छेदोऽपरात्मनः ॥
एकः शुद्धोऽक्षरो नित्यः परमात्मा जगन्मयः ।
नृणां विज्ञानभेदेन भेदवानिव लक्ष्यते ॥
कर्तृत्वं नापि भोक्तृत्वं निर्गुणस्य परात्मनः ।
सम्यग्विज्ञानहीनानां दृश्यते विविधं जगत् ॥
परमज्ञानिनामेतत्परब्रह्मात्मकं द्विज ।
भाति विज्ञानभेदेन बहुरूपधरोऽव्ययः ॥
मायिनो मायया भेदं पश्यन्ति परमात्मनि ।
तस्मान्मायां त्यजेद्योगान्मुमुक्षुर्द्विजसत्तम ॥
ध्यानं ध्येयं ध्यातृभावं यथा नश्यति निर्भरम् ।
ततोऽमृतत्वं भवति ज्ञानामृतनिषेवणात् ॥ इति ॥

तत्रैव ३९ अध्याये वेदमाल्युपाख्याने स्मर्यते—

उपाधिरहितं ब्रह्म स्वप्रकाशं निरञ्जनम् ।
अहमेवेति निश्चित्य परां शान्तिमवाप्नुयात् ॥
इति ॥

केशिध्वजोपाख्यानेऽपि—

तद्भावभावनापन्नस्ततोऽसौ परमात्मनः ।
भवत्यभेदी भेदश्च तस्याज्ञानं कुतो भवेत् ॥

विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते ।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥
अहं ममेत्यविद्येयं व्यवहारस्तयानयोः ।
परमार्थस्त्वसंलाप्यो वचसां गोचरो न यः ॥
इति ॥

बृहदुपाख्याने च ऋभुनिदाघसंवादे—

एको व्यापी समः शुद्धः निर्गुणः प्रकृतेः परः ।
वेणुरन्ध्रादिभेदेन भेदः षड्जादिसंज्ञितः ॥
अभेदो व्यापिनो वायोस्तथा तस्य महात्मनः ।
एकत्वं रूपभेदश्च बाह्यकर्मप्रवृत्तिजः ॥
देवादिभेदमध्यास्ते नास्त्येवावरणो हि सः ।
अवाप्तज्ञानतत्त्वस्य न तस्य द्वैतवासना ॥
निदाघः प्राह भगवन् आचार्यस्त्वमृभुर्मम ।
नान्यस्याद्वैतसंस्कारसंस्कृतं मानसं तथा ॥ इति ॥

इमानि वचनानि "जीवपरयोर्भेदः आविद्यकः । देवादिभेदं जगन्मायया भाति । जीवपरयोरभेदविज्ञानमेव मायाया निवर्तकं मोक्षोपायश्च, तत्वज्ञानां न द्वैतसंस्कारः, कर्तृत्वभोक्तृत्वादिकमात्मनः न स्वाभाविकम्" इति बोधयन्ति । माया अविद्या संमोहः आवरण इति पर्यायाः ॥

तथा च कौर्मे ईश्वरगीतायां आह भगवान्—

स मायी मायया बद्धः करोति विविधास्तनूः ।
न चाप्ययं संसरति न संसारमयः प्रभुः ॥
न कर्ता न च भोक्ता वा न च प्रकृतिपूरुषौ ।
न माया नैव च प्राणाः न चैव परमार्थतः ॥
यथा प्रकाशतमसोः संबन्धो नोपपद्यते ।
तद्वदैक्यं न संबन्धः प्रपञ्चपरमात्मनोः ॥
अहं कर्ता सुखी दुःखी कृशः स्थूलेति या मतिः ।
सा चाहंकारकर्तृत्वादात्मन्यारोपिता जनैः ॥

तस्मादज्ञानमूलो हि संसारः सर्वदेहिनाम् ।
तेनायं संगतस्त्वात्मा कूटस्थोऽपि निरंजनः ॥
तद्वशादेव सर्वेषां सर्वदेहसमुद्भवः ।
एकः सन् भिद्यते शक्त्या मायया न स्वभावतः ॥
तस्मादद्वैतमेवाहुः मुनयः परमार्थतः ।
यदा पश्यति चात्मानं केवलं परमार्थतः ।
मायामात्रं तदा सर्वं जगद्भवति निर्वृतः ॥ इति ॥

गारुडे च मोक्षोपायवर्णने वेदान्तमहावाक्यान्युद्धृत्य तदर्थनिर्णयोपन्यासमुखेन अखण्डार्थत्वनिश्चयपूर्वकं समाध्यवलंबेन मुक्तिः श्रूयते । तथाहि—

आरुरुक्षुमुनीनां तु कर्मज्ञानमुदाहृतम् ।
आरूढयोगवृक्षाणां ज्ञानं त्यागः परं मतम् ॥
अद्वैतं सांख्यमित्याहुः योगस्तत्रैकचित्तता ।
अद्वैतयोगसंपन्नास्ते मुच्यन्तेऽतिबन्धनात् ॥
अतीतारब्धमागामि कर्म नश्यति बोधतः ।
वेदाहमेतं पुरुषं चिद्रूपं तमसः परम् ॥
सोहमस्मीति मोक्षाय नान्यः पन्था विमुक्तये ।
श्रवणं मननं ध्यानं ज्ञानानां चैव साधनम् ॥
एकेन जन्मना ज्ञानान्मुक्तिर्न द्वैतभाविनाम् ।
यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः ॥
तदाऽमृतत्वमाप्नोति जीवन्नेव न संशयः ।
अहं ब्रह्मेत्यवस्थानं समाधि[...]
[...]ति ॥
अहंब्रह्मास्मिवाक्ये[...]
वाक्यज्ञानं भवे[...]
पदद्वया[...]
वाक[...]
प्र[...]

प्रत्यग्रूपं त्वद्वितीयं अहशब्देन मन्यते ॥
परोक्षप्रेक्षणो ह्यत्र भागो लक्ष्येत वाऽहमा ।
तथा ब्रह्मपदेनैव प्राणपिण्डात्मकारणम् ॥
निष्ठाऽपरोक्षता चेति परित्यागेन वक्ष्यते ।
अद्वयानन्तचैतन्यं प्रत्यग्ब्रह्मपदेन तु ॥
अद्वयानन्तचैतन्यं लक्षयित्वा स्थितस्य च ।
ब्रह्माहमस्म्यहं ब्रह्म चाऽहंब्रह्मपदार्थयोः ॥
अहंब्रह्मास्मिवाक्याच्च स्वानुभूतिफलार्थकम् ।
ऐक्यज्ञानं तु हि भवेत् वेदान्ताद् दूरतो ध्रुवम् ॥
ज्ञानादज्ञानकार्यस्य निवृत्त्या मुक्तिरैक्यतः ।
जीवत्ववर्जितः प्राप्तचैतन्यानुस्वरूपतः ॥
अहं ब्रह्मास्मि निर्लेपमहं ब्रह्मास्मि सर्वगम् ।
सा मुक्तिर्ब्रह्मणा चैक्यमनैक्यं प्राकृतैर्गुणैः॥ इति ।

नारदीये च वेदमाल्युपाख्याने पठ्यते—

तत्त्वमस्यादिवाक्येभ्यो ज्ञानं मोक्षस्य साधनम् ।
ज्ञाने त्वनाहते सिद्धे सर्वं ब्रह्ममयं भवेत् ॥
उपाधिरहितं ब्रह्म स्वप्रकाशं निरञ्जनम् ।
अहमेवेति निश्चित्य परां शान्तिमवाप्तवान् ॥
इति ॥

दूरतः लक्षणयेत्यर्थः । तदेवं वियदादिप्रपञ्चस्य क्रियाकारकफलाश्रयस्य मिथ्यात्ववर्णनेन, जीवगतजन्ममरणप्रबन्धरूपसंसारस्याविद्यकत्ववचनेन, अहंकारमूलव्यवहारस्यासाधुत्वापरपर्यायमिथ्यात्वनिरूपणेन, जाग्रत्स्वप्नादिजीवप्रपञ्चस्य मायाप्रयुक्तद्वैरूप्योक्त्या, जीवपरयोरभेदविज्ञानेन मायायाः सवासनं आत्यन्तिकविनाशश्रवणेन, आत्मनः सच्चिदानन्दाद्वितीयत्वप्रतिपादनेन एकेनैव जन्मना ज्ञानाज्जीवतोऽपि मुक्तिश्रवणेन च वैष्णवपुराणानां ऐदंपर्यं केवलाद्वैत एवेति सम्यगवधारितं भवतीति शम् ॥

———

(ञ) शिवपुराणेषु अद्वैतभावाः

(ब्रह्मश्री - वरहूर्. सुब्रह्मण्यशास्त्रिणः)

ஜகத் சிருஷ்டியான ஆதிகாலத்தில், பரமசிவன் [illegible] கினுன்கு வித்தைகளையும் 18 புரா[illegible] சிருஷ்டித்து, மஹாவிஷ்ணு [illegible] மூலமாகவும் உலகில் [illegible] புராணங்களில் 10 [illegible] யைக் கூறுகின் [illegible] புராணங் [illegible] அவைகள் [illegible] த்தாந்தம் [illegible] 'சிவ [illegible] ப்பெற் [illegible] வத [illegible] பா

வியவஹார திருஷ்டியால் மாயை கல்பனை, பரமார்த்தமல்ல. பரமார்த்தமாக அத்வைத பிரம்மமே உள்ளது. அதே மாயையாகவும் ஜீவனுகவும் ஜகத்தாகவும் தோன்றுகிறது (ஸூதஸம்ஹிதை)

கர்மங்களாலோ தானம் தபஸ் முதலியவைகளாலோ மோக்ஷம் கைகூடாது. ஞானத்தால் மாத்திரம் கைகூடும். கிளிஞ்சலில் வெள்ளிபோல் பிரபஞ்சம் சிவனிடம் தோன்றும், (சிவ கீதை). பிரும்மத்துடன் ஐக்யமே முக்தி. தங்கத்தை நெருப்பில் போட அசுத்தங்கள் நீங்கி தங்கம் மற்ருெறு தங்கத்துடன் சேர்வதுபோல் யோகாக்நியால் தன் தோஷம் தீர ஜீவன் பிரும்மத்துடன் ஐக்யத்-

தையடைகிறான்- [மார்கண்டேயபுராணம்] பிரும்மம் நித்ய சுத்த முக்த ஸ்வரூபம்- பழுதையில் பாம்புபோல் பிரபஞ்சம் பிரும். மத்தில் தோன்றுகிறது. (வாயுபுராணம்)

Out of the eighteen puranas, ten go to establish the glory of Śiva. All the eighteen puranas are alike authentic; and it is wrong to ignore these puranas as Tamasic by nature and non-authentic Śrimān Appaya Dikshita has elaborately dealt with this subject in his Śivatattva Viveka. These puranas overflow with Advaitic truths. Brahman alone manifests itself as Māyā, Jīva and the Universe. There is nothing other then Brahman (*Sūta samhitā*).

The difference between Atman and Brahman is due to limiting adjuncts and not natural (*Sūtasamhitā*) Release is attained by knowledge alone and not by the performance of Karma or meditation (*Śivagītā*) "As water poured into water becomes one, so also the soul of the yogin becomes one with the supreme Ātman" (*Markaṇḍeya Purāṇam*).

Those who think that their souls are different from Parameśvara do not see him; Their effort is futile" (*Īśvaragīta*).

Brahman is eternal, blemishless, non-conditioned by space and time. The universe is superimposed upon it.

वन्दे गणपतिं देवं स्वामिनाथं सरस्वतीम् ।
श्रीकाञ्चीकामकोट्याख्यपीठाधिपजगद्गुरून् ॥
अद्वैततत्त्वविषये नानाशिवपुराणगे ।
लेखनीय उपन्यासः इत्याज्ञारूपलेखकः ॥
तेषामनुग्रहं प्राप्तं तदाज्ञापरिपालकम् ।
कृत्वा मां लेखिनीभूतं विलिखत्यप्रसुर्ब्रह्म ।

श्रीमत्सूतसंहितान्तर्गतानि श्रीमदाचार्यपादनिर्दिष्टाद्वैतभावबोधकानि वाक्यानि लिख्यन्ते । अद्वैतसिद्धान्तानुसारेण पारमार्थिकतत्त्वमेकमेव । द्वितीयादिभेदः काल्पनिकः इत्येतद्बोधकानि वाक्यानि—

व्यवहारदशा मायाकल्पना नैव वस्तुतः ।
वस्तुतः परमाद्वैतं ब्रह्मैवास्ति न चेतरत् ॥
मायारूपतया साक्षाद्ब्रह्मैव प्रतिभासते ।
जगज्जीवादिरूपेणाप्यहो देवस्य वैभवम् ॥
स्वस्वरूपातिरेकेण ब्रह्मणो नास्ति किञ्चन ।
तथापि स्वातिरेकेण भाति ह्य देववैभवम् ॥
जगदात्मतया पश्यन्बध्यते न विमुच्यते ।
सर्वमेतत्परं ब्रह्म पश्यन्स्वानुभवेन तु ॥
मुच्यते घोरसंसारात्सद्य एव न संशयः ।
द्विविधो वेदराशिस्तु मुनयस्संशितव्रताः ॥
सत्याद्वैतपरः कश्चित् वेदभागस्समासतः ।
कल्पितद्वैतनिष्ठस्तु वेदभागस्तथा परः ॥
सत्यमेव सदाऽद्वैतं असत्यं द्वैतमास्तिकाः ।

इति प्रपञ्चस्य असत्यत्वं प्रपञ्चे आत्मत्वबुद्धिमतो बन्धं, सत्यब्रह्मात्मज्ञानवतो मुक्तिं चोपपाद्य सत्याद्वैतबोधकत्वेन कस्यचिद्वेदभागस्य तत्त्वावेदकत्वं असत्यभेदबोधकत्वेन च कस्यचित् व्यावहारिकप्रामाण्यं चोपवर्णितम् ।

प्रपञ्चमिथ्यात्वे युक्तिरपि प्रदर्शिता—

अध्यस्तं हि सदा द्वैतं दृश्यत्वाच्छुक्तिरूप्यवत् । इत्यत्र ।

तस्माद् द्वैतपरो भागः कल्पितद्वैतगोचरः ॥
अद्वैतं सर्वदा सत्यं भेदाभ[illegible]
अतो द्वैतं समभ्य[illegible]
अद्वैतं परमान[illegible]
यत्र प्र[illegible]
अतः [illegible]

इत्यत्र [illegible]
स्फुट [illegible]

परमार्थतः अखण्डचिदाकारे ब्रह्मणि अविद्यमानस्यैव भेदस्य उपाधिवशात्प्रतीतिरित्येतत् वक्ष्यमाणश्लोकैः निरूप्यते—

" आत्मभेदस्तथैवात्मब्रह्मभेदश्च सुव्रताः ।
उपाधिनैव क्रियते न स्वतो मुनिपुङ्गवाः ॥
घटाद्युपाधिसम्पर्कादाकाशस्य भिदा यथा ।
एकमेवेति वेदान्तास्तात्पर्येण महेश्वरम् ॥
आहुश्चिद्रूपतो भेदः चितो नास्त्येव सर्वथा ।
वस्तुतः शम्भुरानन्दः सत्यसम्पूर्णचिद्घनः ॥
मायया मोहिता मर्त्यास्तं भेदेन विदुर्बुधाः ।
यद्देशकालदिग्भेदैर्न भिन्नं सर्वदाऽद्वयम् ॥
यदेव विश्वं तद्ब्रह्म यथार्थं प्रणमाम्यहम् ॥
इति ॥

भेदस्य मायोपाधिकत्वादेव

इदं सर्वं जगत्सत्यमिव भातमपि स्वतः ।
कारणव्यतिरेकेण नास्त्येवात्र न संशयः ॥
घटकुड्यादयो भावा भूतानि भुवनानि च ।
सर्वं ब्रह्मातिरेकेण नास्ति ब्रह्मैव सत्सदा ॥
घटाकाशमहाकाशविभागः कल्पितो यथा ।
तथैव कल्पितो भेदः जीवात्मपरमात्मनोः ॥
जडाजडमिदं सर्वं तथा भाति परात्मनि ।
वीचीतरङ्गफेनाद्या यथा भान्ति महोदधौ ।
[illegible] ...न्तं जगद्भाति तथात्मनि ॥
[illegible] ...शंभुः
[illegible] ...शम्भुः ।
[illegible]
[illegible] ...ताम् ।
[illegible] ...॥
[illegible] ...।
[illegible]

यदि स्वाभाविकं तर्हि जीवत्वं सर्वदा भवेत् ।
नास्ति तस्य निवृत्तिर्हि स्वतस्सिद्धं न नश्यति ॥
एकदेशेन वा जीवाः किं वा सर्वात्मना शिवाः ।
एकदेशेन चेत्सर्वे शिवास्संसारवर्तिनः ॥
एकदेशेन सर्वेषां अस्ति साम्यं शिवेन हि ।
सर्वात्मना चेत्साम्यं तत्सर्वथा शिव एव सः ॥
भेदकारणशून्यत्वाद्भेदाभावाच्च वस्तुतः ।
तत्त्वंशब्दौ स्वतस्सिद्धे चिन्मात्रे पर्यवस्यतः ॥
यः पदद्वयलक्ष्यार्थः तस्मिन्भेदः प्रकल्पितः ।
मायाविद्यात्मकोपाधिभेदेनैव न वस्तुतः ॥
स्वतस्सिद्धैकताऽज्ञानं व्युदस्य श्रुतिरादरात् ।
स्वभावसिद्धमेकत्वं बोधयत्यधिकारिणः ॥
जाग्रत्स्वप्नसुषुप्त्यादिप्रपञ्चत्वेन भाति यत् ।
तद्ब्रह्माहमिति ज्ञात्वा सर्वबन्धैः प्रमुच्यते ॥

इति श्लोकैः जीवानां प्रपञ्चस्य च ब्रह्मणा ऐक्यं उपवर्णितम् । यतो ब्रह्मणि अध्यस्तः प्रपञ्चो दुःखनिदानं अतोऽधिष्ठानज्ञानात् अध्यासापनये स्वस्वरूपावस्थितिरेव मोक्षः इति,

" सर्वमेतत्परं ब्रह्म पश्यन्स्वानुभवेन तु ।
मुच्यते घोरसंसारात्सद्य एव न संशयः ॥
सर्वसाक्षिणमात्मानं स्वयं ज्योतिः स्वलक्षणम् ।
सत्यमानन्दमद्वैतमहमर्थं विचिन्तयेत् ॥
परतत्त्वं परं ब्रह्म जीवात्मपरमात्मनोः ।
औपाधिकेन भेदेन द्विधाभूतमिव स्थितम् ॥
चिदेकत्वपरिज्ञानान्न शोचति न मुह्यति ।
अद्वैतं परमानन्दं शिवं याति तु केवलम् ॥
भेदनाशे तयोरैक्यं घटते वेदवित्तम ।
आत्मनः परमा मुक्तिर्ज्ञानेनैव न कर्मणा ॥
ज्ञानं वेदान्तवाक्यानां महातात्पर्यनिर्णयात् ।
उत्पन्नायां मनोवृत्तौ महत्यामम्बुजेक्षण ॥

अभिव्यक्तं भवेदेतद्ब्रह्मैवात्मा विचारतः ।
अनेनैवात्मनोऽज्ञानं आत्मन्येव विलीयते ॥
विलीने स्वात्मनोऽज्ञाने द्वैतं वस्तु विनश्यति ।
घटज्ञानात् घटाज्ञानं यथा लोके विनश्यति ॥
तथाऽऽत्मज्ञानमात्रेण नश्यत्यज्ञानमात्मनः ।
रज्ज्वज्ञानविनाशेन रज्जुसर्पो विनश्यति ॥
तथात्माज्ञाननाशेन संसारश्च विनश्यति ।
तस्मादज्ञानमूलस्य संसारस्य क्षयो हरे ॥
आत्मनस्तत्त्वविज्ञानात् तत्त्वं ब्रह्मैव केवलम् ।

एभिः श्लोकैर्व्यवस्थाप्य,

कर्मणा परमा मुक्तिर्यदि सिद्ध्यति केशव ॥
सा विनश्यत्यसन्देहः स्वर्गलोको यथा तथा ।
तस्मान्न कर्मणा मुक्तिः कल्पकोटिशतैरपि ॥

इति कर्मणो मोक्षहेतुत्वं वारितम् ॥

यस्त्वपरमां मूर्तिमुपास्ते श्रद्धया नरः ॥
तत्र सामीप्यमाप्नोति क्रमेणैव स मुच्यते ।
यः पुमान् श्रद्धया नित्यं त्वामुपास्ते जनार्दन ॥
स शुद्धचित्तस्त्वां विष्णो प्राप्य कालेन मामपि ।
भुक्त्वा भोगान् पुनर्ज्ञानं लब्ध्वा मुक्तो भवेन्नरः ॥

इति च अपरब्रह्मोपासकानां सगुणलोकप्राप्तिः क्रमेण च लब्धज्ञानानां परमा मुक्तिरिति सुनिरूपितम् । मुक्तिखण्डेऽपि "एवं बहुविधा" इत्यादिना अशुद्धचित्तानां परममुक्तौ इच्छापि न जायेत इति अशुद्धचित्तनिन्दया चित्तशुद्धेरावश्यकत्वं सूचयित्वा, कर्मभिः भक्त्या च शुद्धचित्तानां क्रममुक्तौ, अत्यन्तशुद्धचित्तानामेव तु परममुक्तौ इच्छा जायते इत्युक्तम् ॥

यस्य मुक्तिरभिव्यक्ता स्वात्मसर्वार्थवेदिनी ।
तस्य प्रारब्धकर्मान्ता जीवन्मुक्तिः प्रकीर्तिता ॥
ज्ञानांभसैव शुद्धस्य कृतकृत्यस्य योगिनः ।
कर्तव्यं नास्ति लोकेऽस्मिन्नस्ति चेन्न
स तत्त्ववित् ॥

इहैव जीवन्मुक्तास्ते इह चेदिति हि श्रुतिः ।

इति प्राप्तविज्ञानानां लोकान्तरगमनादिनिरपेक्षमेव जीवन्मुक्तिः श्रुतिबोधितापि प्रदर्शिता । एवं सूतसंहिताया अद्वैते तात्पर्यं स्फुटमेव ।

शिवगीतायां प्रथमाध्याये—

न कर्मणामनुष्ठानैर्न दानैस्तपसापि वा ।
कैवल्यं लभते मर्त्यः किन्तु ज्ञानेन केवलम् ॥
(२)

शृण्वतो जायते ज्ञानं ज्ञानादेव विमुच्यते ॥
(१९)

स्वात्मत्वेन शिवस्यासौ शिवसायुज्यमाप्नुयात् ।
शिवश्शिवोऽहमस्मीति वादिनं यञ्च कञ्चन ।
आत्मना सह तादात्म्यभागिनं कुरुते भृशम् ॥
(३४)

निर्लेपः परिपूर्णश्च सच्चिदानन्दविग्रहः ।
आत्मा न जायते नैव म्रियते न च दुःखभाक् ॥
(अ २-६)

आत्मा तु केवलस्तेषु परिपूर्णस्सनातनः ।
(तेषु पाञ्चभौतिकशरीरेषु)
स्वस्वरूपं विदित्वैव दुःखं त्यक्त्वा सुखी भव ॥
(अ २-३४)

सुख्यहं दुःख्यहं चेति जीव एवाभिमन्यते ।
निर्लेपोऽपि परंज्योतिः [illegible] ॥
शुक्तौ रजतवद्विश्वं [illegible] ॥
यतो वि[illegible] विद्यते [illegible]
[illegible]त्परमेष्ठी[illegible]

इति पूर्वोक्त[illegible]
स्फुट[illegible]

स्तानां प्रहाणेन प्राज्ञैः सत्सङ्गादिभिः प्राप्तं ब्रह्मैकत्वविज्ञानं कथमहं प्राप्नुयामिति पृष्टवन्तं अलर्कं प्रति दत्तात्रेयस्योत्तरे—

सा मुक्तिर्ब्रह्मणा चैक्यमनैक्यं प्राकृतैर्गुणैः ।
यथा हि कानकं खण्डमपद्रव्यवदग्निना ॥
दग्धदोषं द्वितीयेन खण्डेनैक्यं व्रजेन्नृप ।
न विशेषमवाप्नोति तद्वद्योगाग्निना यतिः ॥
निर्दग्धदोषस्तेनैक्यं प्रयाति ब्रह्मणा सह ।
तदाख्यस्तन्मयो भूतो न गृह्येत विशेषतः ॥
परेण ब्रह्मणा तद्वत्प्राप्यैक्यं दग्धकिल्बिषः ।
योगी याति पृथग्भावं न कदाचिन्महीपते ॥
यथा जलं जलेनैक्यं निक्षिप्तमुपगच्छति ।
तथात्मा साम्यमभ्येति योगिनः परमात्मनि ॥
सर्वमात्ममयं यस्य सदसज्जगदीदृशम् ।
गुणागुणमयं तस्य कः प्रियः को नृपाप्रियः ॥
यस्तु वेद नरः सम्यक्तथा ध्यायति वा पुनः ।
संसारचक्रमुत्सृज्य त्यक्तत्रिविधबन्धनः ।
प्राप्नोति ब्रह्मणि लयं परमे परमात्मनि ॥

इत्यद्वैततत्त्वं सम्यग्विवृतम् ॥

कूर्मपुराणे उत्तरार्धे प्रथमाध्याये तृतीयश्लोके —

तत्त्वं चाशेषसंसारदुःखनाशनमुत्तमम् ।
[illegible] विषयं तेन पश्येम तत्परम् ॥
[illegible] मिथ्यात्वं अभिहितम् ॥

[illegible] नम् ।
[illegible] ः ॥

यथात्मा मलिनोऽस्वच्छः विकारी स्यात्स्वरूपतः ।
न हि तस्य भवेन्मुक्तिर्जन्मान्तरशतैरपि ॥
पश्यन्ति मुनयो मुक्तास्स्वात्मानं परमार्थतः ।
विकारहीनं निर्द्वन्द्वमानन्दात्मकमव्ययम् ॥
अहं कर्ता सुखी दुःखी कृशस्स्थूलेति यां मतिः ।
सा चाहङ्कारकर्तृत्वात् आत्मन्यारोपिता जनैः ॥
तस्मादज्ञानमूलो हि संसारस्सर्वदेहिनाम् ।
अज्ञानादन्यथाज्ञानात्तत्त्वं प्रकृतिसङ्गतम् ॥
नित्योदितस्स्वयंज्योतिः सर्वगः पुरुषः परः ।
अहंकाराविवेकेन कर्ताऽहमिति मन्यते ॥
पश्यन्ति ऋषयोऽव्यक्तं नित्यं सदसदात्मकम् ।
तेनायं संगतस्स्वात्मा कूटस्थोऽपि निरञ्जनः ॥
यद् ब्रह्म परमं ज्योतिः प्रतिष्ठाक्षरमव्ययम् ।
योन्तरा परमं ब्रह्म स विज्ञेयो महेश्वरः ॥
एष देवो महादेवः केवलः परमश्शिवः ।
तदेवाक्षरमद्वैतं तदादित्यान्तरं परम् ॥
नान्यं देवं महादेवात् व्यतिरिक्तं प्रपश्यति ।
तदेवात्मानमात्मेति यस्स याति परं पदम् ॥
मन्यन्ते ये स्वमात्मानं विभिन्नं परमेश्वरात् ।
न ते पश्यन्ति तं देवं वृथा तेषां परिश्रमः ॥
एकं ब्रह्म परं ब्रह्म ज्ञेयं तत्तत्त्वमव्ययम् ।
स देवस्तु महादेवो नैतद्विज्ञाय बाध्यते ॥
स्वात्मानमक्षरं ब्रह्म नावबुध्येत तत्त्वतः ।
अनात्मन्यात्मविज्ञानं तस्माद्दुःखं तथेतरत् ॥
रागद्वेषादयो दोषाः सर्वे भ्रान्तिनिबन्धनाः ।
कर्माण्यस्य महान्दोषः पुण्यापुण्यमिति स्थितिः ॥
तद्वशादेव सर्वेषां सर्वदेहसमुद्भवः ।
नित्यं सर्वत्र गुह्यात्मा कूटस्थो दोषवर्जितः ॥
एकस्स भिद्यते शक्त्या मायया न स्वभावतः ।
तस्मादद्वैतमेवाहुः मुनयः परमार्थतः ॥
भेदोऽव्यक्तस्वभावेन सा च मायात्मसंश्रया ।
यथा च धूमसम्पर्कान्नाकाशो मलिनो भवेत् ॥

अन्तःकरणजैर्भावैरात्मा तद्वन्न लिप्यते ।
यथा स्वप्रभया भाति केवलः स्फटिकोपलः ॥
उपाधिहीनो विमलः तथैवात्मा प्रकाशते ।
यदा सर्वाणि वै भूतान्यात्मन्येवानुपश्यति ॥
सर्वभूतेषु चात्मानं ब्रह्म संपद्यते तदा ।
यदा पश्यति चात्मानं केवलं परमार्थतः ॥
यदा भूतपृथग्भावमेकस्थमनुपश्यति ।
तत एव च विस्तारं ब्रह्म सम्पद्यते तदा ।
यथा पश्यति चात्मानं केवलं परमार्थतः ॥
मायामात्रं जगत्सर्वं जगद्भवति निर्वृतः ।
यदा जन्मजरादुःखव्याधीनामेकभेषजम् ॥
केवलं ब्रह्मविज्ञानं जायतेऽसौ तदा शिवः ।
यथा नदीनदा लोके सागरेणैकतां ययुः ।
तद्वदात्माऽक्षरेणासौ निष्कलेनैकतां व्रजेत् ॥
तस्माद्विज्ञानमेवास्ति न प्रपञ्चो न संस्थितिः ।
अज्ञानेनावृतं लोके विज्ञानं तेन मुह्यति ॥

इति कर्तृत्वसुखदुःखादीनां अहङ्कारधर्माणां आत्मनि अध्यासः, परमात्मनः स्वाभेदज्ञानादेव मोक्षः, भेददृष्टिपूर्वकोपासनादयः वृथा परिश्रमा एव, भेदभ्रान्त्यैव रागद्वेषादिसंसारमूलोत्पत्तिः पुण्यापुण्यकर्मणां बन्धकत्वाद्दोषत्वं, कूटस्थस्यात्मनो मायाकल्पितो भेदः, अद्वैतोक्तिरेव सिद्धान्तः इत्यादीनि प्रतिपादितानि ॥

वायुपुराणे चतुरधिकशततमेऽध्याये व्याससंशयापनोदननामके—

" मुक्तिमार्गा बहुविधा उक्ता वेदाविरोधतः "
" जीवेश्वरब्रह्मभेदो निरस्तस्सूत्रनिर्णये "
निरूपितं परं ब्रह्म श्रुतियुक्तिविचारतः ।

इत्यादिभिर्बहुविधमुक्तितत्साधनान्युक्त्वा निर्गुणब्रह्मस्वरूपं निरूपितम् ।

तद्ब्रह्म परमं शुद्धमनाद्यन्तमनामयम् ।
दिक्कालाद्यनवच्छिन्नं नित्यं चिन्मात्रमव्ययम् ॥
अध्यस्तं सर्पवद्यत्र विश्वमेतत्प्रकाशते ।
विश्वस्मिन्नपि चान्वेति निर्विकारं च रज्जुवत् ॥
सम्यग्विचारितं यद्वत् फेनोर्मिबुद्बुदं दकम् ।
तथा विचारितं विश्वं ब्रह्मास्मान्न पृथग्भवेत् ॥
सर्वं ब्रह्मैव नानात्वं नास्तीति निगमा जगुः ।
यस्मिन्निदं यतश्चेदं येनेदं यदिदं स्मृतम् ॥
यदज्ञानाज्जगद्भाति यस्मिञ्ज्ञाते जगन्नहि ।
असत्यं यज्जडं दुःखं अवस्त्विति निरूपितम् ।
विपरीतमतो यद्वै सच्चिदानन्दमूर्तिकम् ॥
रज्जावहिर्मरौ वारि नीलिमा गगने यथा ।
असद्विश्वमिदं भाति यस्मिन्नज्ञानकल्पितम् ॥
घटावच्छिन्न एवायं महाकाशो विभिद्यते ।
कार्योपाधिपरिच्छिन्नं तद्वद्यज्जीवसंज्ञितम् ॥
मायया चित्रकारिण्या विचित्रगुणशीलया ।
ब्रह्माण्डचित्रमतुलं यस्मिन्भित्ताविवार्पितम् ॥
परमानन्दसन्दोहरूपमानन्दविग्रहम् ।
एवं ब्रह्मणि चिन्मात्रे निर्गुणे भेदवर्जिते ।
नातः परतरं किंचिन्निगमागमयोरपि ॥
मोक्षो ब्रह्मैक्यमित्येवं सच्चिदान[illegible] ।
सर्वं समाप्यते तस्मि[illegible] ॥
यन्निस्सङ्गं [illegible]
निरीहम[illegible] विद्यते [illegible]
पुराणेष्[illegible] परमेष्ठी [illegible]
अक्षरं [illegible] रघूत्त[illegible]

—०—

(ट) पाञ्चरात्रागमे अद्वैतभावा:

(ब्रह्मश्री, पिरान्तियङ्करै - सुब्रह्मण्यशास्त्रिण:)

பாஞ்சராத்ரம் என்பது ஆகமத்தின் பெயர். பஞ்சராத்ரம் என்ருல் ஐந்து வித-மான அறிவுகள் என்று பொருள். இவ்வாக-மத்தில் பிரம்மா சிவன் குமாரன் வஸிஷ்டர் கபிலர் சௌனகர் நாரதர் முதலியவர்கள் நூல்களை இயற்றியிருக்கின்றனர்.

रात्रं च ज्ञानवचनं ज्ञानं पञ्चविधं स्मृतम् ।
तेनेदं पञ्चरात्रं च प्रवदन्ति मनीषिण: ॥
ब्राह्मं शैवं च कौमारं वासिष्ठं कपिलं परम् ।
शौनकीयं नारदीयं इदं सप्तविधं स्मृतम् ॥

(பிரும்ம புராணம்)

தற்காலம் கிடைக்கக்கூடிய நூல்களைக்-கொண்டு ஆராய்ச்சி செய்தால் பாஞ்சராத்-ராகமத்திற்கும் அத்வைத ஸித்தாந்தத்தி-லேயே தாத்பர்யம் என்று நன்கு தெளி-வாகும்.

''முக்தி என்பது பேதமாகவும் அபேத-மாகவும் மிச்ரமாகவும் மூவகைப்படும். எஜமானன் விஷ்ணு, தாஸன் நான் என்ற பாவனையால் ஏற்படும் முக்தி வைகுண்டத்-தில் விஷ்ணுவுக்கு தாஸனுயிருப்பது. நான் அவனே என்ற பாவனையால் ஏற்படும் அத்யந்த ஐக்யம் தான் அபேத முக்தி எனப்படுவது.

(பாத்ம ஸம்ஹிதை 8-அத்)

ஒரே ஈச்வரன் ஸர்வசரீரங்களிலுமிருக்-கிருன [illegible] டைய பிரதிபிம்பனே ஜீவன், ஸ [illegible] பவிப்பவன்; ஞானம் [illegible] பிம்பம் ஸூர்யனில் [illegible] லயத்தை யடை-

[illegible] ராத்ரம்)

[illegible] s the [illegible] process [illegible] ually [illegible] A [illegible]

"The Jiva attains identity with the Supreme Atman by knowledge. This is (Sāyujya' *Pādma Samhitā*).

"The Jiva who is associated with begin-ning-less impressions becomes one with Brahman; then he is released from rebirth. What you see, O! Brahman, the diversified universe, is the product of Maya''-Jayasamhita.

By knowldge that there is no duality the duality of the mind is destroyed; then the Samsara ends. O Brahman! (*Brahma Samhitā*).

पाञ्चरात्रतन्त्रे पाद्मसंहितायां अष्टमाध्याये ब्रह्मनारायण-संवादे भगवान्—

" भेदेन चाप्यभेदेन मिश्रेण च चतुर्मुख ।
त्रिधैव मुक्तिरुदिता भेदे कैङ्कर्यलक्षणा ॥
मुक्तिर्यथेह लोकेषु परिचर्यापरा नराः ।
देवस्य तद्वदेवैते वैकुण्ठे परमात्मन: ॥
लोके तस्य समीपस्था मुक्तात्मानस्समाहिता: ।
वसन्ति किङ्करास्सन्त: तत्प्रसादपरास्सदा ॥
अभेदे मुक्तिरत्यन्तं ऐक्यं स्यात्परजीवयो: ।
आत्मनो भावना चैक्यं सोऽहमित्येवमात्मिका ॥
सिद्धान्ते मिश्ररूपे तु भेदे स्थित्वाऽर्चनादिभि: ।
तोषयित्वा परं देवं ततो मुक्तस्समाहित: ।
विज्ञानेनैकतानेन परमात्मनि चिद्धने ॥
ऐक्यं प्राप्नोति सा मुक्ति: उक्ता सायुज्यलक्षणा ।
ऐश्वर्यमणिमाद्यष्टगुणावाप्तिस्सुदुर्लभा ।
मुक्तिर्वा परमानन्दप्राप्तिरूपा यदीप्सितम् ।
मुक्तिर्वास्त्येकतापत्तिर्जीवात्मपरमात्मनो: । " इति

तत्रैव षष्ठाध्याये ब्रह्मस्वरूपनिरूपणे—

" यथा पुष्करपर्णेषु स्वच्छमम्भ: प्रतिष्ठितम् ।
अन्तर्बहिरभिव्याप्य तिष्ठत्येको महार्णवे ॥

निमग्नस्येव कुम्भस्य बहिरन्तरपां स्थितिः ।
परक्षेत्रज्ञयोरैक्यं आत्मनश्श्रुतिचोदितम् ॥
क्षेत्रज्ञस्यास्य बाहुल्यं देहभेदात्प्रतीयते ।
एकस्यैव हि बिम्बस्य दर्पणेषु यथा भिदा ।
भूतपञ्चकसंघातं क्षेत्रं तत्र व्यवस्थितः ॥ ”

इत्यादि ॥

तत्रैव षष्ठाध्याये—

“ यथा घटस्थमाकाशं नीयमाने घटे मतिः ।
यातीति वस्तुतो नैव भेदोऽस्ति परजीवयोः ॥ ”

इति ॥

तत्रैव ब्रह्मा—

“ मुक्तात्मनश्च भवतो भेदः कः पुरुषोत्तम ।
एतदाचक्ष्व भगवन्नातिगुह्यं यदि प्रभो ॥ ”

भगवान्—

“ अहमेव भवन्त्येते न भेदस्तत्र कश्चन ।
यथाऽहं विहराम्येव तथा मुक्ताश्च देहिनः ॥ ”

इति जीवन्मुक्तनिरूपणं कृतम् ॥

जयाख्यसंहितायाम् (पुटं ३.)—

अनादि तदनन्तञ्च न सत्तन्नासदुच्यते ।
निर्गुणो गुणभोक्ता च सर्वस्यान्तर्बहिस्स्थितः ॥
सर्वगन्धरसैर्हीनं सर्वगन्धरसान्वितम् ।
एवं वेत्ति परं ब्रह्म ज्ञानेन परमेण च ।
यदा न जायते भूयः संसारेऽस्मिंस्तदा पुमान् ॥
अस्मिन्मायामये विश्वे व्यापी सर्वेश्वरः प्रभुः ।
सर्वदा विद्धयसक्तश्च यथाम्भः पुष्करच्छदे ॥
सर्वभृद्वैश्वरूप्याच्चप्यमोघत्वाच्च निर्गुणः ।
घटसंस्थं यथाऽऽकाशं नीयमानं विभाव्यते ॥
नाकाशं कुत्रचिद्याति नयनात्तु घटस्य च ।
ज्ञानं तदेव ज्ञेयञ्च वह्नेर्ज्वाला यथैव हि ॥

प्रमाणैरपरिच्छेद्यं यतस्संविन्मयं महत् ।
विभाति हृदयाकाशे येषां मायाविवर्जितम् ॥
एष नारायणो देवस्सर्वोपाधिविवर्जितः ।
भवातीतं परं ब्रह्म स्फटिकामलसन्निभम् ॥

तत्रैव (पु. ३३-३७)—

सरित्संगाद्यथा तोयं संप्रविष्टं महोदधौ ।
अलक्ष्यश्चोदके भेदः परस्मिन्योगिना तथा ।
ब्रह्माभिन्नात्ततो ज्ञानात् ब्रह्म संयुज्यते परम् ॥
अनादिवासनायुक्तो यो जीव इति कथ्यते ।
तस्य ब्रह्मसमापत्तिर्याऽपुनर्भाविता च सा ॥
यदिदं पश्यसि ब्रह्मन् मायया निर्मितं जगत् ।
कालादिबहुभिर्भेदैः भिन्नं नानास्वरूपकम् ॥

(पु. २२.)

अहिर्बुध्न्यसंहितायाम्—

अनाद्यन्तं परं ब्रह्म यत्तदक्षरमव्ययम् ।
अनामरूपसंवेद्यम् अवाङ्मनसगोचरम् ॥
तस्य स्यामिति सङ्कल्पे भावतोऽभावतोऽपि वा ।
स्वातन्त्र्याननुयोज्येन रूपेण परिवर्तते ॥
सर्वं सुदर्शनायत्तं सुदर्शनमयं जगत् ।

(पु. २२. २३)

सर्वद्वन्द्वविनिर्मुक्तं सर्वोपाधिविवर्जितम् ॥
तत्परं सर्वगं ब्रह्म सर्वकारण[illegible]
पूर्णं नित्योदितं [illegible] ॥
इदमीदृगियत्[illegible]
[illegible] विद्यते [illegible]
[illegible]त्परमेष्ठी [illegible]
क्षं [illegible] रघूत्त[illegible]
[illegible] कथं [illegible]
स्फुट [illegible]

एक एवेश्वरश्शश्वद्विश्वेषु निखिलेषु च ।
सर्वे तत्कर्मसिद्धाश्च मोहितास्तस्य मायया ॥

(पु. २०९)

जीवस्तत्प्रतिबिम्बश्च भोक्ता च सुखदुःखयोः ॥
प्रलीयते पुनस्तत्र प्रतिबिम्बा यथा रवेः ।
यथैव शातकुम्भेषु निर्मलेषु जलेषु च ॥
प्रत्येकं प्रतिबिम्बश्च दृश्य एव हि जीविनाम् ।
पुनः प्रलीयते सूर्ये गतेषु च घटेषु च ॥
एवं चन्द्रस्य बोद्धव्यं दर्पणे जीवने यथा ।
तस्मान्नित्यं परं ब्रह्म स जीवो नित्य एव सः ॥

(पु. २२०)

ब्रह्मसंहितायाम्

आनन्दलक्षणमित्युपक्रम्य—

" द्वैतं नास्तीति बोधेन मनसो द्वैतनाशनम् ।
एतदन्तो हि संसारः ब्रह्मन्नेवं विचारय ॥

सगुणोपासनं तावत्साधनं निर्गुणस्य तु ।
ब्रह्मविद्भवति ब्रह्म इत्येषा च परा श्रुतिः ॥

(पु. २२)

विष्णुसंहितायाम्

दर्पणानां बहुत्वे तु दृश्यन्ते नैकधा यथा ।
तद्वद्बहुत्वं मन्यन्ते विष्णोस्तस्याल्पचेतसः ॥
यथाम्भसीन्दुबिम्बानि प्रतिशब्दाश्च नैकधा ।
तद्वद्बहुत्वं मन्यन्ते विष्णोस्तस्याल्पचेतसः ॥

(पु. २५)

एकोऽप्यात्मा बहुष्वेवमित्याहुस्तत्वदर्शिनः ।
स ह्यात्मान्तरात्मा च परमात्मा च स स्मृतः ॥

(पु. २६)

आत्मानमन्तरात्मानं परमात्मानमित्यपि ।
तस्य तुर्यं परं रूपं यः पश्यति स एव सः ॥

(पु. ६२)

इत्यादिभिः परमाद्वैतसिद्धान्त एव वैष्णवतन्त्रेषु स्पष्टं प्रतिपादितः ॥

—o—

(ठ) वैखानसागमेषु अद्वैतभावाः

(ब्रह्मश्री - पिरान्तियङ्करै - सुब्रह्मण्यशास्त्रिणः)

[illegible] ஆகமம் ஸாக்ஷாத்
[illegible] விஷ்ணுவின்
[illegible] றர்ஷியால்
[illegible] ரத்தை
[illegible] பெரும்-
[illegible] யில்களை
[illegible] டத்து-
[illegible] தார-
[illegible] வை
[illegible] வம்
[illegible] ின்

நிருபிக்கப்பட்டிருக்கிறது. அடியில்கண்ட வியாஸத்தில் இவ்வாகம நூல்களில் தோன்றும் அத்வைத பாவங்கள் எடுத்துக் காட்டப்பட்டிருக்கின்றன.

வைகானஸ கிருஹ்ய ஸூத்திரம் 8-பிரச்னம் – 9-வது கண்டம்—நிவிருத்தி என்பது உலகம் அநித்யம் பரமாத்மாவைவிட வேறே இல்லை என்றுணர்ந்து ஜீவன் பரமாத்மா இவர்களின் ஐக்யத்தை ஸாக்ஷாத்கரித்து நித்யாநந்த பிரம்மஸ்வருபத்தில் பிரவேசிப்பது (அதாகவே ஆகிவிடுவது).

காச்யப ஸம்ஹிதையில் 'ஸமஸ்த பிரபஞ்சமும் பிரம்மமே, அவனைவிட வேறு பிரபஞ்சம் இல்லை' என்று உரைக்கப்பட்டிருக்கிறது.

Maharshi Vikhanas is said to be the son of Sri Nārāyaṇa.

नारायणः पिता यस्य माता चापि हरिप्रिया ॥
भृग्वादिमुनयः पुत्राः तस्मै विखनसे नमः
(भृगुसंहिता) ।

He founded the Vaikhānasa tantra and taught Marichi Atri, Kaśyapa and other sages. These holy men have left behind them many valuable works upon this Āgama. Though these works treat largely of the daily worship of Nārāyaṇa the construction of temples and the performance of festivals, we find in them a few chapters regarding the nature of the universe and the identity of the Jiva with the Lord.

In the Gṛhyasūtra it is said that one who wishes to obtain Mukti (release) should realize that there is nothing besides the supreme Ātman and perceive the identity (योग) of the soul with Him.

The Paramātman is eternal, incomprehensible in quality and beyond the reach of the senses. Śruti says that the universe is pervaded by Him and there is nothing besides Him (*Atri, Adhyaya* 31).

अथ वैखानसागमस्य अद्वैते तात्पर्यं निरूप्यते । अयं खलु आगमः भगवता विखनसा आदिपुरुष-श्रीमन्नारायणतनूद्भवेन प्रवर्तितः तदनुयायिभिः मरीच्यत्रिकश्यपादिमहर्षिभिः बहु विस्तारितः श्रीमन्नृसिंह-वाजपेयादिभिः पण्डितशिरोमणिभिः व्याख्यातगूढभ[illegible] प्राणिनामभ्युदयनिश्रेयसहेतुः जगत्यां विलसति तत्तद्ग्रन्थपर्यालोचने अद्वैतमेव पारमार्थिकं तत्त्वम्, तज्ज्ञानादेव च कैवल्यप्राप्तिरिति भगवतो विखनसः मरीचिकश्यपादीनां चाभिप्रायः विस्पष्टमवगम्यते ॥

तथा हि श्रीवैखानसगृह्यसूत्रे अष्टमप्रश्ने नवमखण्डे निवृत्तिमार्गं प्रस्तुत्य कीर्तितम्—" निवृत्तिर्नाम लोकानामनित्यत्वं ज्ञात्वा परमात्मनोऽन्यन्न किंचिदस्तीति संसारमनादृत्य छित्वा भार्यामयं पाशं जितेन्द्रियो भूत्वा शरीरं विहाय क्षेत्रज्ञपरमात्मनोर्योगं कृत्वा अतीन्द्रियं सर्वजगद्बीजं अशेषविशेषं नित्यानन्दं अमृतरसपानवत् सर्वदा तृप्तिकरं परं ज्योतिः प्रवेश्यमिति विज्ञायते " इति ॥

अत्र परमात्मनोऽन्यन्न किंचिदस्तीति प्रपंच-मिथ्यात्वं कथितम् । क्षेत्रज्ञपरमात्मनोर्योगश्च अभेद एव नान्यः, द्वैतमिथ्यात्वेन परमात्मव्यतिरेकेण जीवस्यापि असत्त्वात् । उपपादितं च एवमेव उक्तसूत्रभाष्ये श्रीनृसिंहवाजपेयीये । तथा हि " वेदांतमतमाह—यथा लोकानां भूम्यन्तरिक्षस्वर्गादीनां जगतामनित्यत्वं विनाशित्वं मिथ्यात्वमिति यावत् । तदनित्यत्वं कथमिति चेत् श्रुतेरनुमानाच्च । तथा हि-एकमेवाद्वितीयं ब्रह्म, नेह नानास्ति किंचनेति श्रुतेः । प्रपंचः तात्त्विकस्वान्तर्भेद-हीनः, ज्ञातत्वात्, आकाशवत् । अनिर्वचनीयता कुत इति चेत् । अनुमानात् । तथा हि-विवादपदं अनिर्वाच्यं, जडत्वात्, न यदेवं न तदेवं, यथा आत्मा । इदं जगत् अनित्यं, भूत्वा अभावित्वात्, घटवत् । प्रपञ्चो मिथ्या, जघन्यत्वात् दृश्यत्वाद्वा, शुक्तिरूप्यवत् । एवं लोकानामनित्यत्वं श्रुत्यनुमा[illegible] [illegible]नः ब्रह्मणः अन्यत् [illegible] अनुमानात् [illegible] विद्यते [illegible] न भिद्यन्ते [illegible] भोगायतन[illegible] भोगायत[illegible] [illegible] धन[illegible]

"अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' इति च स्रष्टुरेव शरीरानुप्रवेशश्रवणात्। तस्य परमात्मनः जीवात्मनाऽवस्थानश्रवणात्—'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः' इति, 'तत्त्वमसि' इत्यसकृत् ऐकात्म्यश्रुतेश्च। एवमनुमानात् आगमाच्च परमात्मनोऽन्यत् न किंचिदस्तीति ज्ञात्वा, संसारमनादृत्य। कुत इति चेत् सुखस्यानित्यत्वात् इत्यादि। परश्च परमात्मा परं ब्रह्म सः ऐश्वर्यविशिष्टसच्चिदानन्दस्वरूपी दृश्यादृश्यश्च अणुर्महान् एक एव शरीरान्तर्बहिः स्थितः भगवान्नारायणः॥

क्षेत्रज्ञपरमात्मनोर्योगः अनन्यभावः, तं तत्त्वमसीति ज्ञानेन कृत्वा, अतीन्द्रियं आदिकारणं, न शिष्यत इत्यशेषः। विशिष्यते सर्वस्मादिति विशेषः। तच्चाशेषविशिष्टं नित्यानन्दं अमृतं; परं उत्कृष्टं ज्योतिषः विभूतेः प्रवेशो यस्मिन् तज्ज्योतिः प्रवेशं इति; तदेव निवृत्तिर्नाम परब्रह्मणः प्रवेशः तन्मयत्वं फलमिति विज्ञायते, सर्वोपनिषत्सु संगीयते। तत्रैव वैखानसगृह्यसूत्रे संभक्तब्राह्मणलक्षणकथनप्रस्तावे "संभक्तो नाम ब्रह्मणः सर्वव्यापकत्वात्—योऽसौ परमात्मा तत्सर्वव्यापीहाकाशवत्तिष्ठति। तस्मात् ब्रह्मणोऽन्यत्र कुत्रचिदात्मनः प्रतिपद्यतेऽसौ, तस्मात् ब्रह्मव्यतिरिक्तमन्यन्नोपपद्यते। सगुणे ब्रह्मणि बुद्धिं निवेश्य पश्चान्निर्गुणं ब्रह्माश्रित्य मोक्षे यत्नं नित्यं कुर्यात्" इत्यादिना प्रपंचमिथ्या[illegible]। अत्रापि भाष्यम्—"ब्रह्मणः [illegible] तु ज्ञायते, तथा च [illegible] इत्यादि।

[illegible] 'सगुणे [illegible] तद्रूपं [illegible]ज्ञात् [illegible]पं

ध्यात्वा नित्यं उद्योगं कुर्यात्, तस्य योगिनः इह जन्मन्येव मोक्षो भवेत्, तत्कथं? अहमेव परमानन्दस्वरूपी परं ब्रह्म अव्ययः इति यो ध्यायेत् स जीवन्नेव मुक्तः तस्य अस्मिन्नेव जन्मनि मोक्षो भवेत्। कः पुनरयम्? तस्मात् परमानन्दस्वरूपेण ब्रह्मणा सह अत्यंतावस्थानमेव मोक्षः 'आनन्दं ब्रह्मणो रूपं तच्च मोक्षेऽभिव्यज्यते' "विज्ञानमानन्दं ब्रह्म" इति श्रुतेः। अत्र जीवन्मुक्तिरपि कथिता। ज्ञानस्यैव च मोक्षहेतुत्वमुक्तमिति विशेषः।

मरीचिप्रोक्ते वैखानसागमे च एक एवेश्वरः उपाधिगुणभेदात् ब्रह्मेशानादिभेदं भजत इत्युक्तम्। अद्वैतसिद्धान्तसर्वस्वभूता जीवन्मुक्तिरपि निरूपिता। तथा हि—विमानार्चनाकल्पे अशीतितमे पटले—ब्रह्मणः अग्निविस्फुलिंगा इव ब्रह्मेशानादिरूपैः भिन्नत्वात्, कुलालचक्रस्थमृदो घटशरावादिभेदा इव यद्रूपो भावितः तद्रूपो भूत्वा विष्णुः प्रकाशते इति। त्रिणवतितमे पटले—तथा प्रत्यगात्मा नित्यशुद्धमुक्तस्वभावपरमानन्दमयत्वं प्राप्य परमात्मानं नारायणं सदा पश्यति, अणिमाद्यैश्वर्यं च प्राप्नोति, जीवन्मुक्तो भवेत्॥

एवं अत्रिमहर्षिकृतसमूर्तार्चनाधिकारे ३१ अध्याये आत्मनः निर्गुणत्वं प्रपंचमिथ्यात्वं च कथितम्—

"नित्योऽचिन्त्योऽप्रमेयश्च निर्गुणोऽतीन्द्रियः परः।
सर्वेशः सर्वभूतात्मा सर्वाधारः सनातनः॥
तेनेदं पूर्णमित्याह श्रुतिस्तद्रहितं न च" इति॥

तथा काश्यपीये ज्ञानकाण्डे चतुष्षष्टितमेऽध्याये सगुणध्यानात् निर्गुणध्यानं पृथङ्निरूपितम्। तथा हि "प्रत्यगात्मवित् ध्यानयुक्तः निर्गुणं निष्कलं सर्वव्यापिनं परमात्मानं तत्कुम्भजले समावाह्य" इत्यादि॥

तत्रैव प्रपञ्चमिथ्यात्वमपि श्रुतम्—

"ब्रह्मवादिनो वदन्ति" "अणोरणीयान् महतो महीयान्" "आत्मैवेदं सर्वम्" "नेह नानास्ति किंचन" इति श्रुतयो गृह्णन्ति यथा आदर्शसहस्रेषु दृश्यते पुरुषः, यथांभसि अर्कबिंबानि, गिरेः प्रतिशब्द इव तस्य नानात्वं, यथान्धकारे रज्ज्वाः सर्पदण्डोदकधारावभासत्वं तथा अविद्यास्वभावः स्यात् । आत्मस्वभावस्तु—आत्मा; समुद्रस्वभावः तरंगः न तरंगस्वभावः समुद्र इति यावत् ॥

पञ्चत्रिंशाध्याये च अथ विश्वतश्चक्षुः विश्वतोमुखांघ्रिहस्तं विश्वात्मकं विश्वगर्भं विश्ववेत्तारं विश्वेन्द्रियगुणाभासं विश्वेन्द्रियविवर्जितं अनादिनिधनं व्योमाभं ज्ञानज्ञेयविहीनं ज्ञानघनं तदेव जाग्रत्स्वप्नसुषुप्तितुरीयावस्थानगं बहिःप्रज्ञं अंतःप्रज्ञं प्रज्ञावस्थं वैश्वानरतैजसहृदयाकाशरूपमविभक्तं भुंजानं ब्रह्म तुर्यं चतुष्पादं आमनन्ति । तदेव ब्रह्म सत्वोत्कर्षनिकर्षाभ्यां प्राणिषु विभज्यते । तत्र मध्यस्थः सूक्ष्ममूर्तिः सत्तामात्रः सोऽत्र परं ब्रह्म प्रत्यगात्मा विष्णवाख्यः । अत्र जीवब्रह्मणोरैक्यं स्पष्टमुक्तम् ॥

आत्मनः नानात्वं उपाधिकृतमित्येतदपि प्रतिपदितं तत्रैव "ज्ञानगम्यस्य अकर्तुरविकारिणः शुद्धस्याभौतिकस्य आत्मनः पृथक्त्वं घटाकाशवत्" इति ॥

अयं चापरो विशेषः यदस्मिन्नागमे भगवदाराधनाङ्गतया आराधयितुः भगवदभेदेन ध्यानं विहितम् । तथा हि भार्गवे क्रियाधिकारे आराधनाध्याये—

"आत्मसूक्तं ततो जप्त्वा तन्मयत्वेन भावयेत्" इति, "आत्मानं नारायणं ध्यात्वा" इति च ॥

यद्यपि केवलं अभेदध्यानं न ध्यातृध्येययोरभेदं साधयेत्; अतिप्रसंगात्, तथापि अन्यत्र स्पष्टीकृतमभेदं दृढीकुर्यादेवेति भवत्येवास्यापि अद्वैताभिप्रायसूचकत्वम् । तदेवं वैखानसागमग्रन्था अद्वैतपरा एवेति सिद्धम् ॥

(ड) शैवागमेषु अद्वैतभावाः

(देवकोट्टै - कृष्णशास्त्रिणः)

சிவாகமங்கள் அநேகமுள்ளன. அவைகளில், காமிகம், காரணம், அசிந்தியம், சுப்ரபேதம் முதலியன சர்யை (ஆசாரம்) கிரியை (தீக்ஷை கோயில்பூஜை முதலியன) இவைகளுக்கு அதிகமாக உபயோகப்படுகின்றன. மிருகேந்திரம் பௌஷ்கரம் தேவீகாலோத்தரம் ஸர்வஞானோத்தரம் ஞானதிலகம் முதலிய ஆகமங்கள் விசேஷமாய் தத்வஞான விசாரத்துக்கு உபயோகப் படுகின்ற[illegible] போஜராஜன், அகோர சிவாசாரியர், காச்[illegible] ராமகண்டர், வித்யாகண்டர், நாராயண[illegible] கண்டர், ஹரதத்தாசாரியர், ஞானசிவாசாரியர், ஸோமசம்பு, பாஷ்யகார ஸ்ரீ கண்ட சிவாசாரியர், அப்பய்ய தீக்ஷிதர், சிவாக்ர யோகி, உமாபதிசிவம், மாதவ சிவஞான யோகிகள் முதலிய பண்[illegible]ர்கள் அநேக சைவ சாஸ்தி[illegible] யிருக்கிறார்கள். இ[illegible] ஆகமங்களு[illegible] களும் க[illegible] துவக்க[illegible] பாவனை[illegible] பேதா[illegible]ரும்மா (ஞான[illegible] [illegible]ளுக்[illegible] [illegible]பொழுது [illegible]

स्वतोऽशिवः शिवः साक्षात्
न भवेत्तु कदाचन ।
शिव एव स्वतः साक्षात्
शिवो भवति नान्यथा ॥

எனக் கூறுகிறது. இக்காலத்தில் சிவமல்லாத பொருள் முக்தியிலே சிவமாகாது. ஆதலால் முக்காலத்திலும் ஜீவன் சிவமே என்னும் மறை மொழியின் தத்துவமே இதன் பொருள். இந்த ஸர்வஞானோத்தராகமம் தேவகோட்டை சிவாகமசங்கத்தில் வெளி யிடப்பட்டிருக்கிறது. இதற்கு பண்டைய செய்யுளில் மொழிபெயர்ப்பும் முக்திரத்நம் என்னும் விருத்தி யுரையுடன் வெளியிடப் பட்டிருக்கிறது. அப் பதிப்பில் இவ்வாறு முகவுரை காணப்படுகிறது. "இந் நூல் சைவசித்தாந்த சம்பந்தமான எந் நூலிலும் மிகச் சிறந்ததெனக் கருதியும் இந் நூல் பொருளுக்கேற்ப ஏனைய நூல்களுக்குப் பொருள் கொள்ள வேண்டுமென்பது உணர்த்த வேண்டியும் சிவஞான பாடிய கர்த்தாவாகிய ஸ்ரீ மாதவசிவஞான யோகிகள் தாமருளிச்செய்த சிவஞான பாடியத்து ஆறும் சூத்திரத்தில் இச் சர்வஞானோத்தரத்துக்கு ஒரு சுருக்க உரை கூறினார் போன்று இந் நூற் பொருளைத் தொகுத்தெடுத்தருளி இந் நூலின் பெருமையைப் பலவாறு பாராட்டிப் புகழ்ந்தனர். இச் சர்வஞானோத்தரமே வாயு ஸம்ஹிதையில் ஸர்வாகமோத்தரம் எனக் கூறப்பட்டது." என்றும் "ஏனைய ஆகமங் களில் இறைவனுடைய தடத்த நிலை மட்டும் கூறினமையால் அவ்வாகமங்களிற் கூறும் முக்தியும் தடத்த நிலைப் பற்றியதேயாம். இவ்வாகமத்தில் இறைவனுடைய ஸ்வரூப [illegible] மெனவும் தடத்த நிலையைப் [illegible] பொருட்கள் நான்- [illegible] த்திற் கூறும் [illegible] ஆகவே [illegible] ங்களெல் [illegible] றுக்கும் [illegible] பொது [illegible] சர்வ [illegible] ருளைச் [illegible] து [illegible] ம்

ரௌரவாகமத்திலும் இது போன்ற வாக்கியம் காணப்படுகிறது.

यथा जले जलं क्षिप्तं क्षीरे क्षीरं घृते घृतम् ।
अविशेषं भवेत्तद्वत् आत्मापि परमात्मनि ॥

"ஜலத்திலே கலந்த ஜலத்தைப்போலவும் பாலிலே கலந்த பாலைப்போலவும் நெய்யிலே கலந்த நெய்யைப்போலவும் சிவத்தில் ஜீவன் கலக்கிறான்" என்று பொருள். ரௌரவாக- மத்திலுள்ள சிவஞான போதத்தின் எட்டாவது சூத்திரத்திலும் ஒரு அரசகுமாரன் இளம் பருவத்தில் காட்டிலே தடுமாறி வேடர் களுடன் கலந்து, வெகுவருஷங்கள் வரை வேடனாகவே நினைந்து வளர்ந்து, பின்னர் தன் பிதாவான அரசனைத் தற்செயலாய் காட் டிலே கண்டு, அவனது வாக்யத்தால் தான் அரசகுமாரனென்று தெரிந்த பொழுது பொய் யான வேடத் தன்மை தன்னை விட்டு விலகி- யதுபோல் முக்காலத்திலும் சிவனாகவே இருக் கும் ஜீவனுக்கு குருவின் உபதேசத்தால் சிவத் தன்மை வெளிப்படும் பொழுது பொய்யான ஜீவத்தன்மை விலகுகிறது. தான் தானாக இருப்பதே முக்தி என்ற பொருள் கூறப்படு கிறது. இதே உபமானத்தை ஸ்ரீ ஆதி சங்கராசார்ய ஸ்வாமிகளும் பிருகதாரண்யக பாஷ்யத்தில் விளக்கியிருக்கிறார்கள்.

ஸ்ரீ கண்டசிவாசார்யரால் செய்யப்பட்ட சைவவிசிஷ்டாத்வைத பாஷ்யத்திற்கு ஸ்ரீமான் அப்பய்ய தீக்ஷிதர் அவர்கள் சிவார்க்க மணி தீபிகை என்ற ஒரு பேருரை அருளியிருக் கிறார்கள். அவ்வுரையின் ஆரம்பத்தில் கீழ் வரும்பொருள் வருமாறு சுலோகம் வரைந் திருக்கிறார்கள். 'வேதாந்தங்களுக்கும் ஆக மங்களுக்கும் அத்வைத தத்வத்திலேயே கருத்து நிலைத்திருக்க, விசிஷ்டாத்வைத பாஷ்யத்திற்கு உரை இயற்றுவானேன்?' என்றால் ''சிவகிருபையினாலேயே மானிடர் களுக்கு அத்வைத தத்துவத்தில் வாசனை ஏற் படவேண்டும். சிவகிருபைக்கு சிவோபாஸனை யே காரணம். சிவ விசிஷ்டாத்வைதம் சிவோபாஸனைக்கு உபகாரம் செய்கிறது. ஆகையால் உரை செய்கிறேன்'' என்றவாறு.

" यद्यप्यद्वैत एव श्रुतिशिखरगिरामागमानां
च निष्ठा साकं सर्वैः पुराणैः । "

"तथाप्यनुग्रहादेव तरुणेन्दुशिखामणेः ।
अद्वैतवासना पुंसामाविर्भवति नान्यथा ॥"

இதனாலும் ஆகமங்களுக்கு அத்வைதத்திலேயே நிஷ்டை என்பது தெளிவாகிறது.

மற்றும் ஸர்வஞானோத்திரத்தில் "ஆகாயம் ஒரு குடத்திற்குள் இருக்கும் பொழுது அதற்கு குடவெளி' என்று பெயர். பெரு வானவெளியும் குடவெளியும் போன்றவர்களே சிவனும் ஜீவனும். குடம் லயத்தையடைந்தபொழுது உள்வெளி பரவெளியாவது போல, அந்தக்கரணமென்னும் மனம் நாசத்தையடையும் பொழுது, ஜீவன் சிவமே'' என்ற கருத்து வெளிப்படுத்தப்பட்டிருக்கிறது.

घटसंवृतमाकाशं नीयमाने घटे यथा ।
घटो नीयेत नाकाशं तद्वज्जीवो नभोपमः ॥ १ ॥
भिन्ने कुंभे यथाऽऽकाशः आकाशत्वं प्रपद्यते ।
विभिन्ने प्राकृते देहे तथाऽऽत्मा परमात्मनि ॥ २ ॥

We have a number of works in Sivāgama literature. The Kāmika, Kāraṇa, Achintya, Suprabheda and others tell us how to perform the Śiva Pūja, how to conduct Śiva festivals (Utsavas) and how to build Śiva Temples. Agamas, like Mṛgendra, Poushkara and Sarvagnanottara discuss largely the universal truth. They begin with teaching the difference between Jīva and Śiva, useful in the performance of the Pūjas. They then dwell upon difference-cum-nondifference (भेदाभेद) essential for devotion, and finally they declare the ultimate reality, namely the identity of the Jivas with Śiva. Sarvajnaanottarāgama says "A non-Śiva cannot become Siva ; Siva alone can become Śiva". Now Siva's becoming Siva is nothing but the annihilation of the nescience which gives us the notion 'I am not Śiva'—a truth so widely set forth in the Vedāntas.

It is noteworthy that this Sarvajnanottarāgama is said to be the authority on the subject. Other Āgamas should be interpreted according to its principles. Suprabheda [illegible] declares that like water poured [illegible] water, or milk in milk or ghee in ghee, so also the Jiva merging in Śiva becomes non-different. Jiva's becoming Śiva is compared to a prince who fell into the hands of hunters and thought himself a hunter until he was rescued by the king, when he came to know that he was a prince; Śrī Bhagavatpāda also has narrated the same illustration in his Bṛhadāraṇyaka Upanishad :

"As the ether (Ākāśa) defined by a pot becomes one with the all-pervading ether whent the pot is broken, so when the mind called Antaḥkaraṇa is destroyed, the Jīva becomes one with Siva (Sarvajnānottara).

काञ्चन काञ्चीनिलयां कामेशस्यापि काम-
सन्दात्रीम् ।
कलये हृदये नित्यं कामाक्षीं कामकोटि-
पीठस्याम् ॥
श्रीकामकोटिपीठे चन्द्रकलाभूषणं विभुं
नियमात् ।
आराधयन् यतीन्द्रश्चकास्ति तारेशशेखरो
नित्यम् ॥
यद्यप्यद्वैत एव श्रुतिशिखरगिरामागमानां च निष्ठा
साकं सर्वैःपुराणस्मृतिनिकरमहाभारतादि-
प्रबन्धैः ।
तत्रैव ब्रह्मसूत्राण्यपि च विमृशतां भान्ति
विश्रान्तिमन्ति
प्रत्नैराचार्यरत्नैरपि [illegible]
शं [illegible]
त [illegible] विद्यते [illegible]
[illegible] ात्परमेष्ठ [illegible]
[illegible] रघूत्त [illegible]

इति श्री [illegible] कां [illegible]

ब्रह्मसूत्राणां सर्वेषामपि तत्रैव तात्पर्यमिति प्रतीयते। तत्र शिवागमाद्यागमानामद्वैत एव तात्पर्यमित्यत्र किञ्चिद्विमृश्य निरूप्यते ॥

तत्र स्कान्दे शंकरसंहितायां " सनकादिमुनीन्द्रेभ्यस्सिद्धान्तानागमानदात् ", सूतसंहितायां

" अष्टादशपुराणानां कर्ता सत्यवतीसुतः ।
कामिकादिप्रभेदानां यथा देवो महेश्वरः ॥

इत्यादिवचनैः शिवागमानां परमेश्वरप्रोक्तत्वमत एव प्रामाण्यमिति प्रस्फुटम् ॥

ते चागमाः क्रियाप्रधानाः कामिककारणाचिन्त्यसुप्रभेदादयः, तथा विद्याप्रधानाः मृगेन्द्रपौष्करदेवीकालोत्तरसर्वज्ञानोत्तरज्ञानतिलकादयश्च श्रीभोजराजभट्टरामकण्ठविद्याकण्ठनारायणकण्ठहरदत्ताचार्याघोरशि - वाचार्यसोमशंभुदीक्षितेन्द्रशिवाग्रयोगिप्रभृतीनां निबन्धेषूदाहृताः शिवभक्तलोकप्रसिद्धाश्च विराजन्ते। ते च पूजाध्यानाद्यपेक्षितभेदमार्गभेदाभेदादिमार्गान् सोपानक्रमेण निरूप्य क्रमेणोत्तमाधिकारिणं सोऽहंभावनासौधतलमारोप्य अन्ततः पारमार्थिकं परमाद्वैतं प्रकाशयन्ति । तथा सर्वज्ञानोत्तरे—

साधनेन स्वतो जीवो न शिवस्सर्वथा भवेत् ।
स्वतोऽशिवश्शिवस्साक्षान्न भवेत्तु कदाचन ॥
[illegible] स्ततस्साक्षात् शिवो भवति नान्यथा ॥
[illegible] न्ति भ्रान्तचेतसः ॥
[illegible] तम् ।
[illegible] ॥
[illegible] ते ।
[illegible]
[illegible] त्ता-

ति ऐतरेयोपनिषदि चतुर्थखण्डे उद्घुष्टो वामदेवमहर्षिः कदाचित्कुमारगिरिमुपगम्य स्कन्दपरमाचार्यसन्निधिं प्राप्य तच्चरणनलिनमुपसंगृह्य " ओं नमः प्रणवार्थाय प्रणवार्थविधायिने " इत्यादिना संस्तुवन् " अधीहि भगवंस्तत्त्वं शुद्धाद्वैतस्य मे प्रभो । प्रणवार्थं च कारुण्यात् " इति सम्प्रार्थितवान् ॥

एवं प्रार्थयमानाय वामदेवाय योगिने ।
स्कन्दोऽपि भगवांस्तस्मै प्रोवाच करुणाबलात् ॥
शुद्धाद्वैतस्य यत्तत्त्वं सर्वज्ञानोत्तरागमम् ।
प्रणवाख्यस्य तत्त्वं च पञ्चाक्षरमहामनोः ॥
प्रोवाचागमवर्यांश्च स्कन्दकालोत्तरादिकान् ।
उपदिश्याज्ञापयत्तस्मै शुद्धचित्तान्प्रियान्वितान् ।
कृतार्थयोपदेशेन मुने शिष्यानुपागतान् ॥

एतच्च ग्रन्थरत्नं रौरवागमविद्यापादीयपाशविमोचनपटलान्तर्गतत्वेन प्रसिद्धद्वादशसूत्रात्मकशिवज्ञानबोधग्रन्थस्य भाष्यकृद्भिः (सूर्यनार्कोविल्) अर्कवनाधीनाभिषिक्तैश्शिवाग्रयोगिभिस्सत्यज्ञानदर्शीत्यपरनामकमेय्कण्डदेवकृतद्राविडभाषामयशिवज्ञानबोधद्राविडभाष्यकारेण माधवशिवज्ञानयोगिना च स्वकीयग्रन्थेषु मुक्त्यादिनिरूपणप्रस्तावे " तदुक्तम् सर्वज्ञानोत्तरे " इति स्वग्रन्थप्रामाण्यनिर्वाहाय तत्र तत्राद्रियते। तत्रैव शिवानन्यत्वसाक्षात्कारप्रकरणे—

योऽसौ सर्वगतो देवस्सर्वात्मा सर्वतोमुखः ।
सर्वतत्त्वमयोऽचिन्त्यस्सर्वस्योपरि संस्थितः ॥
सर्वतत्वव्यतीतश्च वाङ्मनोनामवर्जितः ।
सोऽहमेवमुपासीत निर्विकल्पेन चेतसा ॥
यदेव निष्कलं ज्ञानं शाश्वतं ध्रुवमव्ययम् ।
निर्विकल्पमनिर्देश्यं हेतुदृष्टान्तवर्जितम् ॥
अलिङ्गमक्षरं शान्तं विषयातीतगोचरम् ।
अविभाव्यमसन्देहं तदहं नात्र संशयः ॥

इत्याद्युपवर्ण्य, श्लोकचतुष्टयानन्तरं

अहमात्मा शिवो ह्यन्यः परमात्मेति यस्स्मृतः ।
एवं योपासयेन्मोहान्न शिवत्वमवाप्नुयात् ॥
शिवोऽन्यस्त्वमहमेवान्यः पृथग्भावं विवर्जयेत् ।
यश्शिवस्सोहमेवेति ह्यद्वयं भावयेत्सदा ॥
एवमेकात्मभावेन संस्थितस्य तु योगिनः ।
सर्वज्ञत्वं प्रकाशेत विकल्परहितस्य तु ॥
आत्मलाभात्परो लाभः क्वचिदन्यो न विद्यते ।
तदात्मानमुपासीत योऽयमात्मा परस्तु सः ॥

इत्युक्तम् । एवमभेदपराणां वाक्यानां यैः कैश्चित् यानि क्लिष्टभेदपरव्याख्यानानि कृतानि तान्यतिगम्भीरदिशा शिवाग्रभाष्यकारा धिक्कृतवन्तः ॥

तत्र बहुप्रकारक्लिष्टव्याख्यानेषु

“ शिवोऽन्यस्त्वहमेवान्यः पृथग्भावं विवर्जयेत् ।
यश्शिवस्सोहमेवेति ह्यद्वयं भावयेत्सदा ॥

इति श्लोकस्थविवर्जयेदितिपदं वि वर्जयेदिति द्विधा विच्छिद्य, विशब्दः प्रतिषेधवाचीत्युक्त्वा विवर्जयेदित्यस्य न वर्जयेदित्यर्थः इत्यादि विवरणं कृतम् । ईदृशक्लिष्टव्याख्याभासानेवाधिकृत्येत्थमभाषिषुः शिवाग्रयोगिनः “ तदेतद्व्याख्यानं न सचेतसां चेतस्समारोहति ” इति । तथा हि एतद्वचनगतानां देवसर्वात्मसर्वतत्त्वमय - सर्वमन्त्रमय-जगन्नाथपरमात्म-सर्वदेहस्थेश्वरादिशब्दानां संकोचयोगादिकल्पनया व्याख्याने कारणं किं संहितान्तरविरोधः ? अथवा पूर्वप्रकरणविरोधः ? उत युक्तिविरोधः ? किं वापसिद्धान्तः ? न तावदाद्यः ; एतद्विरोधेन संहितान्तरस्यैव गौणार्थत्वेन व्याख्यानोपपत्तेः । न च भेदप्रतिपादकस्य संहितान्तरस्य बाहुल्यात् ‘ त्यजेदेकं कुलस्यार्थे ’ इति न्यायेनास्या एव गौणाद्यर्थतया नयनं युक्तमिति वाच्यम् । कर्मब्रह्मकाण्डयोरिव अधिकारिभेदे संहिताद्वयस्यापि उपचारादिकल्पनां विनैवार्थबोधक[illegible] सम्भवति क्लिष्टकल्पनया व्याख्यानस्य अयुक्तत्वात् । अत एव ज्ञानतिलके

कौश्चादिषु सुरैस्सर्वैर्महामायाविमोहितैः ।
ऋषिभिश्चैव भोगार्थैर्मोक्षमार्गपराङ्मुखैः ॥
पृष्टोऽहं तन्त्रमन्त्राणि तपश्चर्याव्रतानि च ।
सिद्धान्ततन्त्रवादांश्च तेऽपि तन्त्राण्यनेकधा ॥
अनेकभेदभिन्नन्तु द्वैतं पार्वतिनन्दन ।
अद्वैतं च तथाप्यन्ये द्वैताद्वैते तथापरे ॥
पृच्छकानां वशेनैव ह्युक्तं शास्त्रमनेकधा ।
साधनानि विचित्राणि मन्त्राणां मन्त्रजातयः ॥
यो यत्पृच्छति भावेन तत्तस्य कथयाम्यहम् ।
किमन्यत्पृच्छमानस्यान्यत्कथयामि षण्मुख ॥
मया विमोहितास्सर्वे अनेकैश्शास्त्रसंग्रहैः ।

इत्यधिकारिभेदेन संहितानां प्रवृत्तिरुक्ता । अत एव चास्यास्संहितायाः संहितान्तरेभ्यो वैलक्षण्येन मुख्याधिकारिविषयतां दर्शयितुं सर्वज्ञानोत्तरमिति नामधेयं कृतम् । एवं देवीकालोत्तरेऽपि अभेदभावनाया एव मोक्षहेतुत्वमुक्तम् ॥

सुप्रभेदे च विद्यापादे

यथा जलं जले क्षिप्तं क्षीरे क्षीरं घृते घृतम् ।
अविशेषं भवेत्तद्वदात्मापि परमात्मनि ॥

इति मुक्तस्य परमशिवेनैक्य[illegible]तम् ।
रौरवे—

“यथा जलं [illegible] विद्यते [illegible]
याति ” [illegible] [illegible]त्परमेश्[illegible]
प्रतिप[illegible] रघूत्त[illegible]
सं[illegible]

न द्वितीयः; पूर्वप्रकरणे संसारदशायां प्रतीयमानस्य भेदस्य कथनात् तद्विरोधाभावात् । नापि तृतीयः ; अभेदनिरासिकाया युक्तेरभावात् ” इति । किञ्च केषुचिदागमेषु “दीक्षैव मोचयत्यूर्ध्वं शैवं धाम नयत्यपि ” इति दीक्षाया मोक्षसाधनत्वमुक्तम् । तस्माद्दीक्षैव मोक्षसाधनं न ज्ञानमिति केचिदाहुः, तदपि शिवाग्रयोगिवर्यैः बहुधा विकल्प्याक्षेपसमाधानपूर्वकं खण्डितम् । तथा हि अत्र इन्द्रियव्याधैरिति व्याधशब्दप्रयोगात् बृहदारण्यकोपनिषद्भाष्ये सुखावगमार्थं व्याधोपाख्यानरूपेण यथा आत्मतत्त्वोपदेशः कृतः, तद्वदेवात्रापीति उपाख्यानविशेषस्स्मयते-तद्यथा कश्चिद्राजपुत्रः कुतश्चित्कारणात् जातमात्र एव कर्णादिवत् व्याधकुलं प्रापितः तैर्व्याधैः स्वापत्यवदशनवसनादिभिः पोषितस्तैस्सहवासात् स्वात्मानमपि व्याधं मन्यमानस्स्वस्वरूपं राजपुत्रत्वादिकमजानानः पश्चात्तादृशस्य कारणस्यापगमे स्वपित्रा राज्ञा मृगयापदेशं गतेनागत्य “न त्वं व्याधजातीयः, किं तु अस्मदपत्यं महाराज एव कुतश्चित्कारणान्मया व्याधकुले स्थापितः । अतस्त्वं व्याध इत्यात्मानं मन्यमानस्त्वात्मगतं राजत्वं न मनुषे । अतस्त्वं एतान्व्याधानात्मवशीकृत्य स्वरूपभूतं राजत्वं प्राप्नुहि ” इति बोधितस्तान्व्याधान् त्यक्त्वा स्वपदं प्राप्तवान् । तथा जीवोऽपि संसारमारभ्य इन्द्रियैस्सह स्थित्वा आत्मानं तत्स्वरूपमेव मन्यमानः स्वस्वरूपं शिवाभेदमजानानः पश्चान्मलपरिपाके सति गुरु[illegible] प्रकारेण अहमेव त्वमित्यनन्यत्वेन

[illegible] बोधितः ।

[illegible] पदम् ॥

[illegible] साधनं

[illegible] त्वा-

कर्माणि तत्प्राप्तिसाधनतयोक्तान्यपि तत्फलस्वभावपरामर्शेन तेषां तत्साधनत्वनिषेधकवाक्यान्तरपर्यालोचनया च ज्ञानद्वारा तत्साधनानीत्याह स्थित्वा इति ” इति । तत्रैव तत्पदं प्राप्नोतीति व्याख्याने “यद्यपि शिवरूपस्य नित्यसिद्धत्वात् जीवतादात्म्यवत्त्वाच्च नित्यप्राप्तत्वमेव तथापि ग्राहकस्य तत्त्वेनाद्य प्रबुद्धत्वेन पूर्वमप्राप्तकल्पं शिवस्वरूपं तन्मोचनेन इदानीं प्राप्तमिव भवति विस्मृतदृष्टं कण्ठस्थग्रैवेयकमिवेति प्राप्नोतीत्युच्यते ” इत्यादिवाक्यजालैरतिविस्तारेण ज्ञानस्यैव मोक्षसाधनत्वं प्रसाध्य ज्ञानकर्मणोस्समुच्चयेन साधनत्वं तयोस्तुल्यकक्ष्यतया च साधनत्वं निराकृतम् । तद्विषये प्रमाणान्यपि उपन्यस्तानि । तथा हि ज्ञानतिलके होमादिवैदिकदीक्षादितान्त्रिकसर्वकर्मकर्त्रनुवादपुरस्सरं

> न तेषां तत्पदं शान्तं निराधारं निरामयम् ।
>
> इति ।

तत्रैव—क्रियमाणेन धर्मेण ह्यधर्म उपजायते ।

इति च ॥

सर्वज्ञानोत्तरे—

> “आत्मानं परमो भूत्वा यो विजानाति तत्त्वतः ।
> स मुच्यते त्वयत्नेन सर्वावस्थां गतोऽपि सन् ॥
> न जातु देवा वेदा वा यज्ञा वा बहुदक्षिणाः ।
> संसारार्णवमग्नानां भूतानां शरणार्थिनाम् ।
> नान्यश्शरणदः कश्चिदात्मज्ञानादृते क्वचित् ” ॥
>
> इति ।

तथा देवीकालोत्तरे “ज्ञानोत्पत्तिनिमित्तन्तु क्रियाचर्या प्रकीर्तिता ” इति ।

किंच ज्ञानतिलक एव संहितान्तरगतो दीक्षादेर्मोक्षसाधनत्वोपदेशः मन्दाधिकारिविषय इत्युक्तम् । तस्मादागमेषु ज्ञानस्यैव मोक्षसाधनत्वं निस्संशयं प्रतिपादितम् । [illegible]च ईश्वरस्य केवलनिमित्तकारणत्ववादिनां केषाञ्चि[illegible]दागमानां ज्ञानतिलकागमोक्तदिशा मन्दाधिकारिविषयत्वेन

चरितार्थतया उत्तमाधिकारिविषये अद्वैतसिद्धान्तादृतं अभिन्ननिमित्तोपादानत्वमेव तात्पर्येण निरूपयन्ति आगमान्ताः इति, अद्वैत एव श्रुतिशिखरगिरामागमानां च निष्ठेत्युपक्रान्तं दीक्षितेन्द्राणां सूक्तं सुस्थितमेव । एतदभिन्ननिमित्तोपादानत्वं शिवज्ञानबोधद्वितीयसूत्रभाष्ये भाष्यकारैरतिविस्तृततयोपवर्णितं विलसति । तथा हि ज्ञानतिलके—

येन सर्वमिदं व्याप्तं यस्मिन्सर्वं प्रतिष्ठितम् ।
यस्मादुत्पद्यते सर्वं तमाहुः परमं पदम् ॥

अचिन्त्यागमे—

आनन्दो ब्रह्म एवैतज्जायतेऽस्माच्चराचरम् ॥

वायुसंहितायाम्—

शक्तिः प्रथमसंभूता शान्त्यतीतपदोत्तरा ।
ततो माया ततोऽव्यक्तं शिवाच्छक्तिमतः प्रभोः ॥
शक्त्यादि च पृथिव्यन्तं शिवतत्त्वसमुद्भवम् ।
तेनैकेन तु तद्व्याप्तं मृदा कुम्भादिकं यथा ॥
शिवात्सत्यपरानन्दप्रकाशैकस्वलक्षणात् ।
आविर्भूतमिदं सर्वं चेतनाचेतनात्मकम् ॥

इत्यादीनि "यतो वा इमानि भूतानि जायन्ते" इत्यादिश्रुतिसहोदराणि उपादानत्वबोधकपञ्चमीश्रुतिघटितान्यागमवचनानि, "पुरुष एवेदं सर्वं" "सर्वं खल्विदं ब्रह्म" इति बाधायां सामानाधिकरण्येन विवर्तोपादानत्वतात्पर्यगर्भितं "भूतानि चाहं स्थिरजंगमानि यावन्ति चान्यान्यहमेव तानि" इति देवीकालोत्तरागमवचनं च प्रमाणीकृत्य, न हि सिद्धान्तशैवागमेषु क्वचिदपि शिवस्य विवर्तोपादानत्वं निषिध्यत इत्युद्घुष्यन्तः शिवज्ञानबोधभाष्यकृतः उपसंहरन्ति स्म । तस्मात् श्रुतिस्मृत्यागमसिद्धं शिवस्य जगदुपादानत्वं इति । अपि च श्रीकण्ठशिवाचार्यैरपि प्रकृत्यधिकरणे परमेश्वरस्य अभिन्ननिमित्तोपादानत्वमेव साधितम् । चतुर्लक्षणीप्रथमाध्यायान्तिमाधिकरणे "एतेन सर्वे व्याख्याताः" इत्यत्र भाष्ये आगमानां चतुर्लक्षणीन्यायातिदेशपरत्वस्य व्याख्यातत्वात् । 'न वयं वेदशिवागमयोर्भेदं पश्यामः' इत्युद्घोषणया च वेदागमयोरेकशास्त्रत्वमेव श्रीकण्ठाचार्याणामभिप्रेतमिति प्रतिभाति । "ये तु वयं तेषां शिववाक्यत्वाविशेषेण ऐकार्थ्याच्च वेदागमयोः एकशास्त्रत्वमभ्युगच्छामः" इति शिवाग्रयोगिभिः उक्तत्वात्तेषामपि तत्सम्मतमिति प्रतीयते॥ सर्वज्ञानोत्तरे—

"घटसंवृत आकाशो नीयमाने यथा घटे ।
घटो नीयेत नाकाशस्तद्वज्जीवो नभोपमः ॥
भिन्ने कुम्भे यथाकाशः आकाशत्वं प्रपद्यते ।
विभिन्ने प्राकृते देहे तथात्मा परमात्मनि ॥

इत्यप्यत्यन्ताद्वैतदृष्टान्तावेदकं वाक्यं दृश्यते । तत्रैव परमात्मनिरूपणप्रकरणे—

अहमेव परो ह्यात्मा पुरुषः कारणं स्मृतः ।
अहमेव परं ब्रह्म ह्यहं ज्ञेयमनक्षरम् ॥
मूर्तामूर्तं जगत्कृत्स्नं पश्यत्यात्मन्युपस्थितम् ।
सर्वज्ञः सर्वदर्शी च परिपूर्णस्सुनिर्मलः ।
विमुक्तः केवलीभूतस्सुखमक्षयमाप्नुयात् ॥

इति जीवन्मुक्तस्वरूपनिरूपणं स्पष्टतया कृतम् । तस्मात् शिवागमानां परमतात्पर्यं परमाद्वैत एवेत्यत्र न कोऽपि विशयः । तस्मात्सुप्रसिद्धा दीक्षिते[illegible] [illegible]तो-पवर्णितेति शिवम् ॥

बह्वीषु पद्धतिषु शिवागमविद्भिः प्रणीतव्याख्यासु च बहुभिः प्रामाणिकाचार्यैस्तत्र तत्र प्रमाणत्वेनोद्दिष्टमेतत् । कारणनाशादेव कार्यस्य नाशः, तस्मान्मलरूपाज्ञानननाशादेव बन्धनाशः, तस्मान्मलस्य नित्यत्वं नास्तीति व्यक्तमत्र विभाव्यते ॥

विज्ञानभैरवतन्त्रम्

" यत्किञ्चित्सकलं रूपं भैरवस्य प्रकीर्तितम् ।
तदसारतया देवि विज्ञेयं शक्रजालवत् ॥ "

इत्यारभ्य

" इन्द्रजालमयं विश्वं न्यस्तं वा चित्रकर्मवत् ।
जलस्येवोर्मयो वह्नेर्ज्वालाभङ्गयः प्रभा रवेः ॥
ममैव भैरवस्यैता विश्वभङ्गयो विभेदिताः ।
चिद्धर्मा सर्वदेहेषु विशेषो नास्ति कुत्रचित् ॥
अतश्च तन्मयं विश्वं भावयन् भवजिज्जनः । "

इत्यन्तश्लोकैः इन्द्रजालवदाभासमानप्रपञ्चस्य जलोर्मिवह्निज्वालासूर्यप्रभादिदृष्टान्तैरयथार्थत्वप्रदर्शनपूर्वकमेतादृशज्ञानवतस्संसारजयः प्रतिपादितः ॥

कुलयुक्तिः

वेदान्ते वैष्णवे शैवे सौरे बौद्धेऽन्यतोऽपि च ।
एक एव परस्त्वात्मा ज्ञाता ज्ञेयं महेश्वरि ॥

(स्प-पु. १२२)

[illegible] न्तदर्शनप्रतिपाद्यं प्रपञ्च-
[illegible] ति ॥

[illegible] ।

[illegible] द

[illegible] न-

तद्वदेवाभिमानस्तु कर्तव्यो देशिकोत्तमैः ।
अहमेव परोऽहं स चाद्यो परमकारणम् ॥

(३९०)

यथा प्रदीप्ते वह्नावेव ज्वाला दृश्यते तथा परतेजोव्यक्तावेव शिवत्वं भासते । तच्च देहप्राणस्थितावित्यनेन इहैव सम्भवतीति जीवन्मुक्तस्वरूपनिरूपणं कृतम् ॥

सर्वज्ञभैरवतन्त्रम्

नान्यत्र गमनं स्थानं मोक्षोऽस्ति सुरसुन्दरि ।
अज्ञानग्रन्थिभेदो यः स मोक्ष इति कथ्यते ॥ (स्प. प्र)

इति स्पष्टतया अद्वैततत्त्वं बोधयति ॥

सम्वित्प्रकाशम्

इति निर्मलबोधैकरूपे दोषपरिग्रहः ॥
विवर्तपरिणामाभ्यां द्वाभ्यामप्युपपद्यते ।
विवर्तोऽपि तथारूपस्तथाभासित्वमच्युतः ॥
परिणामी स एव त्वं सुवर्णमिव कुण्डले । (स्प. प्र)
मायात्वमेतदेव स्यान्नाशस्तत्त्वप्रदर्शनात् ॥
नाहिरज्ञातरज्ज्वात्मा सर्पादीन्मन्यते पुनः ।

(स्प. प्र. २०)

शिवसूत्राणि

चैतन्यमात्मा, अज्ञानं बन्धः ॥

स्पन्दकारिका

" न दुःखं न सुखं यत्र न ग्राह्यं ग्राहकं न च । "
इत्यारभ्य श्लोकदशकस्यान्ते
" स पश्यन्सर्वतो युक्तो जीवन्मुक्तो न संशयः । "

इति ॥

शाक्तागमेष्वद्वैतनिष्ठा

वामकेश्वरतन्त्रान्तर्गतनित्याषोडशिकार्णवे

स्वेच्छाविश्वमयोल्लेखखचितं विश्वरूपकम् ।
चैतन्यमात्मनो रूपं निसर्गानन्दसुन्दरम् ॥
(६-१६)

ज्ञानार्णवे—अक्षमालेति विख्याता मातृका वर्णरूपिणी ।

शब्दब्रह्मस्वरूपेयं शब्दातीतन्तु जप्यते ॥
शब्दातीतं परं धाम गणनारहितं सदा ।
आत्मस्वरूपं जानीहि हंसस्तु परमेश्वरः ॥
(९-२०)

विहरोऽस्येव हंसस्य सृष्टिर्मायामयी भवेत् ।
अयमेव महादेवि निष्प्रपञ्चो यदा भवेत् ॥
संहाररूपी हंसस्तु तदात्मानं प्रदर्शयेत् ।
पक्षित्वमस्य नास्त्येव सोऽहमात्मा प्रतिष्ठितः ॥
(२२. २८)

परशुरामकल्पसूत्रे । (पु. २६)

शरीरकञ्चुकितश्शिवो जीवः ।
निष्कञ्चुकश्शिवः परमेश्वरः ॥ इति

(ढ) ब्रह्मसूत्रेषु अद्वैतभावाः

(शिरुवामणि कृष्णमूर्तिशास्त्रिणः)

தத்வத்தை உபதேசித்து முக்தியின் வழியை விளக்கும் உபநிஷத்துக்களின் தாத்பர்யத்தை நிர்ணயிப்பதன்பொருட்டு வியாஸ பகவான் பிரம்மஸூத்ரங்களை இயற்றினார். ப்ரம்மஸூத்ரங்களுக்கு பாஷ்யங்களை இயற்றிய அந்தந்த பாஷ்யகாரர்கள் தம் தம் மதமே ஸூத்ரங்களில் கூறப்பட்டிருக்கிறதென்று அபிப்பிராயப்படுகிறார்கள். த்வைதம், விசிஷ்டாத்வைதம், அத்வைதம் முதலிய ஒன்றுக்கொன்று வேறுபாடான மதங்கள் எல்லாம் ஸூத்ரங்களின் தாத்பர்யமாக இருக்கமுடியாது. அவைகளில் ஏதாவது ஒன்றுதான் ஸூத்ரங்களின் தாத்பர்யமென்று உரைக்க வேண்டும். ஆகையால் ஸ்ரீவ்யாஸருடைய அபிப்பிராயமான அந்த ஒன்று எது என்று நாம் எவ்வாறு நிர்ணயிப்பது?

சிலர், (திருப்பதியிலிருந்த, கபிஸ்தலம் ஸ்ரீதேசிகாசாரியார்கள் போன்றவர்) ஸ்ரீவ்யாஸ ஸூத்ரங்களின் அபிப்பிராயத்தை ஸ்ரீவ்யாஸ பகவானே எழுதிய மற்றொரு மஹா நிபந்தமாகிய மஹாபாரதத்தைக் கொண்டு நிர்ணயிக்கலாமென்று உரைக்கின்றனர். மஹாபாரதம் முழுவதற்கும் உரையெழுதியவரில் முக்யமானவர் ஸ்ரீநீலகண்டர். அவர் அத்வைதமே பாரதத்தில் கூறப்பட்டிருக்கிறதென்பதைத் தெளிவாக விளக்கியிருக்கிறார். பாரதத்தில் ஸாரமாயுள்ளது பகவத்கீதை. அது உலக முழுவதும் பரவியுள்ளது. அந்த பகவத்கீதைக்கு எண்ணிறந்த உரைகள் உள்ளன. அவைகளில் ஸ்ரீஹனு[illegible] த லிய பெரும்பாலான[illegible] தத்வத்தையே[illegible] நெல்லிக்கன[illegible] கின்றன[illegible]

சி[illegible] போன்[illegible] ரும்மா களி[illegible] அ[illegible] [illegible] பொழுது [illegible]

கருத்துக்களேயும் தம் நூல்களில் கூறியிருக்கிருர்கள். அவ்விதமே ஆகம சாஸ்த்ரகாரர்களும் நாஸ்திக சாஸ்த்ரகாரர்களும், இதர சாஸ்த்ரக் கருத்துக்களேத் தங்கள் நூல்களில் கூறியிருக்கிருர்கள். அவர்கள் எல்லோரும் ஸ்ரீவ்யாஸருடைய ப்ரம்மஸூத்ர தாத்பர்யத்தை எவ்விதம் கூறியிருக்கிருர்களோ, அவற்றைக்கொண்டு ப்ரம்மஸூத்ர தாத்பர்யத்தை நிர்ணயிக்கலாம் என்பதே.

அவ்விதம் ஸ்ரீவ்யாஸரின் ப்ரம்மஸூத்ரங்களின் கருத்தை இதர சாஸ்த்ர மஹரிஷிகளும் எடுத்துக் கூறுமிடத்து ஒரேமுகமாய் அத்வைத தத்வத்தையே கூறியிருக்கிருர்கள்.

இவ்விருமுறைகளேயும் விட்டு, இக்கட்டுரையில், ஸூத்ரங்களேயே பரிசோதித்து அவைகளில் ஸ்வரஸமாக ஏற்படும் அர்த்தத்திலிருந்து அத்வைதமே ஸ்ரீவ்யாஸ பகவானுடைய தாத்பர்யமென்று நிரூபிக்கப்படுகிறது. மானிடஜன்மத்தைக் கடைத்தேறுவிக்கும் தத்வத்தை அறியவேண்டியவருக்கு, இது பேருபகாரமாகிறது.

தன்னுடைய ஸ்வய நிலேயான, ஞானமாத்ரமான ப்ரம்ம ஸ்வரூபமாய் விளங்குவதே முக்திநிலே என்பது அத்வைதஸித்தாந்தம். கை கால் முதலிய இந்திரியங்களோடும் மனதுடனும் ஓர் உத்தமமான லோகத்தில் சென்று வாஸஞ் செய்வதே மோக்ஷ மென்பது இதர மதங்களின் அபிப்பிராயம். ப்ரம்ம ஸூத்ரங்களில் ஸ்ரீவ்யாஸ பகவான் முக்தியைக் கூறுமிடத்து,

संपद्याविर्भावः स्वेन शब्दात् (सू-४-४-१) என்கிருர்.

[illegible] என்னும் இருபதங்கள் இந்த [illegible]க்கின்றன. இதைக் [illegible]ர்பவிப்பதே [illegible]து. இதற் [illegible]

[illegible]மும், [illegible]त्. [illegible]न-

என்ற ஸூத்ரமும் காணப்படுகின்றன. இம்மூன்றில் முதல் ஸூத்ரத்திஞல் முக்தியைப் பற்றி, ஜைமினி மஹரிஷியின் அபிப்ராயம் தெரிவிக்கப்படுகிறது. ஸகுணமான ப்ரம்ம ஸ்வரூபமாக ஆவிர்பவிப்பதே முக்தி என்பது ஜைமினியின் அபிப்பிராயம். இரண்டாவது ஸூத்ரத்தில், முக்தியைப் பற்றிய ஔடுலோமி மஹரிஷியின் அனுபவம் சொல்லப்படுகிறது. முக்தி என்பது பரமாத்மாவுடன் ஒன்ருதலிஞல் (तदात्मकत्वात्) ப்ரம்மாத்மஸ்வரூபமாக ஆவிர்பவிப்பதே என ஔடுலோமி மஹரிஷி தமது அனுபவபூர்வகமாக தெரிவித்திருக்கிருர். அதற் கடுத்த ஸூத்ரம் பாதராயணர் என்னும் ஸ்ரீ வ்யாஸ பகவானுடைய சொந்த அபிப்ராயம். இவ்விரு நிலேகளுக்கும் விரோத மில்லே என்பதை अविरोधं बादरायणः என்னும் இருபதங்களிஞலே தன் அபிப்ராயமாக சொல்லுகிருர். அத்வைத ஸித்தாந்தம் ஒன்றிஞலேயே ஸகுணம் நிர்குணம் என்ற இரு நிலேகளும் விரோதமின்றி பரமாத்ம ஸ்வரூபத்திற்குப் பொருந்தியவை.

மற்றும் शास्त्रदृष्ट्या तूपदेशो वामदेववत् (सू-१-१-३०)

என்ற ஒரு ஸூத்ரம் உளது. வாமதேவர் என்னும் மஹரிஷி தம்முடைய ஆத்மஞான நிலேயில் நானே மனு, நானே ஸூர்யன் என்கிருர். நானே எல்லாம் என்பதே சாஸ்திரத்ருஷ்டி. நான் வேறு, மற்றவன் வேறு என்ற தோற்றமே லோகத்ருஷ்டி என்று அத்வைத ஸித்தாந்தத்தில் வகுக்கப்படும் பாகுபாடு இந்த ஸூத்திரத்தில் शास्त्रदृष्ट्या என்னும் பதத்திஞல் வெளியாகிறது. இது போலவே, अथातो ब्रह्मजिज्ञासा, जन्माद्यस्य यतः, व्यतिहारो विशिंषन्ति हीतरवत् முதலிய அநேக ஸூத்ரங்கள் இங்கு விசாரிக்கப்பட்டு அவைகளினின்று ப்ரகாசிக்கும் அத்வைத உண்மை இவ்வியாஸத்தில் விளக்கப்படுகிறது.

Bhagavān Vyāsa has, in his Brahmasūtras strung together the truths contained in the Vedanta or Upanishads. Every one of the Bhāshyakāras or expositors of the Sūtras is firm in maintaining that his system of philosophy alone is revealed in the Brahmasūtras. All of them cannot be regarded as gi[illegible] the real purport of the Sutras. Only one among them can be so regarded. How

are we to decide which of them is the real meaning of the Sutras ?

Some recent thinkers (represented by the late Kapisthalam Deśikāchāryaswāmin) say that the Mahābhārata, another work of the same Vyāsa can be taken into account in deciding the question.

Nīlakanṭha and others, who have written exhaustive commentaries on the Mahābhārata say that Advaita is the purport of Mahābhārata. Further the most important section of Mahābhārata is the Bhagavad Gītā, famous throughout the world and commented upon by various authors. The majority of the commentaries of the Bhagavad Gītā including the ancient Hanumad Bhāshya are agreed that Advaita alone is the purport of the Gītā.

An old school of thought represented by Vainika Ayyanna Dīkshita adopts the following method in deciding which of the systems of Vedanta is the purport of the Sūtras.

All the six sages who propounded the six systems of Indian philosophy have, in treating their systems of philosophy made references to the sister systems. The authors of Āgamas and non-Vedic systems of philosophy have also proceeded on the same lines. The purport of the Brahmasūtras can justly be that which is expressed in those unbiased external references. All these references in the other Śastras and Āgamas unanimously show that Advaita alone is the purport of the Brahmasūtras.

The author of the the present article has adopted a different method for finding out the purport of the Sūtras. He has examined the Sūtras themselves and has come to the conclusion that Advaita alone is the purport of the Sūtras.

The state of liberation according to Advaita is the attainment of eternal bliss and knowledge through the removal of nescience. According to others, it is settling in a superior world with body, mind and other senses. In the

संपद्याविर्भावः स्वेन शब्दात् ॥

Vyasa Sutra, the terms, स्वेन and आविर्भावः clearly declare that liberation is the coming to the realization his one's own self. The same conclusion is arrived at in the succeeding Sūtras also, viz.,

ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥

चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ॥

एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ॥

The first Sutra is the exposition of the attitude of Jaimini—that the released soul gains all the highest qualities of the Saguna or qualified Brahman. The second is that of Audulomin, that the released soul comes to light as pure knowledge alone. The third is the view of Bādarāyaṇa, the author himself, that there is no contradiction between the two above—mentioned views. Now this reconciliation of Saguṇa and Nirguṇa states is exactly what the Advaitins maintain and others refute.

शास्त्रदृष्ट्या तूपदेशो वामदेववत्

In his realization of Brahman, Vamadeva declares that he is Manu and he is Surya. " I am all " is the Sastraic realization. " I am different from my fellow-being " is the worldly knowledge. This distinction between worldly knowldge and the Sastraic [illegible] prominent feature of [illegible] brought out [illegible] "

The [illegible] is seen to cla[illegible] deny the comp[illegible] sch[illegible]. The a[illegible] t[illegible] se nobody w[illegible] and sacrifices if he [illegible] [illegible] ly the fruits in th[illegible] [illegible] espectiv[illegible]

॥ व्याससूत्रतात्पर्यविमर्शसंग्रहकारिकाः ॥

॥ शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॥

वेदान्तशास्त्रदृष्टिस्तु स्वरसा क्वेति चिन्तकैः ।
अलंभि शास्त्रदृष्टेति सूत्रं चिन्तामणिर्यथा ॥ १ ॥
शास्त्रावान्तरतात्पर्यं साधनत्वेन भाविते ।
उपासनाद्यर्थजाते भिदाघटित इष्यते ॥ २ ॥
तात्पर्यं परमं यत्र सैव दृष्टिरिहोच्यते ।
मनुसूर्याद्यभेदेन वामदेवस्य दर्शनम् ॥ ३ ॥
दृष्टान्तीकृत्य मघवद्ब्रह्माभेद इहोदितः ।
वेदान्तशास्त्रसर्वस्वमाचार्यैर्बादरायणैः ॥ ४ ॥
शास्त्रदृष्ट्या तूपदेशो वामदेववदीरितः ।
शास्त्रदृष्टिरितीहोक्त्या लोकदृष्टिर्निवर्त्यते ॥ ५ ॥
शास्त्रदृष्टिर्महावाक्यसमुत्थाऽखण्डधीः परा ।
शास्त्राख्यवेदे तद्भिन्नाः क्रियास्सर्वा न दृष्टयः ॥ ६ ॥
सर्वा उपासनाश्चापि क्रिया एव न दृष्टयः ।
मानस्यस्ताः क्रियाः आर्यैस्सदृष्टान्तं प्रसाधिताः ॥ ७ ॥
कर्तुं वाऽप्यन्यथाकर्तुमकर्तुं वा क्षमाः क्रियाः ।
दृष्टिस्तु वस्तुतन्त्रत्वान्न विकल्पं तथाऽर्हति ॥ ८ ॥
शास्त्रदृष्टौ वामदेवसूत्रे दृष्टान्ततां गतः ।
वामदेवस्य दृष्टिस्तु सूर्येण मनुनाऽपि च ॥ ९ ॥
स्वात्यन्ताभेदविषया याजुषश्रुतिघोषिता ।
[illegible] भावरीत्या मतान्तरे ॥ १० ॥
[illegible] र्यस्य मनोरपि ।
[illegible] मौ ॥ ११ ॥
[illegible] त् ।
[illegible] १२ ॥
[illegible]
[illegible] त् ।
[illegible] न-

बन्धहेतुर्लोकदृष्ट्या सिद्ध एव निरूप्यते ।
देहदेह्यभिदारीतिः श्रुत्या साक्षाद्विशीर्यते ॥ १५ ॥
जीवा देहाः परो देहीत्येवं मत्वा हि सेव्यते ।
व्यतिहारश्रुतिस्तत्र विरुन्धे सर्वथा स्फुटम् ।
अहं वै त्वमसीत्येवं महावाक्यं यथा तथा ॥ १६ ॥
त्वं वाऽहमस्मि भगवो देवते इति च श्रुतिः ।
घुष्यन्ती वारयत्येव देहदेह्यादिकल्पनाः ॥ १७ ॥
ईश्वरस्य शरीरत्वं शारीरस्य शरीरिता ।
इत्येवमपसिद्धान्तः परेषां भवति ध्रुवः ॥ १८ ॥
व्यतिहारो विशिंषन्तीत्यत्र सूत्रे स्वरूप्ययम् ।
अतस्सिद्धमिदं सूत्रमद्वैते स्वरसं त्विति ॥ १९ ॥

॥ अथातो ब्रह्मजिज्ञासा ॥

अथातो ब्रह्मजिज्ञासेत्यत्र जिज्ञास्यवस्तुनः ।
ब्रह्मशब्देन निर्देशादद्वैतं सूत्रकृन्मतम् ॥ २० ॥
ब्रह्मेति बृहतेर्वृद्धिकर्मणो रूपमुच्यते ।
अभावाप्रतियोगित्वं वृद्धिस्स्यान्निरुपाधिका ॥ २१ ॥
चतुर्णामप्यभावानां प्रतियोगि न यद्भवेत् ।
निरुपाधितया वृद्धमतो ब्रह्म तदिष्यते ॥ २२ ॥
यतः कालानवच्छिन्नं न ध्वंसप्रागभाववत् ।
यतो देशानवच्छिन्नं नात्यन्ताभाववच्च तत् ॥ २३ ॥
यतो वस्त्वनवच्छिन्नमन्योन्याभाववच्च न ।
मतान्तरेषु सर्वेष्वप्यन्योन्याभावन्मतम् ॥ २४ ॥
सद्वितीयत्वतो नो तद्ब्रह्मशब्दार्थतां व्रजेत् ।
अथातो धर्मजिज्ञासेत्यादिशास्त्रान्तरेषु यत् ॥ २५ ॥
जिज्ञासेति पदं तस्य धर्मादिर्विषयोऽस्ति यः ।
स सर्वो जडरूपत्वादनानन्दस्स्वतोऽफलम् ॥ २६ ॥
वेदान्तसूत्रे जिज्ञासाविषयो ब्रह्म यच्छ्रुतम् ।
अखण्डानन्दरूपत्वात्स्वत एव हि तत्फलम् ॥ २७ ॥
तस्यानन्दस्वरूपत्वं सर्ववेदान्तदर्शितम् ।
तस्यैव ज्ञानरूपत्वं तत्रैव बहुधा श्रुतम् ॥ २८ ॥

प्रकाशमान आनन्दः फलं सर्वत्र सम्मतम् ।
यत्रान्येच्छानधीनेच्छा तमानन्दं विदुर्बुधाः ॥ २९ ॥
आनन्दो हि फलं साक्षान्न फलं तस्य साधनम् ।
धर्मादीनां न साक्षात्स्यात्फलत्वं ब्रह्म नो तथा ॥ ३० ॥
धर्मादिर्ज्ञानतः पश्चादनुष्ठानमपेक्षते ।
येन स्वर्गादिकं तस्य दूरे भावि फलं भवेत् ॥ ३१ ॥
जिज्ञासाविषयो ब्रह्म स्वतः फलमिति स्थितेः ।
तज्ज्ञानं तदभिन्नं सन्नानुष्ठानमपेक्षते ॥ ३२ ॥
सर्वानुष्ठानसंसिद्धां जिज्ञासामाह यच्छ्रुतिः ।
यज्ञदानतपोभिस्तं वेदानुवचनेन च ॥ ३३ ॥
जिज्ञासन्ते ब्राह्मणा इत्यर्थमाह यजुःश्रुतिः ।
जिज्ञासानन्तरं चापि क्रिया यैः कल्प्यते परैः ॥ ३४ ॥
आनन्दरूपता तेषां श्रुतिसिद्धा विरुद्ध्यते ।
प्रकाशमान आनन्दः पुरुषार्थो यतस्ततः ॥ ३५ ॥
तज्ज्ञानमेव मोक्षस्य प्रयोजकमिति स्थितिः ।
मोक्षस्तु बन्धमात्रस्य विनिवृत्त्योपलक्षितः ॥ ३६ ॥
एवं बन्धनिवृत्तेस्तु ज्ञानमेव प्रयोजकम् ।
एतदेवात्र सूत्रे च सूत्रकृत्समसूसुचत् ॥ ३७ ॥

ज्ञानेन यस्य विनिवृत्तिरसावतथ्यः
बन्धस्तथाविध इति भ्रममात्रभातः ।
मिथ्येति सिद्धमुपपत्तिशतोपजुष्ट-
श्रुत्यन्तसूत्रपदरीतिनिबोधमात्रात् ॥ ३८ ॥

ब्रह्मशब्दप्रयोगाच्च जिज्ञासायोगतस्तथा ।
अद्वैतं परमं ब्रह्म द्वैतं मिथ्येति चोर्जितम् ॥ ३९ ॥

॥ जन्माद्यस्य यतः ॥

जन्मादिसूत्र आचार्यैर्ब्रह्मलक्षणमुच्यते ।
न मायाया न चान्यस्य लक्षणं यस्य कस्यचित् ॥४०॥
यतस्सृष्टिर्लयस्तत्रेत्युक्त्योपादानतोच्यते ।
उपादाने द्विधाभूते परिणामि न चेष्यते ॥ ४१ ॥
कृत्स्नप्रसक्त्यादिदोषो यतस्तैरेव भाषितः ।
परिशिष्टं विवर्तित्वमेकमेवेह सिद्ध्यति ॥ ४२ ॥
लक्षणोक्तिरतिव्याप्त्याद्यदुष्टैवेष्यतेऽखिलैः ।
स्वतो नोपादानताऽस्य मायाद्वारैव सा भवेत् ॥ ४३ ॥
इत्येवं वादिनां पक्षे लक्षणाकुलता स्फुटा ।
ब्रह्मोपादानताहानिर्भेदाभेदाच्च जैनता ॥ ४४ ॥
निमित्तं केवलं ब्रह्म येषां ते भेदवादिनः ।
यतो जन्म लयस्तत्रेत्युद्घुष्यच्छ्रुतिबाधिताः ॥ ४५ ॥
जन्माद्यस्येति सूत्रेणाप्याहता अनुवादिना ।
प्रकृतिश्चेति सूत्रं च स्फुटं तेषां विरुद्ध्यते ॥ ४६ ॥
एतांश्चात्र सूत्राणां स्वारस्यानि निबोधत ।
प्रबन्धे सूत्रतात्पर्यविमर्शे पण्डितोत्तमाः ॥ ४७ ॥

धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्षस्यैव परमपुरुषार्थत्वं, तत्स्वरूपसाधनविशेषादिकञ्च उपनिषत्सु प्रतिपाद्यते इति आस्तिकमताचार्याणां सर्वेषां सम्प्रतिपन्नम् । तादृशोपनिषदां तात्पर्यनिर्णयानुकूला प्रमाणानुग्राहकन्यायरूपा चतुर्लक्षणी शारीरकमीमांसा श्रीबादरायणाचार्यप्रणीतब्रह्मसूत्रापरनामधेया इत्यपि तथा । परन्तु उपनिषत्तात्पर्यविषयत्वेन ब्रह्मसूत्रैर्निर्णीतोऽर्थः स्वीयसिद्धान्त एवेति तत्तद्भाष्यकारानुयायिनः अभिप्रयन्ति । तत्र द्वैतविशिष्टाद्वैताद्वैतादिरूपाणां तेषां परस्परविरुद्धत्वात् सर्वेषां सूत्रतात्पर्यविषयता न सम्भवतीत्यन्यतमस्यैव तथात्वे वक्तव्ये केचिदाहुः—तद्ग्रन्थसमानकर्तृकग्रन्थान्तरानुसारेण तद्ग्रन्थतात्पर्यस्य निर्णेतुमुचितत्वात् श्रीबादरायणप्रणीतमहाभारतानुसारे[illegible] तो-
सूत्राणामर्थनिर्णय[illegible]
सारभूतभग[illegible]
विप्रतिप[illegible] विद्यते [illegible]
व्याख्या[illegible] त्परमेष्ठ[illegible]
प[illegible] रघूत्त[illegible]

दर्शनान्तरसूत्रकारसिद्धान्तनिराकरणावसरे सर्वैरैकमत्येन वेदान्तदर्शनत्वेन यदनूदितं तदेव ब्रह्मसूत्रतात्पर्यविषयः, तथाभूतञ्चाद्वैतदर्शनमेवेति सयुक्तिकं निरणैषुः। अत्र तु विनैव तानुपायान् पूर्वाचार्योपदर्शितमार्गेण सूत्राक्षरैरेव सूत्रतात्पर्यनिर्णयाय प्रयत्यते॥

तथा हि-चतुर्थाध्यायचतुर्थपादे "सम्पद्याविर्भावः स्वेन शब्दात्" इति सूत्रेण तिरोभावप्रतिद्वन्द्व्याविर्भाव-शब्दघटितेन बन्धावस्थायां तिरोहितस्य स्वस्वरूपस्यैव प्रकाशमात्रं मोक्ष इति स्वरसतो लभ्यतेऽर्थः। द्वैतिभिस्तु

१. सौत्राविर्भावशब्देन श्रौताभिनिष्पत्तिशब्दस्यैव विवरणोपपत्तिः---

"परं ब्रह्म अनतिक्रम्यैव मुक्तो भोगान् भुङ्क्ते" इति भोगदेशसीमनिर्धारणार्थमिदमधिकरणम्, न तु मोक्षस्वरूपनिर्धारणार्थमित्युच्यते—तत्तु सूत्रस्वारस्य-भञ्जकम्—अत्र हि "एष सम्प्रसाद" इत्यादिवाक्यस्थ "सम्पद्य" "स्वेन" इति पदयोस्तथैव निवेशनपूर्वकं "अभिनिष्पद्यत" इत्यस्य स्थाने "आविर्भाव" इति पदप्रयोगेण स एव साध्यांश इति स्वरसतः प्रतीयते। सम्पद्य, न त्वतिक्रम्य इत्यर्थकल्पने तादृशस्वारस्यभङ्ग इति स्वरूपाविर्भावो मोक्ष इत्येतद्व्यवस्थापरमेवेदमधिकरणमिति युक्तम्। स्वशब्दस्य स्वीयार्थकत्वं कथयतामपि सूत्रस्वार-स्यभङ्ग एव; स्वशब्देन स्वरूपस्यैव झटित्युपस्थितेः। ...ेन दृष्टत्वात्" इत्यनेन च ...रूक्त्या "ब्राह्मेण" ...तत्स्वरूपं ...संप्रति- ...निर्णाय- ...त्। ...न-

...मात्रेण" इत्यत्र "स्वेन" इति तृतीयान्तप्रत्यभिज्ञानात्, "तदात्मकत्वात्" इति हेतूक्त्या आविर्भूतस्य स्वरूपनिर्णयार्थतायाः स्फुटत्वाच्च। तदेवं ब्राह्मेणेत्यादित्रिकं मुक्तस्वरूपनिणयपरमिति स्थिते विचार्यते — बादरायण-पक्षः क इति॥

२. ब्राह्मेणेत्यादित्रिसूत्र्या मुक्तस्वरूपं चिन्मात्रमेवेति निर्धारणम्। एवमपीत्यस्य सूत्रस्य चिन्मात्रत्वसगुणत्वयो-विरोधपरिहारार्थत्वकल्पने सूत्रस्यैव वैयर्थ्यादिनारम्यत्वं-मुक्तस्वरूपं चिन्मात्रमित्यस्मिन्नेवार्थे एवमपीत्यस्य स्वारस्यं उपन्यासशब्दसार्थक्यञ्च॥

चिन्मात्रं स्वरूपं मुक्तस्येति श्रीमद्बादरायणपक्ष इति अद्वैतसिद्धान्तः। स एव च सूत्रारूढः [सि-सि. नम्] अत एव मुक्तश्चितितन्मात्रब्रह्मैव कल्पनया सर्वज्ञादिमय म्

इति वास्तवस्वरूपप्रतिष्ठामवस्थाप्यैव "एवमप्युपन्या-सात्पूर्वभावादविरोधं बादरायण" इति ब्राह्मरूपोपन्या-साद्यविरोधसूत्रमुपपन्नम्। अन्यथा ब्राह्मरूपस्यापि स्वाभाविकत्वे विरोधाभावेन "ब्राह्मेण जैमिनिरुपन्या-सादिभ्यः" "चितितन्मात्रेण तदात्मकत्वादित्यौडु-लोमिः" इति पक्षविकल्पानुपपत्तेः। न हि प्रकाशत्वव्यावृत्तिर्जैमिनिपक्षः। "आह च तन्मात्रम्" इति स्वप्रकाशस्यापि श्रुतिवशात् ब्रह्मणोऽपहत-पाप्मत्वादिगुणकत्वस्य परमते तदवस्थितत्वाच्च। औडुलोमिस्तु तदात्मकत्वादिति वदतो गुणविशिष्टा-नात्मकत्वमिष्टम्। तथाऽपि कथञ्चित् अभा-वपर्यवसायि कृत्वाऽपहतपाप्मत्वादेरुपपाद्यत्वात् न विरोधः। तथा च सूत्रकृतः विरोधभ्रम इति वा कल्प्येत। "एवमपि" इति चितितन्मात्रतावस्थापनेन विरोधसमाधानं वा नावकल्पेत। मुक्तस्यापहतपाप्म-त्वादिगुणान्यत्वे सति ब्राह्मेणाविर्भाव इत्यनाञ्जस्यात् स्वेनेत्यस्य स्वीये वृत्तिकल्पनाक्लेशाच्च। तस्मात् एव-...औडुलोमिपक्षानुज्ञया तत्र प्राप्तमुपन्यासादिविरोधं

मुक्तस्य ब्रह्मैकात्म्यादमुक्तदशाऽपहतपाप्मत्वादिगुणवैशिष्ट्योपपत्त्या परिहरति बादरायण इत्युपपन्नम् । अत एवोपन्यासग्रहणमर्थवत् । अन्यथा एवमपि पूर्वभावादविरोधमित्येवोच्येत । न हि चितितन्मात्रतामुपगम्य ब्राह्मरूपभाविकत्वोपगमः शक्यः विरोधात् । यत्तु— विज्ञानघन एवेत्यापातप्रतीतचितितन्मात्रत्वाभ्युपगम एवमपीति इति—तन्न । सूत्रकृदभ्युपगमादेव तदापातत्वनिरासात् । यदपि अववारणीयशेषभूतैवकारस्वारस्याय न शेषिपदजातभङ्गः कार्य इति तदापातत्वबीजोत्प्रेक्षणम्, तदप्यरमणीयम् । अवधारणीयस्वरूपानुपातिनोऽवधारणस्यान्तरङ्गतया परोपाधिनिरूप्यबहिरङ्गगुणबाधकत्वौचित्यात् । अन्यथा प्रज्ञानघन एवेत्येवकारानर्थक्यात् । अपहतपाप्मत्वादिगुणविशिष्टस्यांशतो जडत्वस्यापि व्यावृत्तेरशक्यत्वात् । प्रज्ञानघन इत्येव स्वरूपमात्रजडत्वव्यावृत्तेः । तस्मात्पूर्वोक्त एव सूत्रार्थः । एतेन—अपहतपाप्मत्वादिगुणमात्रात्मकत्वं जैमिनिपक्षः, विज्ञानमात्रात्मकत्वं औडुलोमिपक्षः, उभयरूपत्वं बादरायणपक्षः इति परेषां व्याख्यानं परास्तम् । "चितितन्मात्रेण" इतिवत् "ब्राह्ममात्रेण" त्वश्रवणात्, एवमपीत्यनान्वयस्याचेति । तदेवं आविर्भूतचितितन्मात्रब्रह्मात्मन एव मुक्तस्य ब्राह्मरूपमपि कथञ्चिदुपयतो बादरायणस्याविवादष्टयापादितजगद्व्यापारो न प्रत्याचिख्यासितः, किन्तु दहरादिसगुणोपासनामात्रेण मुक्तदेशीयस्य तत्क्रतुन्यायप्रसञ्जितोऽसौ निराचिकीर्षित इति गम्यते इति, "सङ्कल्पादेव" इत्यारभ्य आन्तं सगुणविद्याफलप्रदर्शनपरं इत्यद्वैतसिद्धान्तपक्ष एव बादरायणः, न तु कृत्स्नोऽप्यपादः परममुक्तिपर इति परकीयसिद्धान्तपक्ष इति भगवत्पादोपदिष्टमार्ग एव शिवः पन्थाः । (सि-सि-नम्) एवं परममुक्तस्य सशरीरत्वे भोगैश्वर्ये च बाधिते "स एकधा भवति त्रिधा भवति" "स तत्र पर्यैति जक्षत् क्रीडन् रममाणः" "[illegible] कामरूप्यनुसञ्चरन्" इत्यादिकायव्यूहपर्ययणज [illegible] निर्गुणविद्याविषयेऽपि प्रशंसार्थमुपादीयते । यद्धि ब्रह्म कारणात्मना एकधा भवति सृष्ट्या चानेकधा तत् मुक्त एव तद्भूतत्वात् ॥

३. 'अविभागेन दृष्टत्वा' दित्यत्र अविभागशब्दोऽभेद एव स्वरसः, "न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत्" इत्यादिश्रुतिषु विभागशब्दस्य भेदे एव प्रयोगात् ॥

तथा च सूत्रम् "अविभागेन दृष्टत्वात्" स्वरूपेणाभिनिष्पन्नो ब्रह्माविभागेन भवति अहं ब्रह्मास्मीति अभेददर्शनात् इति । परस्य तु स्वात्मनो विभक्तस्य ब्रह्मणोऽविभागेनानुभवो भ्रमः स्यात् । प्रकारतया स्वात्मनो दृष्टत्वादिति च विभागस्य दृष्टत्वात् विरुद्धो हेतुः । अविभागे तस्यैव प्रकारप्रकारिताऽयोगात् । न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत् इत्यादिश्रुतिषु विभागशब्दस्य भेदे एव प्रयोगात् अविभागशब्दस्याभेदरूपार्थं एव स्वारस्यात् । अध्याहारदोषाच्च । तत्त्वमसीत्याद्यसामञ्जस्याच्चेति । एवं यत् नृदेवादिब्रह्मलोकावसानेषु कर्मणा कामसङ्कल्पेन वा उपनीतानुच्चावचान् विषयानुपभुञ्जानः पर्येति तदयमेव सर्वात्मकत्वात्, आत्मा हि एषां स भवति इति । एतेन कामान्नित्वादि व्याख्यातम् । किञ्च "स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि" इति सूत्रं परेषां प्रतिकूलं, [illegible]

हि श्रुतिषु [illegible] त ॥

मुक्त्यन्यत [illegible]

मरणा [illegible] विद्यते [illegible]

एवो [illegible] त्परमे [illegible]

ब्रह्म [illegible]

स [illegible]

४. 'अथातो ब्रह्मजिज्ञासा' इत्यत्र परिच्छेदत्रय-शून्यस्य अत एव निष्प्रपञ्चप्रत्यगभिन्नस्यैव जिज्ञास्यत्व एव ब्रह्मशब्दस्वारस्यम् ॥

एवं मोक्षसाधनीभूतज्ञानेऽपि । तथाहि जिज्ञास्यं सूत्रे ब्रह्मशब्देन निर्दिष्टम् । ब्रह्मेति च बृहेर्वृद्धिकर्मणो मनिन्प्रत्ययान्तस्येदं रूपम् । ततश्च तदेकोपाधिना जात्यादिष्वेव तद् व्युत्पाद्यते । सूत्रे च मुमुक्षुजिज्ञासा-विषयसमर्पणपरं ब्रह्मपदं प्रसिद्धजातिजीवादिबाधे प्रकर-णोपपदादिसङ्कोचहेत्वभावात् देशकालवस्तुगुणदोष-सम्बन्धपरिच्छेदरूपसर्वविधाल्पत्वविरोधिरूपमनवधिक - बृहत्त्वमपूर्वमर्थं प्रतिपादयतीत्यवगम्यते । न तु स्वरूपतो गुणतश्च निरवधिकबृहत्वं पुरुषोत्तमम् । एवं सति एतादृशेऽलौकिकेऽर्थे व्युत्पत्त्यनुपपत्त्या ब्रह्मपदगर्भं सूत्रं प्रतिपत्तिवन्ध्यं प्रसज्येत । न च सत्यज्ञानादिवाक्यै-र्ब्रह्मपदं व्युत्पाद्यते । अस्यां दशायां उक्तागमस्यानव-धृतार्थत्वात् । एतेन यतो वेत्यादेरपि तथात्वं निरस्तम् । अधीतस्वाध्यायस्य कर्मविचारानन्तरमेव ब्रह्मविचार-मुपेत्य शास्त्रान्तराद्यवसराभावेन नित्यानित्यविवेकाद्य-सम्भवे यतमानानां परेषां पुराणवाक्येन शक्त्यवधारणाया अप्ययोगात् । अन्यथा पुराणादिनैव ब्रह्मतत्त्वावगमोऽस्तु इति कृतं तद्विचारेण । अतो निरुक्तव्याकरणाभ्यां वृद्धिपर्यायबृहत्त्वोपाधिना जातिजीवादिसाधारण्येन शक्ति-रवधार्यते [illegible] तत्र प्रयोगे च प्रकरणादिना विशेषलाभ [illegible] विशेषविषये प्रयुज्यमानो [illegible] रूपतो गुणतश्च [illegible] गुणानां [illegible] न्तिकं [illegible] रोधि- [illegible] रूप [illegible]

तानन्त्यविरोधात् , प्रकरणादिविशेषपर्यवसानहेत्वभावाच्च । तदिदमाह भगवान् भाष्यकारः "ब्रह्मशब्दस्य हि व्युत्पाद्यमानस्य नित्यशुद्धत्वादयोऽर्थाः प्रतीयन्ते बृहते-र्धातोरर्थानुगमात्" इति । न च विचारकर्तव्यतापरे सूत्रेऽयमर्थो विमृष्टोऽपि पदमात्रोपस्थितो निर्विचिकि-त्समधिगतो भवतीति तदधिगमाय लक्षणादिमुखेन विचारमारभ्यते भगवान् "जन्माद्यस्य यत" इत्यादि-नेति न परोक्तदूषणानां प्रसरः । [सि-सि-नम्] जन्मादिकारणत्वमपि निर्विशेषलक्षणं संभवत्येव । असङ्ग-निर्विशेषेऽप्याविद्यकधर्मधर्मिभावस्योपगमात् । परन्तु तेन सर्वज्ञानादिमयेन शास्त्रैकसमधिगमनीयं अशेषविशेष-विरोधिस्वरूपमेव लक्षणीयम् । लक्ष्यस्वरूपबाधाय लक्षणा-योगात् । न हि विसर्पणोत्फणनाद्युपपाद्यफणित्वादि-लक्षणं स्रग्रूपबाधाय । काल्पनिकं तन्न बाधते इति चेत् कारणत्वमपि शास्त्रतात्पर्यविषयलक्ष्यस्वरूपाबाधाय काल्पनिकमस्तु । शेषिभूताधानधर्मोपांशुत्वानुरोधायापि तदङ्गसाम्न उच्चैस्त्वमौत्पत्तिकमपि बाधित्वोपांशुत्वमुपेयते । प्रकृते च शेषिभूतलक्ष्यस्वरूपानुरोधाय तच्छेषकारणत्व-रूपलक्षणस्यासिद्धानपेक्षितवास्तविकत्वस्य यथाकथञ्चिदुप-पद्यमानस्य काल्पनिकत्वोपगमो हि न्याय्यतरः । न च गन्धवत्त्वाद्याकारान्तरविशिष्टा पृथिवीव पृथिवीत्वेन सर्व-ज्ञत्वाद्याकारान्तरविशिष्टं सविशेषमेव कारणत्वेन लक्ष्यतां, एवं तस्य न काल्पनिकत्वं कल्प्येतेति वाच्यम् । सर्वज्ञत्वादि-घटितशरीरस्यैव तस्य तल्लक्षणत्वात् । अन्यथा प्रधानादि-व्यावृत्त्यसिद्धेः । तदिदमेवोक्तं जन्मादिसूत्रभाष्ये "जन्मस्थितिभङ्गं यतः सर्वज्ञात्सर्वशक्तेर्भवति तत् ब्रह्मेति वाक्यशेषः" इति । प्रथमसूत्रस्थब्रह्मपदोपस्थापित-लक्ष्यस्वरूपस्य निरतिशयबृहद्रूपस्यैव लक्षणे आका-ङ्क्षासम्भवाच्च । [सि-सि-नम्] तस्मात् परिच्छेदसामा-न्यशून्यं वस्तु जिज्ञास्यत्वेनोक्तमिति निरवद्यम् । एवं च [illegible] ब्रह्मात्मकत्वे वक्तव्ये प्रपञ्चस्य ब्रह्मणि कल्पित-[illegible] रेण तत्कृतपरिच्छेदस्यावास्तवत्वेन वास्तवापरि-

च्छेदाविरोधित्वस्यैव मुक्त्यन्वयितया कल्पितस्वरूपत्वान्-हजीवस्य ब्रह्मणि वस्तुपरिच्छेदाभावाविरोधिताया उपपादयितुमशक्यतया ब्रह्मस्वरूपताया एव वक्तव्यतया तथाभूतस्यैव ब्रह्मणो जिज्ञास्यत्वं सूत्रितमिति सिद्धं भवति । तदेवं प्रत्यगभिन्नब्रह्मणो जिज्ञासा इति अद्वैतपक्ष एव सूत्रकार इति सिद्ध्यति ॥

५. प्रकृतिश्चेति सूत्रे ब्रह्मणः प्रकृतित्वोक्तिः विवर्तोपादानत्व एव स्वरसा - परिणाम्युपादानत्वे कृत्स्नप्रसक्त्यादिदोषस्य सूत्रकृतैवोक्तत्वात् ॥

एवं ब्रह्मणः प्रकृतित्वोक्त्यापि अयमर्थस्सिद्ध्यति । [ब्र-वि-णम्] तथा हि-न तावदत्र प्रकृतित्वं परिणाम्युपादानत्वम् । कृत्स्नप्रसक्त्यादिदोषप्रसक्त्या, विकारित्वप्रयुक्तानित्यत्वे "असम्भवस्तु सतोऽनुपपत्तेः" इति सूत्रविरोधापत्त्या च प्रकृतिपदस्य तत्परत्वासम्भवात् । अत्र केचित्-"सृष्टिवाक्यपर्यालोचनया आत्मन उपादानत्वमवगम्यते । उपादानत्वञ्चापृथक्सिद्ध्या विकाराश्रयत्वम् । निर्विकारत्वञ्च श्रुतिष्वाम्नायते । अत उभयविरोधपरिहाराय सृष्टिवाक्येष्वात्मादिपदानां मायाऽव्यक्ताजादिपदैः प्रतिपादिता या दैवी शक्तिः तद्विशिष्टेश्वरपरत्वमुपेयते । तथा च विकारित्वाख्यमुपादानत्वं अव्यक्तरूपविशेषणांश एव पर्यवस्यति; विशेष्यभूतस्यात्मनो निर्विकारत्वप्रतिपादनेन तदंशे बाधात्" इति पूर्वोक्तदोषपरिहारमाहुः । तदयुक्तम्-तथा सति हि तैर्वाचोयुक्त्यन्तरेण तन्मतरीत्या तदधिकरणपूर्वपक्षभूतः सेश्वरसाङ्ख्यपक्ष एव व्यवस्थापितो भवति; प्रकृत्यंशस्यैवोपादानत्वोपगमात् । अपि च सृष्ट्यादिवाक्येष्वात्मब्रह्मादिपदानां प्रकृत्या विशिष्टे लक्षणाऽपि न न्याय्या । कथञ्च "सत्यं ज्ञानमनन्तं ब्रह्म" इति विशुद्धात्मानं प्रस्तुत्याम्नाते "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः" इत्यादौ प्रकृतिविशिष्टात्मलक्षणा । लक्षितेऽपि विशिष्टात्मनि पञ्चम्यर्थस्योपाद[illegible]वैषां विशेष्यांशेऽन्वितस्य विशेषणांशपर्यवसानकल्पन[illegible]

स्वरसम् । तस्मान्नेयं कल्पना श्रुतिस्वारस्यानुरोधिनी । अन्ये तु तदीया आहुः--यथा प्रकृतेरुपादानत्वम्, एवमात्मनोऽप्युपादानत्वम् ; उभयोपादानत्वस्य श्रुतिसिद्धत्वात् । परन्तु आत्मनो विकाराश्रयत्वं परम्परया, प्रकृतिः साक्षादेव विकारिणी, आत्मा तु विक्रियमाणप्रकृत्याश्रयतया विकारी । तथा च श्रुतिः "मायान्तु प्रकृतिं विद्यात् मायिनन्तु महेश्वरम्" इति । न च तथा सति परमात्मन उपादानत्वं न स्यादिति वाच्यम् । न ह्यपृथक्सिद्ध्या विकाराश्रयत्वं उपादानत्वमित्यत्र साक्षात्संबन्धेन विकाराश्रयत्वं विवक्षितम्, येन परम्परया विकाराश्रयस्योपादानत्वं न स्यात् । गौरवेण साक्षात्त्वस्यानिवेशात् । निर्विकारत्वश्रुतिस्तु साक्षाद्विकारित्वं निषेधति । अतो न सविकारनिर्विकारश्रुत्योर्विरोध इति, तदपि न युक्तम्---एवं हि "आत्मन आकाशस्सम्भूतः" इत्यादिवचनानां स्वारस्यं परित्यक्तमेव स्यात् । उत्सर्गतः साक्षात्सम्बन्ध एव हि तत्र प्रतीयते । न चौत्सर्गिकस्य तस्य "मायां तु प्रकृतिं विद्यात् मायिनन्तु महेश्वरम्" इति वचनानुसारेण मायाद्वारकत्वमास्थेयमिति वाच्यम् । न हि तत्रोपादानत्वं मायाद्वारकमित्यवगम्यते, अपि तु प्रकृतिमायाश्रयत्वमात्रम् । ततश्च प्रतिज्ञाद्यनुरोधात् उपादानत्वं मायान्त्वित्यादिश्रुत्यनुरोधात् प्रकृत्याश्रयत्वञ्चेत्यस्तु, न तूपादानत्वमपि परम्परयाऽऽश्रयणीयम् । न च निर्विकारत्वश्रुत्यनुसारेण उत्सर्ग[illegible] साक्षात्त्वं परित्यज्यत इति [illegible]
विकारमिथ्यात्वक[illegible]
तयोर्वि[illegible] विद्यते [illegible]
रिहार[illegible]त्परमेश्[illegible]
कल्पन[illegible] रघूत्त[illegible]
वाक्[illegible]

(सि. सि. नम्) अत्राह "तदनन्यत्व" मित्यादिना विकारमिथ्यात्वं न प्रतिपाद्यते, अपि तु कारणानन्यत्वमिति। सत्यं, कारणात्कार्यस्यानन्यत्वमवगमयति, परन्तु अवगमयंश्च कार्यस्याविद्यामूलकतां मिथ्यात्वरूपामाकलयति। न हि वस्तुसतः कार्यरूपस्यैव कारणानन्यत्वम्; कार्यकारणभावविरोधात्। न च कारणस्यैवावस्थान्तरं कार्यमिति तस्य तदनन्यत्वम्; ब्रह्मणो विकारापत्तेः। उत्तरोत्तरसंस्थानयोगो हि पूर्वपूर्वसंस्थानसंस्थितस्य विनाशः, स्वावस्थस्य तु उत्पत्तिः मृद इव पिण्डघटकपालाद्यवस्थायोग इति परस्योपगमः। न हि पूर्वावस्थमेवोपादानमुत्तरावस्थायाः, येन निरुपादानमवस्थान्तरमापद्येत। तथा चोत्पादविनाशाभ्यामेव विक्रियेत मृदादिवत्। यत्तु चिदचिदीश्वराः विविक्तस्वभावाः पुनः शरीरात्मभावेन द्विराशीकृताश्च पुनर्विशिष्टतया एकीकृताश्चोपदिश्यन्ते। तत्र सर्वावस्थचिदचिद्वस्तुशरीरविशिष्ट एव परमात्मा "सदेव सोम्येदं" इत्यादिभिरुच्यते। ततो विशिष्टमेव कार्यकारणावस्थं इति स्वरूपान्यथाभावज्ञानसङ्कोचादिरवस्थाभेदः परमात्मन एव। किन्तु सद्वारकः। तदवस्थचिदचिन्नियमनरूपावस्थाभेदश्चाद्वारकः। तथा च कार्यकारणानन्यत्वं अविकारित्वञ्चोपपन्नमिति-तन्न-सदादिपदानां चिदचिद्विशिष्टैकार्थविषयत्वे मानाभावात्। अन्यथा "किं कारणं ब्रह्म" इत्यपि विशिष्टविषय-[illegible]तया अनुपपत्त्यभावेन विमर्शासङ्गतेः, [illegible] ब्रह्मकारणतानि- [illegible] च सदादिपदे [illegible]ष्टस्यैव [illegible]णोऽ- [illegible]धः। [illegible]श्चो- [illegible]

भेदपर्यायेऽवश्यम्भाविनि विकारित्वं दुष्परिहरम्। अपि च ब्रह्मणोऽवस्थाभेदपरिणामित्वे कृत्स्नप्रसक्त्यादिदोषः। ब्रह्म जगदुपादानं निरवयवञ्च ब्रुवाणा श्रुतिरपि ह्युपपादनीया, अन्यथा श्रुतेरेव विरुद्धस्यापि प्रतिपत्तौ मीमांसावैयर्थ्यात्। न चाचिन्त्यशक्तितया परमात्मनो निरवयवत्वं परिणामित्वं कृत्स्नप्रसक्तिश्च प्रतिपत्स्यामहे, यथाऽऽह भगवान् "मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः। न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्" इति। श्रूयते च "पराऽस्य शक्तिर्विविधैव श्रूयते" इतीति वाच्यम्। एवमात्मनो भेदश्चाभेदश्च सगुणत्वञ्च निर्गुणत्वञ्च संसारित्वमसंसारित्वञ्चेति शक्तिवैचित्र्यादेवोपपन्नमिति सामानाधिकरण्याद्युपपादनक्लेशानर्थक्यात्। यथादर्शनमविरोधेनात्मनि सर्वशक्तिव्यवस्थोपपत्तौ कल्पनान्तरायोगाच्च। यथा हि शुक्त्यधिष्ठाननिष्ठमेव रजतं, न च तन्निष्ठा शुक्तिः, न ह्यन्योन्याध्यास इतीतरेतरमधिष्ठानारोप्यभावविवक्षयोच्यते; पौर्वापर्यविरोधात्, शून्यपरिशेषप्रसङ्गाच्च, किन्तु इदमात्मना रजतसंसृष्टरूपेण शुक्त्यधिष्ठान एव "इदं रजतम्" इत्यारोप इति। न च शुक्तिनिष्ठं रजतम्; तत्रैव बाध्यत्वात्, एवमिदमुच्यते "मत्स्थानि सर्वभूतानि" इत्यादि। एवं हि दृष्टानुरोधः स्यात्। तस्मात् स्वमहिमप्रतिष्ठ एव परमात्मा ऐश्वरयोगशब्दितप्रकृतिमायाविद्याशक्त्या जगदात्मा विवर्तते इति कार्यस्य तावन्मात्रसत्ताकतया तदनन्यत्वमुच्यते इत्यकामेनापि स्वीकरणीयम्। किञ्च हेतुभूतवाचारम्भणश्रुतिस्वारस्यानुसारेणापि स्वीकर्तव्यो-ऽयमेवार्थः। तथा हि—"वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यं" इत्येतत् विकारानृततापरं— [illegible] आरम्भणं आलम्बनं, विकारो घटादिः। तर्हि

६. तदनन्यत्वसूत्रे आरम्भणशब्दसूचितवाचारम्भणश्रुतेः विकारमिथ्यात्वपर्यवसाने एव उत्तरसन्दर्भगत "अपागादग्नेरग्नित्वं त्रीणि रूपाणीत्येव सत्यम्" इति श्रुत्यर्थस्वारस्यम्॥

वाक् च तदालम्बनं विकारश्चेति द्वयं प्राप्तम् । नेत्याह—नामधेयं--घटश्शराव इति नाममात्रम्—न तु तत्र वस्तुसत्ता अस्तीति द्योत्यते नामधेयपदेन । दृष्टश्च नामपदस्याभासताद्योतकत्वं "यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम्" इति । लोकेऽपि पुत्राभासे पुत्र इति नामधेयं नात्र पुत्रत्वमस्तीति । कथं तर्हि "सन् घट" इत्यादिव्यवहारः इत्यत आह--मृत्तिकेत्येव सत्यं" इति । "मृत्तिकात्मनैव घटादि सत्यं न तु स्वरूपेणेत्यभिप्रायः । एवकारार्थप्रधानश्चेदं वाक्यं गुडजिह्विकान्यायेन मृदः सत्यत्वानुवादपूर्वकं विकारानृततप्रतिपादनाय । एवमुत्तरेष्वपि लोहादिदृष्टान्तेषु द्रष्टव्यम् । इत्थं तैजसानां पदार्थानां त्रिवृत्करणनिरूपणावसरे स्पष्टमेव प्रतिपादितम् "यदग्ने रोहितं रूपं . . . अपागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्" इति । अत्रापागादग्नेरग्नित्वं इति स्पष्टमेव विकारोपमर्दो दर्शितः । अतः स्वरसतो वाचारम्भणश्रुत्या विकारानृतत्वमवधार्यते । नन्वत्र कथं मात्रपदान्तर्भाविनानृतत्वपर्यवसायि नामधेयपदं व्याख्यायते इति चेत्—उच्यते—वाचा व्यवह्रियमाणं विकारं वाचारम्भणमिति वाक्योदितमुद्दिश्य नामधेयत्वविधाने श्रुतार्थमादाय सामानाधिकरण्यस्यासम्भवात् नामधेयपदस्य नामधेयवाच्यलक्षणामुपेत्य सामानाधिकरण्ये पौनरुक्त्यात्, अर्थपरिसङ्ख्यार्थत्वमुपेत्य मात्रपदान्तर्भावेन मिथ्यात्वपर्यवसाय्यर्थवर्णनं नानुपपन्नम् । अन्येषान्तु वाचेति तृतीयायाः चतुर्थ्यर्थत्वाङ्गीकारः, मृत्तिकेत्यनुषङ्गः, तृतीयान्ततया तस्य विपरिणामः, मृत्तिकेत्येवेत्यत्र घटपदाध्याहारश्चेति बहुतरदोषप्रसङ्ग इत्यादिकं विस्तृतं ब्रह्मविद्याभरणे तदनन्यत्वाधिकरणे ॥

एवमेकविज्ञानेन सर्वविज्ञानप्रतिज्ञा सर्वविकारविकल्पाधिष्ठानतया ब्रह्मणः प्रकृतिभावमुपपादयितुं क्षमते एकविज्ञाने सर्वविज्ञानप्रतिज्ञानस्य मतान्तरानानुगुण्यञ्च सिद्धान्तसिद्धाञ्जने द्वितीयभागे स्पष्टम् [illegible]

[illegible] च्छाया [illegible]

"परिणामात्" इति सूत्रमपि अन्यथाभावमात्राभिप्रायम्; तावतैव साधनीयप्रकृतिभावसाधनात्, प्राग्रूपोपमर्देनान्यथाभावानुपपत्तेः । तदेवं विवर्तोपादानत्वस्यैव "प्रकृतिश्च" इत्यनेन सिद्धौ जीवस्य मुक्त्यन्वयित्वेनाकल्पनीयकल्पितत्वकस्य ब्रह्माभेदः सूत्रकाराभिप्रेतः इति स्फुटम् । तथा च ज्ञेयं ब्रह्म जीवाभिन्नमिति सूत्राशयोऽपि स्फुटः ॥

७. 'असम्भवस्तु सत' इति सूत्रे परमात्मनि निरुपपदसच्छब्दप्रयोगस्य परमात्मातिरिक्तस्य सद्भिन्नत्वे एव स्वारस्यम् ॥

किञ्च "असम्भवस्तु सतोऽनुपपत्तेः" इति परमात्मनि निरुपपदसच्छब्दं प्रयुञ्जानस्य सूत्रकारस्य तदतिरिक्तं न सद्रूपमिति भावो लभ्यते । ततश्च पूर्वोक्तरीत्या जीवस्य आवश्यकसद्रूपस्य परमात्माभेदः सूत्रसूचितो भवति । किञ्च गीतायां "ज्ञेयं यत्तत्प्रवक्ष्यामि" इत्यारभ्य ज्ञेयस्वरूपप्रतिपादनावसरे "अविभक्तञ्च भूतेषु विभक्तमिव च स्थितम्" इति ज्ञेयस्य विभक्तवत्स्थित्युक्त्या, विभक्तवत्स्थितेश्च जीवे एव सर्वलोकसिद्धतया, तादृशस्थितेश्च सिद्धवदनूद्यमानत्वेन परमात्मपरत्वानुपपत्त्या, तस्य च इवकरणेन वास्तवाविभक्ततायाः शरीरेषु प्रतिपाद्यतया सर्वशरीरस्थः वास्तवाविभक्तः विभक्तवत्स्थितः शुद्धजीव एव ज्ञेय इति सिद्ध्यति । एतदेव ब्रह्मसूत्रैरपि निर्णीतमि[illegible] "तत्क्षेत्रं यच्च यादृक्च—ब्रह्मसूत्रपदै[illegible]

रिति गीताश्लो[illegible]

ब्रह्माभेद इति [illegible]

[illegible]

सूत्रे [illegible]

काठ[illegible]

स्यापि ज्ञेयत्वं वदतीति चेन्न, प्रकरणात्, परमात्मन एवात्र ज्ञेयत्वोक्तेः, इति सिद्धान्तपरे भागे, काठके जीवे "यच्छेद्वाङ्मनसी प्राज्ञ" इत्यादौ प्रयुक्तस्य प्राज्ञशब्दस्य प्रयोगात् जीवब्रह्माभेदः सूत्रकाराभिप्रेत इति स्फुटं प्रतीयते। अन्यथा परमात्मपरेण शब्देन प्रकरणिन्युदाहरणीये जीवपरेण शब्देन तदुदाहरणमसमञ्जसमेव स्यात्। नन्वेवमपि कथं नासमञ्जसं, जीवपरमात्मनोर्वास्तवाभेदेऽपि व्यावहारिकेण तयोर्विभागेन वेदान्तेष्विदं जीवप्रकरणं इदं परमात्मप्रकरणमिति व्यवस्थितेरभ्युपगमात् इति चेत्—सत्यम्; तथापि काठके जीवपराभेदप्रकरणमिदं, न केवलस्य जीवस्य प्रकरणं, परस्य वा, इति सूचयितुमेव परमात्मपरेण शब्देन प्रकरणिन्युदाहरणीयेऽपि यदभिन्नतया प्रकरणी प्रतिपिपादयिषितः तत्परेण शब्देन तस्योदाहरणं सूत्रे कृतमिति, जीवपरमात्माभेदे श्रुतिसम्मतिपर्यन्तस्वसम्मतिः सूत्रकारेणाविष्कृता। विवेचितश्चैतत् शिवाद्वैतविनिर्णये बहुधा परोक्तार्थनिरसनेन श्रीदीक्षितेन्द्रैः॥

९. शास्त्रदृष्ट्या तूपदेशो वामदेववत् इति सूत्रे शास्त्रदृष्टिपदस्वारस्यं जीवब्रह्माभेदे एव, तेन हि इन्द्रस्य स्वात्मनो ज्ञेयत्वोपदेशः शास्त्रदृष्ट्या इत्युच्यते। ज्ञेयञ्च परं ब्रह्मेति प्रसिद्धिः॥

किञ्च—"शास्त्रदृष्ट्या तूपदेशो वामदेववत्" इति सूत्रमपि जीवब्रह्माभेदे प्रमाणम्। तथा हि—हिततमो-
[illegible] पदेशे कर्तव्ये इन्द्रस्य स्वात्मोपदेशो न
सू[illegible]
[illegible] तूपदेश" इति
[illegible] ब्रह्माभेदसाक्षात्कारः
[illegible] दिशति
[illegible] जनिता

इन्द्रेण कृत इति सूत्रार्थसङ्गतिः इति तन्न। शरीरवाचकानां शरीरिपर्यन्तत्वबोधकशास्त्रस्यैवाभावात्। यदुच्यते नामरूपव्याकरणादिश्रुत्यादि तद्बोधकमिति, तत्तु सिद्धान्तसिद्धाञ्जने विस्तरेण परिष्कृत्य निराकृतं विस्तरभयान्नेह लिख्यते। शरीरवाचकानां शरीरिपर्यन्तत्वस्वीकारोऽप्यसङ्गतः (सि-सि नम्) "ब्राह्मणो यजेत" "मद्यं ब्राह्मणो वर्जयेत्" इत्यादिविधिनिषेधाधिकारित्वस्येश्वरे प्रसङ्गात्। न खलु प्रथमोपस्थितेऽपि देहे ब्राह्मणशब्दः पर्यवस्यति। तत् कस्य हेतोः? जीवपर्यन्तत्वोपगमात्। एवं ब्रह्मपर्यन्तत्वोपगमे प्रथमोपस्थितमपि जीवमतिक्रम्य विशेष्यब्रह्मपर्यवसानं युक्तम्। यत्तु ब्राह्मणादिशब्दैः प्रथमोपस्थिततत्तच्छरीराभिमानिजीवान्वयेन झटिति वाक्यार्थबोधनिष्पत्तौ सत्यां, तवतैव वाक्यप्रामाण्यस्य चरितार्थतया, ईश्वरस्य सर्वान्तर्यामित्वं, अन्तर्यामिणम्प्रति नियाम्यानां शरीरत्वं, शरीरवाचिनां शब्दानां शरीरिपर्यन्तत्वं, श्रुतिन्यायाभ्यामवगन्तव्यमपेक्ष्य विलम्बितोपस्थितिकस्य ईश्वरस्यान्वयेन पुनर्वाक्यार्थबोधान्तरं नोदेतुमर्हति। अत एव "त्रिः प्रथमामन्वाह त्रिरुत्तमाम्" इत्यत्र प्रथमोत्तमशब्दाभ्यां शीघ्रोपस्थितिकयोः प्रथमचरमस्थानयोरेव वाक्यार्थान्वयः, न तु प्रथमचरमस्थानानुवचनीययोः "प्रवो वाजा, आजुहोता" इति ऋचोर्विलम्बितोपस्थितिकयोरिष्यत इति। तदेष व्यामोहमात्रम्—तटस्थो हि ब्राह्मणादिप्रत्ययो जातिविषयो यथायोगं विशेषेषु सङ्क्रामन् न विशिष्यते। श्रुतिन्यायौ च ब्रह्मणि शक्तिग्रहोपक्षीणौ न प्रत्ययकार्यकालौ, येन तदपेक्षया विलम्ब इष्येत। न च तत्तच्छरीरजीवमभिधाय परमात्मानमभिधत्ते। वृत्तिविरामप्रसङ्गात्। तस्य तस्य प्रत्येतुः प्रत्ययस्तु व्यक्तिविशेष एव प्रथम इति तत्रैव वाक्यप्रामाण्यचारितार्थ्ये सामान्यद्वारविलम्बितोपस्थितिकविशेषान्तरान्वयबाधान्तप्रसङ्गात्। "त्रिः प्रथमामन्वाह" इत्यादौ

तु युक्तं प्राथम्याद्युपाधिनैव सामान्यप्रत्ययात् यथाविषयमनुवचनव्यवस्था इति । यत्तु राजा न स्वानुशासनविषय इति निदर्शनम्--तत् वेदापौरुषेयत्वे न प्रतिविधेयम् । अपि चैवं राजधर्मं वा राजा ब्राह्मणधर्मं वा ब्राह्मणोऽनुशासत् स्वयमन्यथावृत्तिः वृद्धहंसाख्यायिकया न निन्द्येत । तथा च न विधिनिषेधोल्लंघने जीवः प्रत्यवेयात्, नापि कर्मणा संसरेत्, मुच्येत वा । न च 'ब्राह्मणः शुक्लः' इत्यादावित्र ब्रह्मणोऽयोग्यतया जीवं विशेषणमेवावक्रामति विधिरिति वाच्यम् । ब्राह्मणशरीरकत्वातिरिक्तविधियोग्यताया जीवेऽप्यभावात् । कर्मवश्यता च ब्रह्मपर्यन्तत्वेऽस्माद्विधेरेव प्रसज्यमाना वारयितुमशक्या । अत एव सुखदुःखादिभाक्त्वस्यापि प्रसङ्गात् । न च श्रुत्यन्तरविरोधः । जीववत् अपहतपाप्मत्वादेरवस्थाभेदनेयत्वोपपत्तेः ॥

१०. शरीरवाचकानां शरीरिपर्यन्तत्वस्य सूत्राभिप्रेतत्वे 'आकाशस्तल्लिङ्गा' दित्याद्यधिकरणवैयर्थ्यम् ॥

किञ्चैवमाकाशादिशब्दानां ब्रह्मण्येव परमा शक्तिरिति नास्तिपूर्वपक्षं "आकाशस्तल्लिङ्गात्" इत्याद्यधिकरणं प्रसज्येतेति न सूत्रकाराभिप्रेतञ्च । अत एत "सुखविशिष्टाभिधानादेव च" इत्यपि न परेषां साधकम् । तत्र हि "कं ब्रह्म खं ब्रह्म" इत्यादौ कंखंशब्दयोरितरेतरान्वयेन नभोवैषयिकसुखव्यावृत्तं यत्प्रस्तुतं तदुच्यते, सुखविशिष्टमिति नभोव्यावृत्तये सुखरूपेण विशेषितमित्यर्थः । शं कं सुखं इत्यादिशब्दानां निष्कृष्टविषयप्रसिद्धिविरोधेन विशिष्टविषयत्वानुवादायोगाच्च । तस्मात् शरीरवाचकानां शरीरिपर्यन्तत्वं असङ्गतं सूत्रकारानभिमतञ्चेति न तदभिप्रायेण इन्द्रस्य असमच्छब्दप्रयोगोपपादनपरं "शास्त्रदृष्ट्या तु" इति सूत्रम् । तत्त्वमसीत्याद्यनानुगुण्याच्च । [illegible] तत्र हि शरीरवाचकानां शरीरिपर्यन्तत्वस्य [illegible]

यथाश्रुतार्थसम्भवः । न ह्यत्र त्वंशब्दस्य ईश्वरशरीरभूतजीववाचकस्येश्वरे वृत्तिरभ्युपेयते; त्वंशब्दार्थस्य तच्छब्दार्थे विशेषणत्वाभावात्, किन्तु तच्छब्दस्यैव प्रकृतपरमात्मपरामर्शकस्य त्वंशब्दार्थेऽभेदसम्बन्धेन विशेषणसमर्पकता । अन्यथा असीति मध्यमपुरुषो न स्यात् । त्वंशब्दार्थस्येतरविशेषणत्वे आकाङ्क्षाऽभावेनाख्यातसामानाधिकरण्यायोगात् । युष्मच्छब्दस्याख्यातसामानाधिकरण्य एव "युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः" इति सूत्रेण मध्यमपुरुषो विधीयते । अतस्त्वंशब्दार्थस्य विशेष्यत्वमभ्युपेतव्यम् । तत्र च परमात्मपरस्य तच्छब्दस्य वृत्तिः शरीरवाचकानां शरीरिपर्यन्तत्वाभ्युपगमेऽपि न सम्भवति । ईश्वरस्य जीवं प्रति शरीरत्वाभावात् । मध्यमपुरुषोपपत्तये च त्वम्पदार्थविशेष्यमेकमेव सामानाधिकरण्यमुपेयम् । एवं "अहं ब्रह्मास्मि" इति सामानाधिकरण्यमपि उत्तमपुरुषोपपत्तये जीवविशेष्यकमेव स्वीकर्तव्यम् । दृश्यते हि त्वमहंशब्दार्थयोः विशेषणविशेष्यभावव्यत्यासे मध्यमोत्तमपुरुषयोर्व्यत्यासः "त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि" इति व्यतिहारवाक्ये । तथाऽन्यत्रापि "यदग्ने स्यामहं त्वं त्वं स्या अहम्" इत्यादौ । ततश्चासीति पदानुसारेण त्वंशब्दार्थविशेष्यके सामानाधिकरण्ये स्थिते शरीरवाचकानां शरीरिपर्यन्तत्वमिति व्युत्पत्त्यभ्युपगमेऽपि स्वारस्यहानेरवर्जनीयतया जीवब्रह्माभेदमुपेत्यैव स्वारसिकार्थ [illegible] सीत्यादिश्रुत्य [illegible] प्रमापकमेवेति [illegible] विद्यते [illegible] न दु [illegible] त्परमेश्व [illegible] स्वान्त [illegible] रघूत्त [illegible] वा [illegible]

गच्छन्ति ग्राहयन्ति च" इति च सूत्रं जीवब्रह्माभेदपरं व्याख्यातम्। यत्तु वेङ्कटनाथीये—"विपरीतश्चायं व्यपदेश आयुष्मतः। अहं ब्रह्मास्मीत्यनुसन्धानं ह्यत्र व्याख्यायते, तच्च भ्रान्तिरूपमिति भवतेष्टव्यम्; विलुप्ताहम्भावादिविप्लवसंविन्मात्ररूपत्वाद् ब्रह्मणः, ततश्च मोक्षोपायतया भ्रान्तिरेव सूत्रितेत्यायातम्। शालामालादिन्यायेन विवक्षितपर्यवस्थापनन्तु सूत्रस्वारस्योपन्यासदशाविरुद्धम्" इति। तन्न। पूर्वोक्तबहुतरसूत्रवक्ष्यमाणसूत्रार्थानुसारित्वात् शालामालान्यायेन एकदेशपरित्यागेन एकदेशमात्रविषयकत्वेन अहं ब्रह्मास्मीत्यनुसन्धानसूत्रणोक्तेः स्वारस्यानपायात्। शरीरशरीरिभावेनानुसंधानसूत्रणस्य असम्भावितत्वोक्तेः, श्रुत्यननुगुणत्वाच्च, तस्य सूत्रकृदभिप्रायानुसारित्वाभावात्। सूत्राक्षराणामर्थविशेषविवादावसरे श्रुतिस्वारस्यानुसरणे दोषाभावात्। तस्यैव युक्तत्वाच्च। किञ्च उक्तसूत्रे "अहमित्युपगच्छन्ति" इत्यनुक्त्वा शालामालान्यायेन विवक्षितपर्यवस्थापनं अहं ब्रह्मास्मि इत्यादेरनुमनुते सूत्रकृत्। अत एव आत्मेति स्वरसम्। भवन्मतेऽपि हि अहं ब्रह्मास्मीत्येवानुसन्धानं सूत्रयितव्यम्, न तु "आत्मा—शरीरी" इति। अनुसन्धानस्य "शरीरी" इत्येवमाकारकत्वाभावात्। तस्माद्यत्किञ्चिदेतत्। इतिकरणञ्च विषयसमाप्तिद्योतकम्। "मनो ब्रह्मेत्युपासीत" [illegible] दृष्टिविधिसूचन एव इतिकरणं स्वरस- सू[illegible] [illegible]भावस्य अनुसन्धान- [illegible] [illegible]येन। [illegible] [illegible]र्त्या- [illegible]ना-

निर्देश एवोपपद्यते। त्वंशब्दनिर्दिष्टे परमेश्वरे स्वशरीरकपर्यन्तस्य वृत्तिसम्भवात्। त्वं वा अहमस्मि इति निर्देशस्तु नोपपद्यते, अहंशब्दनिर्दिष्टे परमेश्वरशरीररूपे स्वस्मिन् परमेश्वरवाचिनः त्वंशब्दस्य वृत्त्यनुपपत्तेः। न च वाक्यद्वयेऽपि त्वंशब्दौ प्रस्तुतगुणविशिष्टपरमेश्वरविषयौ, अहंशब्दौ स्वशरीरकत्वविशिष्टतद्विषयाविति वाक्यद्वयमप्येकरूपार्थपरमेवेति वाच्यम्। तदानीं "त्वं वा अहमस्मि, अहं वै त्वमसीति" व्यवस्थितयुष्मदस्मच्छब्दपौर्वापर्यास्यसिशब्दप्रयोगकृत - वाक्यद्वयवैयर्थ्यापत्तेः। एकेनैव वाक्येन स्वान्तर्यामिणः परमेश्वरस्य चाभेदसिद्धया वाक्यान्तरवैयर्थ्यापत्तेश्च। न चाभेदधीदाढर्यार्थं वाक्यद्वयम्। जीवपरमेश्वरयोरिव अन्तर्यामिपरमेश्वरयोः भेदभ्रान्त्यभावेन तद्दाढर्यापादनस्यानपेक्षितत्वात्। एतेन- त्वं वा अहमस्मि, अहंबुद्धिरहंशब्दश्च त्वत्पर्यवसायिनौ, अहंशब्दयोगादुत्तमपुरुषः, अहं वै त्वमसि, अहंबुद्धिशब्दपर्यवसानभूमिस्त्वं, त्वंशब्दयोगान्मध्यमपुरुषः इत्यादितदीयव्याख्यानमपि प्रत्युक्तम्। क्लिष्टव्याख्यानदोषाच्च। अतो व्यतिहारेण स्वस्मिन् परमेश्वराभेदः परमेश्वरे स्वाभेदश्च भेदाभेदशङ्कानिरासेनात्र प्रतिपाद्यतेऽभेददाढर्यार्थमित्यवगम्यते। एतादृशश्रुतिस्वारस्यानुगुण्येन पूर्वोक्तसूत्राक्षरस्वारस्येन च आत्मेति तूपगच्छन्तीत्यादेः जीवब्रह्माभेद एव तात्पर्यम्॥

११. 'यावद्विकारन्तु विभाग' इति सूत्रस्य परमात्मभिन्नस्य विकारत्वे एव स्वारस्यं, विभाग उत्पत्त्यर्थकत्ववर्णनन्तु क्लिष्टमप्रसिद्धार्थकल्पनञ्च॥

अत एव "यावद्विकारन्तु विभागो लोकवत्" इति विभक्तत्वावच्छेदेन विकारत्वमाह। अन्यथा मुक्त्यन्वयितया अनित्यत्वानर्हजीवस्य विकारत्वानुपपत्त्या ब्रह्मभिन्नत्वे च विकारत्वावश्यम्भावे जीवो [illegible]रूपस्वरूपः स्यादिति महदनिष्टमापद्येत। यत्तु [illegible]त्म्यमिदं सर्वं" मित्याकाशस्यापि विकारत्व- [illegible] यावद्विकारं "तत् तेजोऽसृजत" इत्यादा-

वत्तुक्तोऽपि विभागः उत्पत्तिरुक्तैव भवति । यथा लोके सर्वे एते देवदत्तपुत्रा इत्यभिधाय केषांश्चिदुत्पत्तिवचनेन सर्वेषामप्युत्पत्तिरुक्तैव स्यात् तद्वत् इति । तन्न । (सि-सि-नम्) विभागपदस्योत्पत्तावप्रसिद्धेः । "ऐतदात्म्यमिदं सर्वं" इत्युक्तस्य विशेषोपसंहारः तत्त्वमसीति इति तव मते तस्य जीवसाधारण्येन विकारवचनत्वाभावात् । अन्यथा तस्यापि परस्मादुत्पत्तिरुक्तैव स्यादिति "नात्माऽश्रुते" रित्यादिन्यायविरोधः । तस्मात्पूर्वोक्त एव सूत्रार्थः इति जीवब्रह्माभेदः सूत्रसम्मतः ॥

१२. न स्थानतोऽपीति सूत्रे उभयलिङ्गस्य नेत्यनेनान्वये एव स्वारस्यम्—सर्वत्रेत्यनेनाभिसम्बन्धे निषेधस्य प्रतियोग्यध्याहारक्लेशः, उपाध्यवस्थानप्रयुक्तदोषसम्बन्धाभावप्रतिपादनपरत्वेन सूत्रस्यैव वैयर्थ्यं, सम्भोगप्राप्तिरिति सूत्रेणैव गतार्थत्वात् । अधिकाशङ्कायान्तु सौत्रहेत्वानर्थक्यं, तस्य तदनिवर्तकत्वात् ॥

अत एव "न स्थानतोऽपी" त्यधिकरणेन परमात्मानं निर्विशेषमाह, सविशेषत्वे विरुद्धधर्मवत्त्वेन प्रतीयमानयोर्जीवब्रह्मणोर्विवक्षिताभेदानिर्वाहादिति । यत्तु सविशेषमेवानेन ब्रह्मोपपाद्यते, ब्रह्मणो हि तत्तन्नियाम्योपाधिष्वस्थानतो जीवस्येव दोषसम्बन्धशङ्कायां इदमुच्यते, न स्थानतोऽपि दोषसन्बन्धः, यतः सर्वत्र श्रुतिस्मृतिषु उभयलिङ्गं निरस्तनिखिलदोषतासमस्तकल्याणगुणात्मतारूपोभयलक्षणं ब्रह्मावगम्यते "एष आत्मा अपहतपाप्मा" "निरवद्यं निरञ्जनं" "सत्यकामः सत्यसङ्कल्पः" "समस्तकल्याणगुणात्मकोऽसौ" इत्यादिष्विति । तदयुक्तम् । "सम्भोगप्राप्तिरिति चेन्न वैशेष्यात्" इत्येवास्य गतार्थत्वात्, तत्रापि ह्यपहतपाप्मत्वमेव हेतुः । अथापहतपाप्मत्वेनाकर्मनिमित्तेऽपि देहावस्थाने तन्निबन्धनोऽपुरुषार्थसम्बन्धो दुष्परिहरः । न हि राजापराधनिमित्ते वा चोरस्य, स्वच्छन्दनिमित्ते वा राज्ञो दुर्गन्धादिदुःखभूयिष्ठकारागृहावस्थानेऽनर्थसम्बन्धो विशिष्यते [illegible] जीव[illegible] इति [illegible] एतद् [illegible] हि देहयोगैकहेतुरनर्थयोगः । अन्य[illegible]

कर्माणि भोगमर्पयेयुः, इत्येवमिहाप्यधिकाऽऽशङ्का इति चेत्तर्हि श्रौतापहतपाप्मत्वादेरप्रयोजकीकृतत्वात् चोद्यपदस्यैव पुनरुपादानं उभयलिङ्गं सर्वत्र हीत्यनर्थकं स्यात् । अपि च देहावस्थानप्रयुक्तानर्थासम्बन्धे जीवसाधारणमुभयलिङ्गत्वमप्रयोजकम् ॥

१३. "भेदादिति चेन्न प्रत्येकमतद्वचनात्" इत्यत्र देहयोगरूपावस्थाभेदादित्यर्थकत्वे उपस्थितिकल्पनाक्लेशः, "अतद्वचनात्" इत्यत्र तच्छब्दस्य दोषसम्बन्धपरत्वे प्रकृतावमर्शस्वारस्यभङ्गश्च ॥

नन्वेतदेव निरस्यते सूत्रेण "भेदादिति चेन्न प्रत्येकमतद्वचनात्" उभयलिङ्गस्यापि जीववदेव देहयोगरूपावस्थाभेदादपुरुषार्थयोगोऽवर्जनीय इति चेत्—न "यः पृथिव्यां तिष्ठन्—स त आत्माऽन्तर्याम्यमृतः" "य आत्मनि तिष्ठन्—स त आत्माऽन्तर्याम्यमृतः" इति प्रतिपर्यायं नित्यत्वस्यावक्तव्यतया तत्तदवस्थानप्रयुक्तदोषसम्बन्धाभाववचनात्—इति । उच्यतां सकृदिव शतशोऽपि । कथमप्रयोजकतोद्धारः । अनेनातिरोहितोभयलिङ्गत्वं सूच्यते, जीवस्तु कर्माविद्यावरणतिरोहितज्ञानादिगुण इति तदुद्धार इति चेत्, हन्तैवमतिरोहितत्वेन हेतुरनेन विशेष्यत इत्यापन्नम् । ततश्च सूत्रकृतोऽविशेषितहेतुप्रतिज्ञाहानिः प्रतिज्ञान्तरञ्च निग्रह आपद्येत । अपि च देहयोगरूपावस्थाभेदात् इत्युपस्थितिकल्पनाक्लेशः, अतद्वचनादिति कल्प्योपस्थितिकापुरुषार्थ[illegible]विषयत्वे तत्पदस्य प्रकृतावमर्श[illegible] स्वार[illegible]

च [illegible] त्यादिश्रुत्य[illegible]

प्रमापकमेवेति [illegible] विद्यते [illegible]

[illegible] त्परमेश्व[illegible]

[illegible] रघूत्त[illegible]

वा [illegible] कथं [illegible]

स्यात् । अपि चैवं निषेध्यस्य स्थाननिमित्तानर्थसम्बन्धस्य प्रागप्रसक्तेरिहाध्याहारगौरवप्रसङ्गः । (सि-सि-नम्) यत्तु वेङ्कटनाथीये स्ववाक्यस्थस्यापि गुणस्य स्वरूपत एव निषेधानुपपत्तेः अध्याहारः, न हि गुणो गुणत्वादेव निषेध्यः; वैपरीत्यात् । न च दोषकोटिनिक्षेपेण तन्निषेधः; सर्वज्ञत्वादेर्दोषत्वस्य प्रमाणाभावात् । अतः पारिशेष्याद्दोष एव निषेध्य इति स्थिते जागरितस्वप्नाद्यवस्थासु जीवस्य ये दोषाः पूर्वेष्वधिकरणेषूक्ताः प्रकृताः त एवात्र निषेध्यतया सूत्रकृदभिप्रेता इति स्पष्टं इति—तन्न युक्तम् । धर्मत्वादेव निषेध्यत्वोपपत्तेः । अत एव "अथात आदेशो नेति नेति" इति प्रकृतसर्वप्रपञ्चनिषेधेन ब्रह्मोपदिश्यते । आह च सूत्रकारोऽपि "प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः" इति ॥

१४. प्रकृतैतावत्त्वं हीतिसूत्रे प्रकृतपदं "अथात आदेशो नेति नेति" इति श्रुतेः ब्रह्मणि मूर्तामूर्तप्रपञ्चनिषेधार्थकत्वे एव स्वरसं, न तु एतावत्त्वप्रतिषेधपरत्वे; एतावत्त्वस्याप्रकृतत्वात् ॥

यत्तु "अथात आदेशो नेति नेति" इति वाक्ये न सप्रपञ्चता पूर्वसन्दर्भगता निषिध्यते । अपि तु मूर्तामूर्तात्मकं ब्रह्मणो रूपमित्युक्त्वा तावन्मात्रमेव ब्रह्मणो रूपमिति शङ्कायां, नेति नेतीति वाक्येन तावन्मात्रमेव ब्रह्मणो गुणजातं न भवतीति प्रतिपाद्येत; [illegible] तावन्मात्रतायाः प्रतिषेधाय परासम[illegible] । पार[illegible]त्यने- [illegible] उत्कृष्टं [illegible] त्कृ- [illegible] नं [illegible]

द्व्यातिरिक्तगुणान्तररहितत्वं, तस्यासंशब्दितत्वात् । नह्येतस्मादिति वाक्येऽपि ब्रह्मणोऽन्यदुत्कृष्टं नास्तीति योजनायामन्यपदस्य वैयर्थ्यात्, अन्यस्मिन्नेवोत्कृष्टत्वप्रसक्तेः । तस्मात् पूर्ववाक्येन मूर्तामूर्तात्मककृत्स्नप्रपञ्चो निषिध्यते । निषेधवाक्यार्थं स्वयमेव श्रुतिराह—न ह्येतस्मादिति—एतस्मात् ब्रह्मणोऽन्यत्वेन भासमानं यत्परमन्यद्वस्तुजातं तद्यतो नास्ति अतो नेतीत्युच्यते इति भगवत्पादसम्मतः पन्था एव समीचीनः । एवञ्च प्रकृतैतावत्त्वं हि प्रतिषेधतीत्यत्रापि प्रकृतं एतावत्त्वं प्रतिषेधतीति नार्थः, इयत्तायाः अप्रकृतत्वात् । परन्तु प्रकृतं एतावत् यस्य तत्प्रकृतैतावत्, तस्य भावः प्रकृतैतावत्त्वं, तच्च प्रकृतं यदेतावत् तदेव; विशिष्टवाचकाद्भावप्रत्ययेन विशेषणस्यैव प्रकृतिजन्यबोधप्रकारीभूतस्याभिधानात् । तथा च पूर्वं प्रकृतं यदियत्तापरिच्छिन्नं वस्तु मूर्तामूर्तात्मकं द्वैराश्येनोक्तं तत्प्रतिषेधतीत्येव सूत्रार्थः । अत्र प्रकृतं प्रतिषेधतीत्यनुक्त्वा प्रकृतैतावत्त्वमिति बहुव्रीह्युत्तरभावप्रत्ययेन तदभिधानन्तु, मूर्तामूर्तात्मकप्रपञ्चस्य न यत्र कुत्रचिन्निषेधः, अपि तु ब्रह्मण्येव, यत्सम्बन्धित्वेन पूर्ववाक्ये श्रुतम् इत्येतदर्थलाभार्थम् । तथा सति हि प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वरूपं मिथ्यात्वं बोधितं भवेद्बोधनीयं इति श्रुत्यभिप्रायः प्रकटितो भवेदिति । तल्लाभश्चैवं—विशिष्टाद्भावप्रत्ययेन विशिष्टसम्बन्धित्वेन रूपेण विशेषणोपस्थापनेन मूर्तामूर्तप्रपञ्चविशिष्टं यत् ब्रह्म तत्सम्बन्धित्वविशिष्टस्य निषेधे तत्र तदभावो बोधितो भवेदिति । प्रकृतत्वं इति अनुक्त्वा एतावत्त्वेनापि प्रकृतस्य घटनं तस्य परिच्छिन्नतया निषेधार्हत्वद्योतनाय, उपसर्जनतया प्रकृतब्रह्मणो व्यावर्तनाय च । एतेन अद्वैतिनां मते त्वप्रत्ययस्य, एतावत्त्वमित्यस्यैव वा वैयर्थ्यं इति वेङ्कटनाथीयाद्युक्तं समाहितं वेदितव्यम् । स्पष्टश्चायमर्थो "न स्थानतोऽपि" "प्रकृतैतावत्त्वं" [illegible]करणीयब्रह्मविद्याभरणपरिशीलने । भगवत्पाद- [illegible]रि श्रीभाष्यादिषु शङ्क्यमानस्य परिहारोऽपि

तत्रैव कण्ठत उक्तः, विस्तरभयान्नेह लिख्यते। एवञ्च ततो ब्रवीति च भूय इत्येतदपि नामधेयविषयं न तु गुणजातविषयं, उक्तश्चैतदपि ब्रह्मविद्याभरणे उक्तप्रस्तावे। तथा च उभयलिङ्गत्वस्य स्ववाक्यस्यस्यैव निषेध्यत्वसम्भवात् निषेध्याध्याहारगौरवं दोष एव। जीवावस्थानिरूपणप्रसङ्गात् जीवस्य तत्तत्स्थानप्रयुक्तानर्थ-सम्बन्धो बुद्धिस्थ इति ब्रह्मणि तस्यायं निषेध इति यदि कल्प्येत, तत एव श्येनलयोड्डयनाभ्यामिव नीडस्य, जीवलयोद्गमनाभ्यां ब्रह्मणः सविकारत्वमपि स्याद्बुद्धि-स्थमिति तस्यायं प्रतिषेध इति किं न कल्प्येत। तथा च सन्दिग्धार्थं सूत्रमापद्येत। अल्पाक्षरमसन्दिग्धञ्च सूत्रम्। (सि. सि. नम्) ॥

१५. आह च तन्मात्रं इति सूत्रे प्रकाशमात्रं ब्रह्म इत्यस्मिन्नेवार्थे तन्मात्रपदस्वारस्यम्॥

किञ्चैवं "आह च तन्मात्रम्" इति सूत्रमसङ्गतम्। अत्र हि मात्रशब्दो न वचनविशेषणम्; विषयसमभि-व्याहारात्। तत्र, "तन्मात्रमाह नान्यद्वाक्यान्तरावगतं निषेधति" इति व्याख्यानमसङ्गतम्। "तदाह केवलम्" इति हि तदा स्यात्। अथ तन्मात्रमाह नान्य-निषेधमिति व्याख्यायेत, तर्हि "प्रकाशवच्चावैयर्थ्यम्" इति प्रकृतपरामर्शात् प्रकाशमात्रं ब्रह्माह, तत्र नान्यनिषेधं इति वैरूप्यमापद्येत। प्रकाशरूपत्वमात्रमाह इति व्याख्याने च प्रकृतावमर्शस्वारस्यभङ्गः। तस्मात् तत्त्व-मसीत्यादिवाक्यार्थप्रतिपत्त्युपयोगितया त्वम्पदार्थे जीव-स्वरूपे निरूपिते तत्पदार्थो ब्रह्म निरूप्यते न स्थानतोऽपीत्यादिना। तत्र ब्रह्मणः सविशेषनिर्विशेषो-भयरूपश्रवणात् एकस्य स्वभावादुभयरूपायोगेऽपि स्थानतः—पृथिव्याद्युपाधियोगात् सविशेषत्वं भविष्य-तीति प्राप्ते, न स्थानतोऽपि परस्य तदुभयलिङ्गं वा प्रतिपत्तव्यं, सर्वत्र हि ब्रह्मतत्त्वपरेषु "अस्थूलमनण्वते" "अशब्दमस्पर्शं" "केवलो निर्गुणश्च" [illegible]

नेत्यात्मा" इत्यादिषु निखिलविशेषनिषेधो गम्यते इत्युच्यते। एवं सति आह च तन्मात्रं प्रकाशैकरसं "अयमात्माऽनन्तरोऽबाह्य" इत्यादिः, अतोऽपि नोभय-लिङ्गं, इति प्रकृतविषया हेतुसमुच्चययोजना श्लिष्टा। परस्य तु मात्रपदलभ्यविशेषो वा, अप्रकृतशङ्कानिरास-समुच्चयो वा चार्थ इति क्लिष्टयोजना। नन्वत्र यदि ब्रह्म अरूपवदेव, तत्प्रधानत्वात्, तर्हि रूपवदुपदेश-वैयर्थ्यमित्याशङ्क्य, "प्रकाशवच्चावैयर्थ्यम्" सौरादि-प्रकाशवदौपाधिको रूपभेद उपासनार्थमुपदिश्यत इति सूत्रिते, तन्मात्रं प्रकाशैकरसमाहेत्यप्रकृतार्थविषयमा-पद्येतेति चेत्सत्यं शब्दमात्राद पि तु प्रकृतविषयत्वनिर्वाहः "नालीकासनमीश्वरः शिखरिणां तत्कन्धरोत्थायिनो गन्धर्वाः" इत्यादिवदिति। नन्वौपाधिको ब्रह्मणः सर्वज्ञत्वसर्वकर्मत्वादिविशेष उपगम्यते। सत्यं। तस्या-विद्यामात्रत्वमपि। तदिदमत्र ज्ञेयब्रह्मण्युपाधितोऽपि सविशेषत्वनिषेधे फलितम्। यत्तु सकलविशेषमृषात्व-मारम्भणाधिकरणेनैव सिद्धम्। न च श्रुतिविरोध-समाधयेऽयमारम्भः। विधिनिषेधानां विषयभेदेना-विरोधात्। अपच्छेदन्यायनेयत्वाद्वा। अपि च विरोधेऽपि निषेधार्थं नानुवादः; लोकतोऽप्राप्तेः। नोपासनार्थ-मारोपः; स्वरूपपरवाक्यसिद्धत्वात्। तस्मादर्थभेदा-श्रयणेन विधिनिषेधौ नेतव्यौ। अन्यथा सर्वगन्धादि-शब्दाप्रामाण्यमेवोक्तं स्यात्—इति—तन्न [illegible]विधि-निषेधयोस्तुल्यविषयत्वा[illegible]
नेयत्वा[illegible]
[illegible] विद्यते [illegible] is seen [illegible] deny [illegible]
सम्भव[illegible]
[illegible] and sacrifices if he [illegible] the fruits in [illegible] respecti[illegible]

कर्तव्यः, तथाऽपि इहाप्यध्याये महावाक्यार्थज्ञानसाधनतया पदार्थशोधनस्य कर्तव्यत्वप्राप्तेः तत्पदार्थशोधनप्रसङ्गेन निर्विशेषसविशेषत्वप्रतिपादकश्रुतिविरोधपरिहारस्येहापि सङ्गतत्वात् । यदपि लिङ्गशब्दस्तावत् ज्ञाप्यातिरिक्ते ज्ञापके प्रसिद्धः, निर्विशेषत्वधर्मश्च नोपगम्यते, तत्र नोभयलिङ्गं, किन्तु निर्विशेषलिङ्गमेव, निर्विशेषमेवेति क्लिष्टार्थं कल्प्येत । अपि च नोभयलिङ्गं, किन्तु सविशेषलिङ्गमेवेति किं न भवेत् । सर्वत्र हि निर्विशेषत्वं प्रतिपाद्यत इति चाध्याहार्यं, सविशेषत्वं प्रतिपाद्यत इत्यध्याहारे को निवारकः इत्यादि—तदप्यसारम्—(सि-सि-नम्) लिङ्ग्यते गम्यते इति लिङ्गशब्दस्य ज्ञाप्यस्वरूपवृत्त्युपपत्तेः । तत्रापि ज्ञापकधर्मद्वयं प्रतिपाद्यते सर्वत्र श्रुतिषु परार्थानुमानवत् इति विवक्षिते ब्रह्मणः शास्त्रयोनित्वन्यायविरोधात् । तद्वतः प्रतिपादने च ज्ञापकत्वविवक्षावैयर्थ्यात् । स्थानतोऽपि नोभयलिङ्गं इति सामर्थ्यात् सविशेषलिङ्गप्रतिज्ञाया आर्थत्वात् । सा च स्फुटिता "अरूपवदेव हि तत्प्रधानत्वात्" इति । यत्तु "सर्वानुप्रवेशेन सर्वनामत्वेऽपि ब्राह्मणो यजेतेत्यादि कर्मवश्यत्वमनेन परिह्रियते, अरूपवत् ब्रह्म रूपरहिततुल्यमिति" इति—तन्न युक्तम्—तत्प्रधानत्वादिति जीवसाधारण्यादप्रयोजकतापातात् । सोऽपि हि देवमनुष्यादिनामरूपभेदेषु प्रधानमिति । नामरूप[illegible]कत्वेनेति हेतुविशेषणे चाध्याहारगौरवात् । [illegible]रक्रिमेरिव स[illegible] । परि[illegible] [illegible]पि [illegible] [illegible]प्रधान- [illegible] हि [illegible]-

एव सूर्यकादिदृष्टान्तः परमात्मनः श्रुतिषु प्रसिद्ध उपपन्नो भवति इति हि तस्यार्थः । "यतो नानाविधेषु स्थानेषु स्थितस्यापि परस्य ब्रह्मणो न तत्प्रयुक्तदोषभाक्त्वं, अत एव जलदर्पणादिप्रतिबिम्बितसूर्यादिवत्परमात्मा तत्रावस्थितोऽपि निर्दोष इति शास्त्रेषु उपमा क्रियते "आकाशमेकं हि यथा घटादिषु पृथक् भवेत् । तथाऽऽत्मैको ह्यनेकस्थो जलाधारेष्विवांशुमान् । एक एव हि भूतात्मा भूते भूते व्यवस्थितः । एकधा बहुधा चैव दृश्यते जलचन्द्रवत् इत्यादिषु" इति व्याख्यानन्त्वयुक्तम्—सूत्रसूचितश्रुतिस्वारस्यभञ्जकत्वात्—"आकाशमेकं हि यथा" इत्यत्र हि एकस्यैव सतः आकाशादेः यथोपाधिषु पृथग्भावः तथाऽऽत्मनोऽपीति आत्मन एकत्वाविरोधि पृथक्त्वं इत्येष एवार्थः स्वरसतो लभ्यते । अन्येषां व्याख्याने च तथात्मैक इत्यत्रैकशब्दस्यैकस्वभाव इत्यर्थवर्णनात् स्वारस्यभङ्गः । एवं "एक एव हि भूतात्मा" इत्यत्रापि आत्माभेदे एव स्वरसः । बहुधा चैवेत्यस्यानन्वितार्थकत्वञ्च । स्पष्टश्चायमर्थोऽद्वैतरत्नरक्षणे ॥

१६- अत एव चोपमा सूर्यकादिवत् इति सूत्रे कभत्ययस्वारस्यं परमात्मनः औपाधिकं परन्तु काल्पनिकं अल्पत्वं इत्यभ्युपगन्तॄणां दर्शने एव, वृद्धिह्रासभाक्त्वमिति सूत्रस्य वृद्धिह्रासभाक्त्वनिवृत्तिः सूर्यकसाम्यं इति व्याख्यातॄणां निवर्त्यते इति पदाध्याहारदोषेणास्वारस्यम् ॥

किञ्च "अत एव चोपमा" इति सूर्यकादिदृष्टान्तसाम्यं श्रुत्युक्तं सूत्रितं, तच्च साम्यं "अम्बुवदग्रहणात्तु" इति आक्षिप्तं, वृद्धिह्रासभाक्त्वं" इति च दृष्टान्तदार्ष्टान्तिकसाम्यं निरूपितं इति स्वारसिकोऽर्थः प्रतीयते । अन्येषाञ्च व्याख्याने आक्षिप्तस्य दृष्टान्तदार्ष्टान्तिकसाम्यस्य "वृद्धिह्रासभाक्त्व" मित्यनेन परिहार एवं वृद्धिह्रासा-[illegible]दोषभाक्त्वाभावः साम्यं विवक्षितं इति । ततश्च [illegible]व्याख्यानं स्पष्टतरम् । किञ्च अन्येषाम्मते [illegible]ऽपि न स्वरसः, तस्य हि प्रसिद्धसूर्यापेक्षया

अल्पः सूर्यादिरर्थः, तन्मते च प्रसिद्धसूर्यापेक्षया वस्त्वन्तरं बिम्बप्रतिबिम्बभावस्थले नाङ्गीक्रियते यदल्पादिरूपं प्रसिद्धसूर्यापेक्षया स्यात् । तस्मात् "न स्थानतोऽपी" त्यारभ्य "दर्शनाच्च" इत्यन्तं सूत्रजातं परमात्मा वस्तुतो निर्विशेषः उपाधितस्तु सविशेष इव, विशेषा आविद्यका इति यावत् इत्यस्मिन्नेवार्थे सूत्रतत्सूचितश्रुतिस्वारस्यमिति श्लिष्टा श्रीभगवत्पादीयैव योजना । तदेवं जीवब्रह्माभेदानुकूलनिर्विशेषब्रह्मवाद एव सूत्रकारभिमत इति सिद्ध्यति । अत एव "तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्" इति मुखत एवात्मनो ज्ञातृत्वकर्तृत्वोत्क्रान्तिगत्यागतिव्यपदेशो बुद्धिसत्त्वगुणाध्यासाश्रय इति सूत्रयति ब्रह्माभेदानुकूलतया । यत्तु "कथं बुद्धिगुणसारत्वादित्युच्यते, तच्छब्दो हि प्रकृतपरामर्शी, न च बुद्धिः प्रकृता । ज्ञानन्तु ज्ञोऽत एवेति प्रकृतम् । तेन ज्ञानगुणसारत्वात् विज्ञानत्वव्यपदेशो "यो विज्ञाने तिष्ठ" न्नित्यादौ । प्राज्ञवत् । यथा विपश्चितो ब्रह्मणो ज्ञानगुणसारत्वात् ज्ञानव्यपदेशः "सत्यं ज्ञानमनन्तं ब्रह्मेति स एको ब्रह्मण आनन्द" इत्यानन्दगुणसारत्वाद्वा तद्व्यपदेशः "यदेष आकाश आनन्दो न स्यात्" इति व्याख्येयं सूत्रम्—इति—तन्न युक्तम्, परस्यापि "भेदादिति चेन्न प्रत्येकमतद्वचनात्" इत्यादौ कथञ्चिद्बुद्धिसन्निहितमात्रावमर्शस्वीकारात्, इहापि बुद्धिसत्त्वस्य "बुद्धेर्गुणेनात्मगुणेन चैवे" त्यादिप्रकृतविषयसन्निधानात्, "अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमात् हृदि हि" इति हृच्छब्देन प्रकृतत्वाच्च ॥

१७. तद्गुणसारत्वात्तु तद्व्यपदेश इत्यत्र ज्ञोऽत एवेत्यत्र उपसर्जनीभूतज्ञानपरत्वे तच्छब्दस्य प्रकृतप्रधानपरामर्शित्वस्वारस्यभङ्गः, बुद्धिपरामर्शित्वे तु न स दोषः ॥

व्यवहितावमर्शश्च परस्यापि । उपसर्जना...

दोषोऽधिकः । सम्प्रतिपन्नश्चायं "पानव्या...

"तथा प्राणाः" "तदभावो नाडीषु तच्...

अपि च आनन्दगुणसारत्वाद्यथा प्राज्ञस्या...

इति दृष्टान्तं व्याचक्षाणेन बुद्धिसन्निहितमात्रावमर्शि तद्वृत्तमुपगतम् । अन्यथा दृष्टान्ते हेतुसाध्यवैरूप्यापत्तेः । न चायं यो यद्गुणसारः स तद्व्यपदेश इति सामान्यतो दृष्टान्तः । गन्धादिगुणसारे कुसुमादौ तद्व्यपदेशेन व्यभिचारात् । यत्तु—बुद्धिगुणसारत्वात्प्राज्ञस्य न दहरत्वव्यपदेशः इत्यतो दृष्टान्तः साधनविकलः, प्रयुक्तहेत्वतिरिक्तौपाधिकत्वमात्रसाम्यन्तु क्लिष्टमित्यादि—तन्न । न हि जीवस्य बुद्ध्युपाधिकोऽल्पत्वव्यपदेश इति हेतुना सिसाधयिषितम् । किन्तु तथा व्यपदेशानन्यथासिद्धावपेक्षितोपपत्तिमात्रमुच्यते बुद्धिगुणसारत्वादिति, माभूत्परमात्मनो विभुत्वमित्र अश्रुतोपाधिकत्वात् आराग्रमात्रत्वादि जीवस्वभाव इति शङ्का इति । प्राज्ञस्यापि "दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः" इत्यादिव्यपदेशो हृदयोपाधिकस्तुल्य इति प्राज्ञवदित्यत्र दृष्टान्तः, न तु हृदयोपाधिकमणुत्वमित्यत्र, येन परस्यातदुपाधित्वेन वैषम्यमाशंक्येतेति । परेषान्तु यद्यात्मा चिद्रूपः तत एव ज्ञानव्यपदेश इति कृतं ज्ञानगुणसारत्वेन । अथ न, तर्हि स्वयञ्ज्योतिष्ट्वाद्याम्नायविरोध इति । [सि. सि. नम्] तस्मात् "तद्गुणसारत्वा" दित्येतेन जीवे प्रतिभासमानधर्माणां बुद्धितादात्म्याध्यासमूलकत्वमेव सूत्रितमिति युक्तम् । यत्तु जीवब्रह्माभेदस्य सूत्रसम्मतत्वे "भेदव्यपदेशा... ...यति इत्यादि सूत्रेषु ...

सूत्रकारीयोऽपि व्याख्यातः । विशिष्टविषयत्वात्तस्य । यदपि "अधिकन्तु भेदनिर्देशात्" इति भेद एव व्यवस्थापितः सूत्रकारेणेति । तदप्यसत्—अत्र भेद-वाचकपदाभावात् । अधिकं इत्यस्य अर्थान्तरभूत-मित्यर्थे लाक्षणिकत्वस्यैव वक्तव्यत्वात् । सति सम्भवे लक्षणाया अन्याय्यत्वात् । अभेदमूलकदोषाशङ्कायाः भेदव्यपदेशमूलकभेदव्यवस्थापनमन्तरा परिहारासम्भवात् लक्षणाकल्पनमित्यपि न युक्तं, स्वायत्ते शब्दप्रयोगे तमप्रयुञ्जानस्य सूत्रकृतो भेदव्यपदेशोपपादनाय अभेदव्य-पदेशानुपमर्देन कथञ्चिद्भेदस्य तदुपपादककाल्पनिक-सर्वज्ञत्वकिञ्चिज्ज्ञत्वादिव्यवस्थया हिताकरणादिदोष-प्रसक्तिवारणस्य च तात्पर्यविषयताया उन्नयनात् । स्पष्टश्चायमर्थो दीक्षितेन्द्रकृतशिवाद्वैतनिर्णये । वैराग्य-पादादेषु जीवस्य संसारित्वप्रदर्शनं न शुद्धस्य । यच्च "नात्माऽश्रुतेः" "असम्भवस्तु सत" इत्यधि-करणद्वयं जीवब्रह्माभेदे व्यर्थमिति । तन्न । तयोर्जीवपर-वाक्यानां, ब्रह्मवाक्यानाञ्च, विरोधपरिहारार्थत्वात् । जीवब्रह्माभेदवादेऽपि कानिचिज्जीवपराणि कानि-चिद्ब्रह्मपराणि इति व्यवस्थाया अङ्गीकारात् । तयोः शुद्धस्वरूपस्यैकत्वेऽपि, तद्बोधद्वारीभूतबोधप्रकारी-भूतधर्माणां काल्पनिकत्वेऽपि, तत्तदसाधारणत्वेन तादृशव्यवस्थाया उपपन्नत्वाच्च । यदपि "नाऽत्माऽश्रुते" रित्यत्र [illegible]चनबलादात्मैक्यमित्यस्य दूषणं—तदनुक्तो-[illegible]ब्देन [illegible] [illegible]च्छेदावसरे [illegible] । परिण॥ [illegible]प- [illegible]

भवती" त्युपक्रान्तस्यात्मनः स्वयंज्योतिष्ट्वस्य स्वप्नावस्थां प्रदर्श्य "अत्रायं पुरुषः स्वयञ्ज्योतिर्भवती" ति उपसंहृतत्वात् स्वप्नावस्थोपन्यासः आत्मस्वप्रकाशत्व-निर्धारणार्थं इति वक्तव्यम् । तत्र च तस्योपयोगस्त्वेवं—जागरितव्यवहारो ह्यादित्यादिपरमार्थप्रकाशसाध्यो लोक-दृष्ट्याऽवगतः । स्वाप्नोऽपि व्यवहारः पारमार्थिक-प्रकाशसाध्य एव वक्तव्यः । तदानीञ्च आदित्यादीनां पारमार्थिकज्योतिषामभावात् परमार्थं ज्योतिर्व्यवहारो-पयुक्तमात्मैव परिशिष्यते इति । तत्र यद्यादित्यादिकमपि पारमार्थिकमुपगम्येत, परमार्थत्वेनात्मज्योतिःपरिशेषो दुर्लभः स्यात् । अतः प्रधानप्रतिपाद्यस्वयञ्ज्योतिष्ट्वानु-साराय स्वाप्नपदार्थानां जाग्रत्कालीनपदार्थवैलक्षण्यप्रति-पादनार्थं जाग्रत्कालबाध्यत्वापरपर्यायप्रातिभासिकत्वव्य-वस्थापनार्थमिदमधिकरणमिति न किमप्यनुपपन्नम् ॥

१८. मायामात्रं तु इति सूत्रस्य स्वप्नमृषात्व-परत्वानङ्गीकारे कार्त्स्न्येनेतिपदवैयर्थ्यम् ॥

यदप्यत्र मायाशब्द आश्चर्यवाची न मिथ्यावाचीत्यादि, तदप्यनुपपन्नम्—"ऋतेऽर्थं यत्प्रतीयेत" त्यादि भाग-वतश्लोकेन अनिर्वचनीय एव मायापदव्युत्पादनात् ॥

परमते मायामात्रसूत्रस्य तदीयजीवसृष्टत्वपूर्वपक्षाविरोधेन सिद्धान्तत्वव्याहतेश्च—मायामात्रं, आश्चर्यभूतः स्वप्नः इति प्रतिज्ञायां जीवसृष्टत्वाविरोधात् । जीवस्य कार्त्स्न्येना-नभिव्यक्तसत्यसङ्कल्पत्वादिस्वरूपत्वात् इति त्वदभि-मतहेतुवैयधिकरण्यस्यापरिहार्यत्वाच्च । किञ्च कार्त्स्न्येन इति च व्यर्थम् । न च स्वप्ने सत्यसङ्कल्पत्वाभिव्यक्तिः स्यादितिं शङ्कानिरासायेदमिति शङ्क्यम् । तस्य कार्त्स्न्येन पटोऽनवदातःसाकल्येनानवदातः इत्यादाविव विशेष्यजीवे विधेयानभिव्यक्तिव्यक्तिव्याप्तिपरिच्छेद-[illegible] कादाचित्कतद्व्याप्तावप्युपपद्यमानस्य सार्वदिकानभि-[illegible]नीतेः । आश्चर्यरूपत्वञ्च जाग्रत्कालिक-[illegible]धेन [illegible]णं दुर्निरूपमिति विवेचितं सन्ध्याधि-

करणे शिवार्कमणिदीपिकायाम्, विस्तरभयानेह लिख्यते। प्रातिभासिकत्वरूपं एतादृशमेव च वैधर्म्यमभिप्रेत्य "वैधर्म्याच्च न स्वप्नादिवत्" इत्युक्तम्। परमते चेदं सूत्रं तेषां प्रतिकूलम्—सर्वप्रपञ्चसत्यत्ववादिनां तेषां जाग्रत्स्वप्नवैधर्म्यसूत्रणानुपपत्तेः। "स्वप्नमिथ्यात्वमभ्युपेत्येदं सूत्रं" इति श्रुतप्रकाशिका स्वप्नमिथ्यात्वे सूत्रस्वारस्यं अङ्गीकरोति इति॥

अवेद्यत्वघटितस्वप्रकाशत्ववतो निर्विशेषस्य ब्रह्मणो वेद्यत्वव्याप्तजिज्ञास्यत्वासम्भव इत्यपि न शङ्कनीयम्। चिद्विषयत्वरूपवेद्यत्वाभावघटितत्वात्स्वप्रकाशत्वस्य, वृत्तिविषयत्वमात्रेण च जिज्ञास्यत्वस्योपपत्तेः। अन्यत्र वेद्यत्वसाहचर्यदर्शनमात्रस्य चाप्रयोजकत्वात्। न च वृत्तिज्ञाने मानाभावः। "कामः सङ्कल्पो . . . धीर्भीरित्येतत्सर्वं मन एवेति श्रुतेरेव प्रमाणत्वात्। वृत्तिविषयत्वादेव च -शास्त्रयोनित्वादित्येतदपि उपपादितं वेदितव्यम्। जन्माद्यस्य यत इत्येतदपि निर्विशेषविषयं प्रागुपपादितम्। उपलक्षणतया लक्षणत्वपक्षेऽपि स्वरूपमात्रोपलक्षणताया अपि सम्भवेनाविरोधः। श्रीहर्षेण शास्त्रप्रामाण्यादीनां दुर्निरूपतया अनिर्वचनीयत्वमुक्तं, न त्वलीकत्वम्। समन्वयात् इति सूत्रोक्तसमन्वयपदार्थस्य भेदप्राणबन्धुत्वेऽपि विचारदशायां भेदाङ्गीकारात् तद्विरोधस्याप्यभावः। ईक्षत्यधिकरणेऽपि ईक्षणस्य मुख्यत्वमुक्तं, न तु सत्यत्वम्। मुख्यञ्चेक्षणं ब्रह्मणोऽङ्गीक्रियते आविद्यकम्। आरोपितमपि ब्रह्मण एवासाधारणम्। योग्यतावशादेवारोपदर्शनात्। न हि राजामात्ये राजत्वारोप इति, स्तम्भेऽपि सम्भवति। स्पष्टश्चायमर्थोऽद्वैतसिद्धौ।

१९. आनन्दमयोऽभ्यासादित्यत्र अभ्यासपदं आदरेण पुनर्वचनरूपे तात्पर्यलिङ्गे एव प्रसिद्धं गुणनरूपार्थे गुणिते वा अप्रसिद्धम्, किञ्च गुणितानन्दगुणयोगपरत्वे अभ्यासपदस्य, आनन्दमयस्तल्लिङ्गादित्येवोचितं स्यात्, आ[illegible] ल्लिङ्गादिविवद् ब्रह्म पुच्छं प्रतिष्ठेति वाक्य[illegible] शब्देन लक्षणायां तु अभ्यासपद[illegible] सप्रयोजना न दोषाय॥ [illegible]ङ्गस्या[illegible]

[ब्र. वि. णम्] "आनन्दमयोऽभ्यासा" दिति चाद्वैत्यभिमतयोजनाया एवानुकूलं अभ्यासपदम्। अभ्यस्यमानानन्दगुणयोगादिति तु न हेत्वर्थः। तथा सति आनन्दमयस्तल्लिङ्गात् इत्येवावक्ष्यत्। तस्य चैवानन्दविलक्षणत्वेन ब्रह्मलिङ्गत्वात्। तस्मात् तात्पर्यलिङ्गरूपाभ्यास एव सूत्रकृदभिप्रेतः। तदनुसारेण च वाक्यमेव पक्षः, इति आनन्दमयपदेन ब्रह्म पुच्छमिति वाक्यं लक्ष्यते। स्वप्रधानत्वेन च ब्रह्मप्रतिपादकं इति साध्यस्याप्यध्याहारः। अभ्यासस्य तत्साधकत्वात्। आनन्दमयस्य पक्षत्वे तु उक्तसाध्यानन्वयः। तात्पर्यलिङ्गरूपाभ्यासस्य चोक्तसाधने एव स्वारस्यमिति भगवत्पादीययोजनैव श्लिष्टा। ब्रह्म पुच्छमभ्यासादित्येव वक्तुमुचितत्वेऽपि लाक्षणिकानन्दमयपदप्रयोगेऽर्थान्तरग्रहणेन शङ्काविशेषो निराकर्तव्य इति द्योतनार्थः। ब्रह्म पुच्छं प्रतिष्ठा इत्यनेन स्वप्राधान्येन ब्रह्म प्रतिपाद्यते, न त्वानन्दमयशेषत्वेन। "असन्नेव स भवती"ति मन्त्रे अभ्यासानुसारेण ब्रह्मणः प्राधान्यावगमात्। इहापि तस्यैव प्रत्यभिज्ञानात् स्वप्रधानमेव ब्रह्म भविष्यतीति प्रतिपादिते प्रायपाठसहकृतोपक्रमस्थपुच्छशब्दस्वारस्यानुसारेण "असन्नेव स भवती"ति मन्त्रे ब्रह्मपदमानन्दमयलक्षकमस्तु ततश्चासिद्धो हेतुरिति शङ्कायां आनन्दमयो न निगमनश्लोकप्रतिपाद्यः इति साध्याध्याहारेण सूत्रयोजना, तत्र [illegible] नेन निगमन[illegible]

मयाधिकरणे भगवत्पादीयभाष्यावतरणिकाकल्पतर्वोः स्पष्टम् । प्रतर्दनाधिकरणे उपक्रमोपसंहारादिलिङ्गोपेत-वाक्यसामर्थ्यात् इति हेतोः पर्यवसितार्थाङ्गीकारेऽपि अखण्डार्थवादस्य अभिहितान्वयवादान्विताभिधानवादा-विरोधात् नाद्वैतिनामननुगुणं तत् ॥ तदुक्तं लघुचन्द्रि-कायां "वाक्यस्याखण्डानुभावकत्वेऽपि अन्विताभिधान-मभिहितान्वयश्च न विरुद्ध्यते—आकांक्षादिभिर्यादृशानुभवो जन्यते, तज्जननानुकूलायाः शक्तेः पदनिष्ठायाः अन्विता-भिधानरूपत्वात्, पदाभिहितार्थनिष्ठाया अभिहितान्वय-रूपत्वात्" इति । समानप्रकरणे बिन्दुटीकायामप्युक्त-मेतत् । एतेन—जिज्ञासासूत्रमेव तावदद्वैतिनां न घटते इत्यादिकं वेङ्कटनाथीयोक्तदूषणमपास्तम् । यत्तु प्रपञ्चमिथ्यात्वे सूत्राभिप्रेते कृत्स्नप्रसक्त्यादिदोषपरिहाराय "श्रुतेस्तु शब्दमूलत्वात्" इति सूत्रायोगः । मिथ्यात्वादिति हि तदा स्यादिति । तन्न । भवतोऽपि तदयोगात् । आम्नायतदितरप्रमाणविरोधे आम्नायस्य दौर्बल्यं वदतां भवतां लोकदृष्टन्यायेन कृत्स्नप्रसक्त्यादिशङ्कायाः शब्दमूलत्वादिति परिहा-रायोगात् । युज्यते चास्माकम् । जगदुपादानत्वमेवानुप-पत्त्या मा स्म हीयेतेति तल्लक्ष्यब्रह्मणः शब्दमूलकतया कथञ्चिदुपपादनीयत्वाभिप्रायोपपत्तेः [सि. सि. नं] शब्दकोपं शंकितवतः शब्दान्तरप्रदर्शनेन परिहारो भा... सुहृद्भावे तु "आत्मनि चैवं ... । परिणामवा-

... भा ...

आरम्भसंहतिमते परिहृत्य वादौ
द्वावत्र सङ्ग्रहपदं नयते मुनीन्द्रः ॥
तत्रापि पूर्वमुपगम्य विकारवादं
भोक्त्रादिसूत्रमवतार्य विरोधनुत्त्यै ।
प्रावर्तते व्यवहृतेः परिरक्षणाय
धर्मादिगोचरविधावुपयोगहेतोः ॥
साक्षादिहाभिमतमेव विवर्तवादं
आहृत्य सूत्रयति पूर्वमपेक्षमाणः ।
आरम्भणादिवचनेन विवर्तवादं
शक्नोति वक्तुमुदिते परिणामवादे ॥
आरुह्य भूमिमधरामितराऽधिरोढुं
शक्येति शास्त्रमपि कारणकार्यभावम् ।
उक्त्वा पुरा परिणतिप्रतिपादनेन
सम्प्रत्यपोहति विकारमृषात्वसिद्धयै ॥
विवर्तवादस्य हि पूर्वभूमिः
वेदान्तवादे परिणामवादः ।
व्यवस्थितेऽस्मिन् परिणामवादे
स्वयं समायाति विवर्तवादः ॥
उपायमातिष्ठति पूर्वमुच्चैः
उपेयमाप्तुं जनता यथैव ।
श्रुतिर्मुनीन्द्रश्च विवर्तसिद्धयै
विकारवादं वदतस्तथैव ॥
अहं प्रजायेय बहु स्वयं स्या-
मित्यादिनाऽऽदौ परिणाममुक्त्वा ।
विकारमिथ्यात्वमथ ब्रुवाणा
विवर्तवादं श्रुतिरानिनाय ॥

इत्यादिभिः श्लोकैः ॥

...दे ननु कृत्स्नप्रसक्त्यधिकरणं व्यर्थम्; विवर्तवादस्यैव ...अन्यत्वमित्यत्रैवोद्घाटितत्वादिति चेत्—भवतोऽपि ...मात्" इति सूत्रेण परिणामविशेषादित्यर्थकेन ...षेधेन परिणामस्य व्यवस्थितत्वात्, कृत्स्न-

प्रसक्त्यादिशङ्काया अनुदयात् एतदधिकरणवैयर्थ्यात् । अधिकाशङ्कासमाधानार्थमिति तु ममापि तुल्यं, तदुक्तं ब्रह्मविद्याभरणे "विवर्तवादेऽपि शङ्काविशेषोऽत्र निराकर्तव्योऽस्ति । आरोपिता हि शुक्तिरजतादयो भ्रान्तिसमानकाला एव भवन्ति । न त्वज्ञातसत्ताका एव । तथा च वियदादिसृष्टिक्रमादेरप्यारोपितत्वे ज्ञातैकसत्ताकत्वं वक्तव्यम् । सृष्टिसमये च तज्ज्ञानं भ्रान्तिरूपं नेश्वरस्य वक्तुं शक्यम् । तस्य विदोषस्य भ्रान्त्यसम्भवात् । नापि जीवानां तदानीं भ्रान्तिः सम्भवति ; शरीराभावेन तदानीं सुप्तप्रायत्वात्तेषाम् । तथा च भ्रान्तिनियतस्यारोपितस्य भ्रान्त्यभावेऽसम्भवात् विवर्तवादे सृष्ट्यादिश्रुतिरसदर्थिकैव स्यात्, इत्यस्याः शङ्कायाः पूर्वोक्तस्य विवर्तवादस्य स्मारणेनेत्थं समाधानं विवक्षितम् । श्रुत्या प्रपञ्चस्य मिथ्यात्वेऽवधृते अनृता अपि द्विप्रकारा भविष्यन्तीति कल्प्यते । शुक्तिरजतादयो ज्ञातैकसत्ताकाः । सृष्ट्यादयस्तु स्वसमानकालभ्रान्त्यभावेऽपि स्वरूपेणारोपिता इति । सर्गप्रतिपादकश्रुतिकृता तु परोक्षभ्रान्तिः सर्गानन्तरं जीवानां सम्भवत्येवेति" इति । तदेवं सर्वप्रपञ्चकल्पनाऽधिष्ठाननिष्प्रपञ्चनिर्विशेषप्रत्यगभिन्नब्रह्मात्मज्ञानात् चिन्मात्रस्वरूपाविर्भावलक्षणो मोक्षानन्दः इति बादरायणाचार्याणां पक्षः इत्येतत्सिद्धम् । तच्च ज्ञानं नोपासनारूपम् । तत्त्वे तत्त्वज्ञानत्वानैयत्यात् । "निचाय्यत्वादेवं व्योमवच्च" इति सूत्रम् । "ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ....मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ....एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा" इति ज्ञानसाधनेषु अमानित्वादिषु भक्ति उपासनाऽप[illegible] नामिकां परिगणयन्ती, तथात्वस्यैव सूत्रसम्मतिपर्य[illegible] स्वसम्मतिश्च प्रकटीकुर्वती गीता च ॥ तथा च मोक्ष-साधनज्ञानस्वरूपेऽपि भगवत्पादपक्ष एव बादराय[illegible] मोक्षोऽपि न लोकान्तरगमनप्राप्यः । [illegible] ज्ञानात्तदज्ञाननिवृत्तौ काशीगमनाद्यन[illegible]

सा इति सन्नन्तनिर्देशेन विचारस्य ज्ञानं नान्तराळिकं फलं, अपि तु मुख्यं फलमिति सूचनेन तस्य साक्षान्मोक्षसाधनत्वसूत्रणात्, निरपेक्षसाधनत्वसूचनाच्च ॥

२०. कार्यं बादरिरस्य गत्युपपत्तेः इति सूत्रे उपपत्तिपदं अस्य सिद्धान्तसूत्रत्वे एव स्वरसम् ॥

"कार्यं बादरिरस्य गत्युपपत्तेः" इति च सिद्धान्तसूत्रेण "फलमत उपपत्तेः" इत्यादिवत् उपपत्तिपदघटितेन, गमनप्राप्यं ब्रह्म कार्यमेवेति स्वमतसूत्रणाच्च । न चायं पूर्वपक्षः ; उपपत्तिमत्वकथनेन "फलमत उपपत्तेः" इतिवत् सिद्धान्तसूत्रत्वौचित्यात् । सिद्धान्तसूत्रेणानुपसंहारोऽप्यप्रयोजकः । श्रुतिस्वारस्यानुरोधित्वाच्च । श्रुतिर्हि परं ब्रह्म विदुषः उत्क्रान्तिं प्राणानां देहात्प्रतिषेधति प्राणाभावे च गतिरनुपपन्ना इति । न च शारीरादयं निषेधः ; श्रुतिस्वारस्यभङ्गात् । तथा हि (सि. सि. नम्) "काममय एवायं पुरुष" इति प्रक्रम्य "स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति तस्यैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा" इत्यादिनोत्क्रान्तिं, "अन्यन्नवतरं कल्याणतरं रूपं कुरुते पित्र्यं वा" इत्यादिना पुनर्देहसंबन्धं, "प्राप्यान्तं कर्मणस्तस्य...अस्मै लोकाय कर्मणे" इति गतागतञ्चाभिधाय, "इति नु कामयमानः" इत्यविद्वद्वि[illegible]मुपसंहृत्य "अथाकामयमानः" इत्यादिना वि[illegible] यथाप्राप्तविशिष्ट[illegible] अन्यथ[illegible]

शरीरोऽमृतः प्राणो ब्रह्मैव तेज एव" इत्येतावान् वाक्यसन्दर्भः श्रूयते। तत्र प्रथमवाक्यं तावत् नित्यसिद्धब्रह्मभावाभिव्यक्तिं विदुषः प्रतिपादयत् तस्य स्थानविशेषप्राप्त्यर्थं गत्यपेक्षाऽभावात् तद्गत्युपयोगि प्राणानामुत्क्रमणं नापेक्षितमिति शरीरापादानकतदुत्क्रमणप्रतिषेधार्थग्रहण एवानुकूलम्, न तु जीवप्राणाविश्लेषरूपार्थग्रहणे। न च "ब्रह्माप्येती"ति वचनं ब्रह्मणो विदुषश्च प्राप्यप्राप्तृभावेन भेदं प्रतिपादयतीति तस्य तत् ब्रह्मभावाभिव्यक्तिपरं न भवति। अतो "ब्रह्मैव सन्" इत्यत्र एवकारः इवार्थः इति ज्ञानविकासेन ब्रह्मसदृशो भवन्नेव ब्रह्माप्नोति इति तदर्थो ग्राह्य इति वाच्यम्। अप्येतिशब्दो हि न प्राप्त्यर्थः, किन्तु लयार्थः। लयश्च तस्य प्राणेन्द्रियमनोविशिष्टं स्थूलरूपं विहाय शुद्धेन सूक्ष्मरूपे तादात्म्याभिव्यक्तिरेव। यदि चायं प्राप्त्यर्थः स्यात् तदाऽप्यत्र तादात्म्याभिव्यक्तिरेव तदर्थः सिद्ध्यति। बृहदारण्यक एव "असतो मा सद्गमय, तमसो मा ज्योतिर्गमय, मृत्योर्माऽमृतं गमय" इति मन्त्रान् पठित्वा "स यदाह असतो मा सद्गमयेति मृत्युर्वा असत् - सदमृतं - मृत्योर्माऽमृतं गमय अमृतं मां कुरु इत्येवैतदाह - तमसो मा ज्योतिर्गमयेति - मृत्युर्वै तमो ज्योतिरमृतं - मृत्योर्मामृतं गमय अमृतं मा कुर्वित्येवैतदाह - मृत्योर्माऽमृत गमयेति नात्र [illegible]हितमिवास्ति" इति तन्मन्त्रव्याख्यानावसरे [illegible] प्रापणार्थकशब्दानां ऐक्यसंपादनार्थत्वेन [illegible]समानार्थवाक्येषु प्राप्त्यर्थ- [illegible]पं-

एवानुकूलम्। चतुर्थवाक्यमपि त्यक्तशरीरस्य मुक्तस्य विदुषः सर्वप्राणनहेतुपरब्रह्मभावं तदुपपत्त्यर्थं "तेज एवे"ति विशुद्धज्ञानरूपत्वं च प्रतिपादयत् तत्रैवानुकूलम्। अतो वाक्यशेषानुसाराच्च "न तस्य प्राणा उत्क्रामन्ती"त्यस्य शरीरापादानकोत्क्रमणप्रतिषेध एव स्वारसिकोऽर्थो ग्राह्यः। न तु स्वारस्यं त्यक्तुमुचितम्। ननु शाखान्तरे "न तस्मात्प्राणा उत्क्रामन्ति" इति पूर्वोक्तवाक्यस्थाने पाठो दृश्यते तदनुसारेणात्रापि अपादानत्वमेव सम्बन्धसामान्यार्थकषष्ठ्यर्थः, विशेषाभिधानन्तु ब्रह्माप्ययाभिप्रायेणेति चेत्—न—[सि. सि. नम्] "न तस्मात्प्राणा उत्क्रामन्ति" इति वचनानर्थक्यात्। विदुषोऽप्युत्क्रान्तौ "तमुत्क्रामन्तं प्राणोऽनूत्क्रामति" इत्यस्याविशेषात् आत्मापादनकतदुत्क्रान्त्यप्रसङ्गात्। न च देहवियोगकाल एव ब्रह्मसम्पत्त्यवधारणात्तत्प्रसङ्गः। "यावन्न विमोक्ष्ये" इति सामान्यवचनस्य भोगाभावेऽपि लोकभेदे ब्रह्मसम्पत्त्या लिङ्गभङ्गात् इति विवक्षयोपपत्तेः। "अत्र ब्रह्म समश्नुते" इत्यतोऽपि न प्रसङ्गः; अनुपोष्यामृतत्वविषयत्वापगमात्। अथाऽपि व्यवहितवाक्यान्तरालोचनया भोक्तव्याभावालोचनया वा सा यावत्प्रसज्यते तावत् सन्निहिताविद्वदुत्क्रमणापादानस्य शरीरदेशस्य तदा परामर्शप्राग्भावात् "योऽकाम" इति स्ववाक्यसन्निहितस्यापि शरीरस्य प्रथमप्रसक्तिहेतुत्वेन परामर्शायोग्यत्वात्। अपि च देहवियोगसमकालमेव प्राणवियोगशङ्कायां "तस्य प्राणा उत्क्रामन्ति" इति वचनव्यक्तिर्युक्ता, न तु "न तस्मात्प्राणा उत्क्रामन्ति" इति वरणपरिभ्रमणेन गोपुरप्रवेशन्यायानु[illegible]रणं युक्तम्। उत्क्रान्तिशब्दस्य वियोगवृत्तित्वाभावात्। [illegible]वं "योऽकाम" इति साकांक्षं स्यात् तत्पदस्य [illegible]न्नविषयत्वात्। [सि. सि. नम्] न—यथा लौकिक[illegible]भेदेन यत्तदोरैकार्थ्योपपत्तेः। अथवा प्रकरण[illegible] तस्येति तस्मादिति चेतरेतरत्र श्रुतस्येतरेत[illegible]नैराकाङ्क्ष्यमुपपन्नम्। अर्थपुष्ट्ये तयोरितरे-

तत्रोपसंहार्यत्वात्, प्राप्तशरीरापादानकत्वैकार्थ्यानपवादाच्च । किञ्च “न तस्मात्प्राणा उत्क्रामन्ति” इति वाक्यानन्तरं “अत्रैव समवनीयन्ते” इति प्राणानां “अत्र ब्रह्म समश्नुते” इति श्लोकार्थानुगुण्येनात्रैव लयश्रवणात् शरीरादेवोत्क्रान्तिप्रतिषेधः शाखान्तरेऽपि स्वरसः । अत एवार्तभागप्रश्ने “यत्रायं पुरुषो म्रियते उदस्मात्प्राणाः क्रामन्त्याहो न” इति प्रश्ने, उत्तरे “नेति होवाच याज्ञवल्क्योऽत्रैव समवनीयन्ते स उच्छ्वयत्याध्मायत्याध्मातो मृतः शेते” इति प्राणोत्क्रान्त्यपादानस्य आध्मानेन वायुपूरणेन दृतिवदुच्छ्वयनस्य शरीरधर्मस्य कीर्तनं दृश्यते । नन्वार्तभागप्रश्नोत्तरे न विद्वद्विषये; उत्तरसन्दर्भविरोधात् । उत्तरसन्दर्भे हि “यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति....क्वायं तदा पुरुषो भवति” इति पुनरार्तभागप्रश्ने ताभ्यां रहसि सम्मन्त्रणेन पुण्यपापरूपं कर्म तदाश्रयत्वेन निश्चितमित्याम्नायते । न च “अप पुनर्मृत्युञ्जयति” इति पूर्ववाक्ये संसारतरणरूपफलमुच्यते—तेन प्रकृतविद्वद्विषयत्वमुत्क्रान्तिप्रतिषेधस्यावसीयत इति वाच्यम् । “अग्निर्वै मृत्युः सोऽपामन्न” मित्यपामग्न्यन्नत्वोपासनमुक्त्वा हि तस्य फलं “अप पुनर्मृत्युञ्जयति” इत्युच्यते । तस्मादग्निजय एवात्रापमृत्युजयः न संसारतरणम् । अतोऽस्य वाक्यस्यापि अविद्वद्विषयत्वात् अविद्वुषश्च शरीरात्प्राणानामुत्क्रान्तेरवश्यम्भावात् जीवात्तेषामुत्क्रान्तिप्रतिषेध एव तदर्थः स्वरसः । इतश्चैतदेवं—“यत्रायं पुरुषो म्रियते” इति पूर्ववाक्ये पुरुषशब्देन प्रकृतो जीव एव “उदस्मात्प्राणाः क्रामन्ति आहो न” इत्यत्र सर्वनाम्ना परामर्शनीयः । एवञ्च “स उच्छ्वयति” इति वाक्ये तच्छब्दः शरीरशरीरिणोरभेदोपचा[illegible] शरीरपरतया नेतव्य” इति चेत्—मैवम्—(शिवा—य[illegible] अविद्वद्विषये जीवप्राणविश्लेषस्य अप्रसक्तत्वेन त[illegible]धस्यायुक्ततया प्रश्नोत्तरयोर्विद्वद्विषयत्वस्यावश्यव[illegible] ननु पूर्वोक्तप्रश्नोत्तराणां अविद्वद्विषय[illegible]

प्रश्नोत्तरयोरविद्वद्विषयत्वस्यावश्यवक्तव्यत्वात् जीवप्राणविश्लेषप्रसक्तिर्यथाकथञ्चित्सम्पादनीया इति चेन्न—अविद्वद्विषयप्रश्नोत्तरसन्निधिमात्रेण विद्वद्विषयत्वलिङ्गबाधायोगात् । आर्तभागप्रश्नपरम्परायां “कति ग्रहाः, कत्यतिग्रहाः” इत्याद्यः प्रश्नः । “यदिदं सर्वं मृत्योरन्नं कास्वित्सा देवता यस्या मृत्युरन्नम्” इति द्वितीयः । “यत्रायं पुरुषो म्रियते उदस्मात्प्राणाः क्रामन्त्याहो ने” ति तृतीयः । “यत्रायम्पुरुषो म्रियते किमेनं न जहाति” इति चतुर्थः । “यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति” इत्यादिः पञ्चमः इति प्रश्नानामेकविषयत्वाभावेनैकरूपप्रायपाठासिद्धेश्च । तथाऽपि तृतीयादिप्रश्नानां म्रियमाणपुरुषवृत्तान्तगोचरत्वेनैकविषयत्वात् चतुर्थपञ्चमयोरिव तृतीयस्यापि प्रश्नस्याविद्वद्विषयत्वं वक्तुं युक्तम्; तत्सन्निधिबलादिति चेत्—उच्यते—अश्वलप्रभृतिभिः याज्ञवल्क्येन सह मत्सरतो विजिगीषुकथायां प्रवृत्तैः तमप्रतिभायां पातयितुं प्रायेण निगूढाः प्रश्नाः कृताः । यथा—आर्तभागेनैव तावत् “कति ग्रहाः कत्यतिग्रहाः” इति यज्ञवृत्तान्तविषय इव प्रश्नः कृतः । अध्यात्मप्रसङ्गान्तर्गतत्वात् नायं यज्ञवृत्तान्तविषय इति प्रष्टुः कौटिल्यमवगम्य प्राणादयो ग्रहाः रसरूपादयोऽतिग्रहाः इत्युत्तरमुक्तम् । तथा लाह्यायनिना “क्व पारीक्षिता अभवन्” इत्यप्रसिद्धार्थेन पा[illegible]तच्छ्देन [illegible]मुपसंह[illegible] प्रश्नः कृतः । “यत्राश्वमे[illegible]याजि[illegible] तदर्थं [illegible]

किमेनं न जहाति " इति य उत्तरत्रार्तभागप्रश्नः सोऽप्यनुपपन्नः । अयं प्रश्नस्तदोपपद्यते यदि पूर्ववाक्ये विदुषः प्राणाः देहान्नोत्क्रम्य लोकान्तरङ्गच्छन्ति अपि त्वत्रैव लयं यान्ति इत्यर्थो विवक्ष्येत, तदा लीनत्वात्प्राणा विद्वांसं यदि जहति तत् किं तत्र जहाति इति प्रश्न उत्तिष्ठति । देहोपादानकप्रतिषेधपरत्वे तु विदुषि किञ्चित्पदार्थत्यागाप्रतिपादनात् किमेनं न जहातीति प्रश्नः नाममात्रं न जहातीत्युत्तरञ्चासङ्गतमेव स्यात् । अन्यथानयने च स्वारस्यपरित्यागः । न चात्र विदुषोऽप्रसङ्गः—" यदिदं सर्वं मृत्योरन्नं कास्वित्सा देवता यस्या मृत्युरन्नम् " इति मृत्युमृत्योरात्मविद्याया विषयद्वारा पृष्टत्वात् । तत्र च मृत्युमृत्योः सदसत्वाभ्यामनवस्थाऽनिर्मोक्षाशङ्कया प्रश्ने माभूदनिर्मोक्ष इति मृत्युमृत्युसत्वमात्रे दृष्टान्तोऽयमुच्यते " अग्निर्वै मृत्युः सोऽपामन्न " मिति । न चायं परिच्छेदाभिमानासङ्गलक्षणमृत्युनिवृत्त्युपायप्रश्ने दृष्टान्तः । तस्य होत्रात्विजेत्यादिनोक्तोत्तरत्वेन " कति ग्रहाः कत्यतिग्रहा " इति इन्द्रियविषयात्मकबन्धरूपमृत्युप्रश्नव्यवधानेन च " यदिदं सर्वं मृत्योरन्न " मित्यादिप्रश्नस्य सन्निहितबन्धरूपमृत्योरपेक्षितनिवृत्त्युपायपरत्वे सम्भवत्यनपेक्षितव्यवहितविषयत्वकल्पनायोगात् । तत्रैव दृष्टान्तेन बन्धमृत्युजयोपायसत्वे कल्पिते " निचाय्य तं मृत्युमुखा[illegible]च्यते " इत्यादिदर्शनेन सामर्थ्यात् ब्रह्म-[illegible]यूत " इत्युच्यत इति युक्तम् । [illegible] न च

२२. स्थानविशेषे "समाना चासृत्युपक्रमात्" इति सूत्रनिवेशनं पर ब्रह्मविदुषः प्राणानां नोत्क्रान्तिः, इहैव तु निरवशेषो लयः ततश्चेहैव मुक्तिः इत्यत्रैव स्वरसम् ॥

अत एव " वाङ्मनसि दर्शनाच्छब्दाच्च " इत्यारभ्य " भूतेषु तच्छ्रुतेः " इत्यन्तैरधिकरणैः " प्राणस्तेजसि " इत्यन्तमुपपाद्य " तेजः परस्यां देवतायाम् " इत्येतदवस्थाप्य अन्तराले "समाना चासृत्युपक्रमात्" इति सूत्रणं सङ्गच्छते । तेन हि सृतेरुपक्रम आदिः पूर्वभाविनी परदेवतासम्पत्तिः आतता, समाना विदुषोऽविदुषश्च वागादिसम्पत्तिः । तत्र तु सावशेषत्वनिरवशेषत्वरूपा विशेषोऽस्तीत्यभिप्रायोऽवगम्यते । अन्यथा आदौ अन्ते वा समानत्ववचनं न्याय्यम् । अधिकन्तु सिद्धान्तसिद्धाञ्जने स्पष्टम् ।

२३. स्पष्टो ह्येकेषामित्यत्र हिशब्दस्वारस्यं अस्यैव सिद्धान्तभागत्वे एव हेत्वन्तरपरत्वे "स्पष्टश्चैकेषाम्" इत्युक्तेरेवौचित्यात् ॥

एवञ्च "प्रतिषेधादिति चेन्न शारीरात्" इति पूर्वपक्षसूत्रं "स्पष्टो ह्येकेषाम्" इति सिद्धान्तः इति भगवत्पादीयपक्षः श्रुतिसूत्रानुमतः हिशब्दस्वारस्यमप्यस्यैव सिद्धान्तत्वे एव, अन्यथा चशब्दस्यैव युक्तत्वात् इति इहैव मुक्तिरित्यद्वैतसिद्धान्तपक्ष एव बादरायणपक्ष इति ब्रह्मसूत्रसिद्धान्त इति च सिद्धम् । "अदृश्यत्वादिगुणको धर्मोक्तेः" इत्यादि च अदृश्यादिशब्दविकल्पापेक्षया केवलमनुवादः । न हि धर्मात् इत्युक्तम् । किन्तु धर्मोक्तेरिति । तेन गम्यते शब्दविकल्पप्रत्यया धर्मा उपलक्षणमेवात्मनः, न तु वस्तुतो [illegible]र्मिभाव इति भावः सूत्रकृतः इति ॥

[illegible]देतत्सर्वं सिद्धान्तसिद्धाञ्जन, ब्रह्मविद्याभरण, [illegible]दीक्षितेन्द्रकृतिषु स्पष्टमुक्तं शब्दतोऽर्थतश्चेह लिखित [illegible]ज्ञापयन् श्रीमत्परमहंसपरिव्राजकाचार्यवर्यप्रत्यक्ष-[illegible]पदयोरुपहरन्निमं सूत्रतात्पर्यविमर्शं उप-[illegible]म् ॥

अविच्छिन्नब्रह्मविद्यासम्प्रदायप्रवर्तकैः ।
आचार्यरत्नैरुद्घुष्टाः सदर्थाः शरणं मम ॥ १

ब्रह्मविद्यासम्प्रदायविरुद्धाभ्यूहमात्रतः ।
स्वदूषणेषु ये येऽर्थाः अर्वाचीनैः प्रकल्पिताः ॥ २

तेषामपोहने कोऽपि श्रमलेशोऽस्ति नैव नः ।
यतः श्रुत्येकशरणैः शान्तैः करुणया कृताः ॥ ३

सिद्धिसिद्धाञ्जनब्रह्मविद्याभरणचन्द्रिकाः ।
दूरमुत्सारयन्त्येतान् कुतर्कानवलोकिताः ॥ ४

फलभूतं पराद्वैतं सूचयंस्तत्र तत्र नः ।
अनन्यशेषमन्येषां तच्छेषत्वं विवक्षति ॥ ५

ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते यथा ।
एकोऽप्यद्वैतसूत्राग्निः द्वैतसूत्राणि निर्दहेत् ॥ ६

अन्ते वेङ्कटनाथीयदूषणेषु निवेशिताः ।
ब्रह्मसूत्रविमर्शा ये तेऽत्र सर्वे विचारिताः ॥ ७

तत्र प्रमाणं विबुधाः साध्वसाधुविवेचकाः ।
प्राय आटोपबहुलाः अनुक्तार्थे विदूषकाः ॥ ८

येऽर्थास्तुताननादृत्य मुख्या एवात्र चिन्तिताः ।
प्रायस्तद्दूषणेष्वेषु द्वित्राण्येव कथञ्चन ॥ ९

शिष्यैरनन्यकल्पानां स्वोक्त्यैव विनिवारणात् ।
शुद्धे ब्रह्मणि निर्धर्मे कथं शब्दादिलक्ष्यता ॥ १०

निर्विकल्पः कथं बोधः उपलक्ष्यत्वमेव वा ।
इति शङ्कासमाधानं प्राग्ग्रन्थेष्वेव दृश्यते ॥ ११

मणिकारादयोऽप्यैच्छन् आकाशादिपदैरपि ।
स्मरणं निर्विकल्पं यत् न्यायज्ञाद्वैतिनोऽप्यमी ॥ १२

निर्धर्मके धर्मपूग आविद्यक इतीरितः ।
आविद्यकेन धर्मेण निर्धर्मत्वं न हीयते ॥ १३

देहात्मप्रत्ययो यद्वत्प्रमाणत्वेन कल्पितः ।
लौकिकं तद्वदेवेदं प्रमाणन्त्वात्मनिश्चयात् ॥ १४

उपलक्षणमप्यस्तु धर्मो ब्रह्मणि निर्गुणे ।
उपलक्ष्यस्य नो किञ्चिद्रूपेणैवोपलक्ष्यता ॥ १५

स्वरूपमेवोपलक्ष्यं विनाऽवच्छेदकं क्वचित् ।
जातेः स्वरूपतो भानं विनावच्छेदकं यथा ॥ १६

चन्द्रस्वरूपमात्रस्य प्रकृष्टा या प्रकाशता ।
सोपलक्षणमित्येव सिद्धं लोके प्रदृश्यते ॥ १७

तन्निदर्शनसिद्धं नः स्वरूपस्योपलक्षणम् ।
सिद्ध्यादिदर्शिनामेतदतिरोहितमेव नः ॥ १८

सगुणप्राप्तिरूपाया मुक्तेरपि निरूपणे ।
मध्ये विकारनिर्मुक्तं रूपं सूत्रेण सूचितम् ॥ १९

विकारावर्तिं च प्राह स्थितिं श्रुतिरितीरयन् ।
विकारादनृतादन्यत् सत्यं ब्रह्माह सूत्रकृत् ॥ २०

असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते ।
यथैवं द्वैतवर्त्मस्थः सोऽन्ते पक्वः शि[illegible] ॥ २१

श्रीकुलशेखरमहाराजरचितमुकुन्दमालाया: त्रय: श्लोका:

मुकुन्द मूर्ध्ना प्रणिपत्य याचे
भवन्तमेकान्तमियन्तमर्थम् ।
अविस्मृतिस्त्वच्चरणारविन्दे
भवे भवे मेऽस्तु भवत्प्रसादात् ॥ १ ॥

O' Giver of freedom! prostrating (touching thy blessed feet) with my head, I beg of Thee, this only gain, that in every life (to come) by Thy grace, may I obtain unforgetfulness of Thy Lotus-feet.

कृष्ण त्वदीयपदपङ्कजपञ्जरान्तः
अद्यैव मे विशतु मानसराजहंसः ।
प्राणप्रयाणसमये कफवातपित्तैः
कण्ठावरोधनविधौ स्मरणं कुतस्ते ॥ २ ॥

O Krishna, let the hamsa of my mind even to day enter into the cage made of Thy Lotus - feet. At the time of egress of energies from the body, at the moment of death: attened by the closure of the guttural paths by the forces of Kapha, Vata and Pitta, where is thy remembarance.

तृष्णातोये मदनपवनोद्धूतमोहोर्मिमाले
दारावर्ते तनयसहजग्राहसङ्घाकुले च ।
संसाराख्ये महति जलधौ मज्जतां [illegible]
पादाम्भोजे वरद भवतो भक्तिनावं प्रय[illegible]

In that whose waters are desires, which is filled [illegible] delusion, upheaved by the wind of Kama, beset [illegible] multitudes of the natural soul gripping alliga[illegible] ocean called Samsara unto the drowned, O, Lo[illegible] giver of gifts, kindly bestow the boat [illegible]

RAMANI BROTHERS[illegible]